(तं ह स्म एतम् एवं विद्वांसः मन्यन्ते विद्मः एनम् इति याथातथ्यम् अविद्वांसः) उस ही [यज्ञ] को इस प्रकार जानने वाले मानते हैं—हम इस [यज्ञ] को जानते हैं—सचमुच वे अज्ञानी हैं। (अयम् यज्ञः वेदेषु प्रतिष्ठितः) यह यज्ञ [देवपूजा संगतिकरण दानव्यवहार] वेदों में ठहरा हुआ है। १। (वेदाः वाचि प्रतिष्ठिताः) वेद वाणी में ठहरे हुये हैं। २। (वाक् मनसि प्रतिष्ठिता) वाणी मन में ठहरी हुई है। ३। (मनः प्राणे प्रतिष्ठितम्) मन प्राण में ठहरा हुआ है। ४। (प्राणः अन्ने प्रतिष्ठितः) प्राण अन्न में ठहरा हुआ है। ५। (अन्नं भूमौ प्रतिष्ठितम्) अन्न भूमि में ठहरा हुआ है। ६। (भूमिः अप्सु प्रतिष्ठिता) भूमि जल में ठहरी हुई है। ७। (आपः ज्योतिषि प्रतिष्ठिताः) जल प्रकाश में ठहरा हुआ है। ८। (ज्योतिः वायौ प्रतिष्ठितम्) प्रकाश पवन में ठहरा हुआ है। ९। (वायुः आकाशे प्रतिष्ठितः) पवन आकाश में ठहरा हुआ है। १०। (आकाशम् ब्रह्मणि प्रतिष्ठितम्) आकाश ब्रह्म [परमात्मा] में ठहरा हुआ है। ११। (ब्रह्म

३८—(तम्) पूर्वोक्तं यज्ञम् (विद्वांसः) जानन्तः (मन्यन्ते) जानन्ति। (विद्मः) वयं जानीमः (एनम्) यज्ञम् (याथातथ्यम्) यथातथा—ष्यञ्। वास्तविकं पदार्थम् (अविद्वांसः) अविदन्तः (पुण्याम्) पवित्राम् (सुरभीन्) मनोहरान् (अपहतपाप्मा) विनष्टपापः (अनन्तां श्रियम्) अनन्तसेवनीयसम्प-

ब्रह्मविदि ब्राह्मणे प्रतिष्ठितम्) ब्रह्म वेद जानने वाले ब्राह्मण [ब्रह्मज्ञानी] में ठहरा हुआ है । १२ । (यः ह वै एवं वित् मः ब्रह्मवित्, पुण्यां च कीर्तिं सुरभीन् च गन्धान् लभते) जो ही ऐसा जानने वाला है वह ब्रह्मज्ञानी है और पवित्र कीर्ति और सुन्दर गन्धों [चन्दनादि] को पाता है । (सः अपहृतपाप्मा अनन्तां श्रियम् अश्नुते, यः एवं वेद, यः च एवं विद्वान् एवम् एतां वेदानां मातरं सावित्रीसम्पदम् उपनिषदम् उपास्ते इति ब्राह्मणम्) वह पाप से छूटा हुआ पुरुष अनन्त श्री [सेवनीय सम्पत्ति] भोगता है जो ऐसा जानता है, और जो ऐसा विद्वान् इस प्रकार से इस वेदों की माता सावित्री रूप सम्पदा उपनिषद् [ब्रह्मविद्या] को भजता है--यह ब्राह्मण [ब्रह्मज्ञान] है ।। ३८ ।।

भावार्थः—ईश्वर और उसके कर्मों को वेद द्वारा यथावत् जानकर ब्रह्मज्ञानी बड़ा यश और आनन्द पाता है ।। ३८ ।।

विशेषः—इस कण्डिका का कण्डिका ३७ से मिलान करके गायत्री मन्त्र के अर्थों के साथ अपनी विचारशक्ति बढ़ाओ ।।

कण्डिका ३९ ।।

आपो गर्भं जनयन्तीरित्यपाङ्गर्भः पुरुषः स यज्ञोऽद्भिर्यज्ञः प्रणीयमानः प्राङ्तायते[1], तस्मादाचमनीयं पूर्वमाहारयति स यदाचामति त्रिराचामति द्विः परिशुम्भत्यायुरवरुह्य पाप्मानं निर्णुदत्युपसाद्य यजुषोद्धृत्य मन्त्रान् प्रयुज्यावसाय प्राचीः शाखाः सन्धाय निरङ्गुष्ठे पाणावमृतमस्यमृतोपस्तरणमस्यमृताय त्वोपस्तृणामीति पाणावुदकमानीय जीवास्थेति सूक्तेन त्रिराचामति । स यत्पूर्वमाचामति सप्त प्राणांस्तानेतेनास्मिन्नाप्याययति या ह्येता बाह्याः शरीरान्मात्रास्तद्यथैतदग्निं वायुमादित्यं चन्द्रमसमपः पशूनन्यांश्च प्रजास्तानेतेनास्मिन्नाप्याययत्यापोऽमृतम् । स यद् द्वितीयमाचामति सप्तापानांस्तानेतेनास्मिन्नाप्याययति या ह्येता बाह्याः शरीरान् मात्रास्तद्यथैतत्पौर्णमासीमष्टकाममावास्यां श्रद्धां दीक्षां यज्ञ दक्षिणास्तानेतेनास्मिन्नाप्याययत्यापोऽमृतम् । स यत्तृतीयमाचामति सप्त व्यानांस्तानेतेनास्मिन्नाप्याययति या ह्येता बाह्याः शरीरान्मात्रास्तद्यथैतत् पृथिवीमन्तरिक्षं दिवन्नक्षत्राण्यृतूनार्त्तवान् संवत्सरांस्तानेतेनास्मिन्नाप्याययत्यापोऽमृतं पुरुषो ब्रह्माथाप्रियनिगमो भवति तस्माद्ध विद्वान् पुरुषमिद पुण्डरीकमिति प्राण एष स पुरि शेते स पुरि शेते इति । पुरिशयं सन्तं प्राणं पुरुष इत्याचक्षते । परोक्षेण परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः । स यत्पूर्वमाचामति पुरस्ताद्धोमांस्तेनास्मिन्नवरुन्धे स यद् द्वितीयमाचामत्याज्यभागौ तेनास्मिन्नवरुन्धे, स

त्तिम् (अश्नुते) प्राप्नोति (सावित्रीसम्पदम्) गायत्रीरूपसम्पत्तिम् (उपनिषदम्) ब्रह्मविद्याम् (उपास्ते) भजते । सेवते ।।

---

१. 'प्राङ्णायते' इति पू० सं० पाठः, स चायुक्तः । सम्पा० ।।

यत्तृतीयमाचामति संस्थितहोमांस्तेनास्मिन्नवरुन्धे, स यद् द्विः परिशुम्भति तत्समित्संर्वर्हिः, स यत्सर्वाणि खानि सर्वं देहमाप्याययति यच्चान्यदातारं मन्त्रकार्य्यं यज्ञे स्कन्दति सर्वं तेनास्मिन्नवरुन्धे, स यदोंपूर्वान् मन्त्रान् प्रयुङ्क्त आसर्वमेधादेते क्रतव एत एवास्य सर्वेषु लोकेषु सर्वेषु देवेषु सर्वेषु वेदेषु सर्वेषु भूतेषु सर्वेषु सत्वेषु कामचारः कामविमोचनं भवत्यर्द्धे च न प्रमीयते य एवं वेद ।

तदप्येतद् ऋचोक्तम् । आपो भृग्वङ्गिरो रूपमापो भृग्वङ्गिरोमयम् । सर्वमापोमयं भूतं सर्वं भृग्वङ्गिरोमयम् । अन्तरैते त्रयो वेदा भृगूनङ्गिरसोऽनुगाः ।

अपां पुष्पं मूर्तिराकाशं पवित्रमुत्तममित्याचम्याभ्युक्ष्यात्मानमनुमन्त्रयत इन्द्र जीवेति ब्राह्मणम् ।। ३९ ।।

इति अथर्ववेदे गोपथब्राह्मणपूर्वभागे प्रथमः प्रपाठकः ।। १ ।।

कण्डिका ३९ ।। आचमन के विधान और लाभ ।।

(आपो गर्भं जनयन्तीः इति—अथ० ४ । २ । ८) गर्भ [अर्थात् बालक रूप संसार] को उत्पन्न करते हुये जल [इस मन्त्र से सिद्ध होता है कि] (अपां गर्भः पुरुषः सः यज्ञः) जल का गर्भ [अन्तर्यामी] पुरुष [ब्रह्म] है वही यज्ञ है । (अद्भिः प्रणीयमानः यज्ञः प्राङ्तायते तस्मात् आचमनीयम् पूर्वम् आहारयति) जल के साथ चलाया हुआ यज्ञ पहिले विस्तृत किया जाता है इसलिये आचमन योग्य जल वह [व्रतधारी] पहिले विधि के साथ पीता है । (सः यत् आचामति त्रिः आचामति) वह जब आचमन करता है, तीन बार आचमन करता है, (द्विः परिशुम्भति) दो बार सजाता है [आगे देखो], (आयुः अवरुह्य पाप्मानं निर्णुदति) आयु पर चढ़कर [बढ़ाकर] पाप को निकाल देता है । (यजुषा उपसाद्य मन्त्रान् उद्धृत्य प्रयुज्य अवसाय, प्राचीः शाखाः सन्धाय निरंगुष्ठे पाणौ—अमृतम् असि, अमृत ! उपस्तरणम् असि, अमृताय त्वा उपस्तृणामि इति [ब्राह्मणवचनानि] पाणौ उदकम् आनीय—जीवाः स्थ इति सूक्तेन [अथ० १९ । ६९ । १—४] त्रिः आचामति) देवपूजा के साथ पास आकर, मन्त्रों को निकाल कर, प्रयोग में ला कर और निश्चय करके, और पुरानी शाखाओं [वेदव्याख्याओं] को मिला कर, अगूंठा छोड़ कर हाथ में—तू अमृत [मृत्यु से बचाने वाला जल] है, हे अमृत ! तू बहुत फैलाने वाला है, अमरपन के लिये तुझे फैलाता हूँ [पीता हूँ—इन तीन ब्राह्मण वचनों से] हाथ में

३९—(जनयन्तीः) जनयतेः शतृः । जसि पूर्वसवर्णदीर्घः । जनयन्त्य । उत्पादयन्त्यः (प्रणीयमानः) प्रवर्तमानः (प्राङ्तायते) प्र + अञ्चु गतिपूजनयोः—क्विन्, तनु विस्तारे कर्मणि लट् । तनोतेर्यकि (पा० ६ । ४ । ४४) इति आत्वम् । प्राङ् पूर्वं तायते । विस्तार्यते (आचमनीयम्) आचमनयोग्यं जलम् (आहारयति) विधिपूर्वकं पिबति (परिशुम्भति) शुम्भ शोभायाम्-णिजर्थे । परिशुम्भयति । सर्वतः शोभयति (अवरुह्य) आरुह्य । दीर्घं कृत्वा (यजुषा) देवपूजनेन (उद्धृत्य) उत् + धृञ् धारणे वा हृञ् हरणे—ल्यप् । पृथक् कृत्वा (प्रयुज्य) प्रयोगे नीत्वा

जल लेकर—तुम जीव वाले हो—इस सूक्त से [चार मन्त्रों से] तीन बार आचमन करता है। (सः यत् पूर्वम् आचामति सप्त तान् प्राणान् एतेन अस्मिन् आप्याययति [ताः च अपि], याः हि शरीरात् बाह्याः एताः मात्राः, तत् यथा एतत्, अग्नि वायुम् आदित्यं चन्द्रमसम् अपः अन्यान् पशून् च प्रजाः तान् एतेन अस्मिन् आप्याययति—आपः अमृतम्) वह जो पहिला आचमन करता है उन सात प्राणों [शरीर में भीतर जाने वाले जीवनवर्धक श्वासों] को इस [विधि] से इस [शरीर] में पुष्ट करता है [और उन मात्राओं को भी पुष्ट करता है] जो यह शरीर से बाहर चलती हुई मात्रायें हैं, सो जैसे यह हैं—अग्नि १ [अर्थात् शारीरिक, पार्थिव, समुद्रीय, गुप्त प्रकट बिजुली आदि अग्नि विद्या] वायु २ [अर्थात् पवन विद्या जैसे पवन क्या है और उसका प्रभाव सब जीवों, सब पृथिवी सूर्य आदि लोकों पर क्या है], सूर्य ३ [अर्थात् सूर्य विद्या, जैसे सूर्य का पृथिवी आदि लोकों और उनके पदार्थों से और उन सबका सूर्य लोक से क्या सम्बन्ध है], चन्द्रमा ४ [अर्थात् चन्द्र विद्या, जैसे उपग्रह चन्द्रमा अपने ग्रह पृथिवी पर किस सम्बन्ध से क्या प्रभाव करता है और अन्य चन्द्रमाओं का अन्य ग्रहों से क्या सम्बन्ध है], जल ५ [अर्थात् जल विद्या, जैसे जल क्या है और वह भूमण्डल, मेघमण्डल, सूर्यमण्डल आदि लोकों से क्या सम्बन्ध रखता है], जीव वाले पशु ६ [अर्थात् पशु विद्या, जैसे गौ घोड़ा आदि जीव पृथिवी लोक और दूसरे लोकों में कैसे उपकारी होते हैं], और प्रजाओं ७ [अर्थात् प्रजा की विद्या कि परमात्मा की सृष्टि में भूलोक, चन्द्रलोक, सूर्यलोक आदि के मनुष्य और जीवजन्तुओं का सम्बन्ध आपस में और दूसरे लोक वालों से क्या है]—इन सबको इस [विधि] से इस [शरीर] में पुष्ट करता है, [क्योंकि] जल अमृत है। (सः यत् द्वितीयम् आचामति सप्त तान् अपानान् एतेन अस्मिन् आप्याययति [ताः च अपि], याः हि शरीरात् बाह्याः एताः मात्राः, तत् यथा एतत्, पौर्णमासीम् अष्टकाम् अमावास्यां श्रद्धां दीक्षां यज्ञं दक्षिणाः, तान् एतेन अस्मिन् आप्याययति—आपः अमृतम्) वह जो दूसरा आचमन करता है, उन सात अपानों [शरीर से बाहर निकलने वाले

(अवसाय) अव+षो अन्तकर्मणि—ल्यप्। निश्चित्य (प्राचीः) पूर्वस्मिन् काले भवाः (शाखाः) वेदव्याख्याः (संधाय) सम्+दधातेः—ल्यप्। संयुज्य। (अमृतम्) नास्ति मृतं मरणं यस्मात् तत्। जलम् (उपस्तरणम्) उप+स्तृञ् विस्तारे आच्छादने च—ल्युट्। बहुविस्तारकम् (अमृताय) अमरणाय। (उपस्तृणामि) अधिकं विस्तारयामि। आचामामि। (एतेन) अनेन विधिना (अस्मिन्) दृश्यमाने शरीरे (एताः) एतेस्तुट् च (उ० १। १३३) इण् गतौ—अदिः प्रत्ययः, तस्य च तुडागमः। गमनशीलाः (अग्निम्) अग्निविद्याप्रकाशम् (वायुम्) पवनविद्याम् (आदित्यम्) आदीप्यमानसूर्यविद्याम् (चन्द्रमसम्) आह्लादकचन्द्रविद्याम् (अपः) व्यापकजलविद्याम् (पशून्) गवाश्वादिजीवान्। (अन्यान्) माछाशसिभ्यो यः (उ० ४। १०९) अन प्राणने—यप्रत्ययः। प्राणिनः। (आप्याययति) आ+प्यैङ् वृद्धौ—णिच्। समन्तात् वर्धयति। पोषयति (अपानान्)

प्रश्वासों] को इस [विधि] से इस [शरीर] में पुष्ट करता है [और उन मात्राओं को भी पुष्ट करता है] जो शरीर से बाहर चलती हुई मात्रायें हैं, सो जैसे यह हैं-- पौर्णमासी १, [अर्थात् पूर्णमासेष्टि, जिसमें विचारा जाता है कि उस दिन चन्द्रमा पूरा क्यों दीखता है, पृथिवी, समुद्र आदि पर उसका क्या प्रभाव होता है], अष्टका २, [अष्टमी आदि तिथि का यज्ञ, जिसमें विद्वान् पितर लोग विचारते हैं कि ज्योतिष शास्त्र की मर्यादा से इन तिथियों में सूर्य और चन्द्र आदि लोकों का क्या प्रभाव पड़ता है] अमावास्या ३, [अर्थात् दर्शेष्टि जिसमें विचार होता है कि अमावस को सूर्य और चन्द्रमा एक राशि में आकर क्या प्रभाव डालते हैं], श्रद्धा ४, [अर्थात् ईश्वर और वेदों में विश्वास], दीक्षा ५, [नियम और व्रत पालन की शिक्षा] यज्ञ ६, [परमेश्वर और विद्वानों का सत्कार, परस्पर संयोग और विद्या आदि का दान] और दक्षिणायें ७, [यज्ञ समाप्ति पर विद्वानों के सत्कार के लिये द्रव्य]—इन सबको इस [विधि] से इस [शरीर] में पुष्ट करता है, [क्योंकि] जल अमृत है। (सः यत् तृतीयम् आचामति सप्त तान् व्यानान् एतेन अस्मिन् आप्याययति [ताः च अपि] याः हि शरीरात् बाह्याः एताः मात्राः, तत् यथा एतत्, पृथिवीम् अन्तरिक्षं दिवं नक्षत्राणि ऋतून् आर्त्तवान् संवत्सरान् तान् एतेन अस्मिन् आप्याययति —आपः अमृतम्) वह जो तीसरा आचमन करता है उन सात व्यानों [शरीर में फैले हुए पवनों] को इस [विधि] से इस [शरीर] में पुष्ट करता है [और उन मात्राओं को भी पुष्ट करता है] जो शरीर से बाहर चलती हुई मात्रायें हैं, सो जैसे यह हैं पृथिवी १, [भूगर्भ विद्या, राज्य पालनादि विद्या], अन्तरिक्ष २, [वायुमण्डल, मेघमण्डल, आदि की विद्या], प्रकाश ३, [प्रकाश के ताप, आकर्षण और फैलाव आदि की विद्या]; नक्षत्रों ४,

---

प्रश्वासान्। शरीरबहिर्गामिनो दोषनाशकान् वायून् (पौर्णमासीम्[1]) पूर्णमास—अण्, ङीप्। पूर्णमासेष्टिम्। पूर्णचन्द्रसम्बन्धिनीं विद्याम् (अष्टकाम्) इष्यशिभ्यां तकन् (उ० ३। १४८) अशूङ् व्याप्तौ अश भोजने वा—तकन्, टाप्। अष्टका पितृदैवत्ये (वा० पा० ७। ३। ४५) इत्वाभावः। अष्टम्यादितिथौ पितॄणां समागमेन ज्योतिषविद्याविचारम् (अमावास्याम्) अमा सह वसतः चन्द्रार्कौ यत्र। अमावस्यदन्यतरस्याम् (पा० ३। १। १२२) अमा+वस निवासे—ण्यत्, टाप्। कृष्णपक्षशेषतिथिम्, तद्दिने चन्द्रार्कावेकराशिस्थौ भवतः। दर्शेष्टिम् (श्रद्धाम्) ईश्वरवेदयोर्निश्चयम् (दीक्षाम्) नियमव्रतयोः शिक्षाम्। (यज्ञम्) यज देवपूजासंगतिकरणदानेषु—नङ्। परमेश्वरविद्वत्सत्कारपरस्परसंयोगविद्यादिदानव्यवहारम् (दक्षिणाः) यज्ञसमाप्तौ विद्वद्भ्यः सत्कारद्रव्याणि। (व्यानान्) सर्वशरीरव्यापकान् वायून् (पृथिवीम्) भूगर्भविद्यां राज्यपालनादिविद्यां च (अन्तरिक्षम्) मध्यलोकस्थवायुमण्डलमेघमण्डलादिविद्याम् (दिवम्) सूर्यतापाकर्षणविस्तारादिविद्याम् (नक्षत्राणि) णक्ष गतौ—अत्रन्। गतिशीलानां

---

१. पूर्णमासोऽस्यां वर्त्तत इति पौर्णमासी तिथिः, इत्यत्र पूर्णमासादण् (वा० ४। २। ३५) इति अण्॥ सम्पा०॥

[तारागणों के परस्पर आकर्षण रखने, अपने अपने मार्ग पर चलने उछलने डूबने आदि की विद्या], ऋतुओं ५, [वसन्त आदि ऋतुओं के क्रम और कारण आदि की विद्या], आर्तवों ६, [ऋतुओं में उत्पन्न पदार्थों, फूल फल आदि की उत्पत्ति और उपकार की विद्या], और संवत्सरों ७ [वर्ष में ऋतु महीने आदि कैसे बसते हैं और सब मनुष्य आदि प्राणी कैसे उसका उपभोग करते हैं, इसकी विद्या] इन सबको इस [विधि] से इस [शरीर] में पुष्ट करता है, [क्योंकि] जल अमृत है। (**पुरुषः ब्रह्म, अथ आप्रियनिगमः भवति**) पुरुष ब्रह्म है और यह सब प्रकार प्रिय निगम [वैदिक सिद्धान्त] है, (**तस्मात् वै विद्वान् पुरुषम् इदम् पुण्डरीकम् इति**) [आचष्टे] इस- लिए ही विद्वान् मनुष्य पुरुष को ऐश्वर्यवान् शुद्धस्वरूप ब्रह्म [कहता है] (**एषः सः प्राणः पुरि शेते स पुरि शेते इति**) यही प्राण शरीर में रहता है, यही शरीर में रहता है। (**पुरिशयं सन्तं प्राणं पुरुषः इति आचक्षते**) शरीर में वर्तमान रहते हुये प्राण [जीवन साधन] को पुरुष [आत्मा वा परमात्मा] कहते हैं। (**परोक्षेण**) परोक्ष [आँख ओट प्रलय में वर्तमान ब्रह्म] के द्वारा (**परोक्षप्रिया इव हि**) परोक्षप्रिय [आँख ओट भविष्य के प्रेमी] लोगों के समान ही (**देवाः**) देवता [विद्वान् लोग] (**प्रत्यक्षद्विषः**) प्रत्यक्ष [वर्तमान अवस्था] के द्वेषी (**भवन्ति**) होते हैं [देखो कण्डिका १ तथा ७]।

[वही प्रकरण दूसरे प्रकार कहा जाता है] (**सः यत् पूर्वम् आचामति पुरस्ताद्धोमान् तेन अस्मिन् अवरुन्धे**) वह जो पहिला आचमन करता है पुरस्तात् होमों [पहिले होम विशेषों के फलों] को उस [विधि] से इस [शरीर] में पाता है। (**सः यत् द्वितीयम् आचामति आज्यभागौ तेन अस्मिन् अवरुन्धे**) वह जो दूसरा आचमन करता है दो आज्य भागों [अग्नि के उत्तर और दक्षिण भाग में घी की दो आहुति विशेष के फल] को उस [विधि] से इस [शरीर] में पाता है। (**सः यत् तृतीयम् आचामति संस्थितहोमान् तेन अस्मिन् अवरुन्धे**) वह जो तीसरा आचमन करता है संस्थितहोमों [अन्तिम होम विशेषों के फल] को उस [विधि] से इस [शरीर] में पाता है। (**सः यत् द्विः परिशुम्भति तत् समित्संबर्हिः**) वह जो दो बार सजाता है वह समिधा [काष्ठ] और विधिपूर्वक अग्नि है, (**सः यत् सर्वाणि खानि सर्वं देहम्**

तारागणानां परस्पराकर्षणादिज्ञानम् (**ऋतून्**) वसन्तादीनां क्रमकारणादिबोधम्। (**आर्तवान्**) ऋतु—अण्। ऋतुभवानां पुष्पफलादिपदार्थानां ज्ञानम् (**संवत्सरान्**) संपूर्वाच्चित् (उ० ३। ७२) सम्+वस निवासे—सरन्। संवसन्ति वसन्तादयो यत्र। कालोपभोगविद्याः (**पुरुषः**) पृः कुषन् (उ० ४। ७४) पुर अग्रगमने—कुषन्। पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयन्त्यन्तरित्यन्तरपुरुषमभिप्रेत्य—निरु० २। ३। अग्रगामी परमात्मा (**इदम्**) इन्देः कमिन्नलोपश्च (उ० ४। १५७) इदि परमैश्वर्ये—कमिन्, नलोपः। परमैश्वर्ययुक्तम् (**पुण्डरीकम्**) फर्फरीकादयश्च (उ० ४। २०) पुण शुद्धौ धर्मकृत्यकरणे च—ईकन्, पृषोदरादित्वात् साधुः। शुद्धस्वरूपं ब्रह्म। (**पुरिशयम्**) पुरि+शीङ् स्वप्ने-अच्। पुरि शरीरे वर्त्तमानम् (**पुरस्ताद्धोमान्**) होमविशेषान्, तेषां फलम् (**अवरुन्धे**) प्राप्नोति (**आज्यभागौ**) अग्नेरुत्तर- दक्षिणभागयोर्घृताहुतिद्वयम् (**संस्थितहोमान्**) यज्ञविशेषान् (**समित्संबर्हिः**)

आप्याययति, यत् च अन्यत् आतार मन्त्रकार्यं यज्ञे स्कन्दति सर्वं तेन अस्मिन् अवरुन्धे) वह जो सब इन्द्रियों और सब देह को पुष्ट करता है और जो कोई दूसरा सब प्रकार तराने वाला मन्त्र कार्य यज्ञ में आ जाता है, उस सबको उस [विधि] से इस [शरीर] में पाता है। (सः यत् ओं पूर्वान् मन्त्रान् प्रयुङ्क्ते आसर्वमेधात् अस्य एते एते एव क्रतव) वह जो ओम् को पहिले कह के मन्त्रों को प्रयोग में लाता है सर्वमेध यज्ञ [सब पदार्थों पर धारणावती बुद्धि वाले यज्ञ] तक उसके यही यही सब कर्म होते हैं, (सर्वेषु लोकेषु सर्वेषु देवेषु सर्वेषु वेदेषु सर्वेषु भूतेषु सर्वेषु सत्त्वेषु [अस्य] कामचारः कामविमोचनं भवति अर्द्धे च न प्रमीयते, यः एवं वेद) और सब लोकों में, सब देवों [दिव्य पदार्थों] में, सब वेदों में, सब तत्त्वों में, और सब जीवों में [इसका] सुकामना से विचरना और कुकामना का परित्याग होता है, और वह खण्डित आयु में नहीं मरता है, जो ऐसा जानता है।

(तत् अपि एतत् ऋचा उक्तम्) यह भी इस ऋचा [ब्राह्मण वचन] करके कहा गया है। (आपः भृग्वङ्गिरोरूपम् आपः भृग्वङ्गिरोमयम्। सर्वम् आपोमयं सर्वं भूतं भृग्वङ्गिरोमयम् एते त्रयः वेदाः भृगून् अङ्गिरसः अन्तरा अनुगाः) व्यापक जल प्रकाशमान ज्ञान वाले परमात्मा का रूप है, व्यापक जल प्रकाशमान परमात्मा से परिपूर्ण है। सब जगत् जलमय [जल से परिपूर्ण] है और सब प्राणीमात्र प्रकाशमान ज्ञानवाले परमात्मा से परिपूर्ण हैं। और यह तीनों वेद [अर्थात कर्म उपासना ज्ञान] प्रकाशमान ज्ञान वाले [चारों वेदों] के भीतर साथ साथ चलने वाले हैं। [यह षट्पदा अनुष्टुप् छन्द ब्राह्मण है, इसके पिछले चार पाद कण्डिका २९ में आये हैं, (अनुगाः) के स्थान पर वहां (श्रिताः) पद है॥

(अपां पुष्पं मूर्तिः आकाशम् पवित्रम् उत्तमम् इति आचम्य अभ्युक्ष्य इन्द्रजीव आत्मानम् अनुमन्त्रयते इति ब्राह्मणम्) व्यापक जल का विकाश और वृद्धि, आकाश [के समान व्यापक] पवित्र और उत्तम [ब्रह्म] है · इस [ब्राह्मण

यज्ञकाष्ठं विधानपूर्वकोऽग्निश्च (खानि) इन्द्रियाणि (आतारम्) आ+तॄ संतारणे–घञ्। समन्तात् तारकमुपकारकम् (स्कन्दति) स्कन्दिर् गतिशोषणयोः। गच्छति (आसर्वमेधात्) आङ् मर्य्यादायाम्। सर्वपदार्थेषु मेधा धारणावती बुद्धिर्यस्मिन् स सर्वमेधो यज्ञः। तस्य समाप्तिपर्य्यन्तम् (क्रतवः) कृञः क्तु. (उ० १। ७६) करोतेः—क्रतुः। क्रतुः कर्मनाम—निघ० २। १। प्रज्ञानाम निघ० ३। ९। कर्माणि। (एते एते) अभ्यासे भूयांसमर्थं मन्यन्ते—निरु० ०। ४२। इति द्वित्वम् (देवेषु) दिव्यपदार्थेषु (भूतेषु) तत्त्वेषु (सत्त्वेषु) जीवेषु (कामचारः) स्वकामेन विचरणम् (कामविमोचनम्) कुकामपरित्यागः (अर्द्धे) ऋधु वृद्धौ—घञ्। खण्डिते जीवने (प्रमीयते) मीङ् प्राणवियोगे = मरणे म्रियते (पुष्पम्) पुष पुष्टौ, त्यप्। विकाशः। विशिष्टप्रकाशः (मूर्तिः) मुर्च्छा मोहवृद्ध्योः—क्तिन्। न ध्याख्यापृमूर्च्छिमदाम्

वचन] से आचमन करके और मार्जन करके - इन्द्रजीव—अथर्व० १९ । ७० । १ । इस मन्त्र से अपने को मन्त्र के अनुकूल बनाता है, यह ब्राह्मण है ॥ ३९ ॥

भावार्थ:--व्रतधारी पुरुष आचमनादि क्रिया से स्वस्थचित्त होकर अपने शिर के सात छिद्रों से सम्बन्ध वाले सात प्राण, सात अपान और सात व्यान वायु को वश में करके अग्नि, वायु आदि इस सप्तक, पौर्णमासी अष्टका आदि इस सप्तक तथा पृथिवी, अन्तरिक्ष आदि इस सप्तक, और दूसरी पदार्थ विद्याओं से उपकार लेकर संसार की भलाई करता है। अथर्व० १० । २ । ६ में वर्णन है—(**कः सप्त खानि वि ततर्द शीर्षणि कर्णाविमौ नासिके चक्षणी मुखम् । येषां पुरुत्रा विजयस्य मह्मनि चतुष्पादो द्विपदो यन्ति यामम्**) कर्ता प्रजापति ने [प्राणी के] मस्तक में सात गोलक खोदे, यह दोनों कान, दो नथने, दोनों आंखें और एक मुख । जिनके विजय की महिमा में चौपाये और दोपाये जीव अनेक प्रकार से सन्मार्ग से चलते हैं ।। ३९ ॥

विशेष: १--इस कण्डिका का मिलान अथर्ववेद का० १५ सूक्त १५, १६ और १७ से करो वहाँ मन्त्रों और भाष्य में प्राण, अपान और व्यान तथा अग्नि आदि पदार्थों का सविस्तार वर्णन है ॥

विशेष: २--प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं।

१--**आपो वत्सं जनयन्तीर्गर्भमग्रे समैरयन् । तस्योत जायमानस्योल्ब आसीद्धिरण्ययः कस्मै देवाय हविषा विधेम ॥ अथ० ४ । २ । ८ ऋ० १० । १२१ । ७ । यजु० २७ । २५ ।** (**अग्रे**) पहिले ही पहले (**वत्सम्**) निवास स्थान संसार को वा बालक रूप संसार को (**जनयन्तीः**) उत्पन्न करते हुए (**आपः**) जल-धाराओं [वा तन्मात्राओं ने] (**गर्भम्**) बालक [रूप संसार] को (**समैरयन्**) यथावत् प्रकट किया, (**उत**) और (**तस्य**) उस (**जायमानस्य**) उत्पन्न होते हुये [बालक, संसार] का (**उल्बः**) जरायु [गर्भ की झिल्ली] (**हिरण्ययः**) तेजोमय परमात्मा (**आसीत्**) था, उस (**कस्मै**) सुखदायक प्रजापति परमेश्वर की (**देवाय**) दिव्य गुण के लिये (**हविषा**) भक्ति के साथ (**विधेम**) हम सेवा किया करें ॥ [ब्राह्मण के **'गर्भ'** के स्थान पर वेद में 'वत्सं' है, दोनों पदों का अर्थ "बालक" है] ॥

२--**जीवा स्थ जीव्यासं सर्वमायुर्जीव्यासम् ॥ १ ॥ उपजीवा स्थोप जीव्यासं सर्वमायुर्जीव्यासम् ॥ २ ॥ संजीवा स्थ सजीव्यासं सर्वमायुर्जी-व्यासम् ॥ ३ ॥ जीवला स्थ जीव्यासं सर्वमायुर्जीव्यासम् ॥ ४ ॥ अथ० का० १९ । सू० ६९ ।** [हे विद्वानों !] तुम (**जीवाः**) जीने वाले (**स्थ**) हो, (**जीव्यासम्**) मैं जीता रहूँ, (**सर्वम्**) सम्पूर्ण (**आयुः**) आयु (**जीव्यासम्**) मैं जीता रहूँ ॥ १ ॥ [हे विद्वानों !] तुम (**उपजीवाः**) आश्रय से जीने वाले (**स्थ**) हो, (**उपजी-**

(पा० ८ । २ । ५७) तकारस्य नत्वाभावः । रात्लोपः (पा० ६ । ४ । २१) इति छस्य लोपः । हलि च (पा० ८ । २ ७७) इति उपधायाः दीर्घः । प्रतिमा (अभ्युक्ष्य) मार्जनं कृत्वा (अनुमन्त्रयते) मन्त्रानुकूलं करोति ॥

व्यासम्) मैं सहारे से जीता रहूँ, (सर्वम्) सम्पूर्ण (आयुः) आयु (जीव्यासम्) मैं जीता रहूँ ॥ २ ॥ [हे विद्वानों !] तुम (संजीवाः) मिलकर जीने वाले (स्थ) हो, (संजीव्यासम्) मैं मिलकर जीता रहूँ, (सर्वम्) सम्पूर्ण (आयुः) आयु (जीव्यासम्) मैं जीता रहूं ॥ ३ ॥ [हे विद्वानों !] तुम (जीवलाः) जीवनदाता (स्थ) हो (जीव्यासम्) मैं जीता रहूँ, (सर्वम्) संपूर्ण (आयुः) आयु (जीव्यासम्) मैं जीता रहूँ ॥ ४ ॥

३–इन्द्र जीव सूर्य जीव देवा जीवा जीव्यासमहम् । सर्वमायुर्जीव्यासम् ॥१॥ अथ० क० १९ सू० ७० । (इन्द्र) हे इन्द्र ! [परम ऐश्वर्य वाले मनुष्य] (जीव) तू जीता रहे, (सूर्य) हे सूर्य ! [सूर्य समान तेजस्वी] (जीव) तू जीता रहे, (देवाः) हे विद्वानों ! तुम (जीवाः) जीने वाले [हो], (अहम्) मैं (जीव्यासम्) जीता रहूँ, (सर्वम्) संपूर्ण (आयुः) आयु (जीव्यासम्) मैं जीता रहूँ ॥

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिमश्रीस्याजीरावगायकवाड़ाधिष्ठित बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन श्रीपण्डित क्षेमकरणदासत्रिवेदिना अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्ये पूर्वभागे प्रथम-प्रपाठकः समाप्तः ।

अयं प्रपाठकः प्रयागनगरे चैत्रमासे शुक्लचतुर्दश्यां तिथौ १९८० [अशीत्युत्तरैकोन-विंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ॥

मुद्रितम्––ज्येष्ठकृष्ण १२ संवत् १९८१ वि० ता० ३० मई १९२४ ई० ॥

अथ द्वितीयः प्रपाठकः ॥

कण्डिका १

ओम् ब्रह्मचारीष्णंश्चरति रोदसी उभे इत्याचार्य्यमाह । तस्मिन् देवाः सम्मनसो भवन्तीति वायुमाह स सद्य एति पूर्वस्मादुत्तरं समुद्रमित्यादित्यमाह दीक्षितो दीर्घश्मश्रुरेष दीक्षित एष दीर्घश्मश्रुरेष एवाचार्य्यस्थाने तिष्ठन्नाचार्य्य इति स्तूयते, वैद्युतस्थाने तिष्ठन् वायुरिति स्तूयते, द्यौःस्थाने तिष्ठन्नादित्य इति स्तूयते । तदप्येतदृचोक्तं ब्रह्मचारीष्णन्निति ब्राह्मणम् ॥ १ ॥

कण्डिका १॥ ब्रह्मचारी की महिमा ॥

(ओम् ब्रह्मचारी उभे रोदसी इष्णन् चरति [अथ० ११ । ५ । १ पाद १]– इति आचार्यम् आह) ओम् [रक्षक परमात्मा है], ब्रह्मचारी [वेदपाठी वीर्यनिग्रही पुरुष] सूर्य और पृथिवी दोनों को लगातार खोजता हुआ विचरता है–यह आचार्य को वह [ईश्वर] कहता है (तस्मिन् देवाः सम्मनसः भवन्ति [उक्त मन्त्र पाद २] इति वायुम् आह) उस [ब्रह्मचारी] में देवता [विजय चाहने वाले पुरुष] एकमन

होते हैं--यह पवन [के समान पुरुष] को वह कहता है। (सः सद्यः पूर्वस्मात् उत्तरं समुद्रम् एति [अथ० ११ । ५ । ६ पाद ३]--इति आदित्यम् आह) वह अभी पहिले [समुद्र अर्थात् ब्रह्मचर्याश्रम] से अगले समुद्र [गृहाश्रम] को प्राप्त होता है--यह आदित्य [सूर्य समान ब्रह्मचारी] को वह कहता है। (दीक्षितः दीर्घश्मश्रुः [अथ० ११ । ५ । ६ । पाद २]--एषः दीक्षितः एषः दीर्घश्मश्रुः, एषः एव आचार्य्यस्थाने तिष्ठन् आचार्यः इति स्तूयते), वह दीक्षा पाये हुये [नियम व्रत करता हुआ] बड़ी बड़ी डाढ़ी मूँछ वाला है--यह दीक्षा पाये हुये, यह बड़ी बड़ी डाढ़ी मूँछ वाला, यही [ब्रह्मचारी] आचार्य के पद पर ठहरा हुआ, यह आचार्य है --ऐसा स्तुति किया जाता है, (वैद्युतस्थाने तिष्ठन् वायुः इति स्तूयते) बिजुली के स्थान [अति वेग] में ठहरा हुआ वह वायु [पवन के समान शीघ्रगामी] है--ऐसा स्तुति किया जाता है (द्यौः स्थाने तिष्ठन् आदित्यः इति स्तूयते) प्रकाश के स्थान [ज्ञान के प्रकाश] में ठहरा हुआ वह आदित्य [सूर्य समान तेजस्वी] है--ऐसा स्तुति किया जाता है। (तत् अपि एतत् ऋचा उक्तम् --ब्रह्मचारी इष्णन् [अथ० ११ । ५ । १ पाद १]--इति ब्राह्मणम् , यह भी इस ऋचा करके कहा गया है--ब्रह्मचारी लगातार खोजता हुआ--यह ब्राह्मण है ॥

भावार्थः--ब्रह्मचारी वेदाध्ययन और इन्द्रिय दमनरूप तपोबल से सब सूर्य, पृथिवी आदि स्थूल और सूक्ष्म पदार्थों को जानकर और उनसे उपकार लेकर संसार को सुखी करता है ॥ १ ॥

विशेषः १--प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं।

१--ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन् देवाः संमनसो भवन्ति। स दाधार पृथिवीं दिवं च स आचार्यं तपसा पिपर्ति ॥ अथ० ११ । ५ । १ । (ब्रह्मचारी) ब्रह्मचारी [वेदपाठी और वीर्यनिग्रही पुरुष] (उभे) दोनों (रोदसी) सूर्य और पृथिवी को (इष्णन्) लगातार खोजता हुआ (चरति) विचरता है, (तस्मिन्) उस [ब्रह्मचारी] में (देवाः) विजय चाहने वाले पुरुष (संमनसः) एक

१--(ब्रह्मचारी) ब्रह्म+चर गतिभक्षणयोः--णिनिः। ब्रह्मणे वेदाय वीर्यनिग्रहाय च चरणशीलः पुरुषः (इष्णन्) इष आभीक्ष्ण्ये--शतृः। पुनः पुनरन्विच्छन् (चरति) विचरति। प्रवर्तते (रोदसी) द्यावापृथिव्यौ (आह) ईश्वरो ब्रवीति। (देवाः) विजिगीषवः (सम्मनसः) समानमनस्काः (वायुम्) वायुतुल्यस्वभावयुक्तम् (सद्यः) तत्क्षणम् (पूर्वस्मात्) प्रथमसमुद्ररूपाद् ब्रह्मचर्याश्रमात् (उत्तरम्) अनन्तरम् (समुद्रम्) गृहाश्रमरूपं समुद्रम् (आदित्यम्) सूर्यतुल्यतेजस्विनम् (दीक्षितः) प्राप्तदीक्षः। धृतनियमः (दीर्घश्मश्रुः) लम्बमानमुखस्थलोमा (वैद्युतस्थाने) वायुतुल्यवेगस्थाने (द्यौः स्थाने) द्युस्थाने। ज्ञानप्रकाशपदे (स्तूयते) प्रशस्यते ॥

मन (भवन्ति) होते हैं। (सः) उसने (पृथिवीम्) पृथिवी (च) और (दिवम्) सूर्य लोक को (दाधार) धारण किया है [उपयोगी बनाया है], (सः) वह (आचार्यम्) आचार्य [साङ्गोपाङ्ग वेदों के पढ़ाने वाले पुरुष] को (तपसा) अपने तप से (पिपर्ति) परिपूर्ण करता है ॥

२—ब्रह्मचार्येति समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः । स सद्य एति पूर्वस्मादुत्तरं समुद्रं लोकान्त्संगृभ्य मुहुराचरिक्रत् ॥ अथ० ११।५।६॥ (ब्रह्मचारी) ब्रह्मचारी (समिधा) [विद्या के] प्रकाश से (समिद्धः) प्रकाशित, (कार्ष्णम्) कृष्ण मृग का चर्म (वसानः) धारण किये हुये (दीक्षितः) दीक्षित होकर [व्रत धारण करके] (दीर्घश्मश्रुः) बड़े बड़े डाढ़ी मूंछ रखाये हुये (एति) चलता है। (सः) वह (सद्यः) अभी (पूर्वस्मात्) पहिले [समुद्र] से [अर्थात् ब्रह्मचर्याश्रम से] (उत्तरम् समुद्रम्) अगले समुद्र [गृहाश्रम] को (एति) प्राप्त होता है और (लोकान्) लोगों को (संगृभ्य) संग्रह करके (मुहुः) बारम्बार (आचरिक्रत्) अतिशय करके पुकारता है ॥

विशेष: २—भगवान् पतञ्जलि कहते हैं—[ब्रह्मचर्य्यप्रतिष्ठायां वीर्यलाभः—योगदर्शन, पाद २ सूत्र ३८] ब्रह्मचर्य्य [वेदों के विचार और जितेन्द्रियता] के अभ्यास में वीर्य [वीरता अर्थात् धैर्य और शरीर, इन्द्रिय और मन के निरतिशय सामर्थ्य] का लाभ होता है ॥

विशेषः ३—भगवान् मनु ने आचार्य का लक्षण किया है—[उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते—मनु० अध्याय २ श्लोक १४०] जो द्विज [ब्राह्मण, क्षत्रिय, वैश्य,] शिष्य का उपनयन करके कल्प [यज्ञ आदि के विधान] और रहस्य [उपनिषद् आदि ब्रह्मविद्या] के साथ वेद पढ़ावे, उसको आचार्य कहते हैं ॥

कण्डिका २ ॥

जायमानो ह वै ब्राह्मणः, सप्तेन्द्रियाण्यभिजायन्ते, ब्रह्मवर्च्चसञ्च १, यशश्च २, स्वप्नश्च ३, क्रोधश्च ४, श्लाघाश्च ५, रूपञ्च ६, पुण्यमेव गन्धं सप्तमम् ७ तानि ह वा अस्यैतानि ब्रह्मचर्य्यमुपेतोऽपक्रामन्ति, मृगानस्य ब्रह्मवर्च्चसं १, गच्छत्याचार्य्यं यशो २, ऽजगरं स्वप्नो ३, वराह क्रोधो ४, ऽपः श्लाघा ५, कुमारीं रूप ६, मोषधिवनस्पतीन् पुण्यो गन्धः ७ । स यन्मृगाजिनानि वस्ते तेन तद् ब्रह्मवर्च्चसमवरुन्धे, यदस्य मृगेषु भवति स ह स्नातो ब्रह्मवर्च्चसी भवति । स यदहरहराचार्य्याय कर्म करोति तेन तद्यशोऽवरुन्धे यदस्याचार्य्ये भवति स ह स्नातो यशस्वी भवति । स यत्सुषुप्सुर्निद्रान्निनयति तेन तं स्वप्नमवरुन्धे योऽस्याजगरे भवति तं ह स्नातं स्वपन्तमाहुः स्वपितु मैनं बोबुधथेति । स यत् क्रुद्धो वाचा न कञ्चन हिनस्ति पुरुषात् पुरुषात् पापीयानिव मन्यमानस्तेन तं क्रोधमवरुन्धे योऽस्य वराहे भवति तस्य ह स्नातस्य क्रोधाः श्लाघीयसं विशन्ते । अथाद्भिः श्लाघ्यमानो न

स्नायात्तेन तां श्लाघामवरुन्धे, याऽस्याप्सु भवति स ह स्नातः श्लाघीयोऽन्येभ्यः श्लाघ्यते । अथैतद्ब्रह्मचारिणो रूपं यत्कुमार्य्यास्तान्नग्नान्नोदैक्षतैति वेति मुखं विपरिधापयेत्तेन तद्रूपमवरुन्धे, यदस्य कुमार्य्यां भवति तं ह स्नातं कुमारीमिव निरीक्षन्ते । अथैतद् ब्रह्मचारिणः पुण्यो गन्धो य ओषधिवनस्पतीनां तासां पुण्यं गन्धं प्रच्छिद्य नोपजिघ्रेत्तेन तं पुण्य गन्धमवरुन्धे, योऽस्यौषधिवनस्पतिषु भवति स ह स्नातः पुण्यगन्धिर्भवति ॥ २ ॥

कण्डिका २ ॥ ब्रह्मचारी के सात मनोरागों का दमन आदि कर्त्तव्य ॥

(जायमानः ह वै ब्राह्मणः सप्त इन्द्रियाणि अभिजायन्ते [अभिजनयति] ब्रह्मवर्चसं च यशः च स्वप्नं च क्रोधं च श्लाघां च रूपं च पुण्यम् एव गन्धं सप्तमम्) उत्पन्न होता हुआ [उपनयन आदि संस्कार किये हुये] ही ब्राह्मण [ब्रह्मचारी] सात इन्द्रियों [मनोरागों] को वश में करता है, ब्रह्मवर्चस [वेद पढने का तेज] १, यश २ स्वप्न [नींद] ३, क्रोध ४ घमण्ड ५, रूप ६, और सातवें पवित्र गन्ध को भी ७ । (तानि ह वै एतानि अस्य ब्रह्मचर्यम् उपेतः अपक्रामन्ति) वे सब ही इस ब्रह्मचर्य पाये हुये के दूर चले जाते हैं, (मृगान् अस्य ब्रह्मवर्चसं गच्छति, आचार्यं यशः, अजगरं स्वप्नः, वराहं क्रोधः, अपः श्लाघा, कुमारीं रूपम्, ओषधि-वनस्पतीन् पुण्यः गन्धः) मृगों [सिंहों वा हरिणों] को इसके वेद पढ़ने का तेज जाता है १, आचार्य को यश २, अजगर [बड़े सांप विशेष] को नींद ३, सूअर को क्रोध ४, जल को घमण्ड ५, कुमारी [कन्या] को रूप [सुन्दरता] ६, और ओषधि वनस्पतियों को पवित्र गन्ध ७ । (सः यत् मृगाजिनानि वस्ते तेन तत् ब्रह्मवर्चसम् अवरुन्धे, यत् अस्य मृगेषु भवति, सः ह स्नातः ब्रह्मवर्चसी भवति,) वह जो मृगछालायें पहिरता है उससे उस ब्रह्मतेज को पाता है जो उसका मृगों [सिंहों वा हरिणों] में होता है, वही स्नातक [विद्या में स्नान किया हुआ] ब्रह्मवर्चसी [वेद पढ़ने से तेज वाला] होता है । १ । (सः यत् अहरहः आचार्याय कर्म करोति तेन तत् यशः अवरुन्धे यत् अस्य आचार्ये भवति, सः ह स्नातः यशस्वी भवति) वह जो दिन दिन आचार्य

२—(जायमानः) उत्पद्यमानः । उपनयनादिसंस्कारं प्राप्यमाणः (इन्द्रियाणि) इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा (पा० ५ । २ । ९३) इन्द्र—घप्रत्ययः । इन्द्रियं धननाम—निघ० २ । १० । मनोरागान् । (अभिजायन्ते) अभि जनी प्रादुर्भावे—श्यन्, ज्ञाजनोर्जा (पा० ७ । ३ । ७९) इति धातोः 'जा' आदेशः, आत्मनेपदस्य लटि बहुवचने रूपम् । अभिजनयति । अभिभवति । (ब्रह्मवर्चसम्) वेदाध्ययनतेजः (श्लाघाम्) श्लाघृ कत्थने—अङ्, टाप् । आत्मस्तुतिम् । दम्भम् (रूपम्) सौन्दर्य्यम् (उपेतः) प्रथमा षष्ठ्यर्थे । उपेतस्य । प्राप्तस्य (अपक्रामन्ति) दूरे गच्छन्ति (अजगरम्) बृहत्सर्पविशेषम् (वराहम्) वराय अभीष्टाय मुस्तादिलाभाय आहन्ति खनति भूमिम् । वर + आ + हन हिंसागत्योः—

के लिये कर्म [वेदाध्ययन और अन्य सेवा] करता है, उससे वह उस यश को पाता है जो उसका आचार्य में होता है, वही स्नातक यशस्वी होता है। २। (सः यत् सुषुप्सुः निद्रां निनयति तेन तं स्वप्नम् अवरुन्धे यः अस्य अजगरे भवति तं ह स्नातं स्वपन्तं आहु.--स्वपितु मा एन बोबुधथ इति) वह जो सोने की इच्छा करता हुआ निद्रा को हटा देता है, उससे उस स्वप्न [निद्रा] को पाता है जो इसका अजगर में होता है, उस ही सोते हुए स्नातक को लोग कहते हैं--यह सोता रहे इसे तुम मत जगाओ ॥ ३ ॥ (सः यत् क्रुद्धः वाचा कञ्चन न हिनस्ति, [यतः] पुरुषात् पुरुषात् पापीयान् इव मन्यमानः, तेन तं क्रोधम् अवरुन्धे, यः अस्य वराहे भवति, तस्य ह स्नातस्य क्रोधाः श्लाघीयसं विशन्ते) वह जो क्रुद्ध होकर वाणी से किसी को नहीं सताता है, [क्योंकि अपने को] पुरुष पुरुष से अधिक पापी के समान वह मानता हुआ है, उससे वह उस क्रोध को पाता है जो इसका सूअर में होता है. उस ही स्नातक के क्रोध अधिक घमण्डी में प्रवेश करते हैं। ४। (अथ अद्भिः श्लाघ्यमानः न स्नायात् तेन ताम् श्लाघ्राम् अवरुन्धे या अस्य अप्सु भवति, सः ह स्नातः श्लाघीयः अन्नेभ्यः श्लाघ्यते) और वह जल से घमण्ड करता हुआ न स्नान करे, उससे वह उस घमण्ड को पाता है जो इसका जल में होता है वही प्रशसनीय स्नातक अन्नों के लिये बड़ाई किया जाता है। ५। (अथ एतत् ब्रह्मचारिणो रूपम् यत् कुमार्याः तां नग्नां न उदैक्षत एति वेति मुखं विपरिधापयेत्, तेन तत् रूपम् अवरुन्धे यत् अस्य कुमार्यां भवति, तं ह स्नातं कुमारीम् इव निरीक्षन्ते) और यही ब्रह्मचारी का रूप है जो कुमारी का है, उसको वह नङ्गा न देखे, चलते फिरते मुख ढक लेवे, उससे वह उस रूप को पाता है जो इसका कुमारी में है, उस ही स्नातक को कुमारी के समान [रूपवान्] देखते हैं। ६। (अथ एतत् ब्रह्मचारिणः पुण्यः गन्धः यः ओषधिवनस्पतीनां तासां पुण्यं गन्धं प्रच्छिद्य न उपजिघ्रेत्, तेन तं पुण्यं गन्धम् अवरुन्धे यः अस्य ओषधिवनस्पतिषु भवति, सः ह स्नातः पुण्यगन्धिः भवति) और यह ब्रह्मचारी का पवित्र गन्ध है जो ओषधि वनस्पतियों का है उनके पवित्र गन्ध को तोड़कर न सूंघे, उससे वह

डप्रत्ययः। वराहो मेघो भवति......अयमपीतरो वराह एतस्मादेव। वृहति मूलानि वरं वरं मूलं बृहतीति वा—निरु० ५ । ४ । शूकरम् (अपः) जलम् (कुमारीम्) अनूढां कन्याम् (मृगाजिनानि) हरिणचर्माणि (वस्ते) आच्छादयति (स्नातः) स्नातकः। वेदाध्ययनानन्तरं कृतसमावर्तनाङ्गस्नानः (कर्म) वेदाध्ययनम्। अन्यशुश्रूषां च (सुषुप्सुः) ञिष्वप् शये—सन्. उः प्रत्ययः। शयनेच्छुकः (निनयति) दूरीकरोति (मा बोबुधथ) मा बोधयत (पापीयान्) पापवत्—ईयसुन्। विन्मतोर्लुक् (पा० ५। ३। ६५) मतुपो लुक्। पापितरः (श्लाघीयसम्) श्लाघावत्—ईयसुन्। पूर्ववत् मतुपो लुक्। प्रशंसनीयतरम् (श्लाघ्यमानः) स्तूयमानः (श्लाघीयः) वृद्धाच्छः (पा० ४। २। १०६) श्लाघा--छः। प्रशंसनीयः (एति) गच्छति (वेति) वी गतौ--लट्। चलति (विपरिधापयेत्) आच्छादयेत् (प्रच्छिद्य) प्र+छिदिर् द्वैधीकरणे--ल्यप्। विभिद्य ॥

उस पवित्र गन्ध को पाता है जो इसका ओषधि वनस्पतियों में है, वही स्नातक पवित्र गन्ध वाला होता है ॥ २ ॥

भावार्थः—ब्रह्मचारी राग द्वेष आदि दोषों को छोड़ कर वेदाध्ययन करके ब्रह्मवर्चसी होता है ॥ २ ॥

कण्डिका ३ ॥

स वा एष उपयंश्चतुर्द्धोपैत्यग्निं पादेनाचार्य्यं पादेन ग्रामं पादेन मृत्युं पादेन, स यदहरहः समिध आहृत्य सायं प्रातरग्निं परिचरेत्तेन तं पादमवरुन्धे, योऽस्याग्नौ भवति । स यदहरहराचार्य्याय कर्म करोति, तेन तं पादमवरुन्धे, योऽस्याचार्य्ये भवति । स यदहरहर्ग्रामं प्रविश्य भिक्षामेव परीप्सति न मैथुनन्तेन तं पादमवरुन्धे, योऽस्य ग्रामे भवति, स यत् क्रुद्धो वाचा न कञ्चन हिनस्ति पुरुषात् पुरुषात् पापीयानिव मन्यमानस्तेनैव तं पादमवरुन्धे, योऽस्य मृत्यौ भवति ॥ ३ ॥

कण्डिका ३ ॥ ब्रह्मचारी के कर्तव्य, आचार्य की सेवा आदि कर्म ॥

(सः वै एषः उपयन् चतुर्धा उपैति, पादेन अग्निम्—१, पादेन आचार्यम्—२, पादेन ग्रामम् –३, पादेन मृत्युम्—४,) वही यह [ब्रह्मचारी] पास आता हुआ चार प्रकार से सेवता है, चौथाई से अग्नि को—१, चौथाई से आचार्य को—२, चौथाई से ग्राम को—३, और चौथाई से मृत्यु को–४ । (सः यत् अहरहः समिधः आहृत्य सायं प्रातः अग्निं परिचरेत्, तेन तं पादम् अवरुन्धे यः अस्य अग्नौ भवति—१) वह जो समिधायें लाकर साय प्रातः अग्नि को सेवे, उससे वह उस पद को पाता है जो इसका अग्नि में होता है [अर्थात् अग्निहोत्र करने से वह अग्नि समान तेजस्वी होता है] १ । (सः यत् अहरहः आचार्याय कर्म करोति, तेन तं पादम् अवरुन्धे यः अस्य आचार्ये भवति—२) वह जो दिन दिन आचार्य के लिये कर्म करता है, उससे वह उस पद को पाता है जो इसका आचार्य में होता है [अर्थात् आचार्य की सेवा से वह आचार्य के समान प्रतिष्ठा पाता है]—२ । (सः यत् अहरहः ग्रामं प्रविश्य भिक्षाम् एव परीप्सति न मैथुनम्, तेन तं पादम् अवरुन्धे यः अस्य ग्रामे भवति—३) वह जो दिन दिन ग्राम में जाकर भिक्षा ही पाना चाहता है और न मैथुन [स्त्री समागम] उससे वह उस पद को पाता है जो इसका ग्राम में होता है [अर्थात् शुद्ध आचरण रखने से वह ग्राम में प्रतिष्ठा पाता है]—३ । (सः यत् क्रुद्धः वाचा कञ्चन न हिनस्ति [यतः] पुरुषात् पुरुषात् पापीयान् इव मन्यमानः, तेन एव तं पादम् अवरुन्धे यः अस्य मृत्यौ भवति—४) वह जो क्रुद्ध होकर वाणी से किसी को नहीं सताता है, [क्योंकि अपने को] पुरुष पुरुष से अधिक पापी के समान वह मानता हुआ है, उससे वह उस पद को पाता है

३—(उपयन्) समीपे गच्छन् (चतुर्धा) चतुष्प्रकारेण (उपैति) सेवते (पादेन) चतुर्थांशेन (पादम्) पदम् । स्थैर्यम् (परीप्सति) परि+आप्नोतेः-सन् । परितः प्राप्तुमिच्छति (मैथुनम्) मिथुन--अण् । स्त्रीपुरुषसंगमम् ॥

जो इसका मृत्यु में होता है [अर्थात् क्रोध छोड़ने से वह मृत्यु को वश में करता है]—४॥ ३॥

भावार्थः—ब्रह्मचारी नित्य अग्निहोत्र, आचार्य सेवा, भिक्षा से निर्वाह, और सब पर दया करने से संसार में ऐश्वर्यवान् होता है॥ ३॥

कण्डिका ४॥

पञ्च ह वा एते ब्रह्मचारिण्यग्नयो धीयन्ते, द्वौ पृथग्घस्तयोर्मुखे हृदय उपस्थ एव पञ्चमः। स यद्दक्षिणेन पाणिना स्त्रियन्न स्पृशति तेनाहरहर्याजिनां लोकमवरुन्धे, यत्सव्येन तेन प्रव्राजिनां, यन्मुखेन तेनाग्निप्रस्कन्दिनां, यद्धृदयेन तेन शूराणां, यदुपस्थेन तेन गृहमेधिनां, तैश्चेत् स्त्रियं पराहरत्यनग्निरिव शिष्यते। स यदहरहराचार्य्याय कुलेऽनुतिष्ठते सोऽनुष्ठाय ब्रूयाद्धर्मगुप्तो मा गोपायेति धर्मो हैनं गुप्तो गोपायति,[1] तस्य ह प्रजाः श्वः श्वः श्रेयसी श्रेयसी ह भवति। धाय्यैव प्रतिधीयते, स्वर्गे लोके पितॄन्निदधाति, तान्तवं न वसीत, यस्तान्तवं वस्ते क्षत्रं वर्द्धते न ब्रह्म तस्मात्तान्तवं न वसीत, ब्रह्म वर्द्धतां मा क्षत्रमिति, नोपर्य्यासीत यदुपर्य्यास्ते प्राणमेव तदात्मनोऽधरं कुरुते यद्वातो वहति, अध एवासीत, अधः शयीत, अधस्तिष्ठेदधो व्रजेदेवं ह स्म वैतत् पूर्वे ब्राह्मणा ब्रह्मचर्य्यञ्चरन्ति तं ह स्म तत् पुत्र भ्रातरं वोपतापिनमाहुरानयेतैनमित्यासमिद्धारात् स्वरेष्यन्तोऽन्नमद्यादथाह जघनमाहुः, स्नापयेतैनमित्यासमिद्धारान्नह्येतानि व्रतानि भवन्ति, तं चेच्छयानमाचार्य्योऽभिवदेत्, स प्रतिसंहाय प्रतिशृणुयात्तं चेच्छयानमुत्थाय तञ्चेदुत्थितमभिप्रक्रम्य तं चेदभिप्रक्रान्तमभिपलायमानमेवं ह स्म वैतत् पूर्वे ब्राह्मणा ब्रह्मचर्य्यं चरन्ति, तेषां ह स्म वैषा पुण्या कीर्त्तिर्गच्छत्याह वा अयं सोऽद्य गमिष्यतीति॥ ४॥

कण्डिका ४॥ ब्रह्मचारी का अपने पांच अग्नियों का वशीकरण और क्रमशः विनीत कर्तव्य।

(पञ्च ह वै एते अग्नयः ब्रह्मचारिणि धीयन्ते, द्वौ पृथक्हस्तयोः—१, २, मुखे—३, हृदये—४, उपस्थे एव पञ्चमः—५) यही पांच अग्नियां [उत्तेजक व्यवहार] ब्रह्मचारी में धरे होते हैं, दो अलग अलग दोनों हाथों में—१, २, मुख में—३, हृदय में—४, और उपस्थ में ही पांचवां है—५। (सः यत् दक्षिणेन पाणिना स्त्रियं न स्पृशति तेन याजिनां लोकम् अहरहः अवरुन्धे—१) वह जो दाहिने हाथ से स्त्री को नहीं छूता, उससे वह सत्कर्मियों के लोक को दिन दिन पाता है—१। (यत् सव्येन तेन प्रव्राजिनाम्—२) वह जो बांये हाथ से [स्त्री को नहीं छूता], उससे वह संन्यासियों के [लोक को दिन दिन पाता है]—२। (यत् मुखेन तेन अग्निप्रस्कन्दिनाम्—३)

४—(धीयन्ते) ध्रियन्ते (याजिनाम्) यज देवपूजासंगतिकरणदानेषु—णिनिः। सत्कर्मिणाम् (लोकम्) स्थानम् (प्रव्राजिनाम्) प्र+व्रज गतौ—णिनिः।

---

1. पू० सं० 'गोपायेति' इति पाठः, स चाशुद्धः॥ सम्पा०॥

वह जो मुख से [स्त्री को नहीं छूता], उससे वह अग्नि को प्राप्त होने वालों के [अर्थात् अग्निहोत्रादि विद्या जानने वालों के लोक को दिन दिन पाता है]—३ । (यत् हृदयेन तेन शूराणाम्—४) वह जो हृदय से [स्त्री को नहीं छूता], उससे वह शूरों के [लोक को दिन दिन पाता है]— । (यत् उपस्थेन तेन गृहमेधिनाम्—५) वह जो उपस्थ इन्द्रिय से [स्त्री को नहीं छूता], उससे वह गृहस्थों के [लोक को दिन दिन पाता है]—५ । (तैः चेत् स्त्रियं पराहरति अनग्निः इव शिष्यते ।) उन [कर्मों] से जो स्त्री को वह त्यागता है, अनग्नि [आहवनीय गार्हपत्य और दाक्षिणात्य यज्ञ की अग्नियों को छोड़े हुये सन्यासी] के समान वह उपदेश किया जाता है । (सः यत् अहरहः आचार्याय कुले अनुतिष्ठते, सो अनुष्ठाय ब्रूयात्—धर्मगुप्तः मा गोपाय इति, गुप्तः धर्मः ह एनं गोपायति) वह जो दिन दिन आचार्य के लिये गुरुकुल में कर्म करता है, वह कर्म करके कहे—धर्म से रक्षा किया गया तू मुझे बचा, रक्षा किया गया धर्म ही इस [पुरुष] को बचाता है, (तस्य ह प्रजा श्वः श्वः श्रेयसी श्रेयसी ह भवति, धाय्या एव प्रतिधीयते, स्वर्गे लोके पितॄन् निदधाति) उसकी संतान कल कल [अगले अगले दिन] धार्मिक धार्मिक ही होती है, धाय्या [होम में अग्नि प्रज्वलित करने का सामिधेनी मन्त्र] ही रक्खा जाता है और वह स्वर्गलोक में पितरों [पालने वाले विद्वानों] को धरता है । (तान्तवं न वसीत, यः तान्तवं वस्ते क्षत्रं वर्धते न ब्रह्म, तस्मात् तान्तवं न वसीत, ब्रह्म वर्धतां मा क्षत्रम् इति) वह [ब्रह्मचारी] सूत का वस्त्र न पहिरे जो सूत का वस्त्र पहिरता है क्षत्रियत्व को बढ़ाता है न वेदज्ञान को, इसलिये सूत का वस्त्र न पहिरे, [जिससे] वेदज्ञान बढ़े न क्षत्रियत्व । (उपरि न आसीत, यत् उपरि आस्ते तत् आत्मनः प्राणम् एव अधरं कुरुते यत् वातः वहति) वह ऊपर न बैठे, जब ऊपर बैठता है तब अपने प्राणवायु को नीचा करता है जिसको पवन चलाता है । (अधः एव आसीत, अधः शयीत, अधः तिष्ठेत्, अधः व्रजेत्) वह नीचे बैठे, नीचे सोवे, नीचे खड़ा हो, नीचे चले, (एवं ह स्म वै तत् ब्रह्मचर्यं पूर्वे ब्राह्मणाः चरन्ति, तं ह स्म तत् पुत्रं भ्रातरं वा उपतापिनम् आहुः) इस प्रकार से निश्चय

परिव्राजकानाम् । संन्यासिनाम् (अग्निप्रस्कन्दिनाम्) अग्नि + प्र + स्कन्दिर् गतिशोषणयोः–णिनिः । अग्निप्रापकानाम् । अग्निहोतॄणाम् (गृहमेधिनाम्) गृह + मिधृ मेधाहिंसनयोः संगमे च—णिनिः । गृहान् गृहव्यवहारान् मेधन्ति निश्चयेन जानन्ति ते गृहमेधिनः । गृहस्थानाम् (पराहरति) त्यजति (अनग्निः) नास्ति अग्निर्यस्य । अग्निहोत्रादिकर्मशून्यः । संन्यासी—यथा मनुः ६ । ३८, ४३ (शिष्यते) शासु अनुशासने-कर्मणि लट् । अनुशासने क्रियते । उपदिश्यते । (कुले) गुरुकुले । ब्रह्मचारिणां गृहे (धर्मगुप्तः) धर्मेण रक्षितः (गोपायति) रक्षति (धाय्या) पाय्यसान्नाय्यनिकाय्यधाय्या० (पा० ३ । १ । १२९) दधातेः—ण्यत् । आतो युक् चिण्कृतोः (पा० ७ । ३ । ३३) इति युक् । धीयते अनया समिदिति धाय्या । सामिधेनीनां मध्ये ऋग्विशेषः । अग्निप्रज्वालनमन्त्रः । (प्रतिधीयते) निश्चयेन स्थाप्यते (तान्तवम्) तन्तु–अण् । सूत्रेण सिद्धं वस्त्रम् (उपतापिनम्)

करके उस ब्रह्मचर्य्य को पहिले ब्राह्मण [ब्रह्मज्ञानी] करते थे, उस पुरुष को ही और उसके पुत्र और भाई को प्रतापी कहते हैं [अर्थात् पूरा कुटुम्ब ब्रह्मचारी सहित ऐश्वर्यवान् होता है]। (उपनयेत एनम् इति) वह [आचार्य] इस [ब्रह्मचारी] का उपनयन संस्कार करावे। (आसमिद्धारात् स्वरेष्यन्तः अन्नम् अद्यात् अथ अह जघनम् आहुः) समिधाओं [हवन के लिये काष्ठ] लाने से निवृत्त होकर सुख चाहने वाला वह [ब्रह्मचारी] अन्न खावे फिर प्रसन्न होकर [उसको] गतिशील [पुरुषार्थी] कहते हैं। (स्नापयेत एनम् इति) वह इस [ब्रह्मचारी] को [विद्या में] स्नान करावे। (आसमिद्धारात् न हि एतानि व्रतानि भवन्ति) [केवल] समिधा लाने से निवृत्त होकर ही यह व्रत नहीं होते हैं। (तं चेत् शयानम् आचार्यः अभिवदेत्, सः प्रतिसंहाय प्रतिश्रृणुयात्) उस सोते हुए को जो आचार्य बुलावे, वह सामने जाकर आदर से सुने, (तं शयानं चेत् उत्थाय) उस सोते हुए को जो [वह बुलावे], उठकर [वह आदर से सुने], (तम् उपस्थितं चेत् अभिक्रम्य) उस उठे हुए को जो [वह बुलावे] परिक्रमा करके [वह आदर से सुने], (चेत् तम् अभिक्रान्तम् अभिपलायमानम्) जो उस परिक्रमा करते हुये, भागते हुये को [वह बुलावे, वैसा ही व्यवहार ब्रह्मचारी करे]। (एवं ह स्म वै तत् ब्रह्मचर्य्यम् पूर्वे ब्राह्मणाः चरन्ति तेषां ह स्म वा एषा पुण्या कीर्तिः गच्छति, अह, वै अयं सो अद्य गमिष्यति इति) ऐसे ही निश्चय करके इस ब्रह्मचर्य को पहिले ब्राह्मण करते थे, उनकी ही निश्चय करके यह पुण्य कीर्ति चली आती है, ऐसा यह कहता है, [वैसा ही] निश्चय करके यह [ब्रह्मचारी] भी आज चलेगा ॥ ४ ॥

भावार्थः—जो ब्रह्मचारी विनय पूर्वक आचार्य से विद्या ग्रहण करते हैं वे कीर्ति पाते हैं ॥ ४ ॥

कण्डिका ५ ॥

जनमेजयो ह वै पारीक्षितो मृगयाञ्चरिष्यन् हंसाभ्यामशिक्षदुपावतस्थ इति, तावूचतुर्जनमेजयं पारीक्षितमभ्याजगाम, स होवाच नमो वां भगवन्तौ, कौ नु भगवन्ताविति, तावूचतुर्दक्षिणाग्निश्चाहवनीयश्चेति, स होवाच नमो वां भगवन्तौ, तदाकीयतामिति होपाराममित्यपि किल देवा न रमन्ते न हि देवा न रमन्तेऽपि चैकोपारामाद्देवा आराममुपसंक्रामन्तीति स होवाच नमो वां भगवन्तौ, किं पुण्य-

---

प्रतापिनम् (उपनयेत) उपनयनेन संस्कुर्यात् (आसमिद्धारात्) समिध्+हरतेः-घञ्। समिधां होमकाष्ठानामानयनान्निवृत्तो भूत्वा (स्वरेष्यन्तः) स्वः-एष्यन्तः। जृविशिभ्यां झच् (उ० ३ । १२६) स्वः+इष इच्छायाम्-झच्, आर्षो यकारः। सुखेच्छुकः (जघनम्) हन्तेः शरीरावयवे द्वे च (उ० ५ । ३२) हन हिंसागत्योः—अच्। गतिशीलम् (स्नापयेत्) विद्यया स्नानं कारयेत् (अभिवदेत्) आवाहनं कुर्यात् (प्रतिसंहाय) प्रति+सम्+ओहाङ् गतौ—ल्यप्। प्रत्यक्षं संगत्य। (प्रतिश्रृणुयात्) प्रतीत्या श्रवणं कुर्यात्। (अभिप्रक्रम्य) परिक्रमेण दक्षिणीकरणेन प्राप्य ॥

मिति ब्रह्मचर्य्यमिति किं लौक्यमिति ब्रह्मचर्य्यमेवेति, तत् को वेद इति, दन्तावलो धौम्रोऽथ खलु दन्तावलो धौम्रो यावति तावति काले पारीक्षितं जनमेजयमभ्याजगाम, तस्मा उत्थाय स्वयमेव विष्टरं निदधौ, तमुपसंगृह्य पप्रच्छाधीहि भो किं पुण्यमिति ब्रह्मचर्य्यमिति, किं लौक्यमिति ब्रह्मचर्य्यमेवेति, तस्मा एतत् प्रोवाचाष्टाचत्वारिंशद्वर्षं सर्ववेदब्रह्मचर्य्यं, तच्चतुर्द्धा वेदेषु व्यूह्य द्वादशवर्षं ब्रह्मचर्य्यं द्वादशवर्षाण्यवरार्द्धमपि स्नायंश्चरेद्यथाशक्त्यपरम् । तस्मा उहस्यृषभौ सहस्रन्ददावप्यपि कीर्त्तितमाचार्य्यो ब्रह्मचारीत्येक आहुराकाशमधिदैवतमथाध्यात्मं ब्राह्मणो व्रतवांश्चरणवान् ब्रह्मचारी ॥ ५ ॥

कण्डिका ५ ॥ जनमेजय का दो हंसों और दन्तावल से ब्रह्मचर्य की महिमा और अड़तालीस वर्ष आदि समय पर वार्तालाप ॥

(जनमेजयः ह वै पारीक्षितः मृगयां चरिष्यन् हंसाभ्याम् अशिक्षत् उपावतस्थे इति) जनमेजय [शत्रुओं का कंपाने वाला] ही परीक्षित् के पुत्र ने आखेट को जाते हुये दो हंसों से शिक्षा पाई और ठहर गया। (तौ जनमेजयं पारीक्षितम् ऊचतुः) वे दोनों जनमेजय परीक्षित् के पुत्र से बोले [उसे बुलाया], (अभ्याजगाम) वह पास आया। (सः ह उवाच—नमः वां भगवन्तौ कौ नु भगवन्तौ इति) वह बोला—हे भगवन्! तुम दोनों को नमस्कार, हे भगवन् आप दोनों कौन हैं। (तौ ऊचतुः—दक्षिणाग्निः च आहवनीयः च इति) वे दोनों बोले—हम दक्षिणाग्नि और आहवनीय अग्नि हैं। (सः ह उवाच—नमः वां भगवन्तौ, तत् आकीयताम् ह उपारामम् इति इति) वह बोला—हे भगवन्! तुम दोनों को नमस्कार, सो [आप का] उपवन जाना जावे। अपि किल देवाः न रमन्ते, नहि देवाः न रमन्ते, अपि च एकोपारामात् आरामं देवाः उपसंक्रामन्ति इति) [हंस बोले] यह प्रसिद्ध है—देवता नहीं क्रीड़ा करते हैं, सो यह बात नहीं है कि देवता नहीं क्रीड़ा करते हैं, किन्तु एक उपवन से दूसरे उपवन को देवता चले जाते हैं। (सः ह उवाच—नमः वां भगवन्तौ किं पुण्यम् इति) वह फिर बोला—हे भगवन्! तुम दोनों को नमस्कार, पुण्य [पवित्र धर्म] क्या है। (ब्रह्मचर्य्यम् इति) [वे दोनों बोले] ब्रह्मचर्य्य है। (किं लौक्यम् इति)

५—(जनमेजयः) जनान् पामरान् शत्रून् एजयति कम्पयतीति । एजेः खश् (पा० ३ । २ । २८) एजृ कम्पने—णिच्—खश् । अरुर्द्विषदजन्तस्य मुम् (पा० ६ । ३ । ६७) इति मुम् । राजर्षिविशेषः । (पारीक्षितः) परीक्षितपुत्रः (अशिक्षत्) शिक्ष विद्योपादाने च—लङ् । शिक्षां प्राप्तवान् (आकीयताम्) आ+कि ज्ञाने—कर्मणि लोट् । ज्ञायताम् (उपारामम्) प्रथमार्थे द्वितीया । उपारामः । उपवनम् । (किल) प्रसिद्धौ (लौक्यम्) लोक-ष्यञ् स्वार्थे । दर्शनीयम् । विचारणीयम् । (वेद) वेत्ता (दन्तावलः) दन्तशिखात् संज्ञायाम् (पा० ५ । २ । ११३) दन्त-वलच् मत्वर्थे । वले (पा० ६ । ३ । ११८) पूर्वस्य दीर्घः । बृहद्दन्तवान् । ऋषिविशेषः (धौम्रः) धूम्र-अण् । कृष्णलोहितवर्णवान् । धूम्रस्य ऋषिविशेषस्य शिष्यः (खलु) प्रसिद्धौ (अधीहि)

[वह बोला] लौक्य [देखने वा विचारने योग्य] क्या है। (ब्रह्मचर्य्यम् एव इति) [वे दोनों बोले] ब्रह्मचर्य्य ही है। (तत् कः वेद इति) [वह बोला] उसका कौन जानने वाला है। (दन्तावलः धौम्रः) [वे दोनों बोले] दन्तावल [बड़े बड़े दांतों वाला, ऋषि विशेष] धौम्र [धूयें का सा वर्ण वाला अथवा धूम्र ऋषि का शिष्य] है। (अथ खलु दन्तावलः धौम्रः यावति तावति काले पारीक्षितं जनमेजयम् अभ्याजगाम) फिर प्रसिद्ध है कि दन्तावल धौम्र किसी ही काल में परीक्षित् के पुत्र जनमेजय के पास आ गया। (तस्मै उत्थाय स्वयम् एव विष्टरं निदधौ) उसको उठकर अपना ही बिस्तर उसने दिया। (तम् उपसंगृह्य पप्रच्छ अधीहि भोः किं पुण्यम् इति) और उससे आदर के साथ मिलकर पूछा—महाराज ! बताओ पुण्य क्या है। (ब्रह्मचर्य्यम् इति) [दन्तावल बोला] ब्रह्मचर्य है। (किं लौक्यम् इति) [जनमेजय बोला] लौक्य [देखने वा विचारने योग्य] क्या है। (ब्रह्मचर्य्यम् एव इति) [दन्तावल बोला] ब्रह्मचर्य्य ही है। (तस्मै एतत् प्रोवाच) और उससे यह भी वह बोला—(अष्टाचत्वारिंशद्वर्षं सर्ववेदब्रह्मचर्य्यम्, तत् वेदेषु व्यूह्य चतुर्धा द्वादशवर्षाणि अवरार्द्धं ब्रह्मचर्य्यम्, अपरम् अपि यथाशक्ति स्तायन् चरेत्) अड़तालीस वर्ष वाला सब वेदों के लिये ब्रह्मचर्य्य है, वह वेदों [चार वेदों] में बँट कर चार बार बारह बारह वर्ष वाला है, बारह वर्ष अति न्यून भाग वाला ब्रह्मचर्य है, दूसरे [शेष ब्रह्मचर्य्य] को यथाशक्ति घेरता हुआ करे। (तस्मै उहसि ऋषभौ सहस्रं ददौ) उसको [जनमेजय ने] विज्ञान विषय में दो बैल और सहस्र [मुद्रा] दान किये। (अपि अपि कीर्तितम्—आचार्यः ब्रह्मचारी इति एके आहुः, आकाशम्, अधिदैवतम्, अथ अध्यात्मम्, ब्राह्मणः व्रतवान् चरणवान् ब्रह्मचारी) यह भी अति प्रसिद्ध है—आचार्य ब्रह्मचारी होता है [अथ० ११ । ५ । १६] इसके विषय में कोई कोई कहते हैं, आकाश [आकाश समान व्यापक] सबसे बड़े परमात्मा का विषय है, किन्तु आत्मतत्त्व [का विषय] है—ब्राह्मण [ब्रह्मज्ञानी] ब्रह्मचर्य आदि व्रत वाला और सुन्दर आचरण वाला ब्रह्मचारी होता है ॥ ५ ॥

भावार्थः—मनुष्य उपनयन संस्कार वा वेदारम्भ संस्कार से ब्रह्मचर्य्य के साथ वेदों को क्रिया सहित अड़तालीस वर्ष में पढ़े और न्यून से न्यून बारह वर्ष में एक ही वेद पढ़े और आगे यथाशक्ति पढ़ता रहे ॥ ५ ॥

विशेषः—प्रतीक वाला मन्त्र अर्थ सहित दिया जाता है—

णिजर्थे। अध्यापय (चतुर्धा) चतुःप्रकारेण (व्यूह्य) वि+ऊह वितर्के-ल्यप्। विभज्य (द्वादशवर्षम्) द्वादशद्वादशवर्षोपेतम् (अवरार्द्धम्) अ+वृञ् वरणे-अप्+ऋधु वृद्धौ-घञ्। अवरेण अवरणीयेन अतिन्यूनेन अर्धेन भागेन युक्तम् (स्तायन्) ष्टै वेष्टने—शतृः। वेष्टमानः (चरेत्) कुर्यात् (अपरम्) भिन्नम्। शेषभागम् (उहसि) श्रयतेः स्वाङ्गे शिरः किच्च (उ० ४। १९४) ऊह वितर्के—असुन् कित्, आर्षो ह्रस्वः। विज्ञानविषये (ऋषभौ) वृषभौ (कीर्तितम्) कृत संशब्दने-क्तः। कथितम्। ख्यातम् (चरणवान्) सदाचारी ॥

१—आचार्यो ब्रह्मचारी ब्रह्मचारी प्रजापतिः। प्रजापतिर्विराजति विराडिन्द्रोऽभवद्वशी—अथ० ११।५।१६। (ब्रह्मचारी) ब्रह्मचारी (आचार्यः) आचार्य और (ब्रह्मचारी) ब्रह्मचारी [ही] (प्रजापतिः) प्रजापति [प्रजापालक मनुष्य, होता है] और (प्रजापतिः) प्रजापति [प्रजापालक होकर] (वि) विविध प्रकार (राजति) राज्य करता है, (विराट्) विराट् [बड़ा राजा] (वशी) वश में करने वाला [शासक], (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला] (अभवत्) हुआ है ॥

कण्डिका ६ ॥

ब्रह्म ह वै प्रजाः मृत्यवे सम्प्रयच्छत्, ब्रह्मचारिणमेव न सम्प्रददौ, स होवाचास्यामस्मिन्निति किमिति यां रात्रीं समिधमनाहृत्य वसेत्तामायुषोऽवरुन्धीयेति, तस्माद् ब्रह्मचार्य्यहरहः समिध आहृत्य सायं प्रातरग्निं परिचरेत्, नोपय्युपसादयेत्, अथ प्रतिष्ठापयेत् यदुपय्युपसादयेज्जीमूतवर्षी तदहः, पर्ज्जन्यो भवति, ते देवा अब्रुवन् ब्राह्मणो वा अयं ब्रह्मचर्य्यंश्चरिष्यति ब्रूतास्मै भिक्षा इति, गृहपतिर्ब्रूत बहुचारी गृहपत्न्या इति किमस्या वृञ्जीतादददत्या इति, इष्टापूर्त्तसुकृतद्रविणमवरुन्ध्यादिति, तस्मात् ब्रह्मचारिणेऽहरहर्भिक्षां दद्याद्गृहिणी मामेयेमिष्टापूर्त्तसुकृतद्रविणमवरुन्ध्यादिति। सप्तमीं नातिनयेत्सप्तमीमतिनयन्न ब्रह्मचारी भवति, समिद्भैक्षे सप्तरात्रमचरितवान् ब्रह्मचारी पुनरुपनेयो भवति ॥६॥

कण्डिका ६ ॥ ब्रह्म ने ब्रह्मचारी को और उसे भिक्षा देने वाले गृहपति को छोड़ कर सब प्रजाओं को मृत्यु को दिया ॥

(ब्रह्म ह वै प्रजाः मृत्यवे सम्प्रयच्छत्, ब्रह्मचारिणम् एव न सम्प्रददौ) ब्रह्म ने निश्चय करके सब प्रजाओं [उत्पन्न पदार्थों को] मृत्यु को सौंप दिया, ब्रह्मचारी को ही न सौंपा। (सः ह उवाच अस्याम् अस्मिन् इति किम् इति, यां रात्रीं समिधम् अनाहृत्य वसेत् ताम् आयुषः अवरुन्धीय इति) वह [मृत्यु] बोला—इस [नीति] में और इस [कर्म] में क्या है, जिस रात्रि को समिधा न लाकर वह [ब्रह्मचारी] बसे, उस [रात्रि] को उसका जीवन मैं नष्ट करूं। (तस्मात् ब्रह्मचारी अहरहः समिधः आहृत्य सायं प्रातः अग्नि परिचरेत्) इस लिये ब्रह्मचारी समिधायें लाकर सायंकाल और प्रातःकाल अग्नि को सेवे। (न उपरि उपसादयेत्, अथ प्रतिष्ठापयेत्) वह [समिधाओं को] ऊपर न गिरावे, और संभाल कर धरे। (यत् उपरि उपसादयेत्, तत् अहः जीमूतवर्षी पर्जन्यः भवति) जो वह ऊपर से गिरावे,

६—(सम्प्रयच्छत्) सम्प्रायच्छत्। समर्पितवान् (अस्याम्) वर्तमानायां नीतौ (अस्मिन्) प्रवृत्ते कर्मणि (आयुषः) जीवनस्य (अवरुन्धीय) अहं निरोध नाशं कुर्वीय (उपसादयेत्) प्रस्थापयेत् (जीमूतवर्षी) जेर्मूट् चोदात्तः (उ० ३। ९१) जि जये—

१. 'गृहिणीम् आमेयुः' इति पू० सं० भ्रष्टः पाठः ॥ सम्पा० ॥

उस दिन जल बरसाने वाला मेघ हो जावे। (ते देवाः अब्रुवन् अयम् ब्राह्मणः वै ब्रह्मचर्यं चरिष्यति, अस्मै भिक्षाः ब्रूत इति) देवता [विद्वान् ब्रह्म से] बोले—यह ब्राह्मण ब्रह्मचर्य करेगा, इसको भिक्षायें [भिक्षा विधान] बताओ। (ब्रूत गृहपतिः बहुचारी इति, अस्याः अददत्याः गृहपत्न्याः किम् वृञ्जीत इति) [ब्रह्म बोला]— कहो—गृहपति बहुत कर्म करने वाला है। [वह भिक्षा देगा], [देवता बोले]—इस न देने वाली गृहपत्नी का क्या नष्ट होवे। (इष्टापूर्तसुकृतद्रविणम् अवरुन्ध्यात् इति) [ब्रह्म बोला] इष्टापूर्त्त [यज्ञ, वेदाध्ययन, तथा अन्नदानादि], पुण्य कर्म और धन [उसका] नष्ट हो जावे, (तस्मात् ब्रह्मचारिणे अहरहः भिक्षां दद्यात् इयं गृहिणी मा मा इष्टापूर्तसुकृतद्रविणम् अवरुन्ध्यात् इति) इसलिये ब्रह्मचारी को वह दिन दिन भिक्षा देवे, और यह गृहपत्नी इष्टापूर्त्त [यज्ञ वेदाध्ययन, तथा अन्नदानादि], पुण्यकर्म और धन कभी भी नष्ट न करे। (सप्तमीं न अतिनयेत्, सप्तमीम् अतिनयन् ब्रह्मचारी न भवति) सप्तमी [रात्रि] को न त्यागे, सप्तमी को त्यागता हुआ ब्रह्मचारी नहीं होता है, (समिद्भैक्षे सप्तरात्रम् अचरितवान् ब्रह्मचारी पुनः उपनेयः भवति) समिधा और भिक्षा को सात रात्रि न करने वाला ब्रह्मचारी फिर उपनयन योग्य होता है ॥ ६ ॥

भावार्थः—ब्रह्मचारी कष्ट उठाकर ब्रह्मचर्य का पालन करे और गृहपति उसको भिक्षा दान करता रहे, उससे वे दोनों दीर्घजीवी और पुण्यात्मा होवें ॥ ६ ॥

कण्डिका ७ ॥

नोपरिशायी स्यान्न गायनो न नर्त्तनो न सरणो न निष्ठीवेत् यदुपरिशायी भवत्यभीक्ष्णं निवासा जायन्ते, यद् गायनो भवत्यभीक्ष्णश आक्रन्दान्धावन्ते, यन्नर्त्तनो भवत्यभीक्ष्णशः प्रेतान्निर्हरन्ते, यत्सरणो भवत्यभीक्ष्णशः प्रजाः संविशन्ते, यन्निष्ठीवति मध्य एव तदात्मनो निष्ठीवति, स चेन्निष्ठीवेद्दिवो नु मां यदत्रापि मधोरहं यदत्रापि रसस्य म इत्यात्मानमनुमन्त्रयते। यदत्रापि मधोरहं निरिष्टविषमस्मृतम्। अग्निश्च तत्सविता च पुनर्मे जठरे धत्ताम्। यदत्रापि रसस्य मे परापपातास्म तम्। तदिहोपह्वयामहे तन्म आप्यायतां पुनरिति। न श्मशानमातिष्ठेत्, स चेदभितिष्ठेदुदकं हस्ते कृत्वा यदीदमृतुकाम्येत्यभिमन्त्र्य जपन् सम्प्रोक्ष्य परिक्रामेत् समयायोपरि व्रजेत् यदीदमृतुकाम्याघं रिप्रमुपेयिम अन्धः

क्तः मूडागमश्च + वृषु सेचने—णिनिः। जीमूतस्य मेघजलस्य वर्षकः (पर्ज्जन्यः) पर्जन्यः (उ० ३ । १०३) पृषु सेचने-अन्यप्रत्ययः, षस्य जः निपातनात्। सेचकः। मेघः (ब्रूत) आदराय बहुवचनम्। ब्रूहि। कथय (बहुचारी) बहुकर्मा (वृञ्जीत) वृञ्जो वृजि वर्जने—विधिलिङ्। वर्जयेत् (अददत्याः) ददातेः—शतृः। दानम् अकुर्वत्याः (इष्टापूर्तम्) यज देवपूजासंगतिकरणदानेषु, इषु वाञ्छायाम् वा—क्तः, पूर्वपददीर्घः। यज्ञवेदाध्ययनान्नप्रदानादि पुण्यकर्म (द्रविणम्) धनम् (अवरुन्ध्यात्) नश्येत् (उपनेयः) उप + णीञ् प्रापणे—यत्। उपनयनयोग्यः ॥

श्लोण इव हीयताम् । मा नोऽन्वागादघं यत इति । अथ हैतद्देवानां परिषूतं यद् ब्रह्मचारी । तदप्येतदृचोक्तम् । देवानामेतत्परिषूतमनभ्यारूढं चरति रोचमानं तस्मिन् सर्वे पशवस्तत्र यज्ञास्तस्मिन्नन्नं सह देवताभिरिति ब्राह्मणम् ॥ ७ ॥

कण्डिका ७ ॥ ब्रह्मचारी के दोषों का प्रायश्चित्त विधान ॥

(न उपरिशायी स्यात् न गायनः न नर्त्तनः न सरणः न निष्ठीवेत्) वह [ब्रह्मचारी] ऊपर [खाट आदि पर] न सुवैया होवे १, न गवैया २, न नचकैया ३, न घुमक्कड़ ४, और न थूके ५ । (यत् उपरिशायी भवति अभीक्ष्णं निवासाः जायन्ते) जो वह ऊपर सुवैया होता है बारम्बार [उसके] घर [जन्म] होते हैं १ । (यत् गायनः भवति अभीक्ष्णशः आक्रन्दान् धावन्ते) जो वह गवैया होता है बारंबार विलापों को पाता है २ । (यत् नर्त्तनो भवति अभीक्ष्णशः प्रेतान् निर्हरन्ते) जो वह नचकैया होता है बारबार प्रेतों [मृतकों] को ले जाता है ३ । (यत् सरणः भवति अभीक्ष्णशः प्रजाः संविशन्ते) जो वह घुमक्कड़ होता है, बारंबार लोगों में घुसता रहता है—४ । (यत् निष्ठीवति तत् आत्मनः मध्ये एव निष्ठीवति) जो वह थूकता है वह अपने भीतर ही थूकता है [मन को मलीन करता है], (स चेत् निष्ठीवेत् दिवः नु मां – यत् अत्र अपि—मधोः अहं, यत् अत्र अपि —रसस्य मे—इति आत्मानम् अनुमन्त्रयते) जो वह थूके—दिवो नु मां··· (अथ० ६ । १२४ । १)--इस मन्त्र से, जो इस पर भी [वह थूके]--मधोरहं···इस ब्राह्मण वचन से, जो इस पर भी [थूके]--रसस्य मे··· इस ब्राह्मण वचन से अपने को मन्त्र के अनुकूल करे । (यत् अत्रापि--मधोरहं···, निरिष्ट--विषमस्मृतम्···, अग्निश्च तत् सविता च पुनर्मे जठरे धत्ताम्···) जो इस पर भी [वह थूके]—मधोरहं···१, निरिष्टं विषमस्मृतम्··· २, अग्निश्च तत् सविता च पुनर्मे जठरे धत्ताम्··· [इन तीन ब्राह्मण वचनों से अपने को मन्त्र के अनुकूल करे] । (यत् अत्रापि—रसस्य मे···परापपातास्म तं···तदिहोपह्वयामहे···तन्म आप्यायतां पुनः—इति) जो इस पर भी [वह थूके]—रसस्य मे···१, परापपातास्म तं···२, तदिहोपह्वयामहे···३, तन्म आप्यायतां पुनः···४, [इन चार ब्राह्मण वचनों से वह अपने को मन्त्र के अनुकूल करे], ५ । (श्मशानम् न आतिष्ठेत्) वह मरघट में न ठहरे, ६ । (सः चेत् अभितिष्ठेत् उदकं हस्ते कृत्वा--यदीदमृतुकाम्या···इति अभिमन्त्र्य जपन् सम्प्रोक्ष्य परिक्रमेत्, समयाय उपरि व्रजेत्-

---

७--(शायी) शीङ् शयने--णिनिः । शयनशीलः । (गायनः) गै गाने--ल्युः । गानोपजीवी (नर्तनः) नर्तकः । नटः (सरणः) सरणशीलः । गमनशीलः (निष्ठीवेत्) नि+ष्ठिवु निरासे । मुखेन श्लेष्मादिवमनं कुर्यात् । (अभीक्ष्णम्, अभीक्ष्णशः) वारंवारम् (निवासाः) गृहाणि (आक्रन्दान्) रोदनकर्माणि (धावन्ते) गच्छति । प्राप्नोति (प्रेतान्) मृतान् (संविशन्ते) सम्यक् प्रविशति (श्मशानम्)श्म मन्+शानम् । शीङ् स्वप्ने--मनिन् डिच्च । श्मानः शवाः शेरते यत्र । शीङ्–शानच्, डिच्च । श्मशानं श्म शयनं श्म शरीरम्--निरु० ३ । ५ ।

यदीदमृतुकाम्या···१, अघं रिप्रमुपेयिम अन्धः श्लोण इव हीयतां···२, मा नोऽन्वागादघं यतः--इति) जो वह [मरघट में] ठहरे, जल हाथ में करके--यदीदमृतुकाम्या ···इस [ब्राह्मण वचन] को पढ़ करके जप करता हुआ मार्जन करके घूमे और समय [आचार] के लिए ऊपर जावे, यदीदमृतुकाम्या···१, अघं रिप्रमुपेयिम अन्धः श्रोण इव हीयताम्···२, मा नोऽन्वागादघं यतः···इति ३, [इन तीन ब्राह्मण वचनों से वह अपने को मन्त्र के अनुकूल करे] ६। (अथ ह एतत् देवानां परिपूतं यत् ब्रह्मचारी) और भी यह दिव्य लोकों का चलाने वाला है जो ब्रह्मचारी है।

(तत् अपि एतत् ऋचा उक्तम्--देवानामेतत्परिषूतमनभ्यारूढं चरति रोचमानं, तस्मिन् सर्वे पशवस्तत्र यज्ञास्तस्मिन्नन्नं सह देवताभिः--इति ब्राह्मणम्) वह भी इस ऋचा से कहा गया है--देवानामेतत्···रोचमानं--अथ०--११।५।२३॥ तस्मिन् सर्वे····· देवताभिः--ब्राह्मण वचन, दिव्य लोकों का सर्वथा चलाने वाला, कभी न हराया गया, प्रकाशमान यह [व्यापक ब्रह्म] विचरता है, उसमें सब पशु [जीव], उसमें यज्ञ, उसमें अन्न सब दिव्य पदार्थों के साथ हैं--यह ब्राह्मण है॥ ७॥

भावार्थः--ब्रह्मचारी दोष करने पर अनेक प्रकार प्रायश्चित्त करके परमात्मा में ध्यान लगाने से शुद्ध होवे॥ ७॥

विशेषः--प्रतीक वाले वेद मन्त्र अर्थ सहित लिखे जाते हैं।

१--दिवो नु मां बृहतो अन्तरिक्षादपां स्तोको अभ्यपप्तद् रसेन। समिन्द्रियेण पयसाहमग्ने छन्दोभिर्यज्ञैः सुकृतां कृतेन॥ अथ० ६।१२४।१॥ (दिवः) प्रकाशमान सूर्य से, (नु) अथवा (बृहतः) [सूर्य से] बड़े (अन्तरिक्षात्) आकाश से (अपाम्) जल का (स्तोकः) बिन्दु (माम् अभि) मेरे ऊपर (रसेन) रस के साथ (अपप्तत्) गिरा है। (सुकृताम्) सुकर्मियों के (कृतेन) कर्म से, (अग्ने) हे सर्वव्यापी परमेश्वर! (इन्द्रियेण) इन्द्रपन अर्थात् सम्पूर्ण ऐश्वर्य के साथ (पयसा) अन्न के साथ, (छन्दोभिः) आनन्ददायक कर्मों के साथ, (यज्ञैः) विद्यादि दानों के साथ (अहम्) मैं (सम्=संगच्छेयम्) मिला रहूँ॥

२--देवानामेतत् परिषूतमनभ्यारूढं चरति रोचमानम्। तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम्॥ अथ० ११।५।२३॥ (देवानाम्) प्रकाशमान लोकों का (परिषूतम्) सर्वथा चलाने वाला, (अनभ्यारूढम्) कभी न हराया गया, (रोचमानम्) प्रकाशमान (एतत्) यह [व्यापक ब्रह्म] (चरति) विचरता है, (तस्मात्) उस [ब्रह्मचारी] से (ज्येष्ठम्) सर्वोत्कृष्ट

शवदाहस्थानम् (समयाय) सम्+इण् गतौ--पचाद्यच्। आचाराय (अघम्) पापम् (रिप्रम्) लीरीङोर्ह्रस्वः पुट् च तरौ० (उ० ५।५५) रीङ् स्रवणे--रप्रत्ययः पुडागमो ह्रस्वश्च। रिप्रं पापनाम--निरु० ४।२१। पापम्। (उपेयिम) उप+इण् गतौ--लिट्। वयं प्राप्तवन्तः (श्लोणः) रस्य लः। श्रोणः। पङ्गुः (परिषूतम्) षू क्षेपे प्रेरणे--क्तः। परितः सूतम्। सर्वतः प्रेरकम्॥

(ब्राह्मणम्) ब्रह्म ज्ञान और (ब्रह्म) बुद्धिकारक धन (जातम्) प्रकट [होता है], (च) और (सर्वे देवाः) सब विद्वान् (अमृतेन साकम्) अमरपन [मोक्ष सुख] के साथ [होते हैं] ।।

कण्डिका ८ ।।

प्राणापानौ जनयन्निति शङ्खस्य मूले महर्षेर्वसिष्ठस्य पुत्र एतां वाचं ससृजे, शीतोष्णाविहोत्सौ प्रादुर्भवेयातामिति तथा तच्छश्वदनुवर्त्तते, अथ खलु विपाण्मध्ये वसिष्ठशिला नाम प्रथम आश्रमो, द्वितीयः कृष्णशिलास्तस्मिन् वसिष्ठः समतपद्विश्वामित्रजमदग्नी जामदग्ने तपतः, गौतमभरद्वाजौ सिंहौ प्रभवे तपतः गुंगुर्गुंगुवासे तपत्यृषिर्ऋषिद्रोणेऽभ्यतपदगस्त्योऽगस्त्यतीर्थे तपनि दिव्यत्रिर्हं तपति स्वयम्भूः कश्यपः कश्यपतुङ्गेऽभ्यतपदुलवृकक्षुतरक्षुः श्वा वराहचिल्वटिबभ्रुकाः सर्पदंष्ट्रनः संहनुकृण्वानाः कश्यपतुङ्गदर्शनात्सरणवाटात् सिद्धिर्भवति ब्राह्म्यं वर्षसहस्रमृषिवने ब्रह्मचार्य्येकपादेनातिष्ठद् द्वितीयं वर्षसहस्रं मूर्द्धन्येवामृतस्य धाराम- धारयद्, ब्राह्माण्यष्टाचत्वारिंशतं वर्षसहस्राणि सलिलस्य पृष्ठे शिवोऽभ्यतपत्त- स्मात्तप्तात्तपसो भूय एवाभ्यतपत् । तदप्येता ऋचोऽभिवदन्ति प्राणापानौ जनयन्निति ब्राह्मणम् ।। ८ ।।

कण्डिका ८ ।। ब्रह्मचारी के आश्रम वा तपोवन ।।

(प्राणापानौ जनयन् इति—शंखस्य मूले महर्षेः वसिष्ठस्य पुत्रः एतां वाचं ससृजे, शीतोष्णौ उत्सौ इह प्रादुर्भवेयाताम् इति—तथा तत् शश्वत् अनुवर्त्तते) [प्राणापानौ जनयन्—अथ० ११ । ५ । २४ पाद ३, ४, मन्त्र २५ २६] प्राण और अपान [बल वर्धक श्वास और दोषनाशक प्रश्वास] को प्रकट करता हुआ······इन मन्त्रों से शङ्ख के मूल में [मुख लगाने के स्थान पर] महर्षि वसिष्ठ के पुत्र ने इस वाणी को उत्पन्न किया—शीत और उष्ण दो झरने यहाँ प्रकट हो जावें—वह वैसा ही सदा लगातार होता रहता है [अर्थात् पदार्थों में प्राण और अपान द्वारा शीत और उष्णता का प्रवाह होता है]। (अथ खलु विपाण्मध्ये वसिष्ठशिला नाम प्रथमः आश्रमः, द्वितीयः कृष्णशिलाः तस्मिन् वसिष्ठः समतपत्) और कहा जाता है कि विपाट् [विविध प्रकार चलने वाली वा रोकने वाली नदी] के बीच में वसिष्ठ शिला नाम पहिला आश्रम है, [जिसके समीप] दूसरा कृष्णशिला है, उस [वसिष्ठ शिला आश्रम] में वसिष्ठ ने यथाविधि तप किया । (विश्वामित्रजमदग्नी जामदग्ने तपतः) विश्वामित्र और जमदग्नि

८—(उत्सौ) उन्दिगुधिकुषिभ्यश्च (उ० ३ । ६८) उन्दी क्लेदने- सप्रत्ययः । जलस्रवणस्थाने (विपाट्) वि+पट गतौ, यद्वा । पश बाधनस्पर्शनयोः, ण्यन्तौ— क्विप् । विपाड् विपाटनाद्वा विपाशनाद्वा विप्रापणाद्वा—निरु० ९ । २६ । विपाट् या विविधं पटति गच्छति विपाटयति वा सा—दयानन्दभाष्ये, ऋग्वेद ३ । ३३ । १ । विविधं गमनशीला नदी (वसिष्ठः) वसुमत्—इष्ठन्, मतुपो लुक् । वसुमत्तमः । अतिशयेन धनवान् । यद्वा वसु—इष्ठन् । सर्वश्रेष्ठः (विश्वामित्रः) मित्रे चर्षौ (पा० ६ ।

दोनों जामदग्न में तप करते हैं। (गौतमभरद्वाजौ सिंहौ प्रभवे तपतः) गौतम और भरद्वाज दोनों सिंह [बलवान्] प्रभव [आश्रम] में तप करते हैं। (गुङ्गुः गुगुवासे तपति) गुङ्गु गुगुवास में तप करता है। (ऋषिः ऋषिद्रोणे अभ्यतपत्) ऋषि ने ऋषि द्रोण [ऋषिवन] में सब ओर से तप किया। (अगस्त्यः अगस्त्यतीर्थे तपति) अगस्त्य अगस्त्यतीर्थ में तप करता है। (दिवि अत्रिः ह तपति) द्यौः [स्वर्ग, सुखस्थान] में अत्रि तप करता है। (स्वयम्भूः कश्यपः कश्यपतुङ्गे अभ्यतपत्) स्वयम्भू कश्यप ने कश्यप तुङ्ग [कश्यप पहाड़] पर सब प्रकार तप किया। [यह दस ऋषि दस इन्द्रियाँ हैं] (उलवृक-ऋक्षु-तरक्षुः श्वा वराह चिल्वटि-बभ्रुकाः सर्पदंष्ट्रनः संहनु कृण्वानाः) उलवृक—[भेड़िया], ऋक्षु [ऋक्ष, रीछ], तरक्षु [लकड़बग्घा], श्वा [कुत्ता], वराह [सूअर], चिल्वटि, बभ्रुक [बभ्रु, नेवला], सर्पदंष्ट्रन [सांप के समान डाढ़ों वाला जन्तु, यह आठ बनैले जीव] संगति करते हुये वा परस्पर हिंसा का नाश करते हुए [तप करते हैं]। (कश्यपतुङ्गदर्शनात् सरणवाटात् सिद्धिः भवति) कश्यप तुङ्ग के दर्शन से और चलने के मार्ग से सिद्धि [ऐश्वर्य प्राप्ति] होती है। (ब्राह्म्य वर्षसहस्रम् ऋषिवने ब्रह्मचारी एकपादेन अतिष्ठत्, द्वितीयं वर्षसहस्रं मूर्द्धनि एव अमृतस्य धाराम् अधारयत्) ब्रह्मा के सहस्र वर्ष [द्वीप समान नाड़ियों में] ऋषिवन में

---

३ । १३०) इति दीर्घः । विश्वामित्रः सर्वमित्रः—निरु० २ । २४ । सर्वहितः (जमदग्निः) जमु भक्षणे दीप्तौ च--शतृ+अग्निः । जमदग्नयः प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा । निरु० ७ । २४ । जमन्तः प्रज्वलन्तोऽग्नयो यज्ञे शिल्पसिद्धौ वा यस्य स महर्षिः (गौतमः) गोतमस्यापत्यं शिष्यो वा (भरद्वाजः) भृञ् धारणपोषणयोः—शतृः + वज-गतौ घञ् । अन्नस्य बलस्य विज्ञानस्य वा भर्त्ता धारकः पोषको वा (गुङ्गुः) गुङ् ध्वनौ—डुः + गम्लृ गतौ--डुः । अलुक्समासः । गुङ् ध्वनिं गच्छति प्राप्नोति यः स. वेदपाठकः (गुगुवासे) गुग्गुलवने (ऋषिद्रोणे) ऋषिवने (अगस्त्यः) अग वक्रगतौ--अच् । वसेस्तिः (उ० ४ । १८०) अग+असु क्षेपणे—तिप्रत्ययः । तत्र साधुः (पा० ४ । ४ । ९८) यत्, दीर्घाभावः । अगस्य कुटिलगतेः पापस्य असने क्षेपणे समर्थः (दिवि) स्वर्गे । सुखस्थाने (अत्रिः) अदेस्त्रिनिश्च (उ० ४ । ६८) अद भक्षणे, अत सातत्यगमने वा–त्रिप् । दोषस्य पापस्य भक्षको नाशकः । सदा ज्ञानशीलः (कश्यपः) कश शब्दे यत् + पा पाने–कः । सोमपानशीलः । यद्वा, दृशिर् प्रेक्षणे--वुन् । अशिति परतो ऽपि दृशेः पश्य् इत्यादेशः । आद्यन्तविपर्य्ययेन रूपसिद्धिः । कश्यपः । यथार्थद्रष्टा (उलवृकः) वृकभेदः (ऋक्षुः) ऋक्षः । भल्लूकः (तरक्षुः) तर+क्षि हिंसायाम्--डुः । तर गतिं मार्गं वा क्षिणोतीति । क्षुद्रव्याघ्रः (चिल्वटिः) जाङ्गलपशुभेदः (बभ्रुकः) बभ्रुः । नकुलः । (संहनु) शॄस्वृस्निहित्रप्यसि० (उ० १ । १०) सम्+हन हिंसागत्योः—उप्रत्ययः । संगतिम् परस्पर-हिंसनम् (कृण्वानाः) कृवि हिंसाकरणयोः गतौ च–शानच्, उप्रत्ययः, वस्य अकारः । हिंसन्तः । कुर्वाणाः (सरणवाटात्) गमनमार्गात् (सिद्धिः) ऐश्वर्यप्राप्तिः (ब्राह्म्यम्) ब्रह्मन्–ष्यञ् । ब्रह्मसम्बन्धि (वर्षम्) वृषु सेचने–अच् यद्वा, वृतृवदिवचि०

[इन्द्रिय गणों के बीच] ब्रह्मचारी एक पग से खड़ा रहा, दूसरे सहस्र वर्ष [नाड़ियों में] मस्तक पर ही अमृत [जल] की धारा को धारण किया (ब्राह्माणि अष्टाचत्वारिंशतं वर्षसहस्राणि सलिलस्य पृष्ठे--शिवः अभ्यतपत्) ब्रह्मा के अड़तालीस सहस्र वर्ष [सलिलस्य पृष्ठे—अथ० ११ । ५ । २६] जल के ऊपर [विद्या रूप जल में स्नान करने के लिये] शिव [मंगलदायक ब्रह्मचारी] ने सब ओर से तप किया, (तस्मात् तप्तात् तपसः भूयः एव अभ्यतपत्) उस तप किये हुये तप से अधिक भी उसने तप किया। (तत् अपि एताः ऋचः अभिवदन्ति—प्राणापानौ जनयन्--इति ब्राह्मणम्) वह भी यह ऋचायें बतलाती हैं [अथ० ११ । ५ । २४ पाद ३, ४, मन्त्र २५, २६] प्राण और अपान [बलवर्धक श्वास और दोषनाशक प्रश्वास] को प्रकट करता हुआ... यह मन्त्र है, यह ब्राह्मण है ॥ ८ ॥

भावार्थ:—यह कण्डिका [प्राणापानौ जनयन्......] इन अढ़ाई मन्त्रों से आरम्भ होकर इन ही मन्त्रों पर समाप्त होती है, इससे इस कण्डिका का इन मन्त्रों से दृढ़ सम्बन्ध है, वे मन्त्र यह हैं।

प्राणापानौ जनयन्नाद् व्यानं वाचं मनो हृदयं ब्रह्म मे धाम् ॥ २४ ॥ चक्षुः श्रोत्रं यशो अस्मासु धेह्यन्नं रेतो लोहितमुदरम् ॥ २५ ॥ तानि कल्पद् ब्रह्मचारी सलिलस्य पृष्ठे तपोऽतिष्ठत् तप्यमानः समुद्रे। स स्नातो बभ्रुः पिङ्गलः पृथिव्यां बहु रोचते ॥ २६ ॥ अथ० ११ । ५ । २४, म० २५, २६ ॥ वह [ब्रह्मचारी] (प्राणापानौ) प्राण और अपान [श्वास प्रश्वास विद्या] को (आत्) और (व्यानम्) व्यान [सर्वशरीर व्यापक वायु विद्या] को (वाचम्) वाणी [भाषण विद्या] को, (मनः) मन [मनन विद्या] को, (हृदयम्) हृदय [के ज्ञान] को, (ब्रह्म) ब्रह्म [परमेश्वर ज्ञान] को और (मेधाम्) धारणावती बुद्धि को (जनयन्) प्रकट करता हुआ [वर्तमान होता है] ॥ २४ पाद ३, ४ ॥ [हे ब्रह्मचारी !] (अस्मासु) हम लोगों में (चक्षुः) नेत्र, (श्रोत्रम्) कान (यशः) यश, (अन्नम्) अन्न, (रेतः) वीर्य, (लोहितम्) रुधिर और (उदरम्) उदर [की स्वस्थता] (धेहि) धारण कर ॥२५॥ (ब्रह्मचारी) ब्रह्मचारी (तानि) उन [कर्मों] को (कल्पत्) करता हुआ (समुद्रे) समुद्र [के समान गम्भीर ब्रह्मचर्य] में (तपः तप्यमानः) तप तपता हुआ [वीर्य निग्रह आदि तप करता हुआ] (सलिलस्य पृष्ठे) जल के ऊपर [विद्या रूप जल में स्नान करने के लिये] (अतिष्ठत्) स्थित हुआ है। (सः) वह (स्नातः) स्नान किये हुये [स्नातक-ब्रह्मचारी] (बभ्रुः) पोषण करने वाला और (पिङ्गलः) बलवान् होकर (पृथिव्याम्) पृथिवी पर (बहु) बहुत (रोचते) प्रकाशमान होता है ॥ २६ ॥

ऐसे बहुत से मन्त्र हैं जैसे (जीवेम शरदः शतम् ॥ भूयसीः शरदः शतात् ॥ अथ० १९ । ६७ । २,८) अर्थ—सौ वर्षों तक हम जीते रहें ॥ और सौ से भी अधिक

(उ० ३ । ६२) वृञ् वरणे--सप्रत्ययः। संवत्सरः। द्वीपं यथा भारतवर्षम्, हरिवर्षम्। नाडीसमूहः (ब्राह्माणि) ब्रह्मन्--अण्। ब्रह्मसम्बन्धीनि ॥

वर्षों तक ॥ ८ ॥ इस से जाना जाता है कि इस कण्डिका का सम्बन्ध शरीर से, और ब्रह्मा के सहस्र वर्ष, दूसरे सहस्र वर्ष, और अड़तालीस सहस्र वर्ष और उससे अधिक सहस्र वर्ष, शरीर की नाड़ियों से तात्पर्य्य है। वर्ष द्वीप को भी कहते हैं, जैसे भारतवर्ष, हरिवर्ष यहां नाड़ी समूहों को वर्ष माना है। और ऋषि आदि इन्द्रियों के भी नाम हैं, और प्राण और अपान के सम्बन्ध से इन्द्रियां बलवर्धक और दोषनाशक हैं॥ विद्वान् लोग पदों के साथ अर्थ की संगति विचार कर लगा लेवें ॥ ८ ॥

कण्डिका ९ ॥

एकपाद् द्विपद इति वायुरेकपात्तस्याकाशं पादश्चन्द्रमा द्विपात्तस्य पूर्वपक्षापरपक्षौ पादावादित्यस्त्रिपात्तस्येमे लोकाः पादा अग्निः षट्पादस्तस्य पृथिव्यन्तरिक्षं द्यौराप ओषधिवनस्पतय इमानि भूतानि पादास्तेषां सर्वेषां वेदा गतिरात्मा प्रतिष्ठिताश्चतस्रो ब्रह्मणः शाखा, अथो आहुः षडिति मूर्तिराकाशश्चेत्यृचा मूर्त्तिर्याजुषी गतिः साममयन्तेजो भृग्वङ्गिरसामापैतद् ब्रह्मैव यज्ञश्चतुष्पाद् द्विः संस्थित इति। तस्य भृग्वङ्गिरसः संस्थे अथो आहुरेकसंस्थित इति, यद्धोतर्चा मण्डलैः करोति पृथिवीं तेनाप्याययति एतस्यां ह्यग्निश्चरति।

तदप्येतदृचोक्तम्। अग्निवासाः पृथिव्यसि तनूरिति।

यदध्वर्यु र्यजुषा करोत्यन्तरिक्षं तेनाप्याययति तस्मिन् वायुर्न निविशते कतमच्च नाहः इति।

तदप्येतदृचोक्तम्। अन्तरिक्षे पथिभिर्ह्रीयमाणो न निविशते कतमच्च नाहः। अपां योनिः प्रथमजा ऋतस्य क्व स्विज्जातः कुत आबभूवेति।

यदुद्गाता साम्ना करोति दिवं तेनाप्याययति तत्र ह्यादित्यः शुक्रश्चरति।

तदप्येतदृचोक्तम्। उच्चा पतन्तमरुणं सुपर्णमिति। यद् ब्रह्मर्चा काण्डैः करोत्यपस्तेनाप्याययति चन्द्रमा ह्यप्सु चरति।

तदप्येतदृचोक्तम्। चन्द्रमा अप्स्वन्तरिति। तासामोषधिवनस्पतयः काण्डानि, ततो मूलकाण्डपर्णपुष्पफलप्ररोहरसगन्धैर्यज्ञो वर्त्ततेऽद्भिः कर्माणि प्रवर्त्तन्तेऽद्भिः सोमोऽभिषूयते, तद् यद् ब्रह्माणं कर्मणि कर्मण्यामन्त्रयत्यपस्तेनानुजानात्येषो ह्यस्य भागस्तद्यथा भोक्ष्यमाणोऽप एव प्रथममाचामयेदप उपरिष्टादेवं यज्ञोऽद्भिरेव प्रवर्त्ततेऽप्सु संस्थाप्यते तस्माद् ब्रह्मा पुरस्ताद्धोमसंस्थितहोमैर्यज्ञं परिगृह्णात्यन्तरा हि होमैर्यज्ञो वर्त्ततेऽन्तरा हि पुरस्ताद्धोमसंस्थितहोमैर्यज्ञं परिगृह्णात्यन्तरा हि भृग्वङ्गिरसः वेदानोदुह्य भृग्वङ्गिरसः सोमपानं मन्यन्ते सोमात्मको ह्ययं वेदः।

तदप्येतदृचोक्तम्। सोमं मन्यते पपिवानिति।

तद्यथेमां पृथिवीमुदीर्णां[1] ज्योतिषा धूमायमानां वर्षा शमयत्येवम् ब्रह्मा भृग्वङ्गिरोभिर्व्याहृतिभिर्यज्ञस्य विरिष्टं शमयत्यग्निरादित्याय शमयत्येतेऽङ्गिरस एत इदं सर्वं समाप्नुवन्ति, वायुरापश्चन्द्रमा इत्येते भृगव एत इदं सर्वं समाप्याययन्त्येकमेव संस्थं भवतीति ब्राह्मणम् ॥ ९ ॥

१. अत्र "म इति" पू० सं० भ्रष्टः पाठः ॥ सम्पा० ॥

कण्डिका ९॥ होता, अध्वर्यु, उद्गाता और ब्रह्मा का वर्णन।

(एकपाद् द्विपदः इति वायुः एकपात् तस्य आकाशं पादः) एकपाद् द्विपदः—इति–अथ० १३। २। २७, इस मन्त्र में पवन एक पग वाला है, उसका आकाश पग है, (चन्द्रमाः द्विपात् तस्य पूर्वपक्षापरपक्षौ पादौ) चन्द्रमा दो पग वाला है उसके पहिला पाख और दूसरा पाख दो पग हैं, (आदित्यः त्रिपात् तस्य इमे लोकाः पादाः) सूर्य तीन पग वाला है, उसके यह [ऊँचे नीचे और मध्य] लोक पग हैं, (अग्निः षट्पादः तस्य पृथिवी, अन्तरिक्षं द्यौः आपः ओषधिवनस्पतयः इमानि भूतानि पादाः) अग्नि छह पग वाला है, उसके पृथिवी, अन्तरिक्ष, प्रकाश जल, ओषधि और वनस्पतियें यह सब सत्तायें पग हैं। (तेषां सर्वेषां वेदाः गतिः आत्मा प्रतिष्ठिताः) इन सब में वेद [वेद ज्ञान], गति [प्रवृत्ति] और आत्मा ठहरे हुए हैं। (ब्रह्मणः चतस्रः शाखाः, अथो आहुः षट् इति मूर्तिः आकाशः च इति) ब्रह्म [यज्ञ] की चार शाखायें [वायु, चन्द्रमा, सूर्य और अग्नि] हैं, कोई कहते हैं छह हैं मूर्ति और आकाश [मिलाकर]। (ऋचा मूर्तिः याजुषी गतिः साममयं तेजः भृग्वङ्गिरसाम् आप - आपः, एतद् ब्रह्म एव चतुष्पात् यज्ञः द्विः संस्थितः इति) ऋचा [ऋग्वेद विद्या] मूर्ति, याजुषी [यजुर्वेद विद्या] गति, साममय [सामवेद ज्ञान] तेज, और भृगु अङ्गिरसाओं [प्रकाशमान ज्ञान वाले चारों वेदों] का जल है, यह ब्रह्म ही चार पग वाला यज्ञ और दो बार संस्था [ठीक ठीक ठहराव] वाला है। (तस्य भृग्वङ्गिरसः संस्थे अथो आहुः एकसंस्थितः इति) उस भृगु अङ्गिरा [चारों वेद] दो संस्थायें हैं, कोई कहते हैं एक संस्था वाला है।

(यत् होता ऋचां मण्डलैः करोति, पृथिवीं तेन आप्याययति एतस्यां हि अग्निः चरति) जो होता ऋचाओं [ऋग्वेद मन्त्रों] के समूहों से कर्म करता है पृथिवी को उसके द्वारा पुष्ट करता है, इस [पृथिवी] में ही अग्नि विचरता है। (तत् अपि एतद् ऋचा उक्तम्। अग्निवासाः पृथिवी असितज्ञूः इति) यह भी इस ऋचा करके कहा गया है—अग्निवासाः पृथिव्यसितज्ञूः—अथ० १२। १। २१॥

(यत् अध्वर्य्युः यजुषा करोति अन्तरिक्षं तेन आप्याययति तस्मिन् वायुः कतमत् चन अहः न निविशते इति) जो अध्वर्य्यु यजुर्वेद से कर्म करता है अन्तरिक्ष को

९—(भूतानि) सत्तामात्राणि (गतिः) प्रवृत्तिः (आत्मा) प्राणः (प्रतिष्ठिताः) स्थापिताः (ब्रह्मणः) यज्ञस्य (मूर्तिः) आकारः (ऋचा) ऋग्मन्त्रेण (याजुषी) यजुः—अण्, ङीप्। संगतिकरणयुक्ता। यजुर्वेदमन्त्रसम्बन्धिनी (साममयम्) सामवेदमन्त्रसंबद्धम् (भृग्वङ्गिरसाम्) प्रकाशमानज्ञानानां चतुर्वेदानाम् (आप) विभक्तिलोपः। (आपः) जलानि (संस्थितः) सम्यक्स्थितः। समाप्तियुक्तः (भृग्वङ्गिरसः) चतुर्वेदाः (संस्थे) समाप्ति यज्ञ विशेषद्वयम् (ऋचाम्) ऋग्मन्त्राणाम् (मण्डलैः) समूहैः (करोति) यज्ञकर्म करोति (अग्निवासाः) वसेर्णित् (उ० ४। २१८) वस निवासे आच्छादने च—असुन्। अग्निना तापेन सह निवासो यस्याः सा। यद्वा तापो वस्त्रं यस्याः सा (असितज्ञूः)

उससे वह पुष्ट करता है, उसमें वायु किसी दिन भी नहीं बैठता [रुकता] है। (तत् अपि एतत् ऋचा उक्तम् । अन्तरिक्षे पथिभिः ह्रीयमाणः न निविशते कतमत्चन अहः । अपां योनिः प्रथमजाः ऋतस्य क्व स्वित् जातः कुतः आबभूव इति) यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । १६८ । ३ । यह भी इस ऋचा करके कहा गया है—अन्तरिक्षे······ । अर्थ—अन्तरिक्ष में अनेक मार्गों से ले जाया गया [वायु] किसी दिन भी नहीं बैठता है। जल का कारण और सत्य नियम से पहिले पदार्थों में उत्पन्न होने वाला वह कहां उत्पन्न हुआ और कहां से प्राप्त हुआ है।

(यत् उद्गाता साम्ना करोति दिवं तेन आप्याययति तत्र हि शुक्रः आदित्यः चरति) जो उद्गाता सामवेद से कर्म करता है सूर्य के प्रकाश को उससे वह पुष्ट करता है, उस [प्रकाश] में ही वीर्यवान् सूर्य विचरता है। (तत् अपि एतत् ऋचा उक्तम् । उच्चा पतन्तम् अरुणं सुपर्णम् इति अथ० १३ । २ । ३६) यह भी इस ऋचा करके कहा गया है - उच्चा पतन्तमरुणं सुपर्णम् इति ॥

(यत् ब्रह्मा ऋचां काण्डैः करोति अपः तेन आप्याययति, चन्द्रमाः हि अप्सु चरति) जो ब्रह्मा [चारों वेद जानने वाला] ऋचाओं [चारों वेदों] के काण्डों [भागों] से कर्म, करता है, जल को उससे वह पुष्ट करता है, चन्द्रमा ही जल में विचरता है। (तत् अपि एतत् ऋचा उक्तम् । चन्द्रमा अप्स्वन्तः इति) वह भी इस ऋचा करके कहा गया है—चन्द्रमा अप्स्वन्तः—इति अ० १८ । ४ । ८९ । (तासाम् ओषधिवनस्पतयः काण्डानि, ततः मूलकाण्डपर्णपुष्पफलप्ररोहरसगन्धैः यज्ञः वर्तते) उन [जलों] की ओषधिवनस्पतियां शाखायें हैं, उससे जड़ शाखा पत्ता फूल फल अङ्कुर रस और गन्ध के साथ यज्ञ होता है, (अद्भिः कर्माणि प्रवर्तन्ते, अद्भिः सोमो ऽभिषूयते) जल से कर्म होते रहते हैं, जल से सोम [अमृत रस] निचोड़ा जाता है। (तत् यत् ब्रह्माणम् कर्मणि कर्मणि आमन्त्रयति, अपः तेन अनुजानाति) वह जब ब्रह्मा को काम काम में बुलाता है जल की उससे वह आज्ञा देता है। (एषः हि अस्य भागः तत् यथा भोक्ष्यमाणः अपः एव प्रथमम् आचामयेत् अपः उपरिष्टात्, एवं यज्ञः अद्भिः एव प्रवर्तते अप्सु संस्थाप्यते) यही इस [ब्रह्मा] का भाग है, सो जैसे भोजन चाहता हुआ पुरुष जल को ही पहिले आचमन करे और जल को ही उपरान्त में, इसी प्रकार यज्ञ जल से ही चलता रहता है और जल में समाप्त होता है। (तस्मात् पुरस्तात्—होम संस्थितहोमैः अन्तरा यज्ञः वर्तते, ब्रह्मा हि पुरस्तात्—होम संस्थितहोमैः अन्तरा यज्ञं परिगृह्णाति) इस कारण पुरस्तात्-होम और संस्थित-होमों

वेदे । अ+षिञ् बन्धने—क्तः । अन्दूदृम्फूजम्बू० (उ० १ । ९३) ज्ञा विज्ञापने—कूः । अबद्धं कर्म ज्ञापयति बोधयति नियोजयति वा मा (निविशते) उपविशते (ह्रीयमाणः) नीयमानः (प्रथमजाः) प्रथमेषु जातः (ऋतस्य) सत्यनियमस्य (उच्चायतं तम्) उच्चा पतन्तम्—इति वेदे । उच्चैः ऐश्वर्यं प्राप्नुवन्तम् (ब्रह्मा) चतुर्वेदवेत्ता (काण्डैः) क्वादिभ्यः कित् (उ० १ । ११५) कमु कान्तौ—डप्रत्ययो दीर्घत्वंच । ग्रन्थभागैः (अप्सु अन्तः) जलेषु मध्ये (आमन्त्रयति) संबोधयति (अपः) जलानि (अनुजानाति) आज्ञापयति (भोक्ष्यमाणः) भोक्तुम् इष्यमाणः (उपरिष्टात्)

के बीच में यज्ञ होता है, ब्रह्मा ही पुरस्तात्-होम और संस्थित-होमों के बीच में यज्ञ को धरता है। (भृग्वङ्गिरसः वेदान् हि ओदुह्य भृग्वङ्गिरसः सोमपानं मन्यन्ते, सोमात्मकः हि अयं वेदः) प्रकाशमान ज्ञान वाले वेदों को ही भले प्रकार प्राप्त करके प्रकाशमान ज्ञानवाले मनुष्य सोम पान को जानते हैं, सोमात्मक [अमृतमय] यह वेद है। (तत् अपि एतत् ऋचा उक्तम्। सोमं मन्यते पपिवान् इति) वह भी इस ऋचा से कहा गया है—सोमं मन्यते पपिवान्......अथ० १४। १। ३।

(तत् यथा इमाम् उदीर्णां ज्योतिषा धूमायमानां पृथिवीं वर्षा शमयति एवं ब्रह्मा भृग्वङ्गिरोभिः व्याहृतिभिः यज्ञस्य विरिष्टं शमयति) सो जैसे इस उदार, तेज से धुआं उठती हुई पृथिवी को वर्षा शान्त करती है, वैसे ही ब्रह्मा प्रकाशमान ज्ञान-वाले वेदों और व्याहृतियों से यज्ञ के उपद्रव को शान्त करता है। (अग्निः आदित्याय शमयति एते एते अङ्गिरसः इदं सर्वं समाप्नुवन्ति, वायुः आपः चन्द्रमाः इति एते एते भृगवः इदं सर्वं समाप्याययन्ति, एकम् एव संस्थं भवति इति ब्राह्मणम्) [प्रदत्त आहुति के रस को] अग्नि आदित्य को पहुँचाने हेतु [द्रव्य के] भस्म करता[1] है। यह सब विद्वान् लोग इस सब कर्म को पूरा करते हैं। वायुः आपः चन्द्रमाः [यह ब्राह्मण वचन है इस से] यह सब भृगु [प्रकाशमान लोग] इस सब [जगत्] को यथावत् पुष्ट करते हैं, एक ही संस्था होता है--यह ब्राह्मण है॥ ९॥

भावार्थः-मनुष्यों को योग्य है कि वे ऋग्वेदी को होता, यजुर्वेदी को अध्वर्यु सामवेदी को उद्गाता और चारों वेद जानने वाले को ब्रह्मा वरण करके यज्ञ की सिद्धि करें॥ ९॥

विशेषः--प्रतीक वाले मंत्र अर्थ सहित नीचे दिए जाते हैं।

१-एकपाद् द्विपदो भूयो वि चक्रमे द्विपात् त्रिपादमभ्येति पश्चात्। द्विपाद्ध षट्पदो भूयो वि चक्रमे त एक पदस्तन्वं समासते—अथ० १३। २। २७। (एकपात्) एक रस व्यापक परमेश्वर (द्विपदः) दो प्रकार की स्थिति वाले [जङ्गम स्थावर जगत्] से (भूयः) अधिक आगे (वि) फैल कर (चक्रमे) चला गया, (द्विपात्) दो [भूत भविष्यत्] में गति वाला परमात्मा (पश्चात्) फिर (त्रिपादम्) तीन [प्रकाशमान, अप्रकाशमान और मध्य लोकों] में व्याप्ति वाले संसार में (अभि) सब ओर से (एति) प्राप्त होता है, (द्विपात्) दो [जङ्गम और स्थावर जगत्] में व्यापक ईश्वर (ह) निश्चय करके (षट्पदः) छह [पूर्व दक्षिण पश्चिम उत्तर ऊंची और नीची दिशाओं] में स्थिति वाले ब्रह्माण्ड से (भूयः अधिक आगे (वि चक्रमे) निकल गया, (ते) वे [योगी जन] (एकपदः) एक रस व्यापक परमेश्वर की (तन्वम्) उपकार क्रिया को (सम् निरन्तर (आसते) सेवते हैं।

ऊर्ध्वम् (संस्थाप्यते) समाप्यते (ओदुह्य) आ+उत्+वह प्रापणे--ल्यप्। समन्तात् प्राप्य (भृग्वङ्गिरसः) प्रकाशमानज्ञानयुक्ता विद्वांसः (वेदः) चतुर्वेदसमूहः (उदीर्णाम्) उत्+ऋ गतौ—क्तः। उदाराम्। महतीम् (वर्षम्) वृष्टिः (विरिष्टम्) दोषम्॥

---

१. इस अर्थ की तुलना मनुस्मृति ३।७६ से करें—
अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते॥ सम्पा०॥

२—अग्निवासाः पृथिव्यसितज्ञूस्त्विषीमन्तं संशितं मा कृणोतु—अथ० १२ । १ । २१ (अग्निवासाः) अग्नि के साथ निवास करने वाली [अथवा अग्नि के वस्त्र वाली], (असितज्ञूः) बन्धन रहित कर्म को जताने वाली (पृथिवी) पृथिवी (मा) मुझको (त्विषीमन्तम्) तेजस्वी और (संशितम्) तीक्ष्ण [फुरतीला] (कृणोतु) करे।

३—अन्तरिक्षे पथिभिरीयमानो न निविशते कतमच्चनाहः। अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव—ऋग्० १० । १६८ । ३ (अन्तरिक्षे) अन्तरिक्ष में (पथिभिः) अनेक मार्गों से (ईयमानः) चलता हुआ [वायु] (कतमत् चन अहः) किसी दिन भी (न) नहीं (नि विशते) बैठता है। (अपाम्) जल का (सखा) सखा [वायु] (प्रथमजाः) पहले पदार्थों में उत्पन्न होने वाला (ऋतावा) सत्य नियम वाला वह (क्व स्वित्) कहां पर (जातः) उत्पन्न हुआ और (कुतः) कहां से (आ बभूव) प्राप्त हुआ है ॥

४—उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्। पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्ददत्रिः—अथ० १३ । २ । ३६ (उच्चा) ऊँचे (पतन्तम्) ऐश्वर्यवान् होते हुये, (अरुणम्) सर्वव्यापक, (सुपर्णम्) बड़े पालने वाले, (दिवः) व्यवहार के (मध्ये) मध्य (तरणिम्) पार करने वाले, (भ्राजमानम्) प्रकाशमान, (सवितारम्) सर्वप्रेरक (त्वा) तुझ [परमेश्वर] को (पश्याम) हम देखें, (यम्) जिसको (अजस्रम्) निरन्तर (ज्योतिः) ज्योति (आहुः) वे [विद्वान् लोग] बताते हैं (यत्) जिस [ज्योति] को (अत्रिः) निरन्तर ज्ञानी [योगी पुरुष] ने (अविन्दत्) पाया है ॥

५—चन्द्रमा अप्स्व १ न्तरा सुपर्णो धावते दिवि। न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी—अथ० १८ । ४ । ८९, ऋग्० १ । १०५ । १, साम० पू० ५ । ३ । ६ । (सुपर्णः) सुन्दर पूर्ति करने वाला (चन्द्रमाः) चन्द्रलोक (अप्सु अन्तः) [अपने] जलों के भीतर (दिवि) सूर्य के प्रकाश में (आ धावते) दौड़ता रहता है। (हिरण्यनेमयः) हे प्रकाशस्वरूप परमात्मा में सीमा रखने वाले (विद्युतः) विविध प्रकाशमान [सब लोकों!] (वः) तुम्हारे (पदमु) ठहराव को (न विन्दन्ति) नहीं पाते हैं, (रोदसी) हे सूर्य के समान स्त्री पुरुषो! (मे) मेरे (अस्य) इस [वचन] का (वित्तम्) तुम दोनों ज्ञान करो ॥

६—सोमं मन्यते पपिवान् यत् संपिषन्त्योषधिम्। सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति पार्थिवः—अथ० १४ । १ । ३, ऋग्० १० । ८५ । ३ । (सोमम्) चन्द्रमा [के अमृत] को (पपिवान्) मैने पी लिया [यह बात मनुष्य] (मन्यते) मानता है, (यत्) जब (ओषधिम्) ओषधि [अन्न सोमलता आदि] को (संपिषन्ति) वे [मनुष्य] पीसते हैं। (यम्) जिस (सोमम्) जगत्-स्रष्टा परमात्मा को (ब्रह्माणः) ब्रह्मज्ञानी लोग (विदुः) जानते हैं, (तस्य)

उसका [अनुभव] (पार्थिवः) पृथिवी [के विषय] में आसक्त पुरुष (न) नहीं (अश्नाति) भोगता है ॥

कण्डिका १० ॥

विचारी ह वै काबन्धिः कबन्धस्याथर्वणस्य पुत्रो मेधावी मीमांसकोऽनूचान आस, स ह स्वेनातिमानेन मानुषं वित्तं नेयाय, तं मातोवाच, त एवैतदन्नमवोचंस्त इममेषु कुरुपञ्चालेषु अङ्गमगधेषु काशिकौशल्येषु शाल्वमत्स्येषु शवसोशीनरेषु उदीच्येष्वन्नमदन्तीत्यथ वयं तवैवातिमानेनानाद्यास्मो वत्स वाहनमन्विच्छेति स मान्धातुर्यौवनाश्वस्य सार्वभौमस्य राज्ञः सोमं प्रसूतमाजगाम, स सदोऽनुप्रविश्यर्त्विजश्च यजमानश्चामन्त्रयामास, तद्याः प्राच्यो नद्यो वहन्ति याश्च दक्षिणाच्यो याश्च प्रतीच्यो याश्च उदीच्यस्ताः सर्वाः पृथङ्नामधेया इत्याचक्षते, तासां समुद्रमभिपद्यमानानां छिद्यते नामधेयं समुद्र इत्याचक्षते, एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्याताः सपुराणाः सस्वराः ससंस्काराः सनिरुक्ताः सानुशासनाः सानुमार्जनाः सवाकोवाक्यास्तेषां यज्ञमभिपद्यमानानां छिद्यते नामधेयं यज्ञ इत्येवाचक्षते ॥ १० ॥

कण्डिका १० ॥ काबन्धि की मान्धाता के यज्ञ में यज्ञविषयक वार्त्ता ॥

(विचारी ह वै काबन्धिः आथर्वणस्य कबन्धस्य पुत्रः मेधावी मीमांसकः अनूचानः आस) तत्त्व निर्णय करने वाला काबन्धि, आथर्वण [निश्चल ब्रह्मज्ञान में श्रद्धा वाले] कबन्ध [ब्रह्म में संयम करने वाले ऋषि] का पुत्र अटल बुद्धि वाला, मीमांसा शास्त्र जानने वाला, साङ्गोपाङ्ग वेद पढ़ा हुआ था । (सः ह स्वेन अतिमानेन मानुषं वित्तं न इयाय) उसने अपने अति घमण्ड से मनुष्य योग्य धन न पाया । (तं माता उवाच—ते एव एतत् अन्नम् अवोचन्) उससे माता बोली—उन्होंने ही इस अन्न के विषय में कहा है । (ते इमम् = इदम् अन्नम् एषु कुरुपञ्चालेषु अङ्गमगधेषु काशिकौशल्येषु शाल्वमत्स्येषु शवसोशीनरेषु उदीच्येषु अदन्ति इति) वे लोग इस अन्न को इन कुरुपञ्चालों में, अङ्गमगधों में, काशिकौशल्यों में शाल्वमत्स्यों में शवस उशीनरों में, उत्तरदेशवासियों में खाते हैं । (अथ वयं तव एव अतिमानेन

१०—(विचारी) तत्त्वनिर्णेता (काबन्धिः) अत इञ् (पा० ४ । १ । ९५) कबन्ध—इञ् । कबन्धपुत्रः । ऋषिविशेषः (कबन्धस्य) के ब्रह्मणि बन्धः संयमो यस्य तस्य । ऋषिविशेषस्य (आथर्वणस्य) निश्चलब्रह्मज्ञाननिष्ठस्य (मीमांसकः) मीमांसाशास्त्रनिपुणः (अनूचानः) उपेयिवाननाश्वाननूचानश्च (पा० ३ । २ । १०९) अनु + वच परिभाषणे—कानच् । साङ्गवेदविचक्षणः (वित्तम्) धनम् (इयाय) इण् गतौ—लिट् । प्राप (उदीच्येषु) द्युप्रागपागुदक्प्रतीचो यत् (पा० ४ । २ । १०१)

अनाद्याः स्मः वत्स वाहनम् अन्विच्छ इति) सो हम तेरे ही अति घमण्ड से बिना अन्न हैं, हे बच्चा ! रथ ढूंढ़कर ला । (सः यौवनाश्वस्य सार्वभौमस्य राज्ञः मान्धातुः प्रसुतं सोमम् आजगाम) वह युवनाश्व के पुत्र, चक्रवर्ती राजा मान्धाता के निचोड़े हुये सोम [सोमयज्ञ] में आया । (स सदः अनुप्रविश्य ऋत्विजः च यजमानं च आमन्त्रयामास) वह यज्ञशाला में प्रवेश करके ऋत्विजों और यजमान [मान्धाता] से बोला—(तत् याः प्राच्यः याः च दक्षिणाच्यः याः च प्रतीच्यः याः च उदीच्यः नद्यः वहन्ति ताः सर्वाः पृथङ्नामधेयाः इति आचक्षते, तासां समुद्रम् अभिपद्यमानानां नामधेयं छिद्यते समुद्रः इति आचक्षते) सो जो पूर्व ओर वाली और जो दक्षिण ओर वाली, और जो पश्चिम ओर वाली, और जो उत्तर ओर वाली नदियां बहती हैं, वे सब अलग अलग नामवाली हैं, ऐसा कहते हैं, उन समुद्र में पहुँचने वालियों का नाम मिट जाता है, यह समुद्र है—ऐसा कहते हैं, (एवम् इमे सर्वे वेदाः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्याताः सपुराणाः सस्वराः ससंस्काराः सनिरुक्ताः सानुशासनाः सानुमार्जनाः सवाकोवाक्याः निर्मिताः तेषां यज्ञम् अभिपद्यमानानां नामधेयं छिद्यते यज्ञः इति एव आचक्षते) ऐसे ही यह सब वेद कल्पों सहित रहस्यों सहित, ब्राह्मण ग्रन्थों सहित, उपनिषदों सहित, इतिहासों सहित, व्याख्यानों सहित, पुराणों सहित, स्वरों सहित, संस्कारों सहित, निरुक्तों [निर्वचनों] सहित, अनुशासनों [धर्मशास्त्रों] सहित, अनुमार्जनों [संशोधनों] सहित, वाकोवाक्यों [द्र० १ । २१] सहित बने हुये हैं, उन यज्ञ में पहुँचते हुओं का नाम मिट जाता है, यह यज्ञ है ऐसा ही कहते हैं ॥ १० ॥

भावार्थः——स्पष्ट है ॥ १० ॥

कण्डिका ११ ॥

भूमेर्ह वै एतद्विच्छिन्नं देवयजनं यदप्राक्प्रवणं यदनुदक्प्रवणं यत् कृत्रिमं यत्समविषममिदं ह त्वेव देवयजनं यत्समं समूलमविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णमिव भवति, यत्र ब्राह्मणस्य ब्राह्मणतां विद्याद् ब्रह्मा ब्रह्मत्वं करोतीति वोचे[1] छन्दस्तन्न विन्दामो येनोत्तरमेमहीति । तान् ह पप्रच्छ किं विद्वान् होता हौत्रं करोति, किं विद्वानध्वर्य्युराध्वर्य्यवं करोति, किं विद्वानुद्गातौद्गात्रं करोति, किं विद्वान् ब्रह्मा ब्रह्मत्वं करोतीति वोचे छन्दस्तन्न विन्दामो येनोत्तरमेमहीति । ते ब्रूमो वागेव होता हौत्रं करोति वाचो हि स्तोमाश्च वषट्काराश्चा-

---

उदच्——यत् । उत्तरदेशभवेषु (अनाद्याः) खाद्यवस्तुरहिताः (मान्धातुः) मान पूजायाम्—क्विप् + दधातेः—तृच् । सत्कारधारकस्य राजविशेषस्य (यौवनाश्वस्य) युवनाश्वपुत्रस्य (सार्वभौमस्य) चक्रवर्तिनृपस्य । राजराजेश्वरस्य (प्रसूतम्) षूङ् प्राणिप्रसवे—क्तः । निष्पन्नम् । निष्पीडितम् (सदः) यज्ञशालाम् (आमन्त्रयामास) संबोधितवान् (अभिपद्यमानानाम्) प्राप्यमाणानाम् (सान्वाख्याताः) सव्याख्यानाः (सानुमार्जनाः) संशोधनाः ॥

---

१. 'अवोचम्' इति भवितव्यम् । भ्रष्टोऽयं पाठः प्रतीयते ॥ सम्पा० ॥

भिसम्पद्यन्ते, ते ब्रूमो वागेव होता वाग् ब्रह्म वाक् देव इति । प्राणापानाभ्या-मेवाध्वर्यु राध्वर्य्यवं करोति, प्राणः प्रणीतानि ह भूतानि प्राणः प्रणीताः प्रणी-तास्ते ब्रूमः प्राणापानावेवाध्वर्य्यू प्राणापानौ ब्रह्म प्राणापानौ देव इति । चक्षुषैवो-द्गाता औद्गात्रं करोति चक्षुषा हीमानि भूतानि पश्यन्त्यथो चक्षुरेवोद्गाता चक्षुर्ब्रह्म चक्षुर्देव इति । मनसैव ब्रह्मा ब्रह्मत्वं करोति मनसा हि तिर्य्यक् च दिश ऊर्ध्वं च यच्च किञ्च मनसैव करोति तद् ब्रह्म ते ब्रूमो मन एव ब्रह्मा मनो ब्रह्म मनो देव इति ॥ ११ ॥

कण्डिका ११ ॥ काबन्धि के देवयजन और ऋत्विजों के विषय में प्रश्नोत्तर ॥

(भूमेः ह वै एतत् विच्छिन्नं देवयजनं यत् अप्राक्प्रवणं यत् अनुदक्प्र-वणं यत् कृत्रिमं यत् समविषमम्) यह भूमि से बांटा गया देवयजन [विद्वानों का पूजास्थान] है, जो पूर्व की ओर न झुका हुआ और न उत्तर की ओर झुका हुआ है, जो बना हुआ है, और जो चौरस और ऊंचा नीचा है। (इदं ह तु एच देवयजनं यत् समं समूलम् अविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णम् इव भवति, यत्र ब्राह्मणस्य ब्राह्मणतां विद्यात् ब्रह्मा ब्रह्मत्वं करोति इति) यह तो देवयजन है जो चौरस, नेव [नींव] वाला. बिना जला हुआ, प्रतिष्ठा वाला, पूर्व और उत्तर को झुका हुआ, चौरस, और एक सा फैला हुआ सा है, और जिसमें ब्राह्मण की ब्राह्मणता जानी जावे, [वहाँ] ब्रह्मा ब्रह्मत्व [ब्रह्मा का काम] करता है। (छन्दः वोचे तत् न विन्दामः येन उत्तरम् एमहि इति) मैंने वेदज्ञान कहा है, उसको हम [वैसा] नहीं पाते हैं जिससे हम उत्तर पावें। (तान् ह पप्रच्छ किं विद्वान् होता हौत्रं करोति, किं विद्वान् अध्वर्य्युः आध्वर्य्यवं करोति, किं विद्वान् उद्गाता औद्गात्रं करोति, किं विद्वान् ब्रह्मा ब्रह्मत्वं करोति इति) उनसे उसने पूछा – कौन विद्वान् होता होतृकर्म करता है, कौन विद्वान् अध्वर्य्यु अध्वर्य्यु कर्म करता है, कौन विद्वान् उद्गाता उद्गातृ कर्म करता है, कौन विद्वान् ब्रह्मा ब्रह्मा का कर्म करता है। (छन्दः वोचे तत् न विन्दामः येन उत्तरम् एमहि इति) मैंने वेदज्ञान कहा है, उसको हम [वैसा] नहीं पाते हैं जिससे हम उत्तर पावें। [उन्होंने उत्तर दिया] (ते ब्रूमः वाक् एव

११--(विच्छिन्नम्) विभक्तम् (देवयजनम्) विदुषां पूजास्थानम् (अप्राक्-प्रवणम्) प्रुङ् गतौ--ल्युट्। अपूर्वदिक्क्रमनिम्नम् (अनुदक्प्रवणम्) अनुत्त-रदिक्क्रमनिम्नम् (कृत्रिमम्) ड्वितः क्त्रिः (पा० ३।३।८८) डुकृञ् करणे--क्त्रिः। क्त्रेर्मम्नित्यम् (पा० ४।४।२०) इति मप्। करणेन निर्वृत्तम्। रचितम् (समविषमम्) समं समानं च विषमम् असमानम् च। उच्चनीचं च (अविदग्धम्) वि+दह भस्मीकरणे—क्तः। अविशेषेण दग्धम्। अभस्मीकृतम् (विद्यात्) जानीयात् (वोचे) अवोचम्। अहं कथितवान् (छन्दः) वेदज्ञानम् (विन्दामः)

वाक् एव होता वाक् ब्रह्म वाक् देवः इति) तुझसे हम कहते हैं--वाणी ही होता [होकर] होतृ कर्म करती है, वाणियों को ही स्तोम [स्तुति के मन्त्र और वषट्कार आहुतियां] प्राप्त होती हैं, तुझसे हम कहते हैं—वाणी ही होता, वाणी ब्रह्म [वेदज्ञान], और वाणी देवता है। (प्राणापानाभ्याम् एव अध्वर्युः आध्वर्य्यवं करोति, प्राणः प्रणीतानि ह भूतानि, प्राणः प्रणीताः प्रणीताः-ते ब्रूमः प्राणापानौ एव अध्वर्य्यू, प्राणापानौ ब्रह्म, प्राणापानौ देवः इति) दोनों प्राण और अपान [श्वास और प्रश्वास] से ही अध्वर्य्यु अध्वर्य्यु का काम करता है, प्राण ही अच्छे प्रकार लाये गये जीव हैं, प्राण ही अच्छे प्रकार लाये गये प्रणीता [यज्ञपात्रविशेष] हैं--तुझसे हम कहते हैं--दोनों प्राण और अपान ही दो अध्वर्य्यु हैं, प्राण और अपान ब्रह्म [वेदज्ञान], प्राण और अपान देवता हैं। (चक्षुषा एव उद्गाता औद्गात्रं करोति, चक्षुषा हि इमानि भूतानि पश्यन्ति, अथो चक्षुः एव उद्गाता, चक्षुः ब्रह्म, चक्षुः देवः इति) आंख से ही उद्गाता उद्गाता का काम करता है, आंख से ही यह सब जीव देखते हैं, इसलिये आंख ही उद्गाता, आंख ही ब्रह्म [वेदज्ञान] और आंख ही देवता है। (मनसा एव ब्रह्मा ब्रह्मत्वं करोति, मनसा हि दिशः तिर्य्यक् च ऊर्द्ध्वं च यत् च किं च मनसा एव करोति तत् ब्रह्म, ते ब्रूमः मनः एव ब्रह्मा मनः ब्रह्म मनः देवः इति) मन से ही ब्रह्मा ब्रह्मा का काम करता है, मन से ही दिशा के तिरछे काम और ऊंचे काम को और भी जो कुछ है [उसको भी] मन से ही करता है, वह ब्रह्म [वेदज्ञान] है, तुझसे हम कहते हैं—मन ही ब्रह्मा, मन ब्रह्म [वेदज्ञान] और मन देवता है ॥ ११ ॥

भावार्थः—इस कण्डिका में भौतिक क्रिया के साथ आत्मिक यज्ञ का वर्णन है। और इसका सम्बन्ध अगली कण्डिका से है ॥ ११ ॥

कण्डिका १२ ॥

तद्यथा ह वा इदं यजमानश्च याजयितारश्च दिवं ब्रूयुः पृथिवीति, पृथिवीं वाक् द्यौरिति ब्रूयुस्तदन्यो नानुजानात्येतामेवं नानुजानाति यदेतद् ब्रूयादथ नु कथमिति होतेत्येव होतारं ब्रूयाद्वागिति वाचं, ब्रह्मेति ब्रह्म, देव इति देवमध्वर्यु-रित्येवाध्वर्युं ब्रूयात्, प्राणापानाविति प्राणापानौ, ब्रह्मेति ब्रह्म, देव इति

प्राप्नुमः (एमहि) आ + इण् गतौ—विधिलिङ्। वयं प्राप्नुयाम (हौत्रम्) होतृ—अण्। होतुः कर्म (वषट्काराः[१]) वह प्रापणे डषटि। आहुतय देवयज्ञाः। (वाचः) वाण्यः (सम्पद्यन्ते) प्राप्नुवन्ति (ते) तुभ्यम् (प्रणीतानि) प्र + णीञ् प्रापणे—क्तः। प्रकर्षेण प्रापितानि (प्रणीताः) यज्ञपात्रविशेषाः ॥

१—वस्तुतः यह अव्युत्पन्न शब्द है। 'कार' प्रत्यय से सूचित होता है कि यह निरर्थक शब्द है। क्योंकि कार प्रत्यय का प्रयोग सदा केवल वर्णमात्र की सूचना देने के लिये ही आता है ॥ सम्पा० ॥

देवमुद्गातेत्येवोद्गातारं ब्रूयाच्चक्षुरिति चक्षुर्ब्रह्मेति ब्रह्म, देव इति देवं ब्रह्मेत्येव ब्रह्माणं ब्रूयान्मन इति मनो ब्रह्मेति ब्रह्म देव इति देवम् ॥ १२ ॥

कण्डिका १२ ॥ कावन्धि का अधिक यज्ञ विषयक विचार ॥

(तद् यथा ह वै इदम् यजमानः च याजयितारः च दिवं ब्रूयुः पृथिवी इति, पृथिवीं ब्रूयुः वाक् द्यौः इति) [कावन्धि बोला] सो जैसे यह बात है कि यजमान और याजक लोग प्रकाश को कहें यह पृथिवी है, और पृथिवी को कहें वह वाणी [वा] प्रकाश है। (तद् अन्यः न अनुजानाति एताम् एवं न अनुजानाति यत् एतत् ब्रूयात् अथ नु कथम् इति) उसको दूसरा पुरुष नहीं जान लेता है, इस [वार्ता] को ऐसा नहीं जान लेता है कि इसको [वैसा ही] वह कहे, फिर यह कैसे हो सकता है। (होता इति एव होतारं ब्रूयात्, वाक् इति वाचम्, ब्रह्म इति ब्रह्म, देवः इति देवम्, अध्वर्युः इति एव अध्वर्युं ब्रूयात्) यह होता [होम करने वाला] ही है, होता को कहे, यह वाणी है वाणी को, यह ब्रह्म [वेदज्ञान] है ब्रह्म [वेदज्ञान] को, यह देवता है देवता को, और यह अध्वर्यु ही है अध्वर्यु को बतावे। (प्राणापानौ इति प्राणापानौ, ब्रह्म इति ब्रह्म देवः इति देवं, उद्गाता इति एव उद्गातारं ब्रूयात्) यह प्राण और अपान हैं प्राण और अपान को, यह ब्रह्म है ब्रह्म को, यह देवता है देवता को, और यह उदगाता ही है उद्गाता को ही बतावे। (चक्षुः इति चक्षुः, ब्रह्म इति ब्रह्म, देवः इति देवम्, ब्रह्मा इति एव ब्रह्माणम् ब्रूयात्) यह आंख है आंख को, यह ब्रह्म है ब्रह्म को, यह देवता है देवता को, और यह ब्रह्मा ही है ब्रह्मा को बतावे। (मनः इति मनः, ब्रह्म इति ब्रह्म, देवः इति देवम् ब्रूयात्) यह मन है मन को, यह ब्रह्म [वेदज्ञान] है ब्रह्म [वेदज्ञान] को, यह देवता है देवता को [बतावे] ॥ १२ ॥

भावार्थः—मनुष्य को यथार्थ और स्पष्ट बोलना चाहिये ॥ १२ ॥

कण्डिका १३ ॥

नाना प्रवचनानि ह वा एतानि भूतानि भवन्ति ये चैवासोमपं याजयन्ति ये च सुरापं ये च ब्राह्मणं विच्छिन्नं सोमयाजिनं तं प्रातः समित्पाणय उपोदेयुरुपायामो भवन्तमिति, किमर्थमिति यानेव नो भवांस्तान् ह्यः प्रश्नानपृच्छत्तानेव नो भवान् व्याचक्षीतेति, तथेति तेभ्य एतान् प्रश्नान् व्याचष्टे, तद्येन ह वा इदं विद्यमानश्चाविद्यमानश्चाभिनिदधाति तद् ब्रह्म तद्यो वेद स ब्राह्मणोऽधीयानोऽधीत्याचक्षत इति ब्राह्मणम् ॥ १३ ॥

कण्डिका १३ ॥ कावन्धि का आगे यज्ञ विषयक विचार ॥

(नाना प्रवचनानि ह वै एतानि भूतानि भवन्ति ये च एव असोमपं ये च सुरापं ये च विच्छिन्नं ब्राह्मणं सोमयाजिनं याजयन्ति) अनेक प्रकार से प्रसिद्ध बातें

१२—(दिवम्) प्रकाशम् (ब्रूयुः) कथयेयुः (अनुजानाति) निरन्तरम् अनुभवति ॥

और यह सब जीव होते हैं, जो [जीव] सोम रस को न पीने वाले से, और जो सुरा [मद्य] पीने वाले से, और जो वेद मार्ग से अलग किये हुये सोम यज्ञ कराने वाले ब्राह्मण से यज्ञ कराते हैं, (तं प्रातः समित्पाणयः उपोदेयुः, भवन्तम् उपयामः इति) उस [प्रसिद्ध विद्वान्] के पास प्रातः काल [यज्ञ के लिये] समिधा हाथ में लिये हुये जावें [और कहें] हम आपके पास आये हैं। (किमर्थम् इति) [वह कहे] किस लिये (यान् एव तान् प्रश्नान् नः भवान् ह्यः अपृच्छत् तान् एव नः भवान् व्याचक्षीत इति) जिन ही उन प्रश्नों को हमसे आप ने पूछा है, उनको ही हमें आप बताइये। (तथा इति) [उन्होंने कहा] ऐसा ही हो। (तेभ्यः एतान् प्रश्नान् व्याचष्टे) [और] उनको यह सब प्रश्न बताये। (तत् येन ह वै इदं विद्यमानं च अविद्यमानं च अभिनिदधाति तत् ब्रह्म) सो जिस करके ही यह वर्तमान और अवर्तमान [भूत और भविष्य] सब ओर से धारण किया जाता है वह ब्रह्म है। (तत् यः वेद सः अधीयानः ब्राह्मणः अधीत्य आचक्षते इति ब्राह्मणम्) उसको जो जानता है वह पढ़ा हुआ ब्राह्मण है, [ऐसा] पढ़ करके ही वे लोग कहते हैं—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १३ ॥

भावार्थः—अश्लील कुमार्गी पुरुष से यज्ञ न कराना चाहिये किन्तु वेदज्ञानी सुशील विद्वान् से यज्ञ कराया जावे ॥ १३ ॥

कण्डिका १४ ॥

अयातो देवयजनान्यात्मा देवयजनं श्रद्धा देवयजनमृत्विजो देवयजनं भौमं देवयजनं तद्वा एतदात्मा देवयजनं यदुपव्यायच्छमानो वाऽनुपव्यायच्छमानो वा शरीरमधिवसत्येष यज्ञ एष यजत एतं यजन्त एतद्देवयजनमथैतत् श्रद्धा देवयजनं यदैव कदाचिदादद्यात् श्रद्धा त्वेवैनं नातीयात्तद्देवयजनमथैतदृत्विजो देवयजनं यत्र क्वचिद् ब्राह्मणो विद्यावान् मन्त्रेण करोति तद्देवयजनमथैतद्भौमं देवयजनं यत्रापस्तिष्ठन्ति यत्र स्यन्दन्ति प्रतद्वहन्त्युद्वहन्ति तद्देवयजनं यत्समं समूलमविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णमिव भवति यस्य [1]श्वभ्र ऊर्मो वृक्षः पर्वतो नदी पन्था वा पुरस्तात्स्यान्न देवयजनमात्रं पुरस्तात्पर्य्यवशिष्येन्नोत्तरतोऽग्नेः पर्य्युपासीरन्निति ब्राह्मणम् ॥ १४ ॥

१३—(प्रवचनानि) प्रकृष्टवाक्यानि (असोमपम्) न सोमरसपानकर्त्तारम् (सुरापम्) मद्यपानकर्तारम् (विच्छिन्नम्) वेदमार्गेण वियुक्तम् (तम्) प्रसिद्धं विद्वांसम् (उपोदेयुः) उप+उत्+आ+इयुः, इण् गतौ—विधिलिङ्। प्राप्नुयुः। (व्याचक्षीत) भवान् विवृणोतु (विद्यमानम्) वर्तमानम् (अविद्यमानम्) अवर्तमानं भूतं भविष्यं च (अभिनिदधाति) अभिनिधीयते (अधीत्य) पठित्वा ॥

---

१. पू. सं. "श्वभ्रकूर्मः" इति पाठः ॥ सम्पा० ॥

कण्डिका १४ ।। कात्रन्धि का देवयजनों के विषय में वर्णन ।।

(अथ अतः देवयजनानि आत्मा देवयजनं श्रद्धा देवयजनम् ऋत्विजः देवयजनं भौमं देवयजनम्) अब यहाँ से देवयजन [विद्वानों के पूजा स्थान] कहे जाते हैं—[देखो कण्डिका ११]—आत्मा देवयजन है, श्रद्धा [पूरा विश्वास] देवयजन है, ऋत्विज् [सब ऋतुओं में यज्ञ कराने वाले] देवयजन हैं, जल [जो भूमि से भाप होकर फिर मेह बनकर बरसता है] देवयजन है। (तत् वै एतत् आत्मा देवयजनं यत् उपव्यायच्छमानः वा अनुपव्यायच्छमानः वा शरीरम् अधिवसति, एषः यज्ञः एषः यजतः, एतं यजन्ते, एतत् देवयजनम्) सो ही यह आत्मा देवयजन है जो [आत्मा] फैलता हुआ अथवा न फैलता हुआ [बड़ा वा छोटा होकर] शरीर में बसता है, यह यज्ञ है, यह यजमान है, इसको पूजते हैं. यह देवयजन है। (अथ एतत् श्रद्धा देवयजनं यदा एव कदाचित् आदद्यात् श्रद्धा तु एव एनं न अतीयात्, तत् देवयजनम्) फिर यह श्रद्धा देवयजन है, जब कभी भी वह [ब्रह्मचारी] लेवे श्रद्धा तो इस [लेने वाले] को न उल्लंघन करे, यह देवयजन है। (अथ एतत् ऋत्विजः देवयजन यत्र क्वचित् विद्यावान् ब्राह्मणः मन्त्रेण करोति तत् देवयजनम्) फिर यह ऋत्विज् लोग देवयजन हैं, जहाँ कहीं विद्वान् ब्राह्मण मन्त्र से कर्म करता है वह देवयजन है। (अथ एतत् भौमं देवयजनं यत्र आपः तिष्ठन्ति यत्र स्यन्दन्ति तत् प्रवहन्ति उद्वहन्ति, तत् देवयंजनम्) फिर यह भौम [भूमि से निकला हुआ जल] देवयजन है, जहाँ जल ठहरता है, जहाँ चूता है, वहाँ बहता है और चढ़ता है, वह देवयजन है, (यत् समं समूलम् अविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णम् इव भवति) जो [स्थान] चौरस नींव वाला, बिना जला हुआ, प्रतिष्ठा वाला, पूर्व और उत्तर की ओर झुका हुआ, चौरस और एकसा फैला हुआ होवे (यस्य पुरस्तात् श्वभ्र ऊर्मः वृक्षः पर्वतः नदी पन्थाः वा स्यात्) जिसके आगे चलते हुए पवन वाले हवादार वृक्ष, पहाड़, नदी, अथवा मार्ग हो, (देवयजनमात्रम् पुरस्तात् न पर्य्यवशिष्येत्) देवयजन का परिमाण सामने को न बचा रहे, (न अग्नेः उत्तरतः पर्य्युपासीरन् इति ब्राह्मणम्) और न अग्नि के उत्तर की ओर बैठें—यह ब्राह्मण है ।। १४ ।।

१४—(श्रद्धा) पूर्णविश्वासः (ऋत्विजः) सर्वेषु ऋतुषु यज्ञकर्तारः। (भौमम्) भूमि—अण्। वाष्पमेघरूपेण भूमेर्जातं जलम् (उपव्यायच्छमानः) उप+वि+आ+यम उपरमे—शानच्। दीर्घीभवन् (अनुपव्यायच्छमानः) अदीर्घीभवन्। अल्पीभवन् (यजतः) भृमृदृशियजि० (उ० ३। ११०) यज देवपूजासंगतिकरणदानेषु-अतच्। यजमानः (यजन्ते) पूजयन्ति (आदद्यात्) गृह्णीयात् (अतीयात्) अति+इण् गतौ—विधिलिङ्। उल्लंघयेत् (आपः) जलानि (तत्) तत्र (प्रवहन्ति) प्रकर्षेण गच्छन्ति (श्वभ्रः) श्वभ्र गतौ—घञ्। गमनशीलः। (ऊर्मः) अर्तेरुच्च (उ० ४। ४४) ऋ गतौ-मिः, उत्, ततः अर्शआद्यच्। ऋच्छति गच्छतीति ऊर्मः वेगः। (मात्राम्) परिमाणम् (पर्य्यवशिष्येत्) परि+अव+शिष असर्वोपयोगे—विधि-

भावार्थः—मनुष्यों को चाहिये कि भौतिक यज्ञ के साथ आत्मिक यज्ञ का विचार करते रहें ॥ १४ ॥

कण्डिका १५ ॥

अदितिर्वै प्रजाकामौदनमपचत् तत उच्छिष्टमाश्नात् सा गर्भमधत्त, तत आदित्या अजायन्त, य एष ओदनः पच्यत आरम्भणमेवैतत् क्रियते आक्रमणमेव प्रादेशमात्रीः समिधो भवन्त्येतावान् ह्यात्मा प्रजापतिना सम्मितो ऽग्नेर्वै या यज्ञिया तनूरश्वत्थे तया समगच्छत एषा स्वधृत्या तनूर्यद् घृतम्, यद् घृतेन समिधो अनक्ति ताभ्यामेवैनं तन्तनूभ्यां समर्द्धयति यन्निर्मार्गिस्यादधात्यवकूत्या वै वीर्य्यं क्रियते यन्निर्मार्गिस्यादधात्यवकूत्या एव संवत्सरो वै प्रजननमग्निः प्रजननमेतत् प्रजननं यत्संवत्सर ऋत्वाऽग्नौ समिधमादधाति, प्रजननादेवैनन्तत् प्रजनयिता प्रजनयत्यभक्तुर्वै पुरुषो न हि तद्वेद यदृतुमभिजायते, यन्नक्षत्रं तदाप्नोति, य एष ओदनः पच्यते, योनिरेवैषा क्रियते, यत्समिध आधीयन्ते रेतस्तद् ध्रियते संवत्सरो वै रेतो हितं प्रजायते, ये संवत्सरे पर्य्येतेऽग्निमाधत्ते प्रजापतिरेवैनमाधत्ते, द्वादशसु रात्रीषु पुरा संवत्सरस्याधेयात्ता हि संवत्सरस्य प्रतिमा अथो तिसृष्वथो द्वयोरथो पूर्वेद्युराधेयात् ते वा अग्निमादधानेनादित्या वा इत उत्तरमेव मेऽमुष्मिंल्लोक आयंस्ते पथि रक्षन्त इयन्तदु यक्ष्यमाणं प्रतिनुदन्त उच्छेषणभाजा वा आदित्या यदुच्छिष्टं यदुच्छिष्टेन समिधो अनक्ति तेभ्य एव प्रोवाच तेभ्य एव प्रोच्य स्वर्गलोकं यन्ति ॥ १५ ॥

कण्डिका १५ ॥ अदिति की सृष्टि रचना के दृष्टान्त से भौतिक यज्ञ की रचना ॥

(प्रजाकामा अदितिः वै ओदनम् अपचत्) सन्तान चाहने वाली अदिति [अदीन और अखण्ड परमेश्वर शक्ति] ने सींचने वाला भात वा अन्न पकाया [परमाणुओं को चलाया], (ततः उच्छिष्टम् आश्नात्) फिर बचे हुये को खाया [प्रलय से पीछे बचे संयोग वियोग सामर्थ्य को काम में लाया]। (सा गर्भम् अधत्त) उसने गर्भ धारण

लिङ् । अवशिष्टं भवेत् (पर्य्युपासीरन्) परि+उप+आस उपवेशने–विधिलिङ् । उपविशेयुः ॥

१५—(अदितिः) कृत्यल्युटो बहुलम् (पा० ३ । ३ । ११३) दीङ् क्षये, दो अवखण्डने, दाप् लवने—क्तिन् । द्यतिस्यतिमास्थामित्ति किति (पा० ७ । ४ । ४०) इति इत्वम् । दीङ्पक्षे ह्रस्वत्वं नञ्समासः । अदितिः पृथिवी - निघ० १ । १ । वाक्—निघ० १ । ११ । गौः—निघ० २ । ११ । अदीना देवमाता—निरु० ४ । २२ । अदीना अक्षीणा अखण्डिता वा परमेश्वरशक्तिः (ओदनम्) उन्देर्नलोपश्च (उ० २ । ७६) उन्दी क्लेदने—युच् । ओदनो मेघः—निघ० १ । १० । ओदनमुदकदानं मेघम्—निरु० ६ । ३४ । सेचकं भक्तम् । अन्नम् (उच्छिष्टम्) उत्+शिष असर्वोपयोगे—क्तः । यः प्रलयात् शिष्यते शेषो भवति तं शेषपदार्थम् ।

किया। [गर्भ वा पिंड के रूप में पदार्थ बनाये], (ततः आदित्याः अजायन्त) उस [कर्म] से आदित्य [अखण्ड परमात्मा से उत्पन्न पदार्थ] उत्पन्न हुये। (यः एषः ओदनः पच्यते एतत् आरम्भणम् एव, आक्रमणम् एव क्रियते) [इसी प्रकार यज्ञ में] जो यह भात पकाया जाता है वह आरम्भ कर्म ही और आगे बढ़ने का कर्म ही किया जाता है, (प्रादेशमात्रीः समिधः भवन्ति, एतावान् हि आत्मा प्रजापतिना सम्मितः) प्रादेशमात्री [अँगूठे से तर्जनी तक परिमाण वाली] समिधायें होती हैं, इतना ही आत्मा प्रजापति [परमेश्वर] करके नापा गया है। (अश्वत्थे अग्नेः वै या यज्ञिया तनूः तया समगच्छत) पीपल [आदि काष्ठ] में अग्नि का जो निश्चय करके पूजनीय शरीर है, उसके साथ वह [अग्नि] मिला है, (एषा स्वधृत्या तनूः यत् घृतम्) यह अपने आप [अग्नि को] पुष्ट करने वाला शरीर है जो घृत है, (यत् घृतेन समिधः अनक्ति ताभ्यां तनूभ्याम् एव एनं तं समर्धयति) वह जो घी से समिधाओं को सींचता है, उन दोनों शरीरों [घी और समिधा] से ही इस प्रसिद्ध [अग्नि] को बढ़ाता है। (यत् निर्मार्गस्य अवकूत्या आदधाति वीर्य्यं वै क्रियते) जो निश्चित मार्ग के संकल्प से अग्न्याधान करता है, [उससे] वीर्य्य [सामर्थ्य] ही किया जाता है, (यत् निर्मार्गस्य अवकूत्या एव आदधाति संवत्सरः वै प्रजननम्, अग्निः प्रजननम्, एतत् प्रजननम् यत् संवत्सरः) जो निश्चित मार्ग के संकल्प से ही अग्न्याधान करता है वह संवत्सर ही उत्पादन सामर्थ्य है, अग्नि उत्पादन सामर्थ्य है, यह उत्पादन सामर्थ्य है जो संवत्सर है, (ऋचा अग्नौ समिधम् आदधाति) मन्त्र के साथ अग्नि में समिधा को रखता है। (प्रजननात् एव एनं तत् प्रजनयिता प्रजनयति) उत्पादन सामर्थ्य से ही इस अग्नि को वह उत्पन्न करने वाला [यजमान] उत्पन्न करता है (अभक्तुर्वै पुरुषः नहि तत् वेद यत् ऋतुम् अभिजायते) इस सृष्टि विज्ञान को न समझने वाला पुरुष यह नहीं जानता है कि ऋतुयें कैसे बनती हैं। (यत् नक्षत्रं तत् आप्नोति) जो नक्षत्र [नक्षत्र का वृष्टि आकर्षणादि प्रभाव] है उसको वह पाता है। (यः एषः ओदनः पच्यते एषा एव योनिः क्रियते) जो यह भात [यज्ञ में] पकाया जाता है यही गर्भाशय किया जाता है, (यत् समिधः आधीयन्ते तत् रेतः ध्रियते) जो समिधायें यथावत् रक्खी जाती हैं उससे वीर्य्य धरा जाता है, (संवत्सरः वै हितं रेतः प्रजायते) संवत्सर [समय] ही हितकारी वीर्य हो जाता है। (ये एते संवत्सरे, परि अग्निम् आधत्ते प्रजापतिः एव एनम् आधत्ते) यह जो [नियम हैं उनसे] संवत्सर तक अग्न्याधान करता है, प्रजापति [यजमान] ही

(आश्नात्) अश भोजने—लङ्। अभक्षयत्। अगृह्णात् (आदित्याः) दित्यदित्यादित्य० (पा० । ४ । १ । ८५) अदिति—ण्यप्रत्ययः, अपत्यार्थे। अदितिपुत्राः। सर्वे परमेश्वरजनितपदार्थाः (प्रादेशमात्रीः) हलश्च (पा० ३ । ३ । १२१) प्र + दिश अतिसर्जने—घञ्। उपसर्गस्य घञ्यमनुष्ये बहुलम् (पा० ६ । ३ । १२२) इति दीर्घः। मात्रच् प्रत्ययः। अंगुष्ठतर्जनीपरिमिताः। (सम्मितः) परिमितः। (स्वधृत्या) स्व + धृञ् धारणे—क्यप्। स्वपोषिका (अनक्ति) संयोजयति (निर्मार्गस्य) निश्चितमार्गस्य (अवकूत्या) अव + कूञ् शब्दे—क्तिन्। आकूत्या।

इस [अग्नि] को यथावत् रखता है । (द्वादशसु रात्रीषु संवत्सरस्य पुरा आधेयात् ताः हि संवत्सरस्य प्रतिमाः, अथो तिसृषु अथो द्वयोः अथो पूर्वेद्युः आधेयात्) बारह रात्रियों में संवत्सर के पहिले [अग्नि को] यथावत् रक्खे वे ही [बारह रातें] संवत्सर की प्रतिमायें [स्थानापन्न] हैं, फिर तीन [रातों] में फिर दो में फिर पहिले दिन में [अग्नि को] यथावत् रक्खे । (ते वै आदित्याः अग्निम् आदधानेन इतः वै उत्तरम् एव मे अमुष्मिन् लोके आयन्) वे ही आदित्य [परमेश्वर के उत्पन्न पदार्थ] निश्चय करके अग्न्याधान से इससे पीछे भी मेरे लिये उस लोक [सुख स्थान] में प्राप्त होवें । (ते पथि रक्षन्तः इयम् = इदम् तत् उ यक्ष्यमाण प्रतिनुदन्ते उच्छेषणभाजाः वै आदित्याः) वे मार्ग में रक्षा करते हुये इस और उस दातव्य पदार्थ को भेजते रहते हैं, विशेष सामर्थ्य के बांटने वाले ही आदित्य [ईश्वर के उत्पन्न पदार्थ] हैं, (यत् उच्छिष्टम्) जो बचा हुआ पदार्थ है, (यत् उच्छिष्टेन समिधः अनक्ति तेभ्यः एव प्रोवाच तेभ्यः एव प्रोच्य स्वर्गलोकं यन्ति) जो वह बचे हुये पदार्थ से समिधायें सींचता है [पूर्ण आहुति देता है,] उसने उन [ईश्वर के उत्पन्न पदार्थों] के लिये ही कहा है, उन [ईश्वर के उत्पन्न पदार्थों] के लिये ही व्याख्या करके वे पुरुष स्वर्ग-लोक पाते हैं ॥ १५ ॥

भावार्थः—मनुष्यों को भौतिक यज्ञ के साथ परमात्मा और जीवात्मा का भी विचार करना चाहिये ॥ १५ ॥

विशेषः—इस कण्डिका को मिलाओ—अथ० ११ । १ ॥

कण्डिका १६ ॥

प्रजापतिरथर्वा देवः स तपस्तप्त्वैतश्चातुष्प्राश्यं ब्रह्मौदनं निरमिमीत, चतुर्ल्लोकं चतुर्द्देवं चतुर्वेदं चतुर्होत्रमिति, चत्वारो वा इमे लोकाः पृथिव्यन्तरिक्षं द्यौराप इति, चत्वारो वा इमे देवा अग्निर्वायुरादित्यश्चन्द्रमाः, चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद इति, चतस्रो वा इमाः होत्रा होत्रमाध्वर्य्यवमौद्गात्रं ब्रह्मत्वमिति ।

तदप्येतदृचोक्तम् । चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश इति ।

चत्वारि शृङ्गेति वेदा वा एत उक्ताः, त्रयो अस्य पादा इति सवनान्येव, द्वे शीर्षे इति ब्रह्मौदनप्रवर्ग्यावेव, सप्त हस्तासो अस्येति छन्दांस्येव, त्रिधा बद्ध इति मन्त्रः कल्पो ब्राह्मणं, वृषभो रोरवीत्येष ह वै वृषभ एष तद्रोरवीति यद्य-

---

संकल्पेन (यक्ष्यमाणम्) यज दाने स्यः, शानच् । दातव्यपदार्थम् (प्रतिनुदन्ते) प्रत्यक्षेण प्रेरयन्ति (उच्छेषणभाजाः) उत् + शिष असर्वोपयोगे—ल्युट् + भाज पृथक्कर्मणि—अण् । विशेषसामर्थ्यस्य विभक्तारः (यन्ति, प्राप्नुवन्ति ॥

१—अर्थ तुलनीय निरु० १३ । ७ ॥ सम्पा० ॥

ज्ञेषु शस्त्राणि शंसत्यृग्भिर्यजुर्भिः सामभिर्ब्रह्मभिरिति, महोदेवो मर्त्यां आविवेशेत्येष ह वै महान् देवो यद्यज्ञ एषः मर्त्यां आविवेश। यो विद्यात्सप्त प्रवत इति प्राणानाह सप्त विद्यात्परावत इत्यपानानाह। शिरो यज्ञस्य यो विद्यादित्येतद्वै यज्ञस्य शिरो यन्मंत्रवान् ब्रह्मौदनो यो ह वा एतममन्त्रवन्तं ब्रह्मौदनमुपेयादपशिरसा ह वा अस्य यज्ञमुपेतो भवति तस्मान्मंत्रवन्तमेव ब्रह्मौदनमुपेयान्नामन्त्रवन्तमिति ब्राह्मणम् ॥ १६ ॥

कण्डिका १६ ॥ ब्रह्मज्ञानियों को चार चार प्रकार से ब्रह्मप्राप्ति ॥

(प्रजापतिः अथर्वा देवः) प्रजापति अथर्वा [प्रजापालक निश्चल] प्रकाशमान परमात्मा है। (सः तपः तप्त्वा एतं चातुष्प्राश्यं ब्रह्मौदनं निरमिमीत, चतुर्लोकं चतुर्देवं चतुर्वेदं चतुर्होत्रम् इति) उसने तप करके इस चार प्रकार से फैले हुये ब्रह्मौदन [ब्रह्मज्ञानियों के अन्न] को बनाया, चार लोक, चार देव, चार वेद. और चार ऋत्विजों के कर्म [को बनाया]। (चत्वारः वै इमे लोकाः पृथिवी अन्तरिक्षं द्यौः आपः इति) चार लोक यह हैं—पृथिवी, अन्तरिक्ष, प्रकाश और जल। (चत्वारः वै इमे देवाः अग्निः वायुः आदित्यः चन्द्रमाः) चार देव यह हैं अग्नि, पवन, सूर्य और चन्द्रमा। (चत्वारः वै इमे वेदाः ऋग्वेदः यजुर्वेदः सामवेदः ब्रह्मवेदः इति) चार वेद यह हैं ऋग्वेद, यजुर्वेद, सामवेद और ब्रह्मवेद [अथर्ववेद] (चतस्रः वै इमाः होत्राः हौत्रम्, आध्वर्य्यवम् औद्गात्रं ब्रह्मत्वम् इति) चार ऋत्विजों की क्रियायें यह हैं—होता का कर्म, अध्वर्य्यु का कर्म उद्गाता का कर्म और ब्रह्मा का कर्म।

(तत् अपि एतत् ऋचा उक्तम्) यह भी इस ऋचा करके कहा गया है। (चत्वारि शृङ्गाः त्रयः अस्य पादाः द्वे शीर्षे अस्य सप्त हस्तासः त्रिधा बद्धः वृषभः रोरवीति महः देवः मर्त्यान् आ विवेश इति)—ऋग्वेद ४। ५८। ३, आदि। तथा निरुक्त १३। ७। (चत्वारि अस्य शृङ्गा इति एते वै वेदाः उक्ताः, त्रयः पादाः इति सवनानि एव द्वे शीर्षे इति ब्रह्मौदनप्रवर्ग्यौ एव, सप्त हस्तासः अस्य इति छन्दांसि एव) इस [यज्ञ] के चार सींग [के समान] यह वेद कहे गये हैं, तीन पग [के समान] सवन [प्रातः सवन, माध्यन्दिन सवन और तृतीय सवन अथवा कर्म उपासना ज्ञान], दो सिर [के समान] ब्रह्मौदन और प्रवर्ग्य [ब्रह्मज्ञानियों का अन्न और यज्ञाग्नि, अथवा अभ्युदय और निश्रेयस् सुख] हैं, सात हाथ [के समान गायत्री आदि प्रधान] छन्द ही हैं। (त्रिधा बद्धः इति मन्त्रः कल्पः ब्राह्मणम्) वह तीन

१६—(अथर्वा) गो० पू० १। ४। निश्चलः परमेश्वरः (चातुष्प्राश्यम्) चतुर्+प्र+अशूङ् व्याप्तौ-ण्यत्, स्वार्थे ष्यञ्। हलो यमां यमि लोपः (पा० ८। ४। ६४) यलोपः। चतुर्धा व्याप्यम् (ब्रह्मौदनम्) ब्रह्मभ्यो ब्रह्मज्ञानिभ्यः ओदनम् अन्नम् (चतुर्ल्लोकम्) चतुर्णां लोकानां समाहारम् (द्यौः) प्रकाशलोकः (ब्रह्मवेद०) अथर्ववेदः (होत्राः) हुयामाश्रुभसिभ्यस्त्रन् (उ० ४। १६८) हु दानादानेषु —त्रन्, टाप्। होत्रा वाक्—निघ० १। ११, यज्ञः—निघ० ३। १७। होत्राशब्दः

अथ ह प्रजापतिः सोमेन यक्ष्यमाणो वेदानुवाच, कं वो होतारं वृणीयां, कमध्वर्युं, कमुद्गातारं, कं ब्रह्माणमिति। त ऊचुरृग्विदमेव होतारं वृणीष्व, यजुर्विदमध्वर्युं, सामविदमुद्गातारमथर्वाङ्गिरोविदं ब्रह्माणं, तथा हास्य यज्ञश्चतुर्षु लोकेषु चतुर्षु देवेषु चतुर्षु वेदेषु चतसृषु होत्रासु चतुष्पाद् यज्ञः प्रतिष्ठति, प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद, तस्मादृग्विदमेव होतारं वृणीष्व, स हि हौत्रं वेदाग्निर्वै होता, पृथिवी वा ऋचामायतनमग्निर्देवता गायत्रं छन्दः भूरिति शुक्रं तस्मात्तमेव होतारं वृणीष्वेत्येतस्य लोकस्य जितय एतस्य लोकस्य विजितय एतस्य लोकस्य सञ्जितय एतस्य लोकस्यावरुद्धय एतस्य लोकस्य व्यृद्धय एतस्य लोकस्य समृद्धय एतस्य लोकस्योदात्तय एतस्य लोकस्य व्याप्तय एतस्य लोकस्य पर्य्याप्तय एतस्य लोकस्य समाप्तये, अथ चेन्नैवंविदं होतारं वृणुते, पुरस्तादेवैषां यज्ञो रिच्यते। यजुर्विदमेवाध्वर्युं वृणीष्व स ह्याध्वर्य्यवं वेद, वायुर्वा अध्वर्य्युरन्तरिक्षं वै यजुषामायतनं वायुर्देवता त्रैष्टुभं छन्दो भुव इति शुक्रं तस्मात्तमेवाध्वर्युं वृणीष्वेत्येतस्य लोकस्येत्येवाथ चेन्नैवंविदमध्वर्य्युं वृणुते, पश्चादेवैषां यज्ञो रिच्यते। सामविदमेवोद्गातारं वृणीष्व स ह्यौद्गात्रं वेदादित्यो वा उद्गाता द्यौर्वै साम्नामायतनमादित्यो देवता जागतं छन्दः स्वरिति शुक्रं तस्मात्तमेवोद्गातारं वृणीष्वेत्येतस्य लोकस्येत्येवाथ चेन्नैवंविदमुद्गातारं वृणुते, उत्तर एवैषां यज्ञो रिच्यते। अथर्वाङ्गिरोविदमेव ब्रह्माणं वृणीष्व स हि ब्रह्मत्वं वेद चन्द्रमा वै ब्रह्मा आपो वै भृग्वङ्गिरसामायतनं चन्द्रमा

३। ७९) पितृ—यत्। रीङ् ऋतः (पा० ७। ४। २७) रीङादेशः। पितुरागतं धनम् (स्वर्गङ्गमाः) स्वर्गप्रापिकाः (दूतम्) पदार्थानां प्रापकं तापकं वा (वृणीमहे) स्वीकुर्मः (होतारम्) वेगादिदातारम् (विश्ववेदसम्) वेदः धनं—निघ० २। १०। सर्वधनप्रापकम् (सुक्रतुम्) शोभनकर्तारम् ॥

देवता वैद्युतश्चोष्णिक्ककुभे छन्दसी ओमित्यथर्वणां शुक्रं जनदित्यङ्गिरसां, तस्मात्तमेव ब्रह्माणं वृणीष्वेत्येतस्य लोकस्य जितय एतस्य लोकस्य विजितय एतस्य लोकस्य सञ्जितय एतस्य लोकस्यावरुद्धय एतस्य लोकस्य व्यृद्धय एतस्य लोकस्य समृद्धय एतस्य लोकस्योदात्तय एतस्य लोकस्य व्याप्तय एतस्य लोकस्य पर्य्याप्तय एतस्य लोकस्य समाप्तयेऽथ चेन्नैवंविदं ब्रह्माणं वृणुते, दक्षिणत एवैषां यज्ञो रिच्यते ॥ २४ ॥

इति अथर्ववेदे गोपथब्राह्मणपूर्वभागे द्वितीयः प्रपाठकः समाप्तः ।

कण्डिका २४ ॥ ऋत्विजों के चुनाव में ऋग्वेदी होता, यजुर्वेदी अध्वर्य्यु, सामवेदी उद्गाता, चतुर्वेदी ब्रह्मा हो ॥

(अथ ह प्रजापतिः सोमेन यक्ष्यमाणः वेदान् उवाच) फिर प्रजापति [प्रजापालक परमेश्वर] सोम से [सोम याग समान ऐश्वर्य वा उत्पन्न संसार से] यज्ञ करने की इच्छा करता हुआ वेदों से बोला—(कं वः होतारं वृणीयाम्, कम् अध्वर्य्युम्, कम् उद्गातारम् कं ब्रह्माणम् इति) तुममें से किसको होता चुनूं किसको अध्वर्य्यु, किसको उद्गाता और किसको ब्रह्मा। (ते ऊचुः ऋग्विदम् एव होतारं वृणीष्व, यजुर्विदम् अध्वर्य्युम्, सामविदम् उद्गातारम् अथर्वाङ्गिरोविदं ब्रह्माणम्) वे बोले—ऋग्वेद जानने वाले को ही होता चुन, यजुर्वेद जानने वाले को अध्वर्यु, सामवेद जानने वाले को उद्गाता और अथर्वाङ्गिराओं [चारों वेद] जानने वाले को ब्रह्मा। (तथा ह अस्य यज्ञः चतुर्षु लोकेषु चतुर्षु देवेषु चतुर्षु वेदेषु चतसृषु होत्रासु चतुष्पात् यज्ञः प्रतिष्ठति, प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) वैसे ही इस [प्रजापति] का यज्ञ चार लोकों में, चार देवों में, चार वेदों में, और चार ऋत्विजों की क्रियाओं में [देखो गो० पू० २ । १६] चार पांव वाला यज्ञ ठहरता है, वह पुरुष प्रजा से और पशुओं से प्रतिष्ठा पाता है जो ऐसा जानता है। (तस्मात् ऋग्विदम् एव होतारं वृणीष्व) इसलिये ऋग्वेद जानने वाले को ही होता चुन। (सः हि हौत्रं वेद, पृथिवी वै ऋचाम् आयतनम् अग्निः देवता गायत्रं छन्दः भूः इति शुक्रम्) वही होता का कर्म जानता है, अग्नि ही होता है, पृथिवी ही ऋग्वेद मन्त्रों का स्थान है, अग्नि देवता है, गायत्री छन्द है, भूः [यह व्याहृति = सर्वाधार परमेश्वर] वीर्य है। (तस्मात् तम् एव होतारं वृणीष्व इति एतस्य लोकस्य जितये १, एतस्य लोकस्य विजितये

२४—(प्रजापतिः) प्रजापालकः परमेश्वरः (सोमेन) ऐश्वर्य्येण। उत्पन्नेन संसारेण। सोमरसयागेन (यक्ष्यमाणः) यष्टुमेष्यमाणः (वः) युष्माकं मध्ये (अथर्वाङ्गिरोविदम्) चतुर्वेदवेत्तारम् (अस्य) प्रजापतेः (प्रतितिष्ठति) प्रतिष्ठितो भवति (आयतनम्) आश्रयः (भूः) सर्वाधारः परमेश्वरः (शुक्रम्) वीर्य्यम् (लोकस्य) संसारस्य (जितये) जयाय (विजितये)

२, एतस्य लोकस्य संजितये ३, एतस्य लोकस्य अवरुद्धये ४, एतस्य लोकस्य व्यृद्धये ५, एतस्य लोकस्य समृद्धये ६, एतस्य लोकस्य उदात्तये ७, एतस्य लोकस्य व्याप्तये ८, एतस्य लोकस्य पर्य्याप्तये ९, एतस्य लोकस्य समाप्तये १०) इसलिये उसको ही होता चुन, इस संसार के जय के लिये १, इस संसार के विविध जय के लिये २, इस संसार के पूरे जय के लिये ३, इस संसार की रोक [रक्षा] के लिये ४, इस संसार की विविध बढ़ती के लिये ५ इस संसार की पूरी बढ़ती के लिये ६, इस संसार के उठान के लिये ७, इस संसार के फैलाव के लिये ८, इस संसार की पूर्णता के लिये ९, और इस संसार की सिद्धि के लिये १०। (अथ चेत् एवंविदं होतारं न वृणुते, पुरस्तात् एव एषां यज्ञः रिच्यते) और जो ऐसे विद्वान् को होता नहीं चुनता, पूर्व दिशा में ही इन [ऋत्विजों] का यज्ञ बिछुड़ जाता है। (यजुर्विदम् एव अध्वर्य्युं वृणीष्व) यजुर्वेद जानने वाले को ही अध्वर्य्यु चुन। (सः हि आध्वर्य्यवं वेद वायुः वै अध्वर्य्युः अन्तरिक्षं वै यजुषाम् आयतनम् वायुः देवता त्रैष्टुभं छन्दः, भुवः इति शुक्रम्) वही अध्वर्य्यु का कर्म जानता है, पवन ही अध्वर्य्यु है. अन्तरिक्ष ही यजुर्वेद मन्त्रों का स्थान है, पवन देवता है, त्रिष्टुप् छन्द है भुवः [यह व्याहृति = सर्वव्यापक परमेश्वर] वीर्य है। (तस्मात् तम् एव अध्वर्य्युं वृणीष्व इति एतस्य लोकस्य इति एव) इसलिये उसको ही अध्वर्य्यु चुन, इस लोक के इत्यादि ..... (अथ चेत् एवंविदम् अध्वर्य्युं न वृणुते, पश्चात् एव एषां यज्ञः रिच्यते) और जो ऐसे विद्वान् को अध्वर्यु नहीं चुनता, पश्चिम दिशा में ही इन [ऋत्विजों] का यज्ञ बिछुड़ जाता है। (सामविदम् एव उद्गातारं वृणीष्व) सामवेद जानने वाले को ही उद्गाता चुन। (सः हि औद्गात्रं वेद, आदित्यः वै उद्गाता, द्यौः वै साम्नाम् आयतनम् आदित्यः देवता जागतं छन्दः स्वः इति शुक्रम्) वही उद्गाता के कर्म को जानता है, सूर्य ही उद्गाता है, प्रकाश ही सामवेद मन्त्रों का स्थान है, सूर्य देवता है, जगती छन्द है, स्वः [यह व्याहृति = सुख स्वरू परमात्मा] वीर्य है। (तस्मात् तम् एव उद्गातारं वृणीष्व इति एतस्य लोकस्य इति एव) इसलिये उसको ही उद्गाता चुन, इस लोक के इत्यादि......। (अथ चेत् एवंविदम् उद्गातारं न वृणुते, उत्तरे एव एषां यज्ञः रिच्यते) जो ऐसे जानकार को उद्गाता नहीं चुनता है, उत्तर दिशा में ही इन [ऋत्विजों] का यज्ञ बिछुड़ जाता है। (अथर्वाङ्गिरोविदम् एव ब्रह्माण वृणीष्व) अथर्वाङ्गिराओं [चारों वेद] जानने वाले को ही ब्रह्मा चुन। (सः हि ब्रह्मत्वं वेद, चन्द्रमाः वै ब्रह्मा, आपः वै भृग्वङ्गिरसाम् आयतनम् वैद्युतः चन्द्रमाः च देवता,

---

विविधजयाय (संजितये) सम्यग् जयाय (अवरुद्धये) निरोधाय। रक्षणाय (व्यृद्धये) विविधवृद्धये (समृद्धये) पूर्णवृद्धये (उदात्तये) उत्+आ+ददातेः - क्तिन्। उत्थानाय (व्याप्तये) विस्ताराय (पर्य्याप्तये) पूर्तये (समाप्तये) संसिद्धये (पुरस्तात्) पूर्वस्यां दिशि (एषाम्) ऋत्विजां मध्ये (रिच्यते) रिच वियोजनसंपर्चनयोः—कर्मणि लट्। वियुज्यते (भुवः) सर्वव्यापकः परमेश्वरः (पश्चात्) पश्चिमायां दिशि (स्वः) सुखस्वरूपः (उत्तरे) उत्तरस्यां

उष्णिक्काकुभे छन्दसी ओम् इति अथर्वणां, जनत् इति अङ्गिरसां शुक्रम्) वही ब्रह्मा का काम जानता है, चन्द्रमा ही ब्रह्मा है, जल ही चारों वेदों का स्थान है, और विविध प्रकाश वाला चन्द्रमा देवता, उष्णिक् काकुभ दो छन्द हैं, ओम् [यह व्याहृति = सर्वरक्षक परमात्मा] निश्चल ज्ञान वालों का और जनत [यह व्याहृति = सर्वजनक परमेश्वर] पूर्ण ज्ञान वालों का वीर्य है। (तस्मात् तम् एव ब्रह्माणम् वृणीष्व इति एतस्य लोकस्य जितये १, एतस्य लोकस्य विजितये २, एतस्य लोकस्य संजितये ३ एतस्य लोकस्य अवरुद्धये ४, एतस्य लोकस्य व्यृद्धये ५, एतस्य लोकस्य समृद्धये ६, एतस्य लोकस्य उदात्तये ७, एतस्य लोकस्य व्याप्तये ८, एतस्य लोकस्य पर्य्याप्तये ९, एतस्य लोकस्य समाप्तये १०) इसलिये उसको हा ब्रह्मा चुने, इस संसार के जय के लिये १, इस संसार के विविध जय के लिये २, इस संसार के पूरे जय के लिये ३, इस संसार की रोक [रक्षा] के लिये ४, इस संसार की विविध बढ़ती के लिये ५, इस संसार की पूरी बढ़ती के लिये ६, इस संसार के उठान के लिये ७, इस संसार के फैलाव के लिये ८, इस संसार की पूर्णता के लिये ९, इस संसार की सिद्धि के लिये १०। (अथ चेत्—एवंविदं ब्रह्माणं न वृणुते दक्षिणतः एव एषां यज्ञः रिच्यते) जो ऐसे जानकार को ब्रह्मा नहीं चुनता है, दक्षिण दिशा में इनका [ऋत्विजों] का यज्ञ बिछुड़ जाता है ॥ २४ ॥

भावार्थः—परमेश्वर आप ही यज्ञ रूप संसार में सब ऋत्विजों का काम करके संसार का उपकार करता है ॥ २४ ॥

इति श्रीमद्राजाधिराज प्रथितमहागुणमहिम*श्रीसयाजीरावगायकवाडा-धिष्ठित*बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदास त्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्ये पूर्वभागे द्वितीयप्रपाठकः समाप्तः ॥

अयं प्रपाठकः प्रयागनगरे श्रावणमासे कृष्णचतुर्थ्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ।

अथ तृतीयः प्रपाठकः ॥

कण्डिका १ ॥

ओम् दक्षिणाप्रवणा भूमिर्दक्षिणत आपो वहन्ति तस्माद्यज्ञास्तद्भूमेरुन्नततरमिव भवति यत्र भृग्वङ्गिरसो विष्ठास्तद्यथा आप इमांल्लोकानभिवहन्त्येवमेव भृग्वङ्गिरसः सर्वान् देवानभिवहन्त्येवमेवैषा व्याहृतिः सर्वान् वेदानभिवहत्यो३मिति हर्चामो३मिति यजुषामो३मिति साम्नामो३मिति सर्वस्याहाभिवादस्तं

दिशि (भृग्वङ्गिरसाम्) परिपक्वज्ञानवतां चतुर्वेदानाम् (वैद्युतः) विद्युत्—अण् । विविधप्रकाशयुक्तः (ओम्) सर्वरक्षकः (जनत्) सर्वजनकः (दक्षिणतः) दक्षिणस्यां दिशि ॥

ह स्मैतदुत्तरं यज्ञे विद्वांसः कुर्वन्ति देवा ब्रह्माण आगच्छत आगच्छतेत्येते वै देवा ब्रह्माणो यद्भृग्वङ्गिरसस्तानेवैतद् गृणानांस्तान् वृणानान् ह्वयन्तो मन्यन्ते नान्योऽभृग्वङ्गिरोविद् वृतो यज्ञमागच्छेत् यज्ञस्य तेजसा तेज आप्नोत्यूर्जयोर्जा यशसा यशो नान्यो भृग्वङ्गिरोविदवृतो यज्ञमागच्छेन्नेद्यज्ञं परिमुष्णीयादिति, तद्यथा पूर्वं वत्सोऽधीत्य गां धयेदेवं ब्रह्मा भृग्वङ्गिरोविदवृतो यज्ञमागच्छेन्नेद्यज्ञं परिमुष्णीयादिति. तद्यथा गौर्वाश्वो वाऽश्वतरो वैकपात् द्विपाद् त्रिपादिति स्यात्, किमभिवहेत् किमभ्यश्नुयादिति, तस्मादृग्विदमेव होतारं वृणीष्व, यजुर्विदमध्वर्यु, सामविदमुद्गातारमथर्वाङ्गिरोविदं ब्रह्माणं, तथा हास्य यज्ञश्चतुर्षु लोकेषु चतुर्षु वेदेषु चतुर्षु देवेषु चतसृषु होत्रासु चतुष्पाद्यज्ञः प्रतिष्ठति, प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद यश्चैवमृत्विजामार्त्विज्यं वेद यश्च यज्ञे यजनीयं वेदेति ब्राह्मणम् ॥ १ ॥

कण्डिका १ ॥ ऋत्विज् चुने हुये वेदवेत्ता पुरुष होवें ॥

(ओम्) सर्वरक्षक परमेश्वर! (दक्षिणाप्रवणा भूमिः, दक्षिणतः आपः वहन्ति) दक्षिण की ओर झुकी हुई भूमि है, दक्षिण को जल बहते हैं। (तस्माद् यज्ञाः भूमेः तत् उन्नततरम् इव भवति, यत्र भृग्वङ्गिरसो विष्ठाः) इसलिये यज्ञ भूमि के उस अधिक ऊँचे स्थान को ही पाते हैं, जहां पर भृग्वङ्गिराः [परिपक्व ज्ञानवाले चारों वेद] विशेष करके ठहरे होते हैं। (तत् यथा आपः इमान् लोकान् अभिवहन्ति, एवम् एव भृग्वङ्गिरसः सर्वान् देवान् अभिवहन्ति) सो जैसे जल इन लोकों को ले चलते हैं वैसे ही भृग्वङ्गिरा [[1]परिपक्व ज्ञानवाले चारों वेद] सब दिव्य विद्वानों और पदार्थों को ले चलते हैं। (एवम् एव एषा व्याहृतिः सर्वान् वेदान् अभिवहति ओ३म् इति ह ऋचाम्, ओ३म् इति यजुषाम्, ओ३म् इति साम्नाम् ओ३म् इति सर्वस्य अभिवादः आह) और इसी प्रकार से ही यह व्याहृति [ओम्] सब वेदों को ले चलती है, ओ३म् यह ऋग्वेद मन्त्रों का, ओ३म् यह यजुर्वेद मन्त्रों का, ओ३म् यह सामवेद मन्त्रों का, ओ३म् यह सब प्रणाम योग्य कहा जाता है, (तं ह स्म एतत् उत्तरं यज्ञे विद्वांसः कुर्वन्ति) और उस ही [ओङ्कार] को यज्ञ में विद्वान् लोग अधिक उत्कृष्ट करते हैं। (देवाः ब्रह्माणः आगच्छत आगच्छत, इति एते वै देवाः ब्रह्माणः, यत् भृग्वङ्गिरस, एतत् गृणानान् तान् एव वृणानान् तान् ह्वयन्तः मन्यन्ते) हे विद्वान्! ब्रह्मज्ञानियों! आओ आओ, यही विद्वान् ब्रह्मज्ञानी लोग हैं जो भृग्वङ्गिरा [परिपक्व ज्ञानवाले चारों वेद] हैं, स्तुति किये जाते हुये उनको ही और स्वीकार किये जाते हुये उनको इस प्रकार बुलाते हुये माने जाते

१—(दक्षिणाप्रवणा) दक्षिणस्यां दिशि नम्रा (उन्नततरम्) उच्चतरं स्थानम् (इव) एव (भवति = भवन्ति) प्राप्नुवन्ति (भृग्वङ्गिरसः) परिपक्वज्ञानयुक्ताः चत्वारो वेदाः (विष्ठाः) विशेषेण स्थिताः (देवान्) विदुषः पुरुषान्।

---

१. 'अङ्गिरसः' का अर्थ ऋषि दयानन्द ने यजु० १६।५० में "सर्वविद्यासिद्धान्तविदः" किया है ॥ सम्पा० ॥

हैं। (नान्यः[1] अभृग्वङ्गिरोविद् वृतः यज्ञम् आगच्छेत् यज्ञस्य तेजसा तेजः आप्नोति, ऊर्जया ऊर्जां, यशसा यशः न अन्यः) अन्य कोई चारों वेद न जानने वाला चुना हुआ पुरुष यज्ञ में न आवे [क्योंकि वेदज्ञ ही] यज्ञ के तेज से तेज, बल से बल, यश से यश पाता है, और दूसरा नहीं। (अभृग्वङ्गिरोवित् अवृतः यज्ञम् आगच्छेत् यज्ञं नेत् परिमुष्णीयात् इति) चारों वेद न जानने वाला बिना चुना हुआ पुरुष यज्ञ में [यदि] आवे [तो] वह यज्ञ को कभी न चुरावे [अर्थात् पदाधिकारी न बनाया जावे] (तत् यथा वत्सः पूर्वम् अधीत्य गां धयेत् एवं ब्रह्मा भृग्वङ्गिरोवित् वृतः यज्ञम् आगच्छेत् यज्ञं नेत् परिमुष्णीयात् इति) सो जैसे बछड़ा [दोहने से] पहिले आकर गाय को पी लेवे, वैसे ही ब्रह्मा चारों वेद जानने वाला यज्ञ में आवे वह कभी यज्ञ को न चुरावे [अपनी ही स्वार्थ सिद्धि न करे]। (तत्—यथा गौः वा, अश्वः वा, अश्वतरः वा एकपात् द्विपात् त्रिपात् इति स्यात् किम् अभिवहेत् किम् अभ्यश्नुयात् इति) सो जैसे बैल वा घोड़ा वा खच्चर एक पांव वाला, दो पांव वाला, वा तीन पांव वाला होवे, वह क्या ले जावेगा और किस स्थान पर पहुंचेगा [अल्प शक्ति वाला होने से]। (तस्मात् ऋग्विदम् एव होतारं वृणीष्व, यजुर्विदम् अध्वर्युं, सामविदम् उद्गातारम्, अथर्वाङ्गिरोविदं ब्रह्माणम्) इसलिये ऋग्वेद जानने वाले को ही होता चुन, यजुर्वेद जानने वाले को अध्वर्यु, सामवेद जानने वाले को उद्गाता और अथर्वाङ्गिरा [चारों वेद] जानने वाले को ब्रह्मा। (तथा ह अस्य यज्ञः चतुर्षु लोकेषु चतुर्षु देवेषु चतुर्षु वेदेषु चतसृषु होत्रासु चतुष्पात् यज्ञः प्रतिष्ठति) उस प्रकार से ही इस [यजमान] का यज्ञ चार लोकों में, चार देवों में, चार वेदों में, चार ऋत्विजों की क्रियाओं में ठहरता है [देखो गो० पू० २ । १६ और २४]। (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद, यः च एवम् ऋत्विजाम् आर्त्विज्यं वेद यः च यज्ञे यजनीयं वेद इति ब्राह्मणम्) वह प्रजा से और पशुओं से प्रतिष्ठा पाता है, जो ऐसा जानता है और जो ऋत्विजों के ऋत्विज् कर्म को जानता है और जो यज्ञ में पूजनीय व्यवहार जानता है, यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १ ॥

भावार्थः – वेदवेत्ता यज्ञकुशल पुरुष ही आदरणीय होवें ॥ १ ॥

वायुसूर्य्यादिदिव्यपदार्थान् (आह) कर्मण्यर्थे। कथ्यते (अभिवादः) अर्श-आद्यच्। प्रणामयोग्यः (उत्तरम्) उन्नततरम् (गृणानान्) कर्मण्यर्थे। ग्रियमाणान्। स्तूयमानान् (तान्) वेदान् (वृणानान्) कर्मण्यर्थे। व्रियमाणान्। स्वीकरणीयान् (ह्वयन्तः) आह्वयन्तः। उच्चारयन्तः (मन्यन्ते) ज्ञायन्ते (अन्यः) भिन्नः (वृतः) स्वीकृतः (ऊर्जया) पराक्रमेण (अवृतः) अस्वीकृतः (नेत्) नैव (परिमुष्णीयात्) अपहरेत्। नाशयेत् (पूर्वम्) दोहनात् पूर्वम् (वत्सः) गोशिशुः (अधीत्य) आगत्य (धयेत्) धेट् पाने। पिबेत् (अभ्यश्नुयात्) प्राप्नुयात् ॥

---

१. यहाँ आगे कण्डिका की पङ्क्तियाँ अति भ्रष्ट थीं, हस्तलेखों से मिलान करके मूल एवं अर्थ भी यथावश्यक ठीक किया है ॥ सम्पा० ॥

कण्डिका २ ॥

प्रजापतिर्यज्ञमतनुत, स ऋचैव हौत्रमकरोत्, यजुषाध्वर्य्यवं, साम्नोद्गात्रमथर्वाङ्गिरोभिर्ब्रह्मत्वं, तं वा एतं महावाद्यं कुरुते, यदृचैव हौत्रमकरोद्यजुषाध्वर्य्यवं साम्नोद्गात्रमथर्वाङ्गिरोभिर्ब्रह्मत्वं स वा एष त्रिभिर्वेदैर्यज्ञस्यान्यतरः पक्षः सस्क्रियते मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोत्ययमु वै यः पवते स यज्ञस्तस्य मनश्च वाक् च वर्त्तनिर्मनसा चैव हि वाचा च यज्ञे वहत्यत एव मन इयमेव वाक् स यद्वदन्नास्ति विद्यादर्द्धं मेऽस्य यज्ञस्यान्तरगादिति, तद्यथैकपात् पुरुषो यन्नेकचक्रो वा रथो वर्त्तमानो भ्रेषं न्येत्येवमेवास्य यज्ञो भ्रेषं न्येति, यज्ञस्य भ्रेषमनु यजमानो भ्रेषं न्येति, यजमानस्य भ्रेषमन्वृत्विजो भ्रेषं नियन्ति, ऋत्विजां भ्रेषमनु दक्षिणा भ्रेषं नियन्ति, दक्षिणानां भ्रेषमनु यजमानः पुत्रपशुभिर्भ्रेषं न्येति, पुत्रपशूनां भ्रेषमनु यजमानः स्वर्गेण लोकेन भ्रेषं न्येति स्वर्गस्य लोकस्य भ्रेषमनु तस्यार्द्धस्य योगक्षेमो भ्रेषं न्येति, यस्मिन्नर्द्धे यजन्त इति ब्राह्मणम् ॥ २ ॥

कण्डिका २ ॥ चतुर्वेदी चार ऋत्विजों के बिना यज्ञ गिर जाता है ॥

(प्रजापतिः यज्ञम् अतनुत) प्रजापति [प्रजापालक परमेश्वर वा यजमान] ने यज्ञ फैलाया । (सः ऋचा एव हौत्रम् अकरोत् यजुषा आध्वर्य्यवं, साम्ना औद्गात्रम्, अथर्वाङ्गिरोभिः ब्रह्मत्वम्) उस [प्रजापति] ने ऋग्वेद से ही होता का कर्म किया, यजुर्वेद से अध्वर्यु का कर्म, सामवेद से उद्गाता का कर्म और अथर्वाङ्गिराओं [निश्चल ज्ञान वाले चारों वेदों] से ब्रह्मा का काम । (तं वै एतं महावाद्यं कुरुते यत् ऋचा एव हौत्रम् अकरोत्, यजुषा आध्वर्य्यवं, साम्ना औद्गात्रम् अथर्वाङ्गिरोभिः ब्रह्मत्वम्) उस ही इस [यज्ञ] को उसने अति प्रशंसनीय किया है, जिसने ऋग्वेद से होता का कर्म किया है, यजुर्वेद से अध्वर्यु का कर्म, सामवेद से उद्गाता का कर्म, और निश्चल ज्ञान वाले चारों वेदों से ब्रह्मा का कर्म । (त्रिभिः वेदैः यज्ञस्य सः वै एषः अन्यतरः पक्षः संस्क्रियते, मनसा एव ब्रह्मा यज्ञस्य अन्यतरं पक्षं संस्करोति) तीनों वेदों [त्रयी विद्या] से यज्ञ का वही कोई सा पक्ष [भाग] सिद्ध किया जाता है, मन से ही ब्रह्मा किसी ही पक्ष को सिद्ध करता है । (अयम् उ वै यः पवते सः यज्ञः) और यह जो चलता है, वह यज्ञ है । (तस्य मनः च वाक् च वर्तनिः) उस [ब्रह्मा] का मन और वाणी प्रवृत्ति मार्ग है । (मनसा च एव हि वाचा च यज्ञे वहति, अतः एव मनः इयम् एव वाक्) मन से और वाणी से ही वह यज्ञ में चलता है, इससे ही मन यही वाणी है । (सः यत् वदन् न अस्ति विद्यात् मे अस्य यज्ञस्य अर्द्धम् अन्तः अगात् इति) जो वह [ब्रह्मा] बताता हुआ नहीं रहता है, वह जाने कि मेरे इस यज्ञ की ऋद्धि [सम्पत्ति] छिप गई । (तत् यथा एकपात् पुरुषः यन्, एकचक्रः रथः वा

२—(अतनुत) व्यस्तारयत् (महावाद्यम्) अतिशयेन कथनीयम् । प्रशंसनीयम् (अन्यतरः) अन्यतमः । बहूनां मध्ये निर्धारित एकः (पक्षः) भागः (संस्क्रियते) सम्पाद्यते (संस्करोति) सम्यक् सम्पादयति (पवते) गच्छति ।

वर्तमानः भ्रेषं न्येति एवम् एव अस्य यज्ञः भ्रेषं न्येति) और जैसे एक पांव वाला पुरुष जाता हुआ अथवा एक पहिये वाला रथ चलता हुआ गिर जाता है, वैसे ही इसका यज्ञ गिर जाता है। (यज्ञस्य भ्रेषम् अनु यजमानः भ्रेषं न्येति) यज्ञ के गिराव के साथ यजमान गिर जाता है। (यजमानस्य भ्रेषम् अनु ऋत्विजः भ्रेषं नियन्ति) यजमान के गिराव के समय ऋत्विज् लोग गिर जाते हैं। (ऋत्विजां भ्रेषम् अनु दक्षिणाः भ्रेषं नियन्ति) ऋत्विजों के गिराव के साथ दक्षिणायें गिर जाती हैं। (दक्षिणानाम् भ्रेषम् अनु यजमानः पुत्रपशुभिः भ्रेषं न्येति) दक्षिणाओं के गिराव के साथ यजमान पुत्र और पशुओं सहित गिर जाता है। (पुत्रपशूनां भ्रेषम् अनु यजमानः स्वर्गेण लोकेन भ्रेषं न्येति) पुत्र और पशुओं के गिराव के साथ यजमान स्वर्गलोक से गिर जाता है। (स्वर्गस्य लोकस्य भ्रेषम् अनु तस्य अर्द्धस्य योगक्षेमः भ्रेषं न्येति, यस्मिन् अर्द्धे यजन्ते इति ब्राह्मणम्) स्वर्गलोक के गिराव के साथ उसकी सम्पत्ति का योगक्षेम [पाने योग्य का पाना और पाये हुये का बचाना] गिर जाता है, जिस सम्पत्ति में लोग यज्ञ करते हैं—यह ब्राह्मण [वेदज्ञान] है [इस कण्डिका का मिलान करो—गोपथ पू० १ । १३] ।। २ ।।

भावार्थः—कर्मकुशल ऋत्विजों के न होने से यज्ञ में विघ्न पड़ता है ।। २ ।।

कण्डिका ३ ।।

तदु ह स्माह श्वेतकेतुरारुणेयो ब्रह्माणं दृष्ट्वा भाषमाणमर्द्धं मेऽस्य यज्ञस्यान्तरगादिति, तस्माद् ब्रह्मा स्तुते बहिःपवमाने वाचोयम्यमुपांश्वन्तर्य्यामाभ्यामथ ये पवमान उदूचुस्तेष्वथ यानि च स्तोत्राणि च शस्त्राण्यावषट्कारात्तेषु स यदृक्तो भ्रेषन्नियच्छेदों भूर्जनदिति गार्हपत्ये जुहुयात्, यदि यजुष्ट ओं भुवो जनदिति दक्षिणाग्नौ जुहुयात्, यदि सामत ओं स्वर्जनदित्याहवनीये जुहुयात्, यद्यनाज्ञाता ब्रह्मतो ओं भूर्भुवः स्वर्जनदोमित्याहवनीय एव जुहुयात्, तद्वाकोवाक्यस्यर्चां यजुषां साम्नामथर्वाङ्गिरसामथापि वेदानां रसेन यज्ञस्य विरिष्टं सन्धीयते, तद्यथा लवणेनेत्युक्तं, तद्यथा उभयपात्पुरुषो यन्नुभयचक्रो वा रथो वर्त्तमानोऽभ्रेषं न्येत्येवमेवास्य यज्ञोऽभ्रेषं न्येति, यज्ञस्याभ्रेषमनु यजमानोऽभ्रेषं न्येति, यजमानस्याभ्रेषमनृत्विजोऽभ्रेषं नियन्ति, ऋत्विजामभ्रेषमनु दक्षिणा अभ्रेषं नियन्ति, दक्षिणानामभ्रेषमनु यजमानः पुत्रपशुभिरभ्रेषं न्येति, पुत्रपशूनामभ्रेषमनु यजमानः स्वर्गेण लोकेनाभ्रेषं न्येति, स्वर्गस्य लोकस्याभ्रेषमनु तस्यार्द्धस्य योगक्षेमोऽभ्रेषं न्येति, यस्मिन्नर्द्धे यजन्त इति ब्राह्मणम् ।। ३ ।।

कण्डिका ३ ।। यज्ञ में त्रुटि होने पर प्रायश्चित्त ।।

(आरुणेयः श्वेतकेतुः तत् उ स्म ब्रह्माणं भाषमाणं दृष्ट्वा आह मे अस्य

निघ० २ । १४ (वर्त्तनिः) प्रवृत्तिमार्गः (वदन्) कथयन् (अर्द्धम्) पू० १ । १३ । ऋद्धिम् । संपत्तिम् (अन्तः) मध्ये (यन्) इण् गतौ-शतृः । गच्छन् (भ्रेषम्) भ्रेषृ चलने—घञ् । अधःपतनम् (न्येति) निश्चयेन प्राप्नोति (अर्द्धस्य) सम्पत्तेः (योगक्षेमः) गो० पू० १ । १३ । प्राप्यस्य प्रापणं प्राप्तस्य रक्षणम् ।।

यज्ञस्य अर्द्धम् अन्तर् अगात् इति) अरुण का पुत्र श्वेतकेतु तब ही ब्रह्मा को बोलते हुये देख कर कहने लगा—मेरे इस यज्ञ का आधा भाग छिप गया। (तस्मात् ब्रह्मा बहिःपवमाने वाचोयम्यम् उपांशु यामाभ्याम् अन्तर् स्तुते) इसलिये ब्रह्मा दो बहिःपवमान स्तोत्र को वाणी रोक कर चुपचाप दो पहर तक बोलता है। (अथ ये पवमाने उद्गुचुः तेषु अथ यानि च स्तोत्राणि च शस्त्राणि आवषट्कारात् तेषु सः यत् ऋक्तःभ्रेषं नियच्छेत् ओं भूः जनत् इति गार्हपत्ये जुहुयात्) और जो पुरुष दो पवमान स्तोत्रों को बोलें उनमें, और जो स्तोत्र और शस्त्र वषट्कार के साथ यज्ञ समाप्ति तक होते हैं उनमें, वह [ब्रह्मा] जो ऋग्वेद से गिराव [त्रुटि] को रोके, ओम् भूः जनत्—इन [व्याहृतियों] से गार्हपत्य अग्नि में हवन करे। (यदि यजुष्टः ओं भुवः जनत् इति दक्षिणाग्नौ जुहुयात्) जो यजुर्वेद से [त्रुटि को रोके]—ओम् भुवः जनत्—इनसे दक्षिणाग्नि में हवन करे।(यदि सामतः, ओं स्वः जनत् इति आहवनीये जुहुयात्) जो सामवेद से [त्रुटि को रोके]—ओं स्वः जनत्—इनसे आहवनीय अग्नि में हवन करे। (यदि अनाज्ञाताः ब्रह्मणे[1], ओं भूः भुवः स्वः जनत् ओम् इति आहवनीये एव जुहुयात्) जो न जानी हुई ब्रह्मा की क्रियाओं को [रोके]—ओम् भूः भुवः स्वः जनत्—इन [व्याहृतियों] से आहवनीय अग्नि में ही हवन करे। (तत् वाकोवाक्यस्य ऋचां, यजुषां, साम्नाम्. अथर्वाङ्गिरसां अथ अपि वेदानां रसेन यज्ञस्य विरिष्टम् सन्धीयते) वह वाकोवाक्य के ऋग्वेद मन्त्रों के, यजुर्वेद मन्त्रों के, सामवेद मन्त्रों के और चारों वेद मन्त्रों के और वेदों के रस—[ध्वनि] से यज्ञ का दोष सुधर जाता है। (तत् यथा लवणेन इति उक्तम्) सो जैसे लवण [खार] के साथ यह कहा गया है [गोपथ पू० १। १४], (तत् यथा उभयपात् पुरुषः यन् उभयचक्रः रथः वा वर्तमानः अभ्रेषं न्येति एवम् एव अस्य यज्ञः अभ्रेषं न्येति) सो जैसे दो पांव वाला पुरुष चलता हुआ, अथवा दो पहिये वाला रथ वर्त्तमान [जाता हुआ] नहीं चलता [स्थिरता] पाता है, वैसे ही इस [यजमान] का यज्ञ निश्चलता पाता है। (यज्ञस्य अभ्रेषम् अनु यजमानः अभ्रेषं न्येति) यज्ञ की निश्चलता के साथ यजमान निश्चलता [अकर्मण्यता] पाता है। (यजमानस्य अभ्रेषम् अनु ऋत्विजः अभ्रेषं नियन्ति) यजमान की निश्चलता के साथ ऋत्विज् लोग निश्चलता पाते हैं। (ऋत्विजाम् अभ्रेषम् अनु दक्षिणाः अभ्रेषं नियन्ति) ऋत्विजों की निश्चलता के साथ दक्षिणायें निश्चलता पाती हैं। (दक्षिणानाम् अभ्रेषम् अनु यजमानः पुत्रपशुभिः अभ्रेषं न्येति) दक्षिणाओं की निश्चलता के साथ यजमान पुत्रों और पशुओं सहित निश्चलता पाता है। (पुत्रपशूनाम् अभ्रेषम् अनु यजमानः स्वर्गेण लोकेन अभ्रेषं न्येति) पुत्रों और पशुओं की निश्चलता

३—(आरुणेयः) अरुण—ढक्। अरुणस्य पुत्रः (अन्तर्) अदर्शनम्। मध्ये (स्तुते) स्तौति (बहिः पवमाने) स्तोत्रविशेषद्वयम् (वाचोयम्यम्) यम उपरमे —यत्। वाचः वाण्याः यम्यं यमन विरोधं कृत्वा (उपांशु) अप्रकाशे गुप्ते (यामाभ्याम्) प्रहराभ्याम् (उद्गुचुः) उच्चारितवन्तः (आवषट्कारात्) वषट्-

---

१. पू० सं० 'ब्रह्मतो' इति पाठः स चासङ्गतः ॥ सम्पा० ॥

के साथ यजमान स्वर्ग लोक के सहित निश्चलता पाता है। (स्वर्गस्य लोकस्य अभ्रेषम् अनु तस्य अर्द्धस्य योगक्षेमः अभ्रेषं न्येति, यस्मिन् अर्द्धे यजन्ते इति ब्राह्मणम्) स्वर्ग लोक की निश्चलता के साथ उस [यजमान] की ऋद्धि [सम्पत्ति] का योगक्षेम [पाने योग्य का पाना और पाये हुये का बचाना] निश्चलता पाता है, जिस सम्पत्ति में वे यज्ञ करते हैं, यह ब्राह्मण [वेदज्ञान] है ॥ ३ ॥

भावार्थः—यज्ञ में त्रुटि का प्रायश्चित्त कर देने से यज्ञ की सिद्धि और यजमान की वृद्धि होती है ॥ ३ ॥

विशेषः—इस कण्डिका को मिलाओ—गो० पू० १ । १४ और ऐतरेय ब्राह्मण ५ । ३४ ॥

कण्डिका ४ ॥

तद्यदौदुम्बर्य्यान्म आसिष्ट, हिङ्कृणोत् मे प्रास्तावीन्म उदगासीत् मे सुब्रह्मण्यामाह्वासीदित्युद्गात्रे दक्षिणा नीयन्ते, ग्रहान् मेऽग्रहीत् प्राचारीन्मेऽशुश्रुवन् मे संमनसस्कार्षीदयाक्षीन्मेऽवषट्कार्षीन्म इत्यध्वर्य्यवे, होतृसदन आसिष्ट, अयाक्षीन्मेऽशांसीन्मेऽवषट्कार्षीन्म इति होत्रे, देवयजनं मेऽचीक्लृपद् ब्रह्मा सादं मेऽसीसृपद् ब्रह्मजपान्मेऽजपीत् पुरस्ताद्धोम-संस्थितहोमान्मेऽहौषीदयाक्षीन्मेऽशांसीन्मेऽवषट्कार्षीन् म इति ब्रह्मणे भूयिष्ठेन मा ब्रह्मणाकार्षीदित्येतद्वै भूयिष्ठं ब्रह्म यद्भृग्वङ्गिरसः, येऽङ्गिरसः स रसः येऽथर्वाणः, येऽथर्वाणस्तद्भेषजं, यद्भेषजं तदमृतं, यदमृतं तद् ब्रह्म, स वा एष पूर्वेषामृत्विजामर्द्धभागस्यार्द्धमितरेषामर्द्धं ब्रह्मण इति ब्राह्मणम् ॥ ४ ॥

कण्डिका ४ ॥ ऋत्विजों के कर्म जिनमें वे दक्षिणा पाते हैं ॥

(तत् यत् औदुम्बर्य्यां मे आसिष्ट, हिङ्कृणोत् मे, प्रास्तावीत् मे, उदगासीत् मे, सुब्रह्मण्याम् आह्वासीत् इति उद्गात्रे दक्षिणाः नीयन्ते[1]) वह जो [उद्गाता] औदुम्बरी [गूलर के मचान] पर मेरे [यजमान के] लिये बैठा, मेरे लिये हिङ् शब्द किया, मेरे लिये स्तुति की, मेरे लिये सामगान किया सुब्रह्मण्या [भली

कारेण यज्ञसमाप्तिपर्यन्तम् (भ्रेषम्) अधःपतनम् (नियच्छेत्) यम उपरमे—विधिलिङ् । नियमे कुर्यात् । अवरुन्धेत । (वाकोवाक्यस्य) क० २१ द्र० । पदसमूहस्य (यन्) गच्छन् (अभ्रेषम्) अचलनम् । दृढत्वम् । स्थिरताम् ।

४—(औदुम्बर्य्याम्) पृभिदिव्यधि० (उ० १ । २३) उड संहतौ संहनने समूहे वा, सौत्रो धातु—कुः । संज्ञायां भृतृवृ० (पा० ३ । २ । ४६) उडु + वृञ् वरणे—खच् । मुम् च डस्य दः, वस्य बः । ततः अण् ङीप् । उदुम्बरकाष्ठनिर्मितायां खट्वायाम् (मे) मदर्थम् (उदगासीत्) अगायत् (सुब्रह्मण्याम्) तत्र

---

१. ऋत्विजों के विभिन्न कार्यों के प्रति कृतज्ञता व्यक्त करते हुए यजमान द्वारा दक्षिणा दी जा रही है इसी का वर्णन यहाँ है, अर्थात् आप मेरे लिए दो शाखा वाले गूलर की डाल के नीचे बैठे, सामवेद गान के समय हिङ्कार किया, आदि २ बहुत कष्ट उठाये ।।सम्पा०।।

भांति ब्रह्म को बताने वाली ऋचा] बोला, इसलिये उद्गाता को दक्षिणायें दी जाती हैं (ग्रहान् मे अग्रहीत् प्राचारीत् मे, अशुश्रुवत् मे, संमनसः कार्षीत्, अयाक्षीत् मे, अवषट्कार्षीत् मे इति अध्वर्यवे) [जिसलिये अध्वर्यु ने] ग्रहों [सोमपात्रों] को मेरे लिये ग्रहण किया, मेरे लिये प्रचार किया, मेरे लिये [वेदमन्त्र] सुनवाये, [लोगों को] समान मन वाला किया, मेरे लिये यज्ञ किया, मेरे लिये वषट् [समाप्ति का शब्द] किया, इसलिये अध्वर्यु को [दक्षिणायें लायी जाती हैं]। (होतृसदने आसिष्ट, अयाक्षीत् मे, अशांसीत् मे, अवषट्कार्षीत् मे, इति होत्रे) [जिसलिये होता] होतृसदन में बैठा, मेरे लिये यज्ञ किया, मेरे लिये स्तुति की, मेरे लिये वषट्कार किया, इसलिये होता को [दक्षिणायें लायी जाती हैं]। (ब्रह्मा देवयजनं मे अचीक्लृपत्, सादं मे असीसृपत् ब्रह्मजपान् मे अजपीत्, पुरस्ताद्धोमसंस्थितहोमान् मे अहौषीत्, अयाक्षीत् मे, अशांसीत् मे, अवषट्कार्षीत् मे, इति ब्रह्मणे) [जिसलिये] ब्रह्मा ने देवयजन मेरे लिये ठीक बनाया, मेरे लिए स्थान पहुँचाया, मेरे लिए वेद के जप जपे, मेरे लिए पुरस्तात्-होम और संस्थितहोमों को हवन किया, मेरे लिए यज्ञ किया, मेरे लिए स्तुति की, मेरे लिए वषट् [यज्ञ समाप्ति का शब्द] किया, इसलिए ब्रह्मा को [दक्षिणायें दी जाती हैं]। (भूयिष्ठेन ब्रह्मणा मा अकार्षीत् इति एतत् वै भूयिष्ठं ब्रह्म यत् भृग्वङ्गिरसः) [ब्रह्मा ने] बहुत अधिक ब्रह्मज्ञान के साथ मुझे किया है, यही बहुत अधिक ब्रह्मज्ञान है, जो भृगु अङ्गिरा [परिपक्व ज्ञान वाले चारों वेद] हैं। (ये अङ्गिरसः सः रसः ये अथर्वाणः) जो अङ्गिरस [ज्ञान वाले चारो वेद] हैं, जो अथर्वा [निश्चल ज्ञान वाले चारों वेद] हैं, वह रस है। (ये अथर्वाणः तद् भेषजम्) जो अथर्वा [निश्चल ज्ञान वाले चारों वेद] हैं; वह औषध है। (यत् भेषजं तत् अमृतं यत् अमृतं तत् ब्रह्म, सः वै एषः) जो औषध है वही अमृत है, जो अमृत है वह ब्रह्म [वेद ज्ञान] है, वही [ज्ञान स्वरूप] यह [ब्रह्मा] है। (पूर्वेषाम् ऋत्विजाम् अर्द्धभागस्य अर्द्धम् इतरेषाम् ब्रह्मणः अर्द्धम् इति ब्राह्मणम्) पहिले ऋत्विजों की सम्पत्ति के भाग का आधा दूसरों [उद्गाता, अध्वर्यु और होता] का है और आधा ब्रह्मा का है, यह ब्राह्मण [ब्रह्मज्ञान] है[१] ॥ ४ ॥

साधुः (पा० ४ । ४ । ९८) सुब्रह्मन्—यत्, टाप् । सुब्रह्मणि सुष्ठु वेदज्ञाने प्रवृत्ताम् स्तुतिम् ऋचं वा (आह्वासीत्) आ + ह्वेञ् शब्दे—लुङ् । आहूतवान् (नीयन्ते) प्राप्यन्ते । दीयन्ते (ग्रहान्) सोमपात्राणि (अशुश्रुवत्) श्रु श्रवणे—णिच्, लुङ् । श्रावितवान् (संमनसः) समानहृदयान् (अशांसीत्) शंसु स्तुतौ—लुङ् । स्तुतवान् (अवषट्कार्षीत्) वषट्कार, नामधातुः—लुङ् । वषट् शब्दम् अकार्षीत् (अचीक्लृपत्) समर्थं योग्यं कृतवान् (सादम्) स्थानम् (असीसृपत्) सृप्लृ गतौ—णिच्—लुङ् । अगमयत् । प्रापितवान् (भूयिष्ठेन) बहुतमेन (ब्रह्मणा) वेदज्ञानेन (भेषजम्) औषधम् (अर्द्धम्) ऋधु वृद्धौ—घञ् । द्वयोर्मध्ये समभागः । समृद्धिः ॥

---

१. कण्डिका का भ्रष्टपाठ एवं तदनुसार अर्थ ठीक किया है ।। सम्पा० ॥

भावार्थः—चार ऋत्विजों में ब्रह्मा चतुर्वेदी और यज्ञविधान दर्शक होता है तथा शेष तीन एक एक वेद वाले होते हैं, इसलिए यजमान ब्रह्मा का औरों से उच्च पद जाने और उसका अधिक सत्कार करे ॥ ४ ॥

कण्डिका ५ ॥

देवाश्च ह वा असुराश्च संग्रामं समयतन्त, तत्रैतास्तिस्त्रो होत्रका जिह्मं प्रतिपेदिरे, तासामिन्द्र उक्थानि सामानि लुलोप, तानि होत्रे प्रायच्छदाज्यं ह वै होतुर्बभूव, प्रउगं पोतुर्वैश्वदेवं ह वै होतुर्बभूव, निष्केवल्यं नेष्टुर्मरुत्वतीयं ह वै होतुर्बभूव, आग्निमारुतमाग्नीध्रस्य, तस्मादेतदभ्यस्ततरमिव शस्यते यदाग्निमारुतं तस्मादेते संशंसुका इव भवन्ति यद्धोता पोता नेष्टाग्नीध्रो मुमोहे वसीत तद् ब्रह्मेयस मिवास तासामर्द्धं प्रतिलुलोप प्रथमार्हणञ्च प्रथमपदञ्चैतद्दक्षिणाञ्चैतत्परिशिषेदेदिति ब्राह्मणम् ॥ ५ ॥

कण्डिका ५ ॥ तीन ऋत्विजों से यज्ञ करना ॥

(देवाः च ह वै असुराः च संग्रामं समयतन्त) देवता और असुर लोग संग्राम में जुटे [विद्वान् और अविद्वान् ऋत्विज् लड़ने लगे]। (तत्र एताः तिस्रः होत्रकाः जिह्मं प्रतिपेदिरे) उस [संग्राम] में इन तीन होताओं ने कुटिलता विचारी । (तासाम् इन्द्रः उक्थानि[1] सामानि लुलोप) इन्द्र ने उन [ऋत्विजों] के उक्थ साम स्तोत्रों को तोड़ डाला । (तानि होत्रे प्रायच्छत्) उस [इन्द्र] ने उन [स्तोत्रों] को होता को दे दिया । (आज्यं ह वै होतुः बभूव) वही [स्तोत्र] आज्य [घृत स्तोत्र] होता का हुआ. (पोतुः प्रउगं होतुः वैश्वदेवं ह वै बभूव) वही [स्तोत्र] पोता [शोधने वाले ऋत्विज्] का प्रउग [प्रयोजनीय स्तोत्र] होता का ही वैश्वदेव [स्तोत्र] हुआ (नेष्टुः निष्केवल्यं ह वै होतुः मरुत्वतीयं बभूव आग्नीध्रस्य आग्निमारुतम्) वही [स्तोत्र] नेष्टा [नायक ऋत्विज्] का निष्केवल्य स्तोत्र ही होता का मरुत्वतीय [स्तोत्र] हुआ, और आग्नीध्र [अग्नि प्रकाशक ऋत्विज्] का आग्निमारुत [स्तोत्र हुआ], (तस्मात् एतत् अभ्यस्ततरम् इव शस्यते यत् आग्निमारुतम्) इसलिये यह [स्तोत्र] अधिक बार ही बोला जाता है, जो आग्निमारुत है।

५—(होत्रकाः) होत्रा-कन्, टाप् स्त्रीलिङ्गः। होत्राः—गो० पू० २ । १६ । ऋत्विजः (जिह्मम्) जहातेः सन्वदाकारलोपश्च (उ० १ । १४१)। ओहाक् त्यागे-मन् । कुटिलभावम् । मन्दत्वम् (प्रतिपेदिरे) प्रतिपादितवन्तः । आचरितवन्तः (सामानि) सामवेदस्तोत्राणि (लुलोप) लुप्लृ छेदने—लिट् । छिन्नवान् (प्रउगम्) उञ्छादीनां च (पा० ६ । १ । १५४) प्र+युजिर् योगे—घञ् अगुणः कुत्वं यलोपः । प्रयोगार्हं स्तोत्रम् (निष्केवल्यम्) इन्द्रस्य शस्त्रं स्तोत्रम् (नेष्टुः) नप्तृनेष्टृत्वष्टृ० (उ० २ । ९५) णीञ् प्रापणे—तृन्, षुक् च । नयनकर्तुः । ऋत्विग्विशेषस्य (मरुत्वतीयम्) मत्वादिभ्यश्च (पा० ४ । २ । ८६)। मरुत्—मतुप् मस्य वः । मरुत्वत्-

---

१. उक्थम् शब्द पातृतुदि० (उ० २ । ७) से थक् प्रत्यय करके निष्पन्न होता है । उच्यते परितो भाष्यते यत्तदुक्थम् ॥ सम्पा० ॥

है। (तस्मात् एते संशंसुकाः इव भवन्ति यत् होता पोता नेष्टा आग्नीध्रः मुमोहे [=सुमोहे] वसीत) इसलिये यह सब लोग संशंसुक [मिल कर स्तुति करने वाले] ही होते हैं, कि होता पोता, नेष्टा और आग्नीध्र बड़े मोह में घिर जावें, (तत् ब्रह्मा इयसाम् आस इव) और तब ब्रह्मा उदासीन ? सा हुआ । (तासाम् अर्धं प्रतिलुलोप) उन [होत्रक लोगों का आधा भाग उस [इन्द्र यजमान] ने काट दिया । (एतत् प्रथमार्हणं च प्रथमपदं च एतत् दक्षिणां च परिशिषेदेत् इति ब्राह्मणम्) इस कारण प्रथम पूजन और प्रथम पद [ब्रह्मा पद] को और इस कारण दक्षिणा को प्रतिषेध करे [रोक देवे] यह ब्राह्मण [ब्रह्मज्ञान] है ॥ ५ ॥

भावार्थः—इस कण्डिका का शब्दार्थ समझ में नहीं आया, विद्वान् लोग विचार लेवें। भाव यह जान पड़ता है कि ब्रह्मा के अभाव में यज्ञ पूरा पूरा सिद्ध नहीं होता, इसलिये सहायक ऋत्विजों को आधी दक्षिणा दी जावे और आधी बचा ली जावे ॥ ५ ॥

कण्डिका ६ ॥

उद्दालको ह वा आरुणिरुदीच्यान् वृतो धावयाञ्चकार, तस्य ह निष्क उपाहितो बभूव, उपवादाद् बिभ्यतो, यो मा ब्राह्मणोऽनूचान उपवदिष्यति तस्मा एतं प्रदास्यामीति, तद्धोदीच्यान् ब्राह्मणान् भयं बिभेद उद्दालको ह वा अयमायाति, कौरुपाञ्चालो ब्रह्मा ब्रह्मपुत्रः स ऊर्ध्वं वृतो न पर्य्यादधीत केनेमं वीरेण प्रतिसंयतामहा इति, य यत एव प्रपन्नं दध्रे तत् एवमनुप्रतिपेदिरे. ते ह स्वैदायनं शौनकमूचुः, स्वैदायन त्वं वै नो ब्रह्मिष्ठोऽसीति त्वयेमं वीरेण प्रतिसंयतामहा इति, तं यत एव प्रपन्नं दध्रे तत एवमनुप्रतिपेदिरे. तं ह स्वैदायना इत्यामन्त्रयामास, स भो गोतमस्य पुत्रेतीतिहास्मा असूयात्, प्रतिश्रुतं प्रतिशुश्राव, स वै गौतमस्य पुत्र ऊर्द्ध्वं वृतोऽधावीत् ॥ ६ ॥

कण्डिका ६ ॥ उद्दालक ऋषि का उत्तर वालों से शास्त्रार्थ करने का प्रयत्न ॥

(वृतः आरुणिः उद्दालकः ह वै उदीच्यान् धावयांचकार) चुने हुए आरुणि [अरुण के पुत्र] उद्दालक [अज्ञान दलने वाले ऋषि] ने उत्तर निवासियों पर धावा

छप्रत्ययः । मरुत्वान् इन्द्रः, तस्य स्तोत्रम् (आग्नीध्रस्य) अग्निमिन्धे अग्नीत्, अग्नि+ञिइन्धी दीप्तौ--क्विप् । अग्नीधः शरणे रण् भं च (वा० पा० ४ । ३ । १२०) अग्नीध्—रण् । अग्निप्रदीपकस्य ऋत्विग्विशेषस्य (संशंसुकाः) समि कस उकन् (उ० २ । २९) सम्+शंसु स्तुतौ—उकन् । संयोगेन स्तोतारः (मुमोहे) प्रमादपाठः । सुमोहे । सु+मुह वैचित्ये—घञ् । महत्यज्ञाने (वसीत) वस आच्छादने । आच्छाद्यते (इयसाम्+आस) ? इयस उदासीनतायां—लिट् ? आर्षप्रयोगः । उदासीनो बभूव (इव) यथा (प्रतिलुलोप) प्रत्यक्षेण लुप्तवान् (प्रथमार्हणम्) अर्ह पूजायाम्--ल्युट् । प्रथमपूजनम् (एतत्) अनेन प्रकारेण (परिशिषेदेत्) षिधु गत्याम्, अस्यार्षरूपम् । निषेधेत् । वर्जयेत् ॥

किया। (उपवादात् बिभ्यतः तस्य ह निष्कः उपाहितः बभूव) शास्त्रार्थ से डरते हुए उस [उद्दालक] का हार पण में रक्खा गया था। (यः अनूचानः ब्राह्मणः मा उपवदिष्यति तस्मै एतं प्रदास्यामि इति) [उद्दालक ने कहा] जो अनूचान [अङ्ग उपाङ्ग सहित वेद जानने वाला] ब्राह्मण मुझसे शास्त्रार्थ करेगा उसको यह [हार] दूँगा। (तत् ह उदीच्यान् ब्राह्मणान् भयं बिभेद) उससे उत्तर निवासी ब्राह्मणों को भय ने छेद डाला। (अयम् उद्दालकः ह वै आयाति, कौरुपाञ्चालः ब्रह्मा ब्रह्मपुत्रः, सः वृतः ऊद्ध्र्वं पर्य्यादधीत इमं वे न वीरेण प्रतिसंयतामहै) यह उद्दालक ही आता है, यह कुरु पञ्चाल का रहने वाला ब्रह्मा [चारों वेद जानने वाला] ब्रह्मा का पुत्र है वह चुना हुआ [हार को] ऊपर न धारण करे, [इसलिए] इसको किस वीर के साथ हम जुटावें। (यतः एव तं प्रपन्नं दध्रे ततः एवम् अनुप्रतिपेदिरे) जो कि उस [उद्दालक] ने उस [हार] को सामने रख दिया था, इसलिए उन्होंने ऐसा विचार किया। (ते ह स्वैदायनं शौनकम् ऊचुः) वे उसके विषय में स्वैदायन शौनक से बोले— (स्वैदायन त्वं वै नः ब्रह्मिष्ठः असि इति इमं त्वया वीरेण प्रतिसंयतामहै इति) हे स्वैदायन ! तू ही हममें बड़ा ब्रह्मज्ञानी है, इसको तुझ वीर के साथ हम जुटावें। (यतः एव तं प्रपन्नं दध्रे ततः एवं तं ह स्वैदायनाः अनुप्रतिपेदिरे इति) जो कि उस [उद्दालक] ने उस [हार] को सामने रख दिया था, इसलिए ऐसा उसके विषय में ही स्वैदायन लोगों ने विचार किया। (सः आमन्त्रयामास भो गोतमस्य पुत्र इति इति ह अस्मै असूयात्) वह [स्वैदायन] बोला—हे गोतम के पुत्र ! आप इस [मुझ] से युद्ध करें। (प्रतिश्रुतं प्रतिशुश्राव) उस [उद्दालक] ने अङ्गीकृत वचन को अङ्गीकार किया। (सः वै गोतमस्य वृतः पुत्रः ऊद्ध्र्वम् अधावीत्) वही गोतम का चुना हुआ पुत्र ऊँचे स्थान को शीघ्र गया॥ ६॥

६—(उद्दालकः) उत् + दलविदारणे—घञ्, स्वार्थे कन्। उत्कर्षेन दलति भिनत्ति अज्ञानानि यः। मुनिभेदः (आरुणिः) अरुण—इञ्। अरुणस्य पुत्रः (उदीच्यान्) द्युप्रागपागुदक्प्रतीचो यत् (पा० ४।२।१०१) उदच्—यत्। उत्तरदेशनिवासिनः (निष्कः) वक्षोभूषणम्। हारः (उपाहितः) उप + आ + दधातेः—क्तः। पणे आरोपितः (उपवादात्) शास्त्रार्थात् (बिभ्यतः) बिभेतेः—शतृः। भयं गच्छतः पुरुषस्य (अनूचानः) साङ्गोपाङ्गवेदवेत्ता (उपवदिष्यति) उपेत्य कथयिष्यति। शास्त्रार्थं करिष्यति (कौरुपाञ्चालः) तस्य निवासः (पा० ४।२।६९) कुरुपञ्चाल—अण्। अनुशतिकादीनां च (पा० ७।३।२०) उभयपदादिवृद्धिः। कुरुपञ्चालदेशनिवासी। उद्दालकः (ऊद्ध्र्वम्) उच्चम् (वृतः) स्वीकृतः (दध्रे) दधार (स्वैदायनम्) स्वेदायन—अण्। स्वेदायनस्य पुत्रम्। (शौनकम् शुन गतौ -कः, ततः कन्, अण् च। ज्ञानवान्। मुनिविशेषः (ब्रह्मिष्ठः) ब्रह्म—इष्ठन्। अतिशयेन ब्रह्मज्ञानी (अस्मै) क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः (पा० १।४।३७) असूयात् इति क्रियया सह चतुर्थी (असूयात्) असु उपतापे—लेट्। विवादयेत् (प्रतिश्रुतम्) स्वीकृतम् (प्रतिशुश्राव) स्वीकृतवान्॥

भावार्थ:--विद्वान् लोग परस्पर प्रश्नोत्तर करके ब्रह्मज्ञान की उन्नति करें ॥ ६ ॥

कण्डिका ७ ॥

यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादिमाः प्रजाः शिरस्तः प्रथमं लोमशा जायन्ते १, कस्मादासामपरमिव श्मश्रूण्युपकक्षाण्यन्यानि लोमानि जायन्ते २, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादिमाः प्रजाः शिरस्तः प्रथमं पलिता भवन्ति ३, कस्मादन्ततः सर्वा एव पलिता भवन्ति ४, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादिमाः प्रजा अदन्तिका जायन्ते ५, कस्मादासामपरमिव जायन्ते ६, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादासां सप्तवर्षाष्टवर्षाणां प्रभिद्यन्ते ७, कस्मादासां पुनरेव जायन्ते ८, कस्मादन्ततः सर्व एव प्रभिद्यन्ते ९, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादधरे दन्ताः पूर्वे जायन्ते १०, पर उत्तरे ११, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादधरे दन्ताः अणीयांसो ह्रसीयांसः १२, प्रथीयांसो वर्षीयांस उत्तरे १३, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादिमौ दंष्ट्रौ दीर्घतरौ १४, कस्मात्समे इव जम्भे १५, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादिमे श्रोत्रेऽन्ततः समे इव दीर्णे १६, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मात् पुमांसः श्मश्रुवन्तो १७, ऽश्मश्रवः[1] स्त्रियः १८, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादासां सन्ततमिव शरीरं भवति १९, कस्मादासामस्थीनि दृढतराणीव भवन्ति २०, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादासां प्रथमे वयसि रेतः सिक्त न सम्भवति २१, कस्मादासां मध्यमे वयसि रेतः सिक्तं सम्भवति २२, कस्मादासामुत्तमे वयसि रेतः सिक्तं न सम्भवति २३, यस्तद्दर्शपूर्णमासयो रूपं विद्यात् कस्मादिदं शिश्नमुच्चश एति २४, नीचीपद्यते २५, कस्मात्सकृदपानम् २६ ॥ ७ ॥

कण्डिका ७ ॥ अमावस्या और पूर्णमासी के यज्ञ के सम्बन्ध से उद्दालक के शरीर सम्बन्धी प्रश्न ॥

(तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) [उद्दालक ने कहा] सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् इमाः प्रजाः प्रथमं शिरस्तः लोमशाः जायन्ते १, कस्मात् आसाम् अपरम् इव श्मश्रूणि उपकक्षाणि अन्यानि लोमानि जायन्ते २) कैसे यह सब प्रजायें पहिले शिर पर लोम वाले उत्पन्न होते हैं १, कैसे पीछे से इनके दाढ़ी मूँछ और कांख के और दूसरे लोम उत्पन्न होते हैं २। (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् इमाः प्रजाः प्रथमं शिरस्तः पलिताः भवन्ति ३, कस्मात् अन्ततः सर्वा एव पलिताः

७—(उपकक्षाणि) कक्षसमीपस्थानि (पलिताः) श्वेताः (अदन्तिकाः) दन्तरहिताः (अणीयांसः) अणु—ईयसुन्। अतिसूक्ष्माः (ह्रसीयांसः) ह्रस्व-

---

१. "अश्मश्रुवः" इति पू० सं० पाठः ॥ सम्पा० ॥

भवन्ति ४) क्यों यह प्रजायें पहिले शिर पर श्वेत हो जाते हैं ३, क्यों अन्त में सब ही श्वेत हो जाते हैं ४ । (यः तत् दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् इमाः प्रजाः अदन्तिकाः जायन्ते ५, कस्मात् आसाम् अपरम् इव जायन्ते ६) क्यों यह प्रजायें बिना दांत वाले उत्पन्न होते हैं ५, क्यों इनके [दांत] पीछे निकलते हैं ६ । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् आसां सप्तवर्षाष्टवर्षाणां प्रभिद्यन्ते ७, कस्मात् आसां पुनः एव जायन्ते ८, कस्मात् अन्ततः सर्वे एव प्रभिद्यन्ते ९) क्यों इन सात वर्ष आठ वर्ष वालों के [दांत] उखड़ जाते हैं ७, क्यों इनके [दांत] फिर भी निकल आते हैं ८, क्यों अन्त में सभी उखड़ जाते हैं ९ । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् अधरे दन्ताः पूर्वे जायन्ते १०, परे उत्तरे ११) क्यों नीचे वाले दांत पहिले निकलते हैं १०, और पीछे ऊपर वाले ११ । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् अधरे दन्ताः अणीयांसः, ह्रसीयांसः १२, उत्तरे प्रथीयांसः वर्षीयांसः १३) क्यों नीचे वाले दांत अधिक सूक्ष्म और निर्बल होते हैं १२ और ऊपर वाले अधिक चौड़े और सबल होते हैं १३ । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् इमौ दंष्ट्रौ दीर्घतरौ १४, कस्मात् समे इव जम्भे १५) क्यों वह दोनों [सामने के] बड़े दांत अधिक लम्बे होते हैं १४, क्यों दोनों डाढ़ें चौकोर सी हैं १५ । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् इमे श्रोत्रे अन्ततः समे इव दीर्णे १६) क्यों यह दोनों कान अन्त में समान से फटे होते हैं १६ । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् पुमांसः श्मश्रुवन्तः १७, स्त्रियः अश्मश्रवः १८) क्यों पुरुष दाढ़ी मूछ वाले होते हैं १७, और स्त्रियां बिना दाढ़ी मूछ वाली १८ । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह उत्तर देवे]—(कस्मात् आसां शरीरं सन्ततम् इव भवति १९, कस्मात् आसाम् अस्थीनि दृढतराणि इव भवन्ति २०) क्यों इन [प्रजाओं] का शरीर फैला हुआ सा होता है १९, क्यों इनकी हड्डियां अधिक

ईयसुन् । निर्बलतराः । कोमलतराः (प्रथीयांसः) पृथु—ईयसुन् । स्थूलतराः (वर्षीयांसः) वृद्ध—ईयसुन् । वृद्धतराः । सबलतराः (उत्तरे) उपरिस्थाः (समे) समाने (सन्ततम्) विस्तृतम् (सिक्तम्) सिंचितम् (सम्भवति) उत्पद्यते (शिश्नम्) मेढ्रम् (सकृत्) शके ऋतिन् (उ० ४ । ५८) शक्ल शक्तौ-ऋतिन् वा शस्य सः । पुरीषम् । वीर्यम् (अपानम्) अप+अन प्राणने–अच् ।

दृढ़ होती हैं २० । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह बतावे]—(कस्मात् आसां प्रथमे वयसि रेतः सिक्तं न सम्भवति २१, कस्मात् आसां मध्यमे वयसि रेतः सिक्तं सम्भवति २२, कस्मात् आसाम् उत्तमे वयसि रेतः सिक्तं न सम्भवति २३) क्यों इन [प्रजाओं] की पहली अवस्था में वीर्य सींचा हुआ नहीं निकलता है २१, क्यों इनकी मध्यम अवस्था में वीर्य सींचा हुआ निकलता है २२, क्यों इनकी पिछली अवस्था में वीर्य सींचा हुआ नहीं निकलता है २३ । (तत् यः दर्शपूर्णमासयोः रूपं विद्यात्) सो जो पुरुष अमावस्या और पूर्णमासी के [यज्ञ के] रूप को जाने [वह बतावे]—(कस्मात् इदं शिश्नम् उच्चशः एति २४, नीचीपद्यते २५, कस्मात् शकृत् अपानम् २६) क्यों यह मनुष्य लिङ्ग ऊंचा जाता है २४, और नीचा होता है २५, क्यों शकृत् [मल वा वीर्य] नीचे जाने वाला होता है २६ ॥७॥

भावार्थः—अमावस्या और पूर्णमासी को चन्द्रमा की गति का प्रभाव शरीर पर क्या होता है, इसका विचार विद्वान् करते रहें । उत्तरों के लिये कण्डिका ९ देखो ॥७॥

कण्डिका ८ ॥

अथ यः पुरस्तादष्टावाज्यभागान् विद्यात् मध्यतः पञ्च हविर्भागाः, षट् प्राजापत्याः उपरिष्टादष्टावाज्यभागान् विद्यात् १ अथ यो गायत्रीं हरिणीं ज्योतिष्पक्षां सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहन्तीं विद्यात् २, अथ यः पङ्क्तिं पञ्चपदां सप्तदशाक्षरां सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहन्तीं विद्यात् ३ अस्मै ह निष्कं प्रयच्छन्नुवाचानूचानो ह वै स्वैदायना स सुवर्णं वै सुवर्णविदे ददामीति तदुपयम्य निश्चक्राम, तत्रापवव्राज यत्रेतरो बभूव, तं ह पप्रच्छ किमेष गोतमस्य पुत्र इत्येष ब्रह्मा ब्रह्मपुत्र इति होवाच, यदेनं कश्चिदुपवदेतोत मीमांसेत ह वा मूर्द्धा वा अस्य विपतेत्, प्राणा वैनं जह्युरिति, ते मिथ एव चिक्रन्देयुर्विप्रापवव्राज यत्रेतरो बभूव[1] ते प्रातः समित्पाणय उपोदेयुरुपायामो भवन्तमिति, किमर्थमिति यानेव नो भवांस्तान् ह्यः प्रश्नानपृच्छत्तानेव नो भवान् व्याचक्षीतेति, तथेति तेभ्य एतान् प्रश्नान् व्याचचक्षे ॥ ८ ॥

कण्डिका ८ ॥ पूर्वोक्त प्रश्नों के विषय में उद्दालक और स्वैदायन वा शौनक का वार्तालाप ॥

(अथ यः पुरस्तात् अष्टौ आज्यभागान् विद्यात् मध्यतः पञ्च हविर्भागाः, षट् प्राजापत्याः, उपरिष्टात् अष्टौ आज्यभागान् विद्यात् १) फिर जो पहिले आठ आज्य भागों [घी की आहुति विशेषों] को जाने, मध्य में पांच हविर्भाग [हवि की आहुतियां] और छः प्राजापत्य [प्रजापति की आहुतियां हैं उनको और] पीछे से आठ

अधःपतनशीलम् । अथवा अप + आ + णीञ् प्रापणे-डप्रत्ययः । अधोगमनशीलम् ॥

---

१. पू. सं. "बभूवुः" इति पाठः ॥ सम्पा० ॥

आज्य भागों को जाने १, (अथ यः हरिणीं ज्योतिष्पक्षां सवः यज्ञः यजमानं स्वर्ग लोकम् अभिवहन्तीं गायत्रीं विद्यात् २) फिर जो सुवर्ण मूर्ति, ज्योति के पंख वाली, सब यज्ञों के द्वारा यजमान को स्वर्ग लोक में पहुंचाने वाली गायत्री को [कण्डिका १०] जाने २, (अथ यः पञ्चपदां सप्तदशाक्षरां सर्वैः यज्ञैः यजमानं स्वर्गं लोकम् अभिवहन्तीं पङ्क्ति विद्यात् ३) फिर जो पांच पाद वाली, सत्रह अक्षर वाली, सब यज्ञों के द्वारा यजमान को स्वर्ग लोक में पहुंचाने वाली पङ्क्ति को [क० १०] जाने ३, (अस्मै निष्कं प्रयच्छन् सः ह वै अनूचानः उवाच, स्वैदायनाः सुवर्णं वै सुवर्णविदे ददामि इति) उस [जानकार] पुरुष को हार देता हुआ वही अनूचान [अङ्ग उपाङ्ग सहित वेदों का जानने वाला उद्दालक] बोला - हे स्वैदायन के लोगो ! सुवर्ण [सोने का हार] सुवर्ण [सुन्दर वरणीय स्वीकरणीय व्यवहार] जानने वाले को दूंगा। (तत् उ यम्य निश्चक्राम) यह निश्चित करके वह बाहिर गया, (तत्र अपवव्राज यत्र इतर. बभूव) और वहां पहुंचा जहां दूसरा [स्वैदायन] था। (तं ह पप्रच्छ किम् एषः गोतमस्य पुत्रः इति) उससे उस [स्वैदायन] ने पूछा—क्या यह गोतम का पुत्र है ? (ह उवाच एषः ब्रह्मा ब्रह्मपुत्रः इति) वह [उद्दालक] बोला—यह [मैं] ब्रह्मा [चारों वेद जानने वाला] और ब्रह्मा [चारों वेद जानने वाले] का पुत्र है, (यत् एनं कश्चित् उपवदेत उत मीमांसेत ह वा अस्य मूर्द्धा विपतेत् वा प्राणाः एनं जह्युः इति) जो कोई इसके साथ शास्त्रार्थ करे अथवा विचार करे अथवा इसका मस्तक गिर पड़े अथवा इसको प्राण छोड़ देवें—(ते मिथः एव चिक्रन्देयुः = विक्रन्देयुः) वे आपस में चिल्लाने लगे। (विप्रापवव्राज यत्र इतरः बभूव) वह [स्वैदायन] वहां पहुँचा जहां दूसरा [उद्दालक] था। (प्रातः ते समित्पाणयः उपोदेयुः, भवन्तम् उपयामः इति) वे [स्वैदायन] प्रातःकाल समिधायें हाथ में लिये हुये पहुँचे [और बोले]—हम आपके पास आये हैं। (किमर्थम् इति) [उद्दालक बोला] किसलिये। (यान् एव तान् प्रश्नान् भवान् नः ह्यः अपृच्छत्, तान् एव नः भवान् व्याचक्षीत इति) [स्वैदायन बोला] जिन ही उन प्रश्नों को हमसे आप ने कल पूँछा था, उनको ही हमें आप बताइगे। (तथा इति) [उद्दालक बोला] वैसा ही

८—(हरिणीम्) श्यास्त्याहृञविभ्य इनच् (उ० २ । ४६) हृञ् हरणे—इनच्, ङीप्। दुःखहरणशीलाम्। सुवर्णप्रतिमाम् (सुवर्णविदे) कृवृजृसि० (उ० ३ । १०) वृञ् वरणे—नप्रत्ययः + विद ज्ञाने—क्विप्। सुष्ठु वरणीयस्य स्वीकरणीयस्य व्यवहारस्य ज्ञात्रे (उपयम्य) निश्चित्य (निश्चक्राम) बहिर्जगाम (अपवव्राज) अपजगाम (मीमांसेत) विचारयेत् (जह्युः) ओहाक् त्यागे—विधिलिङ्। त्यजेयुः (चिक्रन्देयुः[1]) क्रदि आह्वाने रोदने च, आक्रोशं कृतवन्तः (विप्रापवव्राज) वि + प्र + अप + वव्राज (उपोदेयुः) उप + उद् + आ + ईयुः। समीपे आजग्मुः (व्याचक्षीत) भवान् विवृणोतु (व्याचचक्षे) व्याख्यातवान् ॥

---

१ विक्रन्देयुः इति समीचीनः पाठः प्रतिभाति ॥ सम्पा० ॥

हो । (तेभ्यः एतान् प्रश्नान् व्याचचक्षे) उन [उद्दालक] को उस [स्वैदायन] ने यह प्रश्न बताये ॥ ८ ॥

भावार्थः—विद्वान् लोग विद्वानों से सत्कार पूर्वक प्रश्नोत्तर करके सत्य का निर्णय करें ॥ ८ ॥

कण्डिका ९ ॥

यत्पुरस्ताद् वेदेः प्रथमं बर्हिः स्तृणाति तस्मादिमाः प्रजाः शिरस्तः प्रथमं लोमशा जायन्ते १, यदपरमिव प्रस्तरमनुस्तृणाति तस्मादासामपरमिव श्मश्रूण्युपकक्षाण्यन्यानि लोमानि जायन्ते २, यत् प्राग्बर्हिषः प्रस्तरमनुप्रहरति तस्मादिमाः प्रजाः शिरस्तः प्रथमं पलिता भवन्ति ३, यदन्ततः सर्वमेवानुप्रहरति तस्मादन्ततः सर्व एव पलिता भवन्ति ४, यत्प्रयाजा अपुरोऽनुवाक्यावन्तो भवन्ति तस्मादिमाः प्रजा अदन्तिका जायन्ते ५, यद्धवींषि पुरोऽनुवाक्यावन्ति भवन्ति तस्मादासामपरमिव जायन्ते ६, यदनुयाजा अपुरोऽनुवाक्यावन्तो भवन्ति तस्मादासां सप्तवर्षाष्टवर्षाणां प्रभिद्यन्ते ७, यत्पत्नीसंयाजाः पुरोऽनुवाक्यावन्तो भवन्ति तस्मादासां पुनरेव जायन्ते ८, यत्समिष्टयजुरपुरोऽनुवाक्यावद्भवति तस्मादन्ततः सर्व एव प्रभिद्यन्ते ९, यद्गायत्र्याऽनूच्य त्रिष्टुभा यजति तस्मादधरे दन्ताः पूर्वे जायन्ते १०, पर उत्तरे ११, यदृचाऽनूच्य यजुषा यजति तस्मादधरे दन्ता अणीयांसः ह्रसीयांसः १२, प्रथीयांसो वर्षीयांस उत्तरे १३, यदाघारौ दीर्घतरौ प्राञ्चावाघारयति तस्मादिमौ दंष्ट्रौ दीर्घतरौ १४, यत् संयाज्ये मच्छन्दसी तस्मात् समे इव जम्भे १५, यच्चतुर्थे प्रयाजे समानयति तस्मादिमे श्रोत्रे अन्ततः समे इव दीर्णे १६, यज्जपं जपित्वाऽभिहिङ्कृणोति तस्मात् पुमांसः श्मश्रुवन्तो १७, ऽश्मश्रुव स्त्रियः १८, यत् सामिधेनीः संतन्वन्नाह तस्मादासां सन्ततमिव शरीरं भवति १९, यत् सामिधेन्यः काष्ठहविषो भवन्ति तस्मादासामस्थीनि दृढतराणीव भवन्ति २०, यत् प्रयाजा आज्यहविषो भवन्ति तस्मादासां प्रथमे वयसि रेतः सिक्तं न सम्भवति २१, यन्मध्ये हविषां दध्ना च पुरोडाशेन च प्रचरन्ति तस्मादासां मध्यमे वयसि रेतः सिक्तं सम्भवति २२, यदनुयाजा आज्यहविषो भवन्ति तस्मादासामुत्तमे वयसि रेतः सिक्तं न सम्भवति २३, यदुत्तमेऽनुयाजे सकृदपानिति तस्मादिदं शिश्नमुच्चश एति २४, नीचीपद्यते २५, यन्नापानेत् शकृच्छूनं स्याद्यन्मुहुरपानेत् शकृत्यन्नं स्यात् तस्मात् सकृदपानिति नेत् शकृच्छूनं स्यात् शकृत्यन्नं वेति २६ ॥ ९ ॥

कण्डिका ९ ॥ अमावस्या और पूर्णमासी के यज्ञविधान से शरीर की अवस्था का वर्णन ॥

(यत् वेदेः पुरस्तात् प्रथमं बर्हिः स्तृणाति तस्मात् इमाः प्रजाः शिरस्तः प्रथमं लोमशाः जायन्ते १) [स्वैदायन के उतर प्रश्नों के लिये कण्डिका ७ देखो] जो वेदी के पूर्व में वह पहिले कुशासन बिछाता है, इसलिये यह प्रजायें शिर पर पहिले लोम वाले होते हैं १ । (यत् अपरम् इव प्रस्तरम् अनुस्तृणाति तस्मात् आसाम्

अपरम् इव श्मश्रूणि उपकक्षाणि अन्यानि लोमानि जायन्ते २) जो कि पीछे से प्रस्तर [कुशा का मुट्ठा] बिछाता है, इसलिये पीछे से इनके दाढ़ी मूंछ और कांख के और दूसरे लोम उत्पन्न होते हैं २ । (यत् प्राक् बर्हिषः प्रस्तरम् अनुप्रहरति तस्मात् इमाः प्रजाः शिरस्तः प्रथमं पलिताः भवन्ति ३) जो पूर्व दिशा में कुशा के मुट्ठे को समेट लेता है, इसलिये यह प्रजायें शिर पर पहिले श्वेत हो जाते हैं । ३ (यत् अन्ततः सर्वम् एव अनुप्रहरति तस्मात् अन्ततः सर्वे एव पलिताः भवन्ति ४) जो कि अन्त में सबको ही समेट लेता है इसलिये अन्त में सभी श्वेत हो जाते हैं ४ । (यत् प्रयाजाः अपुरोऽनुवाक्यावन्तः भवन्ति तस्मात् इमाः प्रजाः अदन्तिकाः जायन्ते ५) जो कि प्रयाज [यज्ञाङ्ग विशेष] पुरोऽनुवाक्या बिना होते हैं, इसलिये यह प्रजायें बिना दांत वाले होते हैं ५ । (यत् हवींषि पुरोऽनुवाक्यावन्ति भवन्ति तस्मात् आसाम् अपरम् इव जायन्ते ६) जो कि हवि पुरोऽनुवाक्या वाले होते हैं, इसलिये इनके [दान्त] पीछे निकलते हैं ६ । (यत् अनुयाजाः अपुरोऽनुवाक्यावन्तः भवन्ति तस्मात् आसाम् सप्तवर्षाष्टवर्षाणां प्रभिद्यन्ते ७) जो कि अनुयाज [यज्ञाङ्गविशेष] पुरोऽनुवाक्या बिना होते हैं, इसलिये सात वर्ष आठ वर्ष वालों के [दाँत] उखड़ जाते हैं ७ । (यत् पत्नीसंयाजाः पुरोऽनुवाक्यावन्तः भवन्ति तस्मात् आसाम् पुनः एव जायन्ते ८) जो कि देवपत्नियों के यज्ञ पुरोऽनुवाक्या वाले होते हैं, इसलिये इनके [दांत] फिर भी निकल आते हैं ८ । (यत् समिष्टयजुः अपुरोऽनुवाक्यावत् भवति तस्मात् अन्ततः सर्वे एव प्रभिद्यन्ते ९) जो कि समिष्टयजु [यज्ञविशेष] पुरोऽनुवाक्या बिना होता है, इसलिये अन्त में सब ही [दांत] उखड़ जाते हैं ९ । (यत् अनूच्य गायत्र्या त्रिष्टुभा यजति तस्मात् अधरे दन्ताः पूर्वे जायन्ते १० परे उत्तरे ११) जो कि [मन्त्रों को] पढ़कर गायत्री के साथ और त्रिष्टुप के साथ यज्ञ करता है, इसलिये नीचे वाले दांत पहिले निकलते हैं १०, और पीछे ऊपर वाले ११ । (यत् अनूच्य ऋचा यजुषा यजति तस्मात् अधरे दन्ताः अणीयांसः, ह्रसीयांसः १२, उत्तरे प्रथीयांसः वर्षीयांसः १३) जो कि [मन्त्रों को] पढ़कर ऋग्वेद के साथ और यजुर्वेद के साथ यज्ञ करता है, इसलिये नीचे वाले दांत अधिक सूक्ष्म और निर्बल होते हैं १२, और ऊपर वाले अधिक चौड़े और सबल होते हैं १३ । (यत् दीर्घतरौ प्राञ्चौ आघारौ आघारयति तस्मात् इमौ दंष्ट्रौ दीर्घतरौ १४) जो कि अधिक लम्बे और अधिक पूजनीय दोनों आघार [घृतदान के होमविशेष] को सींचता है, इसलिये यह [सामने के] दोनों बड़े दांत अधिक लम्बे होते हैं १४ । (यत् संयाज्ये सच्छन्दसी तस्मात् समे इव जम्भे १५) जो कि दोनों संयाज्य समान छन्द वाले होते हैं, इसलिये दोनों दाढ़ें चौकोर सी हैं १५ । (यत् चतुर्थे

९—(स्तृणाति) आच्छादयति (लोमशाः) लोमवन्तः (प्रस्तरम्) दर्भमुष्टिम् (अनुप्रहरति) संगृह्णाति (पत्नीसंयाजाः) देवपत्नीनां स्तुतियुक्तयज्ञाङ्गविशेषाः । देवपत्न्यः यथा इन्द्राणी, अग्नायी, वरुणानी, इत्यादयः. (आघारौ) आ+घृ क्षरणे—घञ् । घृतदानहोमविशेषौ (प्राञ्चौ) प्रकर्षेण पूजनीयौ (आघारयति) समन्तात् सिञ्चति (सामिधेनी) समिधामाधाने षेण्यण् (वा० पा० ४ । ३ । १२०) समिध्—षेण्यण्, षित्वात् ङीष्, यलोपः । अग्निप्रज्वलने

प्रयाजे समानयति तस्मात् इमे श्रोत्रे अन्ततः समे इव दीर्णे १६) जो कि चौथे प्रयाज [यज्ञ] में [हवि] समान लाता है, इसलिये यह दोनों कान अन्त में समान से फटे हुये हैं १६ । (यत् जपं जपित्वा अभिहिङ्क्रणोति तस्मात् पुमांसः श्मश्रुवन्तः १७ स्त्रियः अश्मश्रुवः १८) जो जप को जप कर हिङ्कार शब्द करता है, इसलिये पुरुष दाढ़ी मूंछ वाले होते हैं १७, और स्त्रियां बिना दाढ़ी मूंछ वाली १८ । (यत् सामिधेनीः संतन्वन् आह तस्मात् आसां सन्ततम् इव शरीरं भवति १६) जो कि सामिधेनी ऋचाओं [अग्नि जलाने के मन्त्रों] को फैलाता हुआ बोलता है, इसलिये इन [प्रजाओं] का फैला हुआ सा शरीर होता है १६ । (यत् सामिधेन्यः काष्ठहविषः भवन्ति तस्मात् आसाम् अस्थीनि दृढतराणि इव भवन्ति २०) जो कि सामिधेनी ऋचायें काष्ठ के हवि वाली होती हैं, इसलिये इनकी हड्डियां अधिक दृढ़ होती हैं २० । (यत् प्रयाजा आज्यहविषः भवन्ति, तस्मात् आसां प्रथमे वयसि रेतः सिक्तं न सम्भवति २१) जो कि प्रयाज [यज्ञ] जमे हुये घी के हवि वाले होते हैं, इसलिये इन [प्रजाओं] की पहिली अवस्था में वीर्य सींचा हुआ नहीं निकलता है २१ । (यत् हविषां मध्ये दध्ना च पुरोडाशेन च प्रचरन्ति तस्मात् आसां मध्यमे वयसि रेतः सिक्तं सम्भवति २२,) जो हवियों के मध्य में दही से और पुरोडाश [मालपूये] से हवन करते हैं, इसलिये इन की मध्यम अवस्था में वीर्य सींचा हुआ निकलता है २२ । (यत् अनुयाजाः आज्यहविषः भवन्ति तस्मात् आसाम् उत्तमे वयसि रेतः सिक्तं न सम्भवति २३) क्योंकि अनुयाज [पिछले यज्ञ] जमे हुये घी वाले होते हैं, इसलिये इनकी पिछली अवस्था में वीर्य सींचा हुआ नहीं निकलता है २३ । (यत् उत्तमे अनुयाजे सकृत् अपानिति तस्मात् इदं शिश्नम् उच्चशः एति २४, नीचीपद्यते २५,) जो कि सबसे पिछले अनुयाज में सकृत् [एक बार, शेष हवि उठा कर] गिराता है, इसलिये यह मनुष्य लिङ्ग ऊंचा जाता है २४, और नीचा होता है २५ । (यत् न अपानेत् [1]शक्रुच्छूनं स्यात्) जो [हवि] न गिरावे, [लिङ्ग] शक्रुच्छून [वीर्य शून्य] हो जावे, (यत् मुहुः अपानेत् शक्रुति अन्नं स्यात्) और जो बार बार [हवि को] गिरावे, शक्रुत् [वीर्य] में अन्न [का रस] होवे, (तस्मात् सकृत् अपानिति शक्रुच्छूनं नेत् स्यात्) इसलिये सकृत् [एक बार] [हवि को उठा कर] गिरावे और वह शक्रुच्छून [वीर्यशून्य] न होवे, (शक्रुति अन्नं वेति) शक्रुत् [वीर्य] में अन्न [का रस] पहुंचता है २६ ॥ ६ ॥

भावार्थः—कण्डिका ७ के प्रश्न देखो ॥ ६ ॥

ऋचः (संतन्वन्) सम्यग् विस्तारयन् (अपानिति) अपानयति । अग्नौ हविःशेषं क्षिपति (शक्रुच्छूनम्) शक्रुता वीर्येण शून्यम् (अपानेत्) प्रक्षिपेत् (शक्रुति) वीर्ये (अन्नम्) अन्नरसः (वेति) वी गत्यादिषु । गच्छति ॥

---

१. शक्रुत् (मल, वीर्य) एवं सकृत् (एक बार) ये दो पृथक् शब्द हैं । पू० सं० में यहां व कं० ७ में सर्वत्र दन्त्य सकार ही छपा है, तदनुसार भाष्यकार ने अभेदार्थ मानते हुये सकृत् की सिद्धि में "वा शस्य सः" पृ. १४४ में लिखा है । वस्तुतः यह उच्चारणगत अन्धपरम्परा का सूचक है । शकार सकार दोनों एक नहीं है ॥ सम्पा० ॥

कण्डिका १० ॥

अथ ये पुरस्तादष्टावाज्यभागाः पञ्चप्रयाजा द्वावाघारौ द्वावाज्यभागावाग्नेया आज्यभागानां प्रथमः सौम्यो द्वितीयो हविर्भागानां हविर्ह्येव सौम्यमाग्नेयः पुरोडाशोऽग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदित्येते मध्यतः पञ्च हविर्भागाः । अथ ये षट् प्राजापत्या इडा च प्राशित्रञ्च यच्चाग्नीध्रीया-वद्यति, ब्रह्मभागो यजमानभागोऽन्वाहार्य्य एव षष्ठोऽथ य उपरिष्टादष्टावाज्य-भागास्त्रयोऽनुयाजाश्चत्वारः पत्नीसंयाजाः समिष्टयजुरष्टममथ या गायत्री हरिणी ज्योतिष्पक्षा सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहति, वेदिरेव सा, तस्य ये पुरस्ता-दष्टावाज्यभागाः स दक्षिणः पक्षोऽथ ये उपरिष्टादष्टावाज्यभागाः स उत्तरः पक्षः, हवींष्यात्मा, गार्हपत्यो जघनमाहवनीयः शिरः सौवर्णराजतौ पक्षौ, तद्यदादित्यं पुरस्तात् पर्य्यन्तं न पश्यन्ति तस्मादज्योतिष्क उत्तारो भवति । अथ या पङ्क्तिः पञ्चपदा सप्तदशाक्षरा सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहति याज्येव सा, तस्या ओं श्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरं, यजेति द्व्यक्षरं, ये यजामह इति पञ्चाक्षरं, द्व्यक्षरो वै वषट्कारः, सैषा पङ्क्तिः पञ्चपदा सप्तदशाक्षरा सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहति, तद्यत्रास्यैश्वर्य्यं स्याद्यत्र वैनमभिवहेयुरेवंविदमेव तत्र ब्रह्माणं वृणीयान्नानेवंविदमिति ब्राह्मणम् ॥ १० ॥

कण्डिका १० ॥ कण्डिका ८ के यज्ञ सम्बन्धी प्रश्नों के उत्तर ॥

(अथ ये पुरस्तात् अष्टौ आज्यभागाः, आज्यभागानां पंचप्रयाजाः, द्वौ आज्यभागौ द्वौ आघारौ आग्नेयौ, प्रथमः द्वितीयः सौम्यः) [सौदायन ने उत्तर दिये - कण्डिका ८ देखो] फिर जो पहिले आठ आज्यभाग [घी की आहुतियां] हैं, उन आज्यभागों में पांच प्रयाज [पांच प्राण देवता वाली आहुतियां—प्राणाः वै प्रयाजाः—ऐतरेय ब्राह्मण १। ११। ५] दो आज्यभाग दो आघार [नामक आहुति] दोनों आग्नेय [अग्नि देवता वाली] और पहिली और दूसरी सौम्य [एक सोम देवता की] है। (हविर्भागानां हविः हि एव सौम्यम्, आग्नेयः पुरोडाशः, अग्नीषोमीयः उपांशुयाजः अग्नीषोमीयः पुरोडाशः, अग्निः स्विष्टकृत् इति एते मध्यत पंचहविर्भागाः) हविर्भागों में हवि ही सोम देवता का है १, अग्नि का पुरोडाश २, अग्नि और सोम का उपांशु याज [मौन आहुति] ३, अग्नि और सोम का पुरोडाश ४, अग्नि का स्विष्टकृत् [आहुति] है ५, यह मध्य के पांच हविर्भाग हैं । (अथ ये षट् प्राजापत्याः, इडा च प्राशित्रं च यत् च आग्नीध्रीयौ अद्यति, ब्रह्मभागः, अन्वाहार्यः यजमानभागः, एव षष्ठः) और जो छः प्राजापत्य [प्रजापति देवता की] आहुति हैं उनमें

---

१० - (सौम्यः) सोमदेवताकः (उपांशुयाजः) अप्रकाशमन्त्रयज्ञः (प्राशित्रम्—प्र + अश भोजने—इत्रन् । प्राशनम् (इडा) इल स्वप्नक्षेपणयोः—कः, टाप् । पृथिवी । गौः । वाक्, (अद्यति)—आर्षं दिवादित्वम् । अत्ति । भक्षति (अन्वाहार्य्य) अनु + आ + हृञ् हरणे—ण्यत् । प्रतिमासकर्त्तव्याऽमावास्याविहितश्राद्धोपेतः ।

इडा=भूमि नामक १, और प्राशित्र [प्राशन वा ओदन नामक] २, और जो दो आग्नीध्रीय [आग्नीध्र वाली दो आहुति को अग्नि] खाता है ३, ४, ब्रह्मा का भाग ५, और प्रति मास अमावस को करने योग्य श्राद्ध वाला यजमान का भाग छठा है ६। (अथ ये उपरिष्टात् अष्टौ आज्यभागाः, त्रयः अनुयाजाः, चत्वारः पत्नीसंयाजाः अष्टमं समिष्टयजुः) और जो पिछले आठ आज्य भाग हैं, [उनमें] तीन अनुयाज, चार पत्नी संयाज और आठवाँ समिष्टयजु है। (अथ या गायत्री हरिणी ज्योतिष्पक्षा सर्वैः यज्ञैः यजमानं स्वर्गं लोकं अभिवहति सा वेदिः एव) और जो गायत्री सुवर्ण मूर्ति, ज्योति के पंख वाली होकर सब यज्ञों के द्वारा यजमान को स्वर्गलोक में पहुँचाती है वह वेदी [यज्ञ कुण्ड] ही है। (तस्य ये पुरस्तात् अष्टौ आज्यभागाः स दक्षिणः पक्षः, अथ ये उपरिष्टात् अष्टौ आज्यभागाः स उत्तरः पक्षः, हवींषि आत्मा, गार्हपत्यः जघनम्, आहवनीयः शिरः, सौवर्णराजतौ पक्षौ) उस [यजमान] के जो पहिले आठ आज्य भाग हैं वह [वेदी का] दाहिना पंख है, और जो पीछे वाले आठ आज्य भाग हैं वह बांया पंख है, सब हवि आत्मा हैं, गार्हपत्य [अग्नि] जंघा है, आहवनीय शिर है, सोने और चांदी वाले दोनों पंख हैं, (तत् यत् आदित्यं पुरस्तात् पर्य्यन्तं न पश्यन्ति तस्मात् अज्योतिष्कः उत्तरः भवति) सो जो सूर्य को पूर्व से पश्चिम में जाता हुआ नहीं देखते हैं इसलिये बिना ज्योति वाला पिछला [यज्ञ वा पक्ष] होता है। [अर्थात् सूर्य को अवश्य देखे जिससे ज्योति बढ़े]। (अथ या पङ्क्तिः पंचपदा सप्तदशाक्षरा सर्वैः यज्ञैः यजमानं स्वर्गं लोकम् अभिवहति सा याज्या इव) और जो पङ्क्ति पांच पाद वाली सत्रह अक्षर वाली होकर सब यज्ञों के द्वारा यजमान को स्वर्ग लोक में पहुँचाती है वह याज्या [नाम वाली इष्टि] ही है। (तस्याः ओं श्रावय इति चतुरक्षरम्, अस्तु श्रौषट् इति चतुरक्षरम्, यज इति द्व्यक्षरं, ये यजामहे इति पंचाक्षरं, द्व्यक्षरः वै वषट्कारः) उस [याज्या] के ओं श्रावय [ओम् को तू सुना] यह चार अक्षर वाला है, अस्तु श्रौषट् [श्रौषट् होवे] यह चार अक्षर वाला है, यज [यज्ञ कर] यह दो अक्षर वाला है, ये यजामहे [जो हम यज्ञ करते हैं] यह पांच अक्षर वाला है, वषट् [यह शब्द] दो अक्षर वाला ही है। (सा एषा पङ्क्तिः पंचपदा सप्तदशाक्षरा सर्वैः यज्ञैः यजमानं स्वर्गं लोकम् अभिवहति) सो यही पङ्क्ति पांच पाद वाली और सत्रह अक्षर वाली होकर सब यज्ञों के द्वारा यजमान को स्वर्ग लोक में पहुँचाती है (तत् यत्र अस्य ऐश्वर्यं स्यात्, वा यत्र एनम् अभिवहेयुः एवंविदम् एव तत्र ब्रह्माणं वृणीयात् न अनेवंविदम् इति ब्राह्मणम्) सो जहां [यज्ञ में] इस [यजमान] का ऐश्वर्य होवे, अथवा जहां इसको [शत्रु लोग] हरावें, वहां ऐसे जानकार को ही ब्रह्मा चुने, ऐसे न जानने वाले को नहीं, यह ब्राह्मण है ॥ १० ॥

भावार्थः—यथाविधि यज्ञ करने से मनुष्य कार्यसिद्धि करें ॥ १० ॥

(पुरस्तात्) पूर्वस्यां दिशि (पर्य्यन्तम्) परिगतो अन्तो येन तम्। (याज्या) यजतेः ण्यत्। याजनीया। इष्टिः (श्रौषट्) श्रु श्रवणे—डौषटि+यज्ञादौ हविर्दानम् (वषट्कारः) वह प्रापणे—डषटि+कृञ्+घञ्। देवोद्देश्यकहविस्त्यागः (वृणीयात्) स्वीकुर्यात् (अनेवंविदम्) अनेवंविधज्ञातारम् ॥

कण्डिका ११ ॥

अथ ह प्राचीनयोग्य आजगामाग्निहोत्रं भवन्तं पृच्छेद् गोतम इति, पृच्छ प्राचीनयोग्येति । किन्देवत्यं ते गवीडायां १, किन्देवत्यमुपहूतायां २, किन्देवत्यमुपसृष्टायां ३, किन्देवत्यं वत्समुन्नीयमानं ४, किन्देवत्यं वत्समुन्नीतं ५, किन्देवत्यं दुह्यमानं ६, किन्देवत्यं दुग्धं ७, किन्देवत्यं प्रक्रम्यमाणं ८, किन्देवत्यं ह्रियमाणं ९, किन्देवत्यमधिश्रियमाणं १०, किन्देवत्यमधिश्रितं ११, किन्देवत्यमभ्यवज्वाल्यमानं १२, किन्देवत्यमभ्यवज्वालितं १३, किन्देवत्यं समुद्वान्तं १४, किन्देवत्यं विष्यन्नं १५, किन्देवत्यमद्भिः प्रत्यानीतं १६, किन्देवत्यमुद्वास्यमानं १७, किन्देवत्यमुद्वासितं १८, किन्देवत्यमुन्नीयमानं १९, किन्देवत्यमुन्नीतं २०, किन्देवत्यं प्रक्रम्यमाणं २१, किन्देवत्यं ह्रियमाणं २२, किन्देवत्यमुपसाद्यमानं २३, किन्देवत्यमुपसादितं २४, किन्देवत्या समित् २५, किन्देवत्यां प्रथमामाहुतिमहौषीः २६, किन्देवत्यं गार्हपत्यमवेक्षिष्ठाः २७, किन्देवत्योत्तराहुतिः २८, किन्देवत्यं हुत्वा स्रुचं त्रिरुदञ्चमुदनैषीः २९, किन्देवत्यं बर्हिषि स्रुचन्निधायोन्मृज्योत्तरतः पाणी निरमा[1]र्क्षीः ३०, किन्देवत्यं द्वितीयमुन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधामकार्षीः ३१, किन्देवत्यं प्रथमं प्राशीः ३२, किन्देवत्यं द्वितीय ३३, किन्देवत्यमन्ततः सर्वमेवाप्राशीः ३४, किन्देवत्यमप्रक्षालितयोदकं स्रुचा न्यनैषीः ३५, किन्देवत्यं प्रक्षालितया ३६, किन्देवत्यमपरेणाहवनीयमुदकं स्रुचा न्यनैषीः ३७, किन्देवत्यं स्रुवं स्रुवञ्च प्रत्यताप्सीः ३८, किन्देवत्यं रात्रौ स्रुग्दण्डमवा[2]मार्क्षीः ३९, किन्देवत्यं प्रातरुदमा[3]र्क्षीरित्येतच्चेद्वेत्थ ४०, गोतम हुतं, यदि[4] न वेत्थाहुतं त इति ब्राह्मणम् ॥ ११ ॥

कण्डिका ११ ॥ प्राचीनयोग्य मुनि के उद्दालक से अग्निहोत्र विषयक चालीस प्रश्न ॥

(अथ ह प्राचीनयोग्यः आजगाम) फिर प्राचीनयोग्य [सनातन वेदों में समर्थ मुनि विशेष] आया। (अग्निहोत्रं भवन्तं पृच्छेत् गोतम इति) [उसने कहा] अग्निहोत्र को आपसे यह पूंछेगा, हे गोतम ! (पृच्छ प्राचीनयोग्य इति) [उद्दालक ने कहा—क० ६] पूंछ, हे प्राचीनयोग्य । [प्राचीनयोग्य बोला] (किंदेवत्यं ते इडायां गवि १) तेरी इडा [पाने योग्य] गौ [यज्ञ के लिये दूध देने वाली कामधेनु] में कौन देवता वाला कर्म है १, (किंदेवत्यम् उपहूतायाम् २) उस बुलायी हुई में कौन देवता वाला कर्म है २, (किंदेवत्यम् उपसृष्टायाम् ३) उस पास आयी हुई में कौन देवता

११—(प्राचीनयोग्यः) प्राचीनेषु सनातनेषु वेदेषु योग्यः समर्थः । मुनिविशेषः (किन्देवत्यम्) किम्+देवता—यत् । किंदेवताविषयकं कर्म (गवि) यज्ञार्थं दुग्धदात्र्यां

---

१. पू सं० "निर्माक्षीः" इति पाठः ॥ २. पू. सं० अवमार्क्षीः इति पाठः ॥
३. पू. स० उन्मार्क्षीः इति पाठः ॥
४. पू. सं० 'चेद्यद्यु न' इति पाठः । जर्मनसंस्करणे यद्यु न इति पाठः, अस्माभिः 'यदि न' संशोधितः ॥ सम्पा० ॥

वाला कर्म है ३, (वत्सम् उन्नीयमानम् किंदेवत्यम् ४) बछड़े को लाया जाता हुआ कर्म कौन देवता वाला है ४, (वत्सम् उन्नीतं किंदेवत्यम् ५) बछड़ा लाया गया कर्म कौन देवता वाला है ५, (दुह्यमानं किंदेवत्यम् ६) दुहता हुआ कर्म क्या देवता है ६, (दुग्धं किंदेवत्यम् ७) दूध क्या देवता है ७, (प्रक्रम्यमाणं किंदेवत्यम् ८) घुमाया जाता हुआ [दूध] क्या देवता है ८, (ह्रियमाणं किंदेवत्यम् ९) लिया जाता हुआ [दूध] क्या देवता है ९, (अधिश्रियमाणं किंदेवत्यम् १०) रक्खा जाता हुआ दूध क्या देवता है १०, (अधिश्रितं किंदेवत्यम् ११) रक्खा गया दूध क्या देवता है ११, (अभ्यवज्वाल्यमान किंदेवत्यम् १२) औंटता हुआ दूध क्या देवता है १२, (अभ्यवज्वालितं किंदेवत्यम् १३) औंटा हुआ दूध क्या देवता है १३, (समुद्वान्तं किंदेवत्यम् १४) उफनता हुआ दूध क्या देवता है १४, (विष्यन्नं किंदेवत्यम् १५) बहता हुआ दूध क्या देवता है १५, (अद्भिः प्रत्यानीतं किंदेवत्यम् १६) जल से लौटा दिया गया दूध क्या देवता है १६, (उद्वास्यमानं किंदेवत्यम् १७) छोड़ा जाता हुआ दूध क्या देवता है १७, (उद्वासितं किन्देवत्यम् १८) छोड़ा हुआ दूध क्या देवता है १८, (उन्नीयमानं किंदेवत्यम् १९) ऊपर लाया जाता हुआ [नवनीत = माखन] क्या देवता है १९, (उन्नीतं किंदेवत्यम् २०) ऊपर लाया गया नवनीत क्या देवता है २०, (प्रक्रम्यमाणं किंदेवत्यम् २१) घुमाया जाता हुआ नवनीत क्या देवता है २१, (ह्रियमाणं किंदेवत्यम् २२) लिया जाता हुआ नवनीत क्या देवता है २२, (उपसाद्यमानं किंदेवत्यम् २३) पास लाया जाता हुआ नवनीत क्या देवता है २३, (उपसादितं किंदेवत्यम् २४) पास रक्खा गया नवनीत क्या देवता है २४, (समित् किंदेवत्या २५) समिधा कौन देवता वाली है २५, (किंदेवत्यां प्रथमाम् आहुतिम् अहौषीः २६) कौन देवता वाली पहिली आहुति को तूने दिया है २६, (किंदेवत्यं गार्हपत्यम् अवेक्षिष्ठाः २७) कौन देवता वाली गार्हपत्य अग्नि वाली हवि को तूने विचारा है २७, (किंदेवत्या उत्तरा आहुतिः २८) कौन देवता वाली पिछली आहुति हैं २८, (किंदेवत्यं हुत्वा उदञ्चं स्रुचं त्रिः उदनैषीः २९) कौन देवता वाली हवि को देकर उत्तर की ओर रक्खी हुई स्रुचा [वट के पत्ते के समान रूप वाला विकङ्कट काठ का बना हुआ भुजा तुल्य चमचा] को तीन बार तूने उठाया है २९, (किंदेवत्यं स्रुचं बर्हिषि निधाय उन्मृज्य उत्तरतः पाणी निरमार्क्षीः ३०) कौन देवता वाली स्रुचा को कुशासन पर धर के और धोके उत्तर की ओर दोनों हाथों को तूने धोया है ३०, (किंदेवत्यं द्वितीयम् उन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधाम्

धेनौ (इडायाम्) इल गतौ — कः, टाप् । प्रापणीयायां गवि (उपसृष्टायाम्) संगतायाम् (वत्सम्) गोशिशुम् (प्रक्रम्यमाणम्) मथ्यमानम् (ह्रियमाणम्) निःस्रियमाणम् (समुद्वान्तम्) सम् + उत् + टुवम उद्गिरणे—क्तः । उद्गीर्णम् । उद्गतम् (विष्यन्नम्) वि + स्यन्दू प्रस्रवणे—क्तः । प्रस्रुतम् (उद्वास्यमानम्) विसृज्यमानम् (उद्वासितम्) विसृष्टम् (उपसादितम्) समीपे स्थापितम् (अहौषीः) हु दानादनयोः—लुङ् । हुतवान् असि (अवेक्षिष्ठाः) अव + ईक्ष दर्शने—लुङ्, आडभावः । दृष्टवानसि (स्रुचम्) यज्ञपात्रम् (उदञ्चम्) उदङ्मुखं कृत्वा (उत्तरतः) उत्तरस्यां दिशि

अकार्षीः ३१) कौन देवता वाली दूसरी [स्रुचा] को धोकर पित्र्य [पितृतीर्थ अर्थात् तर्जनी और अंगूठे के बीच] में यज्ञोपवीत करके दक्षिण ओर में पितरों [बड़े बूढे विद्वानों] के लिये तूने स्वधा [अन्न] किया है ३१, (किंदेवत्यं प्रथम प्राशीः ३२) कौन देवता वाली पहिली [हवि] को तूने खाया है ३२, (किंदेवत्यं द्वितीयम् ३३) कौन देवता वाली दूसरी [हवि को तूने खाया है] ३३, (किंदेवत्यं सर्वम् एव अन्ततः आप्राशीः ३४) कौन देवता वाली सब ही [हवि] को तूने खा लिया है ३४, (किंदेवत्यम् उदकम् अप्रक्षालितया स्रुचा न्यनैषीः ३५) कौन देवता वाले जल को बिना धुली हुई स्रुचा से तूने गिराया है ३५, (किंदेवत्यं प्रक्षालितया ३६) कौन देवता वाले [जल] को धुली हुई [स्रुचा] से [गिराया है] ३६, (किंदेवत्यं उदकम् अपरेण स्रुचा आहवनीयम् न्यनैषीः ३७) कौन देवता वाले जल को दूसरे स्रुचा से आहवनीय अग्नि पर तूने गिराया है ३७, (किंदेवत्यं स्रुवं स्रुचं च प्रत्यताप्सीः ३८) कौन देवता वाले स्रुवा [खैर की लकड़ी का बना हुआ हाथ भर का यज्ञ पात्र] और स्रुचा को तूने तपाया है ३८, (किंदेवत्यं स्रुग्दण्डं रात्रौ अवामार्क्षीः ३९) कौन देवता वाले स्रुचा के दण्ड को रात्रि में तूने धोकर रख दिया है ३९, (किंदेवत्यं प्रातः उदमार्क्षीः इति ४०) कौन देवता वाले [स्रुचा के दण्ड को] प्रातःकाल तूने धोकर उठाया है ४०, (एतद् चेद् वेत्थ, गोतम, हुतम्, यदि न वेत्थ ते अहुतम् इति ब्राह्मणम्) इसको जो तू जानता है, हे गोतम ! [उद्दालक ! तेरा] अग्निहोत्र है, और जो तू नहीं जानता है, तेरा निषिद्ध अग्निहोत्र है, यह ब्राह्मण है ॥ ११ ॥

भावार्थः—स्पष्ट है ॥ ११ ॥

कण्डिका १२ ॥

स होवाच, रौद्रं मे गवीडायां १, मानव्यमुपहूतायां २, वायव्यमुपसृष्टायां ३, वैराजं वत्समुन्नीयमानं ४, जागतमुन्नीतम् ५, आश्विनं दुह्यमानं ६, सौम्यं दुग्धं ७, बार्हस्पत्यं प्रक्रम्यमाणं ८, द्यावापृथिव्यं ह्रियमाणम् ९, आग्नेयमधिश्रियमाणं १०, वैश्वानरीयमधिश्रितं ११, वैष्णवमभ्यवज्वाल्यमानं १२, मारुतमभ्यवज्वालितं १३, पौष्णं समुद्वान्तं १४, वारुणं विष्यन्नं १५, सारस्वतमद्भिः प्रत्यानीतं १६, त्वाष्ट्रमुद्वास्यमानं १७, धात्रमुद्वासितं १८, वैश्वदेवमुन्नीयमानं १९, सावित्रमुन्नीतं २०, बार्हस्पत्यं प्रक्रम्यमाणं २१, द्यावापृथिव्यं ह्रियमाणम् २२, ऐन्द्रमुपसाद्यमानं २३, बलायोपसन्नम् २४, आग्नेयी समिद् २५, यां प्रथमामाहुतिमहौषं मामेव तत् स्वर्गे लोकेऽधां २६, यद्गार्हपत्यमवेक्षिषमस्य लोकस्य सन्तत्यै २७, प्राजापत्योत्तराहुतिः, तस्मात् पूर्णतरा मनसैव सा २८, यद्धुत्वा

(निरमार्क्षीः) निर्+मृजूष् शुद्धौ—लुङ् । नितरां शोधितवानसि (पित्र्युपवीतम् = पित्र्योपवीतम्) पित्र्यं पितृतीर्थे तर्जन्यङ्गुष्ठयोर्मध्ये स्थितं यज्ञोपवीतम् । (दक्षिणतः) दक्षिणस्यां दिशि (पितृभ्यः) पितृतुल्यमाननीयेभ्यो विद्वद्भ्यः (प्राशीः) अश भोजने—लुङ् । भक्षितवानसि (अप्रक्षालितया) अशोधितया (प्रत्यताप्सीः) प्रत्यक्षेण तप्तवानसि (वेत्थ) विद ज्ञाने—लट् । जानासि (हुतम्) अग्निहोत्रम् (अहुतम्) निषिद्धाग्निहोत्रम् ॥

स्रुचं त्रिरुदश्चमुदनैषं[1] रुद्रांस्तेनाप्रैषं २९, यद्बर्हिषि स्रुचं निधायोन्मृज्योत्तरतः पाणी [2]निरमार्क्षमोषधिवनस्पतींस्तेनाप्रैषं ३०, यद् द्वितीयमुन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधाकारमकार्षं पितृंस्तेनाप्रैषं ३१, यत्प्रथमम्प्राशिषं प्राणांस्तेनाप्रैषं ३२, यद् द्वितीयं गर्भास्तेन, तस्मादनश्नन्तो गर्भा जीवन्ति ३३, यदन्ततः सर्वमेवाप्राशिषं विश्वान्देवांस्तेनाप्रैषं ३४, यदप्रक्षालितयोदकं स्रुचा न्यनैषं सर्पेतरजनांस्तेनाप्रैषं ३५ यत् प्रक्षालितया सर्पपुण्यजनांस्तेन ३६, यदपरेणाहवनीयमुदकं स्रुवा न्यनैषं गन्धर्वाप्सरसस्तेनाप्रैषं ३७, यत् स्रुवं स्रुचश्च प्रत्यताप्सं सप्तऋषींस्तेनाप्रैषं ३८, यद्रात्रौ स्रुग्दण्डमवामार्क्षं[3] ये रात्रौ संविशन्ति दक्षिणांस्तानुदनैषं ३९, यत् प्रातरुदमार्क्षं ये प्रातः प्रव्रजन्ति दक्षिणांस्तानुदनैषमिति ४०, ब्राह्मणम् ॥ १२ ॥

कण्डिका १२ ॥ प्राचीनयोग्य के ४० प्रश्नों के उद्दालक के दिये उत्तर ॥

(सः ह उवाच) वह [उद्दालक] बोला—(रौद्रं मे इडायां गवि १) रुद्र [शत्रुओं का रुलाने वाला शूरवीर] देवता वाला कर्म मेरी प्राप्ति योग्य गौ में है १, (मानव्यम् उपहूतायाम् २) मानव [मननशील मनुष्य] देवता वाला कर्म उस बुलाई हुई में है २, (वायव्यम् उपसृष्टायाम् ३) वायु [गति वाला पवन] देवता वाला कर्म उस पास आयी हुई में है ३, (वैराजं वत्सम् उन्नीयमानम् ४) विराट् [विविध प्रकाश वाले] देवता वाला कर्म बछड़े को लाया जाता हुआ कर्म है ४, (जागतम् उन्नीतम् ५) जगत् [संसार] देवता वाला कर्म लाया गया [बछड़ा] है ५ (आश्विनं दुह्यमानम् ६) दोनों अश्वी [स्त्री पुरुष] देवता वाला दुहा जाता हुआ कर्म है ६, (सौम्यं दुग्धम् ७) सोम [सोमलता ओषधि] देवता वाला दूध है ७, (बार्हस्पत्यं प्रकम्प्यमाणम् ८) बृहस्पति [बड़ी विद्याओं का स्वामी] देवता वाला घुमाया जाता हुआ दूध है ८, (द्यावापृथिव्यं ह्रियमाणम् ९) द्यावापृथिवी [सूर्य और भूमि] देवता वाला लिया जाता हुआ दूध है ९, (आग्नेयम् अधिश्रियमाणम् १०) अग्निदेवता वाला रक्खा जाता हुआ दूध है १०, (वैश्वानरीयम् अधिश्रितम् ११) वैश्वानर [सब नरों का हितकारक] देवता वाला रक्खा गया दूध है ११, (वैष्णवम् अभ्यवज्वाल्यमानम् १२) विष्णु [व्यापक अग्नि] देवता वाला औंटता हुआ दूध है १२, (मारुतम्

१२—(रौद्रम्) रुद्रदेवत्यम्, रुद्रः शत्रुरोदकः शूरवीरः (मानव्यम्) ब्राह्मणमाणववाडवाद् यन् (पा० ४।२।४२) मानव[4]—यन्। मानवसमूहदेवताकम्। मानवो मननशीलो मनुष्यः (वायव्यम्) वाय्वृतुपित्रुषसो यत्। (पा० ४।२।३१) वायु—यत्। वायुदेवताकम् (वैराजम्) विराज्—अण्। विराड्देवताकम्। विराड् विविधैश्वर्यवान् (जागतम्) जगत्—अण्। जग-

१. पू. सं. सर्वत्र 'उन्नैषं' इति पाठः ॥ २. पू. सं. 'निर्मार्क्षं' इति पाठः ॥

३. पू. सं. 'अवमार्क्षं' इति पाठः ॥

४. माणव शब्द से कहा हुआ यन् प्रत्यय ज्ञापक के बल से मानव शब्द से भी होता है। द्र. पदमञ्जरी ४।२।४२ ॥ सम्पा० ॥

अभ्यवज्वालितम् १३) मरुत् [वायु] देवता वाला औटा हुआ दूध है १३, (पौष्णं समुद्वान्तम् १४) पूषा [पुष्ट करने वाला सूर्य] देवता वाला उफनता हुआ दूध है १४, (वारुणं विष्यन्नम् १५) वरुण [जल] देवता वाला बहता हुआ दूध है १५, (सारस्वतम् अद्भिः प्रत्यानीतम् १६) सरस्वती [जल वाली नदी] देवता वाला जल से लौटा दिया गया दूध है १६, (त्वाष्ट्रम् उद्वास्यमानम् १७) त्वष्टा [सूक्ष्म बनाने वाला विद्वान्] देवता वाला छोड़ा जाता हुआ दूध है १७ (धात्रम् उद्वासितम् १८) धाता [सब का धारण करने वाला] देवता वाला छोड़ा हुआ दूध है १८, (वैश्वदेवम् उन्नीयमानम् १९) विश्वेदेवा [सब दिव्य गुण] देवता वाला ऊपर लाया जाता हुआ [नवनीत माखन] है १९, (सावित्रम् उन्नीतम् २०) सविता [सर्वप्रेरक] देवता वाला ऊपर लाया गया नवनीत है २०, (बार्हस्पत्यं प्रक्रम्यमाणम् २१) बृहस्पति [बड़ी विद्याओं का स्वामी] देवता वाला घुमाया जाता हुआ नवनीत है २१, (द्यावापृथिव्यं ह्रियमाणम् २२) द्यावापृथिवी [सूर्य और भूमि] देवता वाला लिया जाता हुआ नवनीत है २२, (ऐन्द्रम् उपसाद्यमानम् २३) इन्द्र [बड़े ऐश्वर्य वाले] देवता वाला पास लाया जाता हुआ नवनीत है २३, (बलाय उपसन्नम् २४) बल के लिये पास रक्खा गया नवनीत है २४, (आग्नेयी समित् २५) अग्नि देवता वाली समिधा है २५, (यां प्रथमाम् आहुतिम् अहौषम् माम् एव तत् स्वर्गे लोके अधाम् २६) जिस पहिली आहुति को मैंने दिया है, उस से अपने को मैंने स्वर्गलोक में रक्खा है २६, (यत् गार्हपत्यम् अवेक्षिषम् अस्य लोकस्य संतत्यै २७) जो मैंने गार्हपत्य अग्नि वाली हवि को विचारा है, वह इस लोक के विस्तार के लिये है २७, (प्राजापत्या उत्तरा आहुतिः, तस्मात् सा पूर्णतरा मनसा एव २८) प्रजापति [प्रजापालक ईश्वर वा गृहस्थ] देवता वाली पिछली आहुति है, इस कारण वह मन के साथ ही अधिक पूर्ण है २८, (यत् हुत्वा उदञ्चम् स्रुचं त्रिः उदनैषं रुद्रान् तेन अप्रैषम् २९) जो हवि देकर उत्तर ओर रक्खी हुई स्रुचा [वट के पत्ते के समान रूप

द्देवताकम् (आश्विनम्) अश्विन्--अण् । अश्विदेवताकम् । अश्विनौ स्त्रीपुरुषौ । कुहस्विद् दोषा कुह वस्तोरश्विना--ऋ० १० । ४० । २ (सौम्यम्) सोम--टयण् । सोमदेवताकम् । ओषधिः सोमः सुनोतेः--निरु० ११ । २ (बार्हस्पत्यम्) बृहस्पति--ण्यः । बृहस्पतिदेवताकम् । बृहस्पतिः । बृहतीनां विद्यानां पतिः । वाचस्पतिः (वैश्वानरीयम्) वैश्वानर--छः । वैश्वानरदेवताकम् । वैश्वानरः सर्वनरहितः (वैष्णवम्) विष्णुदेवताकम् । विष्णुः व्यापकोऽग्निः (मारुतम्) मरुत्--स्वार्थे अण् । वायुदेवताकम् (पौष्णम्) पूषन्--अण् । पूषदेवताकम् । पूषा पोषकः सूर्यः (वारुणम्) वरुणदेवताकम् । वरुणो जलम् (सारस्वतम्) सरस्वतीदेवताकम् । सरस्वती जलवती नदी (त्वाष्ट्रम्) त्वष्टृदेवताकम् । त्वष्टा सूक्ष्मीकर्ता । विश्वकर्मा (वैश्वदेवम्) सर्वदिव्यगुणदेवताकम् (सावित्रम्) सर्वप्रेरकदेवताकम् (ऐन्द्रम्) ऐश्वर्यवद्देवताकम् (अहौषम्) हुतवानस्मि (माम्) आत्मानम् (अधाम्) धारितवानस्मि (प्राजापत्या) प्रजापतिः ईश्वरो गृहस्थो वा, तद्देवताका (रुद्रान्)

वाला विकङ्कट काष्ठ का बना हुआ भुजा तुल्य चमचा] को तीन बार मैंने उठाया है, रुद्रों [शत्रुनाशक शूरवीरों] को मैंने तृप्त किया है २९, (यत् बर्हिषि स्रुचं निधाय उन्मृज्य उत्तरतः पाणी निरमार्क्षं तेन ओषधिवनस्पतीन् अप्रैषम् ३०) जो कुशासन पर स्रुचा को धर के उत्तर की ओर दोनों हाथों को मैंने धोया है, उससे ओषधि वनस्पतियों को मैंने तृप्त किया है ३०, (यत् द्वितीयम् उन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधाम् अकार्षम् तेन पितॄन् अप्रैषम् ३१) जो दूसरी [स्रुचा] को धोकर पित्र्य [पितृतीर्थ अर्थात् तर्जनी और अगूठे के बीच] में यज्ञोपवीत करके दक्षिण ओर में पितरों [बड़े बूढ़े विद्वानों] के लिये स्वधा [अन्न] मैंने किया है, उस से पितरों [बड़े बूढ़े विद्वानों] को मैंने तृप्त किया है ३१, (यत् प्रथमं प्राशिषं तेन प्राणान् अप्रैषम् ३२) जो पहिली [हवि] को मैंने खाया है. उस से प्राणों को मैंने तृप्त किया है ३२, (यत् द्वितीयं तेन गर्भान्, तस्मात् अनश्नन्तः गर्भाःजीवन्ति, ३३) जो दूसरी [हवि] को [मैंने खाया है] उससे गर्भों को [मैंने तृप्त किया है] इस कारण बिना खाते हुये [अर्थात् नाभि की नाड़ी से रस खींचते हुये] गर्भ जीते हैं ३३, (यत् अन्ततः सर्वम् एव आप्राशिषं तेन विश्वान् देवान् अप्रैषम् ३४) जो अन्त में सब ही [हवि] को मैंने खा लिया है उस से सब दिव्य गुणों को मैंने तृप्त कियाहै ३४, (यत् उदकम् अप्रक्षालितया स्रुचा न्यनैषं तेन सर्पेतरजनान् अप्रैषम् ३५) जो जल को बिना धुली स्रुचा से मैंने गिराया है, उससे गतिशीलों से भिन्न पामरजनों को मैंने तृप्त किया है ३५, (यत् प्रक्षालितया तेन सर्पपुण्यजनान् ३६) जो धुली हुई [स्रुचा] से [मैंने जल गिराया है], उससे गतिशील पवित्र आचरण वाले लोगों को [मैंने तृप्त किया है] ३६, (यत् अपरेण स्रुचा उदकम् आहवनीयं न्यनैषं तेन गन्धर्वाप्सरसः अप्रैषम् ३७) जो दूसरी स्रुचा से जल को आहवनीय अग्नि पर मैंने गिराया है, उससे गन्धर्व अप्सरसों [पृथिवी के धारण करने वालों और आकाश में चलने वालों] को मैंने तृप्त किया है ३७, (यत् स्रुवं स्रुचं च प्रत्यताप्सं तेन सप्तऋषीन् अप्रैषम् ३८) जो स्रुवा [खैर की लकड़ी का बना हुआ हाथ भर का यज्ञपात्र] और स्रुचा को मैंने तपाया है, उससे सात ऋषियों [त्वचा, नेत्र, कान, जिह्वा, नाक, मन और बुद्धि] को मैंने तृप्त किया है ३८,

---

शत्रुरोदकान् (अप्रैषम्) प्रीञ् तर्पणे—लुङ्। तर्पितवानस्मि (प्राशिषम्) प्रकर्षेण भक्षितवानस्मि (अनश्नन्तः) न भक्षयन्तः (सर्पेतरजनान्) सर्पन्ति गच्छन्ति सर्पाः गतिशीलाः । इतरः भिन्नः जनः पामरलोकः । गतिशीलेभ्यो भिन्नान् पामरजनान् (सर्पपुण्यजनान्) गतिशीलान् पवित्राचरणान् (गन्धर्वाप्सरसः) गां वाणीं पृथिवीं गतिं वा धरति धारयति वा स गन्धर्वः । कॄगॄशॄदृभ्यो वः (उ० १ । १५५) गो + धृञ् धारणे—वप्रत्ययः, गो शब्दस्य गम् । सर्त्तेरप्पूर्वादसिः (उ० ४ । २३७) अप् + सृ गतौ—असिः । अप्सरसः अप्सु आकाशे सरणशीलाः । पृथिवीधारकान् आकाशे गमनशीलान् च (सप्तऋषीन्) इगुपधात् कित् (उ० ४ । १२०) ऋषी गतौ दर्शने च—इन् । ऋत्यकः (पा० ६ । १ । १२८) इति प्रकृतिभावः । सप्त ऋषयः प्रतिहिताः शरीरे—यजु० ३४ । ५५ । त्वक्चक्षुःश्रवण-

(यत् रात्रौ स्रुग्दण्डम् अवामार्क्षं ये रात्रौ संविशन्ति तान् दक्षिणान् उदनैषम् ३९) जो रात्रि में स्रुचा के दण्डे को मैंने धोया है, जो रात्रि में सोते हैं उन चतुर लोगों को मैंने उठाया है ३९, (यत् प्रातः उदमार्क्षम्, ये प्रातः प्रव्रजन्ति तान् दक्षिणान् उदनैषम् ४० इति ब्राह्मणम्) जो प्रातःकाल [स्रुचा के दण्डे को] मैंने धोया है, जो प्रातःकाल चलते फिरते हैं उन चतुर लोगों को मैंने उठाया है ४०, यह ब्राह्मण [ब्रह्मज्ञान] है १२ ॥

भावार्थः—दूध घी आदि पदार्थों का उपयोग विचारपूर्वक करना चाहिये ॥ १२ ॥

कण्डिका १३ ॥

एवमेवैतद्भो यथा भवानाह पृच्छामि त्वेव भवन्तमिति, पृच्छ प्राचीनयोग्येति । यस्य सायमग्नय उपसमाहिताः स्युः सर्वे ज्वलयेयुः प्रक्षालितानि यज्ञपात्राण्युपसन्नानि स्युरथ चेद् दक्षिणाग्निरुद्वायात् किं वा ततो भयमागच्छेदिति, क्षिप्रमस्य पत्नी प्रैति. यो विद्वान् जुहोति विद्यया त्वेवाहमभिजुहोमीति, का ते विद्या का प्रायश्चित्तिरिति १, गार्हपत्यादधि दक्षिणाग्निं प्रणीय प्राचोऽङ्गारानुद्धृत्य प्राणापानाभ्यां स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरं जुहुयात्सा मे विद्या सा प्रायश्चित्तिरिति २, अथ चेदाहवनीय उद्वायात् किं वा ततो भयमागच्छेदिति क्षिप्रमस्य पुत्रः प्रैति, यो विद्वाञ्जुहोति विद्यया त्वेवाहमभिजुहोमीति, का ते विद्या का प्रायश्चित्तिरिति २, गार्हपत्यादध्याहवनीयं प्रणीय प्रतीचोऽङ्गारानुद्धृत्य समानव्यानाभ्यां स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरञ्जुहुयात् सा मे विद्या सा प्रायश्चित्तिरिति २ । अथ चेद्गार्हपत्य उद्वायात् किं वा ततो भयमागच्छेदिति. क्षिप्रं गृहपतिः प्रैति, यो विद्वाञ्जुहोति विद्यया त्वेवाहमभिजुहोमि इति का ते विद्या का प्रायश्चित्तिरिति ३, सभस्मकमाहवनीयं दक्षिणेन दक्षिणाग्निं परिहृत्य गार्हपत्यस्यायतने प्रतिष्ठाप्य ततः आहवनीयं प्रणीय उदीचोऽङ्गारानुद्धृत्योदानरूपाभ्यां स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिरिति ३, अथ चेत्सर्वेऽग्नय उद्वायेयुः किं वा ततो भयमागच्छेदिति, क्षिप्रं गृहपतिः सर्वज्यानिञ्जीयते, यो विद्वां जुहोति विद्यया त्वेवाहमभिजुहोमीति, का ते विद्या का प्रायश्चित्तिरिति ४, आनडुहेन शकृत्पिण्डेनाग्न्यायतनानि परिलिप्य होम्यमुपसाद्याग्निं निर्मथ्य प्राणापानाभ्यां स्वाहा समानव्यानाभ्यां स्वाहा उदानरूपाभ्यां स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरञ्जुहुयात् सा मे विद्या सा प्रायश्चित्तिरिति ४, अथ चेन्न श्रि जनयितुं शक्नुयुर्न कुतश्चन वातो वायात् किं वा ततो भयमागच्छेदिति मोघमस्येष्टं च हुतञ्च भवति, यो विद्वां जुहोति विद्यया त्वेवाहमभिजुहोमीति, का ते विद्या का प्रायश्चित्तिरित्यानडुहेनैव शकृत्पिण्डे-

---

रसनाघ्राणमनोबुद्धीः (संविशन्ति) शेरते (दक्षिणान्) कुशलान् (प्रव्रजन्ति) प्रकर्षेण गच्छन्ति ॥

नाग्न्यायतनानि परिलिप्य होम्यमुपसाद्य वात आवातु भेषजमिति सूक्तेनात्मन्येव जुहुयादथ प्रातरग्निं निर्मथ्य यथास्थानमग्नीनुपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिरिति ५ ब्राह्मणम् ॥ १३ ॥

कण्डिका १३ ॥ तीनों अग्नियों में विघ्न पड़ने पर उपाय और प्रायश्चित्त ॥

(भो एवम् एव एतत् यथा भवान् आह, तु एव भवन्तं पृच्छामि इति) [प्राचीनयोग्य बोला] महाराज ! ऐसा ही यह है जैसा आप कहते हैं, फिर भी आपसे मैं पूछता हूं। (प्राचीनयोग्य पृच्छ इति) [उद्दालक बोला] हे प्राचीनयोग्य ! पूछ। (यस्य सायम् अग्नयः उपसमाहिताः स्युः सर्वे ज्वलयेयुः प्रक्षालितानि यज्ञपात्राणि उपसन्नानि स्युः) [प्राचीनयोग्य बोला] जिसकी सायंकाल को सब अग्नियां यथाविधि ठीक की गयी हों, और सब जलती हों और धुले हुये यज्ञपात्र समीप हों, (अथ चेत् दक्षिणाग्निः उद्वायात् किं वा ततः भयम् आगच्छेत् इति, क्षिप्रम् अस्य पत्नी प्रैति, यः विद्वान् जुहोति विद्यया तु एव अहम् अभिजुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति १) फिर जो दक्षिणाग्नि भड़क उठे [अधिक बढ़ जावे] अथवा उससे कुछ भय आवे, [जिससे] उसकी पत्नी शीघ्र चली जावे, और जो विद्वान् पुरुष होम करता है—(विद्यया……) विद्या के साथ फिर भी मैं सब प्रकार होम करूं [यह कहे, उसमें] तेरी क्या विद्या है और क्या प्रायश्चित्त [पापशोधन विधि] है १। (गार्हपत्यात् अधि दक्षिणाग्निं प्रणीय प्राचः अङ्गारान् उद्धृत्य प्राणापानाभ्यां स्वाहा इति जुहुयात्, अथ प्रातः यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिः इति) [उद्दालक बोला] गार्हपत्य अग्नि से दक्षिणाग्नि लेकर पूर्व दिशा वाले अङ्गारों को निकाल कर—(प्राणापानाभ्यां स्वाहा) भीतर जाने वाले और बाहर आने वाले श्वास के लिये सुन्दर आहुति है--[इस मन्त्र से] होम करे फिर प्रातःकाल अपने अपने स्थान में अग्नियों को ठीक कर के पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है १। (अथ चेत् आहवनीयः उद्वायात् किं वा ततः भयम् आगच्छेत् इति क्षिप्रम् अस्य पुत्रः प्रैति, यः विद्वान् जुहोति विद्यया तु एव अहम् अभिजुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति २) [प्राचीनयोग्य बोला] फिर जो आहवनीय अग्नि भड़क उठे अथवा उस से कुछ भय आवे, [जिससे] उसका पुत्र शीघ्र चला जावे और जो विद्वान् होम करता है—(विद्यया……) विद्या के साथ फिर भी

१३--(तु) पुनः (उपसमाहिताः) यथाविधिसंस्कृताः (प्रक्षालितानि) क्षल शोधकर्मणि–क्तः। संशोधितानि (उपसन्नानि उप+षद्लृ गतौ–क्तः। समीपस्थानि (उद्वायात्) उद्गच्छेत् (प्रैति) प्र+इण् गतौ--लट्। प्रकर्षेण गच्छति (प्रायश्चित्तिः) प्र+इण् गतौ घञ्+चिती संज्ञाने--क्तिन्। प्रायस्य चित्तिचित्तयोः (वा० पा० ६। १। १५७) इति सुट्। पापशोधनविधिः (प्राचः) पूर्वदिक्स्थितान् (समाधाय) यथाविधि संस्कृत्य (यथापुरम्) पुर अग्रगमने--कः।

मैं सब प्रकार होम करूं [यह कहे, इस में] तेरी क्या विद्या है और क्या प्रायश्चित्त है २ । (गार्हपत्यात् अधि आहवनीयं प्रणीय प्रतीचः अङ्गारान् उद्धृत्य समानव्यानाभ्यां स्वाहा इति जुहुयात्) [उद्दालक बोला] गार्हपत्य अग्नि से आहवनीय अग्नि को लेकर पश्चिम ओर वाले अङ्गारों को निकाल कर—(समानव्यानाभ्यां स्वाहा) नाभि वाले और सब शरीर में फैलने वाले श्वास के लिये सुन्दर आहुति है— इस मन्त्र से होम करे (अथ प्रातः यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिः इति २) फिर प्रातःकाल अपने अपने स्थान पर अग्नियों को ठीक कर के पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है २ । (अथ चेत् गार्हपत्यः उद्वायात् किं वा ततः भयम् आगच्छेत् इति, क्षिप्रं गृहपतिः प्रैति. यः विद्वान् जुहोति विद्यया तु एव अहम् अभिजुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति ३) [प्राचीनयोग्य बोला] फिर जो गार्हपत्य अग्नि भड़क उठे अथवा उस से कुछ भय आवे, [जिससे] गृहपति शीघ्र चला जावे, और जो विद्वान् होम करता है (विद्यया······) विद्या के साथ फिर भी मैं सब प्रकार होम करूं [यह कहे, उस में] तेरी क्या विद्या है और क्या प्रायश्चित्त है ३ । (दक्षिणेन दक्षिणाग्निं परिहृत्य सभस्मकम् आहवनीयं गार्हपत्यस्य आयतने प्रतिष्ठाप्य ततः आहवनीयं प्रणीय उदीचः अङ्गारान् उद्धृत्य उदानरूपाभ्यां स्वाहा इति जुहुयात्, अथ प्रातः यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिः इति ३) [उद्दालक बोला] दाहिने हाथ से दक्षिणाग्नि को छोड़ कर, भस्म सहित आहवनीय अग्नि को गार्हपत्य के स्थान में रख कर फिर आहवनीय अग्नि को लेकर उत्तर ओर वाले अङ्गारों को निकाल कर—(उदानरूपाभ्यां स्वाहा) कण्ठ से ऊपर वाले वायु और रूप के लिए सुन्दर आहुति है—इस मन्त्र से हवन करे, फिर प्रातःकाल अपने-अपने स्थान में अग्नियों को ठीक करके पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है ३ । (अथ चेत् सर्वे अग्नयः उद्वायेयुः किं वा ततः भयम् आगच्छेत् इति, क्षिप्रं गृहपतिः सर्वज्यानिं जीयते, यः विद्वान् जुहोति विद्यया तु एव अहम् अभि जुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति ४) [प्राचीन-योग्य बोला] फिर जो सब अग्नियां भड़क उठें, अथवा उससे कुछ भय आवे [जिससे] गृहपति शीघ्र सब हानि प्राप्त करे, और जो विद्वान् होम करता है—[विद्यया······] विद्या के साथ फिर भी मैं सब प्रकार होम करूं [यह कहे, इसमें] तेरी क्या विद्या है और क्या प्रायश्चित है ४ । (आनडुहेन शकृत्पिण्डेन अग्न्यायतनानि परिलिप्य होम्यम् उपसाद्य अग्निं निर्मथ्य प्राणापानाभ्यां स्वाहा,

---

यथापूर्वम् (प्रतीचः) पश्चिमदिशि स्थितान् (परिहृत्य) परित्यज्य (आयतने) यज्ञस्थाने (उद्धृत्य) उत्+हृञ् हरणे—ल्यप् । बहिष्कृत्य (सर्वज्यानिम्) वीज्याज्वरिभ्यो निः (उ० ४ । ४८) ज्या वयोहानौ—निः । सर्वक्षतिः । (जीयते) कर्मणि प्रयोग आर्षः । जयति प्राप्नोति (आनडुहेन) अनुडुही—अण् । धेनुसंबन्धिनी (शकृत्पिण्डेन) विष्ठासंचयेन (होम्यम्) होम—यत् । होमाय हितं हविः । (मोघम्) निष्फलम् (इष्टम्) अभीष्टम् (आत्मनि) मनसि ॥

समानव्यानाभ्यां स्वाहा, उदानरूपाभ्यां स्वाहा इति जुहुयात् अथ प्रातः यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिः इति ४) [उद्दालक बोला] गौ के गोबर से अग्नि के स्थानों को लीप कर, होम योग्य द्रव्य को पास लाकर, अग्नि को मथ कर (प्राणापानाभ्यां स्वाहा, समानव्यानाभ्यां स्वाहा, उदानरूपाभ्यां स्वाहा) [ऊपर वाले इन तीन मन्त्रों से] होम करे, फिर प्रातःकाल अपने अपने स्थान में अग्नियों को ठीक करके पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है ४ । (अथ चेत् अग्निं जनयितुं न शक्नुयुः न कुतश्चन वातः वायात् किं वा ततः भयम् आगच्छेत् इति अस्य इष्टं च हुतं च मोघ भवति, यः विद्वान् जुहोति विद्यया तु एव अहम् अभिजुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति ५) [प्राचीनयोग्य बोला] फिर जो अग्नि को लोग न उत्पन्न कर सकें और जो कहीं से वायु न चले अथवा उससे कुछ भय आवे [जिससे] उसका अभीष्ट और होम निष्फल होवे, और जो विद्वान्—होम करता है—(विद्यया......) विद्या के साथ फिर भी मैं सब प्रकार होम करूँ [यह कहे, इसमें] तेरी क्या विद्या है और क्या प्रायश्चित्त है ५ । (आनडुहेन एव शकृत्पिण्डेन अग्न्यायतनानि परिलिप्य होम्यम् उपसाद्य, वातः आवातु भेषजम् इति सूक्तेन आत्मनि एव जुहुयात् अथ प्रातः अग्निं निर्मथ्य यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात्, सा मे विद्या सा प्रायश्चित्तिः ५ इति ब्राह्मणम्) [उद्दालक बोला] गौ के ही गोबर से अग्नि के स्थानों को लीप कर, होमयोग्य पदार्थ को पास लाकर (वातः आवातु भेषजम्) वायु औषध लावे—[इस मन्त्र का मिलान करो अथर्व ४।१३।३] इस सूक्त से आत्मा [अपने] में ही [मानसिक] होम करे, फिर प्रातःकाल अग्नि को मथ कर अपने अपने स्थान में अग्नियों को ठीक करके पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है ५ । यह ब्राह्मण है ॥ १३ ॥

भावार्थः—अग्नियों के अभाव में मनुष्य मानसिक हवन ही करे ॥ १३ ॥

विशेषः—पूर्वोक्त मन्त्र यहां लिखा जाता है—आ वात वाहि भेषजं वि वात वाहि यद् रपः । त्वं हि विश्वभेषज देवानां दूत ईयसे ॥ अथ० ४।१३।३ ऋ० ०।१३७।३। (वात) हे वायु (भेषजम्) स्वास्थ्य को (आ वाहि) बहकर ला, और (वात) हे वायु ! (यत् रपः = यत् रपः तत्) जो दोष है उसे (वि वाहि) बह कर निकाल दे, (हि) क्योंकि (विश्वभेषज) हे सर्वरोगनाशक [वायु] ! (त्वम्) तू (देवानाम्) इन्द्रियों, विद्वानों और सूर्यादि लोकों के बीच (दूतः) चलने वाला वा दूत [समान सन्देश पहुंचाने वाला] होकर (ईयसे) फिरता रहता है ॥

कण्डिका १४ ॥

एवमेवैतद् भो भगवन् यथा भवानाहोपयामि त्वेव भवन्तमित्येवं चेन्नावक्ष्यो मूर्द्धा ते व्यपतिष्यदिति हन्त तु ते तद्वक्ष्यामि यथा ते न व्यपतिष्यतीति, यो ह वा एवं विद्वानश्नाति च पिबति च वाक् तेन तृप्यति, वाचि तृप्तायामग्निस्तृप्यत्यग्नौ तृप्ते पृथिवी तृप्यति, पृथिव्यां तृप्तायां यानि पृथिव्यां भूतान्यन्वायत्तानि

तानि तृप्यन्ति १, यो ह वा एवं विद्वानश्नाति च पिबति च प्राणस्तेन तृप्यति, प्राणे तृप्ते वायुस्तृप्यति, वायौ तृप्तेऽन्तरिक्षं तृप्यति अन्तरिक्षे तृप्ते यान्यन्तरिक्षे भूतान्यन्वायत्तानि तानि तृप्यन्ति २, यो ह वा एवं विद्वानश्नाति च पिबति च चक्षुस्तेन तृप्यति, चक्षुषि[3] तृप्त आदित्यस्तृप्यत्यादित्ये तृप्ते द्यौस्तृप्यति, दिवि तृप्तायां यानि दिवि भूतान्यन्वायत्तानि तानि तृप्यन्ति ३, यो ह वा एवं विद्वानश्नाति च पिबति च मनस्तेन तृप्यति, मनसि तृप्ते चन्द्रमास्तृप्यति चन्द्रमसि तृप्ते आपस्तृप्यन्त्यप्सु तृप्तासु यान्यप्सु भूतान्यन्वायत्तानि तानि तृप्यन्ति ४, यो ह वा एवं विद्वानश्नाति च पिबति च श्रोत्रं तेन तृप्यति, श्रोत्रे तृप्ते दिशश्चान्तर्देशाश्च तृप्यन्ति, दिक्षु चान्तर्देशेषु च तृप्तेषु च यानि दिक्षु चान्तर्देशेषु च भूतान्यन्वायत्तानि तानि तृप्यन्ति ५, यो ह वा एवं विद्वानश्नाति च पिबति च तस्यायमेव दक्षिणः पाणिर्जुहूः सव्य उपभृत् कण्ठो ध्रुवाऽन्नं हविः प्राणा ज्योतींषि सदेष्टं सदाहुतं सदाशितं पायितमग्निहोत्रं भवति य एवं वेद यश्चैवं विद्वानग्निहोत्रं जुहोतीति ब्राह्मणम् ॥१४॥

कण्डिका १४ ॥ खान पान के लाभ ॥

(भो भगवन् एवम् एव एतत् यथा भवान् आह, उपयामि तु एव भवन्तम् इति) [प्राचीनयोग्य बोला] हे भगवन् यह वैसा ही है जैसा आपने कहा कि मैं तो आप के पास ही आया हूँ। (एवं चेद् न अवक्ष्यः ते मूर्द्धा व्यपतिष्यत् इति) जो तू ऐसा [यथार्थ] न कहता तो तेरा मस्तक गिर जाता [देखो कं० ८], (तु हन्त ते तत् वक्ष्यामि यथा ते न व्यपतिष्यति इति) किन्तु, हे भाई! तुझसे वह कहूंगा जिस से तेरे लिये [मेरा मस्तक] न गिरेगा। (यः ह वै एव विद्वान् अश्नाति च पिबति च वाक् तेन तृप्यति) जो ही ऐसा [सत्यवादी] विद्वान् खाता और पीता है वाणी उससे तृप्त होती है १, (वाचि तृप्तायाम् अग्निः तृप्यति) वाणी के तृप्त होने पर अग्नि तृप्त होता है २, (अग्नौ तृप्ते पृथिवी तृप्यति) अग्नि के तृप्त होने पर पृथिवी तृप्त होती है ३, (पृथिव्यां तृप्तायां पृथिव्यां यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) पृथिवी के तृप्त होने पर जो एक दूसरे के वशीभूत प्राणी आदि हैं वे तृप्त होते हैं। ४,१। (यः ह वै एवं विद्वान् अश्नाति च पिबति च प्राणः तेन तृप्यति) जो ही ऐसा विद्वान् खाता और पीता है प्राण उससे तृप्त होता है १, (प्राणे तृप्ते वायुः तृप्यति) प्राण के तृप्त होने पर वायु तृप्त होता है २, (वायौ तृप्ते अन्तरिक्षं तृप्यति) वायु के तृप्त होने पर अन्तरिक्ष [मध्यलोक] तृप्त होता है ३, ((अन्तरिक्षे तृप्ते अन्तरिक्षे यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) अन्तरिक्ष के तृप्त होने पर

१४—(उपयामि) उप+या प्रापणे-लट्। आगतवानस्मि (अवक्ष्यः) वच परिभाषणे—लृङ्। अकथयिष्यः (व्यपतिष्यत्) वि+पत्लृ गतौ-लृङ्, विविधमपतिष्यत्। (वक्ष्यामि) कथयिष्यामि (अश्नाति) भक्षति (पिबति) पानं करोति (तृप्यति) हृष्यति (भूतानि) सत्तामात्रवस्तूनि (अन्वायत्तानि)

---

१. २. ३. पू. सं. 'उपायाम्' 'व्यपतिष्यति' 'चक्षुषी' इत्येते पाठाः ॥ सम्पा० ॥

अन्तरिक्ष में जो एक दूसरे के आधीन प्राणी आदि हैं वे तृप्त होते हैं ४ २ । (यः ह वै एवं विद्वान् अश्नाति च पिबति च चक्षुः तेन तृप्यति) जो ही ऐसा विद्वान् खाता और पीता है आंख उससे तृप्त होती है १, (चक्षुषि तृप्ते आदित्यः तृप्यति) आंख तृप्त होने पर सूर्य तृप्त होता है २, (आदित्ये तृप्ते द्यौः तृप्यति) सूर्य के तृप्त होने पर प्रकाशलोक [जहां पर सूर्य का प्रकाश है] तृप्त होता है ३, (दिवि तृप्तायां दिवि यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) प्रकाशलोक तृप्त होने पर प्रकाशलोक में जो एक दूसरे के आधीन प्राणी आदि हैं वे तृप्त होते हैं ४, ३ । (यः ह वै एवं विद्वान् अश्नाति च पिबति च मनः तेन तृप्यति) जो ही ऐसा विद्वान् खाता पीता है, मन उससे तृप्त होता है १, (मनसि तृप्ते चन्द्रमाः तृप्यति) मन तृप्त होने पर चन्द्रमा तृप्त होता है २, (चन्द्रमसि तृप्ते आपः तृप्यन्ति) चन्द्रमा तृप्त होने पर जल तृप्त होता है ३, (अप्सु तृप्तासु अप्सु यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) जल तृप्त होने पर जल में जो एक दूसरे के आधीन प्राणी आदि हैं, वे तृप्त होते हैं ४, ४ । (यः ह वै एवं विद्वान् अश्नाति च पिबति च श्रोत्रं तेन तृप्यति) जो ही ऐसा विद्वान् खाता और पीता है, कान उससे तृप्त होता है १, (श्रोत्रे तृप्ते दिशः च अन्तर्देशाः च तृप्यन्ति) कान तृप्त होने पर दिशायें और बीच वाले देश तृप्त होते हैं २, (दिक्षु च अन्तर्देशेषु च तृप्तेषु च दिक्षु च अन्तर्देशेषु च यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) दिशाओं और बीच वाले देशों के तृप्त होने पर दिशाओं और बीच वाले देशों में जो एक दूसरे के आधीन प्राणी आदि हैं, वे तृप्त होते हैं ३, ५ । (यः ह वै एवं विद्वान् अश्नाति च पिबति च, तस्य अयम् एव दक्षिणः पाणिः जुहूः, सव्यः उपभृत्, कण्ठः ध्रुवा, अन्नं हविः, प्राणाः ज्योतींषि, सदेष्टं सदाहुतं सदाशितं पायितम् अग्निहोत्रं भवति, यः एवं वेद यः च एवं विद्वान् अग्निहोत्रं जुहोति इति ब्राह्मणम्) जो ही ऐसा विद्वान् खाता और पीता है, उसका यही दाहिना हाथ जुहू [पलाश की लकड़ी का बना हुआ चन्द्राकार यज्ञपात्र], बायां हांथ उपभृत् [चक्राकार यज्ञपात्र], कण्ठ ध्रुवा [बट के पत्राकार का यज्ञपात्र] है, अन्न हवि है, प्राण ज्योति हैं, सदा अभीष्ट, सदा हवन और सदा खाया पिया अग्निहोत्र है, जो ऐसा जानता है और जो ऐसा विद्वान् अग्निहोत्र करता है, यह ब्राह्मण है ॥ १४ ॥

भावार्थः—मनुष्य खान पान के उपयोग से स्वस्थ रहकर संसार का उपकार करे ॥ १४ ॥

परस्परवशीभूतानि (अन्तरिक्षम्) मध्यलोकः (चक्षुषि) नेत्रे (द्यौः) सूर्य-प्रकाशस्थानम् (जुहूः) हु दानादानादनेषु—क्विप् । पलाशकाष्ठनिर्मितार्ध-चन्द्राकृतियज्ञपात्रभेदः (उपभृत्) उप + भृञ् भरणे—क्विप् । चक्राकारयज्ञपात्रम् (ध्रुवा) ध्रु स्थैर्ये—कः, टाप् । वटपत्राकृतियज्ञपात्रम् । (ज्योतींषि) सूर्य्यादीनि (सदा—अशितम्) नित्यभक्षितम् (पायितम्) पा पाने स्वार्थे—णिच्, क्तः । पीतम् ॥

कण्डिका १५ ॥

प्रियमेधा ह वै भरद्वाजा यज्ञविदो मन्यमानास्ते ह स्म न कश्चन[1] वेदविदमुपयन्ति, ते सर्वमविदुस्ते सहैवाविदुस्तेऽग्निहोत्रमेव न समवादयन्त तेषामेकः सकृदग्निहोत्रमजुहोत् द्विरेकस्त्रिरेकस्तेषां यः सकृदग्निहोत्रमजुहोत्तमितरावपृच्छतां कस्मै त्वं जुहोषीति एकधा वा, इदं सर्वं प्रजापतिः प्रजापतय एवाहं सायं जुहोमीति प्रजापतये प्रातरिति । तेषां यो द्विरजुहोत् तमितरावपृच्छतां काभ्यां त्वं जुहोषीति, अग्नये प्रजापतय इति सायं, सूर्य्याय प्रजापतय इति प्रातः । तेषां यस्त्रिरजुहोत्तमितरावपृच्छतां केभ्यस्त्वं जुहोषीत्यग्नये प्रजापतयेऽनुमतय इति सायं, सूर्य्याय प्रजापतये अग्नये स्विष्टकृत इति प्रातः । तेषां यो द्विरजुहोत्स आर्ध्नोत्स भूयिष्ठोऽभवत्प्रजया चेतरौ श्रिया चेतरावत्याक्रामत्तस्य ह प्रजामितरयोः प्रजे [2]सजातत्त्वमुपेयातां तस्माद् द्विर्होतव्यं, यजुषा चैव मनसा च यामेव ऋद्धिमार्ध्नोति तामृध्नोति य एव वेद, यश्चैवं विद्वानग्निहोत्रं जुहोतीति ब्राह्मणम् ॥ १५ ॥

कण्डिका १५ ॥ क्रियात्मक और मानसिक यज्ञ करना चाहिए ॥

(प्रियमेधाः ह वै भरद्वाजाः यज्ञविदः मन्यमानाः) भरद्वाज गोत्र वाले बुद्धि को प्रिय रखने वाले [अपने को] यज्ञवित् समझते हुये । (ते ह स्म कश्चन वेदविदं न उपयन्ति) वे किसी वेदज्ञाता के पास नहीं जाते थे । (ते सर्वम् अविदुः ते सह एव अविदुः) [वे मानते थे] वे सब जानते हैं, वे मिलकर ही जानते थे । (ते अग्निहोत्रम् एव न समवादयन्त) वे अग्निहोत्र का ही अब संवाद करने लगे । (तेषाम् एकः सकृत् अग्निहोत्रम् अजुहोत् द्विः एकः त्रिः एकः) उनमें एक एक बार [एक देवता के लिये] अग्निहोत्र करता था, दो बार [दो देवता के लिये] एक और तीन बार [तीन देवता के लिये] एक ।

(तेषां यः सकृत् अग्निहोत्रम् अजुहोत् तम् इतरौ अपृच्छताम् कस्मै त्वम् एकधा वं जुहोषि इति) उनमें जो एक बार अग्निहोत्र करता था, उससे अन्य दोनों ने पूंछा—तू किस देवता के लिये एक प्रकार ही यज्ञ करता है । (इद सर्वं प्रजापतिः प्रजापतये एव अहं सायं जुहोमि इति, प्रजापतये प्रात इति) [वह बोला] यह सब प्रजापति है, प्रजापति के लिये ही मैं सायंकाल होम करता हूँ, और प्रजापति के लिये प्रातःकाल । (तेषां यः द्विः अजुहोत् तम् इतरौ अपृच्छताम्, काभ्यां त्वं जुहोषि

१५—(प्रियमेधाः) प्रिया मेधा धारणावती बुद्धिर्येषां ते ऋषयः (भरद्वाजाः) भरद्वाजवंशीयाः (यज्ञविदः) यज्ञवेत्तारः (मन्यमानाः) जानन्तः (कश्चन) कमपि (उपयन्ति) समीपे गच्छन्ति (अविदुः) अजानन् (न) सम्प्रति—निरु० ७ । ३१ (समवादयन्त) परस्परम् अकथयन्त (सकृत्) एकवारम् ।

---

१. पू. सं. 'कश्चना' इति पाठः ॥ २. अत्रत्यः पाठोऽतीवभ्रष्टः, अस्माभिः संशोधितः ॥सम्पा०॥

इति) उनमें से जो दो बार होम करता था, उससे अन्य दोनों ने पूँछा—कौन दो देवताओं के लिये तू होम करता है । (अग्नये प्रजापतये इति सायं, सूर्याय प्रजापतये इति प्रातः) [वह बोला] अग्नि प्रजापति के लिये सायंकाल, [तथा] सूर्य प्रजापति के लिये प्रातःकाल [अग्नि और सूर्य एक ही देवता हैं] (तेषां यः त्रिः अजुहोत् तम् इतरौ अपृच्छताम् केभ्यः त्वं जुहोषि इति) उनमें जो तीन बार [तीन देवताओं के लिये] होम करता था, उससे अन्य दोनों ने पूँछा—किन देवताओं के लिये तू होम करता है । (अग्नये प्रजापतये अनुमतये इति सायं, सूर्याय प्रजापतये स्विष्टकृते अग्नये इति प्रातः) [वह बोला] अग्नि, प्रजापति और अनुमति [अनुकूल बुद्धि वाले] के लिये सायंकाल और सूर्य, प्रजापति और स्विष्टकृत् [उत्तम मनोरथ सिद्ध करने वाले] अग्नि के लिये प्रातःकाल [होम करता हूँ] ।

(तेषां यः द्विः अजुहोत् सः आर्ध्नोत्, सः भूयिष्ठः अभवत्, प्रजया च इतरौ श्रिया च इतरौ अत्याक्रामत्) उनमें जो दो बार [दो देवता के लिये] होम करता था वह समृद्ध हुआ और बहुत अधिक हुआ और प्रजा [बाल बच्चों] के साथ अन्य दूसरों से और लक्ष्मी के साथ अन्य दूसरों से बढ़ गया । (तस्य ह प्रजाम् इतरयोः [आत्मनोः] प्रजे सजातत्त्वम् उपेयाताम्) उसकी प्रजा को, प्रजाओं में वे दोनों प्राप्त करें । (तस्मात् द्विः होतव्यम्) इसलिये दो बार [दो देवता के लिये] हवन करना चाहिये । (यजुषा च एव मनसा च याम् एव ऋद्धिम् आर्ध्नोति ताम् ऋध्नोति यः एवं वेद यः च एवं विद्वान् अग्निहोत्रं जुहोति इति ब्राह्मणम्) यजु [हवि आदि सामग्री के संगतिकरण] से और मन [मानसिक यज्ञ] से जिस ऋद्धि को पूजता है उसको वह बढ़ाता है जो ऐसा जानता है जो ऐसा विद्वान् अग्निहोत्र करता है यह ब्राह्मण है ॥ १५ ॥

कण्डिका १६ ॥

स्वाहा वै कुतः सम्भूता, केन प्रकृता, किं वाऽस्या गोत्रं, कत्यक्षरा, कतिपदा, कति वर्णा, किम्पूर्वावसाना, क्वचित् स्थिता, किमधिष्ठाना, ब्रूहि स्वाहाया यद्दैवतं रूपञ्च । स्वाहा वै सत्यसम्भूता, ब्रह्मणा प्रकृता, लामगायनसगोत्रा, द्वे अक्षरे, एकं पदं त्रयश्च वर्णाः शुक्लः पद्मः सुवर्ण इति सर्वच्छन्दसां वेदेषु समासभूतैकोच्छ्वासा वर्णान्ते चत्वारो वेदाः शरीरे, षडङ्गान्योषधिवनस्पतयो लोमानि

एकस्मै देवाय (द्विः) द्विवारम् । द्वाभ्यां देवाभ्याम् (त्रिः) त्रिवारम् । त्रिभ्यो देवेभ्यः (एकधा) एकप्रकारेण (अनुमतये) अनुकूलबुद्धियुक्ताय (स्विष्टकृते) उत्तममनोरथसाधकाय (आर्ध्नोत्) अवर्धत (भूयिष्ठः) बहु—इष्ठन् । अतिशयेन बहुः (अत्याक्रामत्) अति + आ + अक्रामत् । अत्यगच्छत् (उपेयाताम्) उप + इण् गतौ—विधि लिङ् । उपगच्छेताम् (यजुषा) हविरादिसंगतिकरणेन । भौतिकयज्ञेन (मनसा) अन्तःकरणेन । मानसिकयज्ञेन (ऋद्धिम्) सिद्धिम् । ऐश्वर्य्यम् (आर्ध्नोति) पूजयति (ऋध्नोति) वर्धयति ।

चक्षुषी सूर्य्याचन्द्रमसौ, सा स्वाहा सा स्वधा सैषा यज्ञेषु वषट्कारभूता प्रयुज्यते, तस्या अग्निर्दैवतं ब्राह्मणो रूपमिति ब्राह्मणम् ॥ १६ ॥

कण्डिका १६ ॥ स्वाहा शब्द के विषय में प्रश्नोत्तर ॥

(स्वाहा वै कुतः सम्भूता १, केन प्रकृता २, किं वै अस्याः गोत्रम् ३, कत्यक्षरा ४ कतिपदा ५, कति [1]वर्णाः ६ किंपूर्वावसाना ७, क्वचित् स्थिता ८, किमधिष्ठाना ९, ब्रूहि स्वाहायाः यत् दैवतम् १० रूपं च ११) स्वाहा [सुवाणी, आशीर्वाद, सुदान] कहां से उत्पन्न हुई १, किस करके बनाई गई २. क्या इसका गोत्र है ३, कितने अक्षर वाली है ४, कितने पाद वाली है ५, कितने वर्ण वाली है ६, कौन आदि अन्त वाली है ७, कहां ठहरी हुई है ८, कौन अधिष्ठान [आश्रय] वाली है ९, तू बता स्वाहा का जो देवता १० और रूप है ११, (स्वाहा वै सत्यसम्भूता) [उत्तर] स्वाहा सत्य से उत्पन्न है १, (ब्रह्मणा प्रकृता) ब्रह्म करके बनाई गई है २, (लामगायनसगोत्रा) लामगायन [मनोहर वेदों के गाने वाले] के साथ एक गोत्र वाली है ३, (द्वे अक्षरे) दो अक्षर हैं ४, (एकं पदम्) एक पाद है ५, (त्रयः च वर्णाः शुक्लः पद्मः सुवर्णः इति) और तीन वर्ण हैं शुक्ल [श्वेत], पद्म [कमलवर्ण] और सुवर्ण [सोना] ६, (वेदेषु सर्वच्छन्दसां समासभूता वर्णान्ते एकोच्छ्वासा) वेदों में सब छन्दों के संग्रह रूप और वर्णों के अन्त में एक श्वास वाली है ७, (चत्वारः वेदाः षट् अङ्गानि शरीरे, ओषधिवनस्पतयः लोमानि चक्षुषी सूर्याचन्द्रमसौ) चारों वेद और छह अङ्ग [शिक्षा कल्प व्याकरण निरुक्त छन्द और ज्योतिष] दो शरीर, ओषधि वनस्पति लोम और दोनों आंखें सूर्य चन्द्रमा हैं ८, (सा स्वाहा सा स्वधा सा एषा यज्ञेषु वषट्कारभूता प्रयुज्यते, तस्याः अग्निः दैवतम् ब्राह्मणः रूपम् इति ब्राह्मणम्) वह स्वाहा वह स्वधा और वही वषट्कार रूप होकर यज्ञों में प्रयुक्त की जाती है, उसका अग्नि देवता ९, और ब्राह्मण [वेदज्ञाता] रूप है १०—यह ब्राह्मण है ॥ १६ ॥

१६—(स्वाहा) सु+आङ्+ह्वेञ् आह्वाने—डा । वाङ्नाम—निघ० १ । ११ स्वाहेत्येतत् सु आहेति वा स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति –निरु० ८ । २० सुवाणी । आशीर्वादः । सुदानम् । (संभूता) उत्पन्ना (प्रकृता) सृष्टा (कतिपदा) कतिपादयुक्ता (किंपूर्वावसाना) किमाद्यन्ता (लामगायनसगोत्रा) रमु क्रीडायाम्— घञ्, रस्य लः, गै गाने ल्युट् । लामगायनेन रामगायनेन मनोहरवेदगायकेन समानगोत्रा (समासभूता) संग्रहभूता (एकोच्छ्वासा) एकश्वासयुक्ता । एकविरामा (वर्णान्ते) मन्त्राणां वर्णान्ते (शरीरे) शरीरद्वयम् ॥

---

१. पूर्व संस्करण में "कति वर्णाः" यह प्रश्नात्मक पाठ कण्डिका में नहीं है, किन्तु उत्तर दिया है, तथा जर्मन सं. में भी कण्डिका में है अतः हमने बढ़ाया है । उत्तरों में "किम्पूर्वावसाना" का उत्तर कण्डिका में नहीं है अतः कण्डिका का पाठ अस्त व्यस्त प्रतीत होता है । पाठान्तरों के अभाव में हम संशोधन नहीं कर सके ॥ सम्पा० ॥

कण्डिका १७ ॥

अथापि कारवो ह नाम ऋषयो अल्पस्वा आसंस्त इममेकगुमग्निष्टोम ददृशुस्तमाहरंस्तेनायजन्त ते स्वर्य्ययुः स य इच्छेत् स्वर्यामी[1]ति स एतेनैकगुनाऽग्निष्टोमेन यजेतेति ब्राह्मणम् ॥ १७ ॥

कण्डिका १७ ॥ अग्निष्टोम विषय ॥

(अथ अपि कारवः ह नाम ऋषयः अल्पस्वाः आसन्) फिर स्तुति करने वाले प्रसिद्ध ऋषि थोड़े धन वाले थे । (ते इमम् एकगुम् अग्निष्टोमं ददृशुः) उन्होंने इस एक वाणी [पाद] वाले अग्निष्टोम [स्वाहाकार] को देखा । (तम् आहरन् तेन अयजन्त, ते स्वः ययुः) वह उसे ले आये, उससे यज्ञ किया और उन्होंने स्वर्ग पाया । (स. य. इच्छेत् स्वर्यामि इति सः एतेन एकगुना अग्निष्टोमेन यजेत इति ब्राह्मणम्) जो चाहे कि मैं स्वर्ग पाने वाला होऊं वह इस एक वाणी [पाद] वाले अग्निष्टोम [स्वाहाकार] से यज्ञ करे—यह ब्राह्मण है ॥ १७ ॥

कण्डिका १८ ॥

अथातः सवनीयस्य पशोर्विभागं व्याख्यास्यामः उद्धृत्यावदानानि, हनू सजिह्वे प्रस्तोतुः, कण्ठः सकाकुदः प्रतिहर्त्तुः, श्येनं वक्ष[2] उद्गातुर्दक्षिणं पार्श्वं सांसमध्वर्य्योः, सव्यमुपगातॄणां, सव्योंऽसः प्रतिप्रस्थातुर्दक्षिणा श्रोणिरथ्यास्त्री ब्रह्मणोऽवरसक्थं ब्राह्मणाच्छंसिनः, ऊरुः पोतुः, सव्या श्रोणिर्होतुरवरसक्थं मैत्रावरुणस्योरुरच्छावाकस्य, दक्षिणा दोर्नेष्टुः, सव्या सदस्यस्य, सदश्चानूकश्च गृहपतेर्जाघनी पत्न्यास्तां सा ब्राह्मणेन प्रतिग्राहयति, वनिष्टुर्हृदयं वृक्कौ चाङ्गुल्यानि दक्षिणो बाहुराग्नीध्रस्य, सव्य आत्रेयस्य, दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य, [सव्यौ] पादौ गृहपत्न्या व्रतप्रदायाः, सहैवैनयोरोष्ठस्तं गृहपतिरेवानुशास्ति मणिकाश्च[3] स्कन्धास्तिस्रश्च कीकसा ग्रावस्तुतस्तिस्रश्चैव कीकसा अर्द्धं चापानश्चोन्नेतुरत ऊर्ध्वं चमसाध्वर्यूणां क्लोमाः शमयितुः, शिरः सुब्रह्मण्यस्य, यश्च सुत्यामाह्वयते तस्य चर्म तथा खलु षट्त्रिंशत्सम्पद्यन्ते षट्त्रिंशदवदाना गौः

१७—(कारवः) कृवापाजिमि० (उ० १ । १) करोतेः—उण् । कारुरहमस्मि कर्ता स्तोमानाम्—निरु० ६ । ६ स्तोतारः (नाम) प्रसिद्धौ (ऋषयः) सूक्ष्मदर्शिनः (अल्पस्वाः) अल्पधनाः (इमम्) पूर्वोक्तं स्वाहाकारम् (एकगुम्) गोस्त्रियोरुपसर्जनस्य (पा० १ । २ । ४८) गोशब्दस्य ह्रस्वः । गौर्वाङ्नाम—निघ० १ । ११ । एकवाचम् । एकपादयुक्तम् (आहरन्) आनीतवन्तः (स्वः) स्वर्गलोकम् (ययुः) जग्मुः । प्रापुः ।

---

१. पू० सं० स्वर्यायीति पाठः ॥ २. पू० सं० पक्ष इति पाठः ॥
३. पू० सं० "मणिर्जाः" इति पाठः ॥ सम्पा० ॥

षट्त्रिंशदक्षरा बृहती, बार्हतो वै स्वर्गो लोकः बृहत्या वै देवाः स्वर्गे लोके यजन्ते, बृहत्या स्वर्गे लोके प्रतितिष्ठन्ति, प्रतितिष्ठन्ति प्रजया पशुभिर्य एवं विभजन्ते। अथ यदतोऽन्यथाशीलिको वा पापकृतो वा हुतादो वाऽन्यजना वाऽपि मथ्नीरन्नेवमेवैषां पशुर्विमथितो भवत्यस्वर्ग्यो[1] देवता यो ह वा इमं[2] श्रुत ऋषिः पशोर्विभागं विदाञ्चकार, तामु ह गिरिजाय बाभ्रव्यायामन्यो मनुष्येभ्यः प्रोवाच, ततोऽ[2]यमर्वाङ् मनुष्येष्वासीदिति ब्राह्मणम् ॥ १८ ॥

कण्डिका १८ ॥ पशुरूप वेदवाणी की सूक्ष्मता का विचार ॥

(अथ अतः सवनीयस्य पशोः अवदानानि उद्धृत्य विभागं व्याख्यास्यामः) अब यहां यज्ञ योग्य पशु के खण्डों को निकाल कर विभाग की हम व्याख्या करेंगे। (सजिह्वे हनू प्रस्तोतुः) जिह्वा सहित दोनों जाबड़े प्रस्तोता [ऋत्विज्] के हैं १, (सकाकुदः कण्ठः प्रतिहर्तुः) तालु सहित कण्ठ प्रतिहर्ता का है २, (श्येनं वक्षः उद्गातुः) श्येन पक्षी के आकार वाली छाती उद्गाता की है ३, (सांसं दक्षिणं पार्श्वम् अध्वर्योः) कन्धे सहित दाहिना पांजर अध्वर्यु का है ४, (सव्यम् उपगातृणाम्) बांयां [पांजर] उपगाताओं का है ५, (सव्यः अंसः प्रतिप्रस्थातुः) बांयां कन्धा प्रतिप्रस्थाता का है ६, (दक्षिणा श्रोणिः अथ्यास्त्री ब्रह्मणः) दाहिना कूल्हा अथ्यास्त्री [??] ब्रह्मा का है ७, (अवरसक्थं ब्राह्मणाच्छंसिनः) [दाहिनी] नीचे वाली पिंडली ब्राह्मणाच्छंसी की है ८, (ऊरुः पोतुः) जांघ पोता [ऋत्विज्] की है ९, (सव्या श्रोणिः होतुः) बांयां कूल्हा होता का है १०, (अवरसक्थं मैत्रावरुणस्य) [बायीं] नीचे वाली पिंडली मैत्रावरुण [प्राण और अपान वायु के जानने वाले ऋत्विज्] की है ११, (ऊरुः अच्छावाकस्य) [बायीं] जांघ अच्छावाक की है १२, (दक्षिणा दोः नेष्टुः) दाहिना भुजदण्ड नेष्टा का है १३, (सव्या सदस्यस्य) बांयां [भुजदण्ड] सदस्य का है १४, (सदं च अनूकं च गृहपतेः) पीठ का बांस [रीढ़] और मूत्र की थैली गृहपति की है १५, १६ (जाघनी पत्न्याः तां सा ब्राह्मणेन प्रतिग्राहयति) पूंछ पत्नी की है, उसको वह ब्राह्मण [ब्रह्मज्ञानी] से स्वीकार कराती है १७, (वनिष्टुः हृदयं वृक्कौ च आङ्गुल्यानि दक्षिणः बाहुः आग्नीध्रस्य) वनिष्ठु [भीतरली मल की मोटी आंत], हृदय, दो अण्डकोश, अंगुलियों के जोड़ और दाहिनी भुजा आग्नीध्र की है १८, १९, २०, २१, २२, (सव्यः आत्रेयस्य) बायीं [भुजा] आत्रेय

१८—(सवनीयस्य) यज्ञीयस्य (उद्धृत्य) उत्+हृञ् हरणे—ल्यप्। उत्क्षिप्य (अवदानानि) खण्डनानि (श्येनम्) श्येनाकारम् (वक्षः) पचिवचिभ्यां सुट् च (उ० ४।२२०) वच व्यक्तायां वाचि—असुन्, सुट् च। उरः (पार्श्वम्) स्पृशेः श्वण्शुनौ पृ च (उ० ५।२७) स्पृश संस्पर्शने—श्वण् पृ इत्यादेशः। कक्षाधोभागः (श्रोणिः) वहिश्रिश्रुयुद्रु० (उ० ४।५१) श्रु गतौ श्रुतौ च—निः। कटेः पश्चाद्भागः। नितम्बः। (अथ्यास्त्री) ?? (अवरसक्थम्) असिसञ्जिभ्यां क्थिन्

---

१. पू० सं० 'स्वर्गो' इति पाठः ॥ २. पू० सं० "इमां, इयम्" इति पाठः ॥ सम्पा० ॥

भवन्ति, प्रातर्यावृणां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब प्रातरनुवाक [यज्ञ] को वे स्वीकार करते हैं, तब प्रातःकाल चलने वाले ही देवों देवताओं को पूजते हैं, प्रातःकाल चलने वाले देव देवता होते हैं प्रातःकाल चलने वाले देवों के सहयोग और सहवास को वे पाते हैं जो इसको स्वीकार करते हैं । ८ । (अथ यत् प्रातः सवनम् उपयन्ति तत् वसून् एव देवान् देवतां यजन्ते, वसवः देवाः देवताः भवन्ति, वसूनां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब प्रातःसवन [प्रातःकालीन यज्ञ] को स्वीकार करते हैं, तब वसु देवों ही [आठ वसु—क० ७] देवता को पूजते हैं, वसु देव देवता होते हैं, वसु देवताओं के सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । ९ । (अथ यत् माध्यन्दिनं सवनम् उपयन्ति, तत् रुद्रान् एव देवान् देवतां यजन्ते. रुद्राः देवाः देवताः भवन्ति रुद्राणां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब माध्यन्दिन सवन [दोपहर के यज्ञ] को स्वीकार करते हैं, तब रुद्र देवों ही [ग्यारह रुद्रों—क० ७] देवता को पूजते हैं रुद्र देव देवता होते हैं, रुद्र देवों के सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । १० । (अथ यत् तृतीयं सवनम् उपयन्ति, तत् आदित्यान् एव देवान् देवतां यजन्ते, आदित्याः देवाः देवताः भवन्ति, आदित्यानां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब तृतीय सवन [तीसरे पहर के यज्ञ] को स्वीकार करते हैं, तब आदित्य [बारह महीनों—क० ७] देवों देवता को ही पूजते हैं, आदित्य देव देवता हैं, आदित्य देवों के सहयोग और सहवास को वे पाते हैं जो इसको स्वीकार करते हैं । ११ । (अथ यत् अवभृथम् उपयन्ति, तत् वरुणम् एव देवं देवतां यजन्ते, वरुणः देवः देवता भवति वरुणस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब अवभृथ [यज्ञान्त स्नान] को वे स्वीकार करते हैं, तब वरुण [जल] ही देव देवता को पूजते हैं, वरुण देव देवता होता है, वरुण देव के ही सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । १२ । (अथ यत् उदयनीयया यजन्ते तत् दितिम् एव देवीं देवतां यजन्ते, अदितिः देवी देवता भवति अदित्याः [दित्याः] देव्याः सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब उदयनीया [इष्टि] से यज्ञ करते हैं । तब दिति ही [दोषखण्डक शक्ति] देवी देवता को पूजते हैं, अदिति [दिति] देवी देवता होती है, अदिति [दिति] के सहयोग और सहवास को वे पाते हैं जो इसको स्वीकार करते हैं । १३ । (अथ यत् अनूबन्धया यजन्ते तत् मित्रावरुणौ एव देवौ देवते यजतः, मित्रावरुणौ देवौ देवते भवतः, मित्रावरुणयोः देवयोः सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब अनूबन्ध्या [इष्टि] से यज्ञ करते हैं तब मित्र और वरुण ही [प्राण और अपान] देव देवता पूजे जाते हैं. मित्र और वरुण दोनों देव देवता होते हैं, मित्र और वरुण देव के सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । १४ । (अथ यत् त्वाष्ट्रेण पशुना यजन्ते, तत् त्वष्टारम् एव देवं देवतां यजन्ते, त्वष्टा देवः देवता भवति त्वष्टुः देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब त्वष्टा [सूक्ष्म बनाने वाले] को देवता मानने वाले पशु [प्राणी अर्थात् आत्मा] के साथ यज्ञ करते हैं, तब त्वष्टा ही [सूक्ष्म बनाने

वाले] देव देवता को ही पूजते हैं, त्वष्टा देव देवता होता है त्वष्टा देव के सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । १५ । (अथ यत् देविकाः हविर्भिः चरन्ति याः एताः उपसत्सुः भवन्ति, अग्निः, सोमः, विष्णुः इति देव्यः देविकाः देवताः भवन्ति, देवीनां देविकानां देवतानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जो देविकायें [व्यवहार कुशल देवियां] हवियों [ग्राह्य पदार्थों] से काम करती हैं, जो समीप बैठने वाली होती हैं, अग्नि, सोम [ऐश्वर्यवान्] विष्णु व्यापक यह देवी देविकायें देवता होती है, देवियों, देविकाओं, और देवताओं के सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । १६ । (अथ यत् दशातिरात्रम् उपयन्ति, तत् कामम् एव देवं देवतां यजन्ते कामः देवः देवता भवति, कामस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब दशातिरात्र [यज्ञ] को वे स्वीकार करते हैं, तब काम [श्रेष्ठ इच्छा] ही देव देवता को पूजते हैं, काम देव देवता होता है, काम देव के सहयोग और सहवास को पाते हैं, जो इसको स्वीकार करते हैं । १७ । (अथ यत् उदवसानीयया यजन्ते, तं स्वर्गम् एव लोकं देवं देवतां यजन्ते, स्वर्गः लोकः देवः देवता भवति, स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब उदवसानीया [उत्तम समाप्ति योग्य इष्टि] से यज्ञ करते हैं, उस स्वर्ग लोक ही देव देवता को पूजते हैं, स्वर्ग लोक देव देवता [प्रधान विषय] होता है, स्वर्ग लोक देव के सहयोग [पक्के मेल] और सहवास [एक स्थान में निवास] को वे पाते हैं जो इसको स्वीकार करते हैं ॥ १८ ॥

(तत् वै एतत् अग्निष्टोमस्य जन्म) सो यही अग्निष्टोम यज्ञ का जन्म है । (यः एवम् एतत् अग्निष्टोमस्य जन्म वेद, सः तत् अग्निष्टोमम् आप्त्वा एव स्वर्गे लोके प्रतिष्ठति) जो इस प्रकार इस अग्निष्टोम के जन्म को जानता है, वह उससे अग्निष्टोम को पाकर ही स्वर्ग लोक में ठहरता है । (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद, अग्निष्टोमेन सात्मा सलोकः भूत्वा देवान् अप्येति इति ब्राह्मणम्) वह प्रजा [संतान आदि] से और पशुओं से प्रतिष्ठा पाता है और वही अग्निष्टोम के साथ एक आत्मा वाला और एक निवास वाला होकर उत्तम गुणों को पाता है — यह ब्राह्मण [ब्रह्मज्ञान] है ॥ ८ ॥

भावार्थः—कण्डिका ७ के समान है ॥ ८ ॥

विशेषः १—इस कण्डिका का मिलान कण्डिका ७ से करो ।

२—प्रकरण मिलाने से जान पड़ता है कि [विश्वेभ्यो देवेभ्यः[1] दशरात्रं दिग्भ्यो दशरात्रिकं पृष्ठचं षडहमेभ्यो लोकेभ्यः छन्दोमत् त्र्यहं संवत्सरात् दशमहः प्रजा—] इतना विषय कण्डिका ९ के [गवायुषी] पद के पीछे का कण्डिका आठ में छप गया है । यह भूल एशियाटिक सुसैटी के पुस्तक और जीवानन्द सं. दोनों में है । हमने पुस्तक का मूल और अपना भाष्य प्रकरण के अनुसार ठीक कर दिया है ॥

---

१. यह पाठ जर्मन सं. में यथास्थान ९ वीं कण्डिका में है ॥ सम्पा० ॥

कण्डिका ९ ॥

अहोरात्राभ्यां वै देवाः प्रायणीयमतिरात्रं निरमिमत १, अर्द्धमासेभ्यश्चतुर्विंशमहः २, ब्रह्मणोऽभिप्लवं ३, क्षत्रात् पृष्ठ्यम् ४, अग्नेरभिजितम् ५, अद्भ्यः स्वरसामानः ६. सूर्य्याद्विषुवन्तम् ७ उक्ता आवृत्ताः स्वरसामानः। इन्द्राद्विश्वजितम् ८, उक्तौ पृष्ठ्याभिप्लवौ मित्रावरुणाभ्यां गवायुषी[1] ९, विश्वेभ्यो देवेभ्यः दशरात्रं १०, दिग्भ्यो दशरात्रिकं पृष्ठ्यं षडहम् ११, एभ्यो लोकेभ्यः छन्दोमत् त्र्यहं १२, संवत्सरात् दशममहः १४, प्रजा[1]पतेर्महाव्रतं १४, स्वर्गाल्लोकादुदयनीयमतिरात्रं १५, तद्वा एतत् संवत्सरस्य जन्म, स य एवमेतत् संवत्सरस्य जन्म वेद संवत्सरेण सात्मा सलोको भूत्वा देवानप्येतीति ब्राह्मणम् ॥ ९ ॥

कण्डिका ९ ॥ प्रायणीय अतिरात्रादि पन्द्रह प्रकार के यज्ञ और संवत्सर ॥

(अहोरात्राभ्यां वै देवाः प्रायणीयम् अतिरात्रं निरमिमत) दिन और रात से ही विद्वानों ने प्रायणीय [पाने योग्य] अतिरात्र [रात्रि में पूरा होने वाले यज्ञ] को बनाया। १। (अर्धमासेभ्यः चतुर्विंशम् अहः) आधे महीनों से चतुर्विंशमहः [चौबीस अवयव वाले दिन अर्थात् यज्ञ] को। २। (ब्रह्मणः अभिप्लवम्) ब्रह्मा से अभिप्लव [उछल जाना, यज्ञ] को। ३। (क्षत्रात् पृष्ठ्यम्) क्षत्रिय से पृष्ठ्य [सेचन यज्ञ] को। ४। (अग्नेः अभिजितम्) अग्नि [पराक्रम] से अभिजित् [विजय यज्ञ] को। ५। (अद्भ्यः स्वरसामानः) जल से स्वरसामों [स्वर सहित साम वाले यज्ञों] को। ६। (सूर्यात् विषुवन्तम्) सूर्य से विषुवत् [तुल्य रात्रि दिन के काल, अर्थात् ग्रीष्म विषुवत् और हेमन्त विषुवत् वाले यज्ञ] को। ७। (आवृत्ताः स्वरसामानः उक्ताः) बार बार आने वाले स्वरसाम यज्ञ कहे गये। (इन्द्रात् विश्वजितम्) इन्द्र [ऐश्वर्यवान्] से विश्वजित् [दिग्विजय यज्ञ] को। ८। (पृष्ठ्याभिप्लवौ उक्तौ) पृष्ठ्य और अभिप्लव यज्ञ कहे गये। (मित्रावरुणाभ्यां गवायुषी) मित्र और वरुण [प्राण और अपान] से गवायुषी [गौ विद्या वा पृथिवी और आयु अर्थात् जीवन दो यज्ञों] को। ९। (विश्वेभ्यः देवेभ्यः दाशरात्रम्) विश्वे देवाओं [सब दिव्य गुणों] से दशरात्र [दशरात्रि यज्ञ] को। १०। (दिग्भ्यः दशरात्रिकं पृष्ठ्यं षडहम्) दिशाओं से दशरात्रिक पृष्ठ्य षडह को। ११। (एभ्यः लोकेभ्यः छन्दोमत् त्र्यहम्) इन लोकों से छन्दोमत् त्र्यह [छन्दयुक्त तीन दिन वाले यज्ञ] को। १२। (संवत्सरात् दशम् अहः) संवत्सर [वर्ष] से दशम अहः [दसवें दिन वाले यज्ञ] को। १३। (प्रजापतेः महाव्रतम्) प्रजापति [पुरुष] से महाव्रत [उत्तम नियम] को। १४। (स्वर्गात् लोकात् उदयनीयम्

९—(अतिरात्रम्) अतिक्रान्तो रात्रिम्, अच् समासान्तः। यज्ञविशेषम् (क्षत्रात्) क्षत्रियात् (पृष्ठ्यम्) तिथपृष्ठगूथ० (उ० २। १२) पृषु सेचने—थक्। पृष्ठादुपसङ्ख्यानम् (वा० पा० ४। २। ४२) पृष्ठ—यत्। सेचनम्। (स्वरसामानः) आर्षी प्रथमा द्वितीयार्थे। स्वरसाम्नः। स्वरसहितसामवतो यज्ञान् (विषुवन्तम्) तुल्यरात्रिदिनकालवन्तं यज्ञम् (आवृत्ताः) अभ्यस्ताः (मित्रावरुणाभ्याम्) प्राणापानाभ्याम् (गवायुषी) गौश्च आयुश्च। यज्ञविशेषम्

---

१. यहाँ देखें १९० पृ० की टिप्पणी ॥ सम्पा० ॥

अतिरात्रम्) स्वर्ग लोक से उदयनीय अतिरात्र [उत्तमता से पाने योग्य रात्रि में पूरे होने वाले यज्ञ] को [बनाया] । १५ । (तत् वै एतत् संवत्सरस्य जन्म) सो यही संवत्सर यज्ञ का जन्म है । (यः एवम् एतत् संवत्सरस्य जन्म वेद सः संवत्सरेण सात्मा सलोकः भूत्वा देवम् अप्येति इति ब्राह्मणम्) जो इस प्रकार संवत्सर के जन्म को जानता है, वह संवत्सर से समान आत्मा वाला और सामान लोक वाला होकर उत्तम गुण पाता है—यह ब्राह्मण [ब्राह्मज्ञान] है ॥ ९ ॥

भावार्थः—जो मनुष्य संवत्सर [काल] यज्ञ के विविध अङ्गों को जानकर उनका ठीक प्रयोग करता है, वह संवत्सर [काल] के समान विजयी होता है ॥ ९ ॥

विशेषः—इस कण्डिका संशोधन के विषय में क० ८२ देखो ॥

कण्डिका १० ॥

अथ यत् प्रायणीयमतिरात्रमुपयन्त्यहोरात्रावेव तद्देवौ देवते यजतोऽहोरात्रौ देवौ देवते भवतोऽहोरात्रयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १ । अथ यच्चतुर्विंशमहरुपयन्त्यर्द्धमासानेव तद्देवां देवतां यजन्तेऽर्द्धमासा देवा देवता भवन्त्यर्द्धमासानां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । २ । अथ यदभिप्लवमुपयन्ति ब्रह्माणमेव तत् देवं देवतां यजन्ते ब्रह्मा देवो देवता भवति ब्रह्मणो देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ३ । अथ यत् पृष्ठचमुपयन्ति क्षत्रमेव तत् देवं देवतां यजन्ते क्षत्रं देवो देवता भवति क्षत्रस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ४ । अथ यदभिजितमुपयन्त्यग्निमेव तत् देवं देवतां यजन्तेऽग्निर्देवो देवता भवत्यग्नेर्देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ५ । अथ यत् स्वरसाम्न उपयन्त्यप एव तत् देवीर्देवता यजन्ते आपो देव्यो देवता भवन्त्यपां देवीनां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ६ । अथ यद्विषुवन्तमुपयन्ति सूर्य्यमेव तत् देवं देवतां यजन्ते सूर्य्यो देवो देवता भवति सूर्य्यस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ७ । उक्ता आवृत्ताः स्वरसामानः । अथ यद्विश्वजितमुपयन्तीन्द्रमेव तत् देवं देवतां यजन्ते इन्द्रो देवो देवता भवतीन्द्रस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ८ । उक्तौ पृष्ठ्याभिप्लवौ । अथ यद् गवायुषी उपयन्ति मित्रावरुणावेव तत् देवौ देवते यजतो मित्रावरुणौ देवौ देवते भवतो मित्रावरुणयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ९ । अथ यद् दशरात्रमुपयन्ति विश्वानेव तद् देवान् देवतां यजन्ते विश्वेदेवा देवता भवन्ति विश्वेषां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १० । अथ यद् दाशरात्रिकं पृष्ठ्यं षडहमुपयन्ति दिश एव तत् देवीर्देवता यजन्ते दिशो देव्यो देवता भवन्ति दिशां देवीनां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ११ । अथ यच्छन्दोमत्र्यहमुपयन्तीमानेव तल्लोकां देवान् देवतां यजन्त इमे लोका देवा

(संवत्सरात्) सम्पूर्वाच्चित् (उ० ३ । ७२) सम् + वस निवासे—सरन् चित् । संवत्सरः संवसन्तेऽस्मिन् भूतानि - निरु० ४ । २७ । द्वादशमासात्मकात् कालात् । समयात् ॥

देवता भवन्ति एषां लोकानां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १२ । अथ यद् दशममहरुपयन्ति संवत्सरमेव तद् देवं देवतां यजन्ते संवत्सरो देवो देवता भवति संवत्सरस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १३ । अथ यन्महाव्रतमुपयन्ति प्रजापतिमेव तद् देवं देवतां यजन्ते प्रजापतिर्देवो देवता भवति प्रजापतेर्देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १४ । अथ यदुदयनीयमतिरात्रमुपयन्ति स्वर्गमेव तल्लोकं देवं देवतां यजन्ते स्वर्गो लोको देवो देवता भवति स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १५ । तद् वा एतत्संवत्सरस्य जन्म, स य एवमेतत्संवत्सरस्य जन्म वेदाप्त्वैतःसंवत्सरं स्वर्गे लोके प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद संवत्सरेण सात्मा सलोको भूत्वा देवाँ अप्येतीति ब्राह्मणम् ॥ १० ॥

कण्डिका १० ॥ प्रायणीय अतिरात्र आदि पन्द्रह प्रकार के यज्ञ और उनके फल और संवत्सर का जन्म ॥

(अथ यत् प्रायणीयम् अतिरात्रम् उपयन्ति तत् अहोरात्रौ एव देवौ देवते यजतः अहोरात्रौ देवौ देवते भवतः अहोरात्रयोः देवयोः सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब प्रायणीय अतिरात्र [यज्ञ क० ९] को स्वीकार करते हैं तब दिन और रात ही दोनों देव देवता पुजे जाते हैं, दिन और रात दोनों देव देवता [मुख्य विषय] होते हैं, दिन और रात दोनों देवों के सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । १ । (अथ यत् चतुर्विंशम् अहः उपयन्ति तत् अर्धमासान् एव देवान् देवतां यजन्ते, अर्द्धमासाः देवाः देवताः भवन्ति, अर्द्धमासानां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब चतुर्विंश अहः [यज्ञ] को स्वीकार करते हैं, तब आधे-आधे महीनों देवों देवता को ही पूजते हैं, आधे-आधे महीने देव देवता होते हैं, आधे-आधे महीनों देवों के सहयोग और सहवास वे पाते हैं जो इसको स्वीकार करते हैं । २ । (अथ यत् अभिप्लवम् उपयन्ति तत् ब्रह्माणम् एव देवं देवतां यजन्ते, ब्रह्मा देवः देवता भवति ब्रह्मणः देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब अभिप्लव को स्वीकार करते हैं, तब ब्रह्मा ही देव देवता को पूजते हैं, ब्रह्मा देव देवता होता है, ब्रह्मा देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ३ । (अथ यत् पृष्ठ्यम् उपयन्ति तत् क्षत्रम् एव देवं देवतां यजन्ते क्षत्रं देवः देवता भवति, क्षत्रस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब पृष्ठ्य यज्ञ को स्वीकार करते हैं, तब क्षत्रिय ही देव देवता को पूजते हैं, क्षत्रिय देव देवता होता है, क्षत्रिय देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ४ । (अथ यत् अभिजितम् उपयन्ति तत् अग्निम् एव देवं देवतां यजन्ते अग्निः देवः देवता भवति अग्नेः देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब अभिजित् यज्ञ को स्वीकार करते हैं, तब अग्नि ही देव देवता को पूजते हैं, अग्नि देव

१०—(यजतः) पूज्येते । अन्यद् व्याख्यातम् क० ८, ९ ॥

देवता होता है, अग्नि देव का सहयोग और सहवास वे पाते हैं जो इसे पूजते हैं । ५ । (**अथ यत् स्वरसाम्न: उपयन्ति, तत् अप: एव देवी: देवता: यजन्ते, आप: देव्य: देवता: भवन्ति अपां देवीनां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति**) फिर जब स्वर-साम यज्ञों को स्वीकार करते हैं, तब जल ही देव देवता को पूजते हैं, जल देव देवता होता है, जल देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ६ । (**अथ यत् विषुवन्तम् उपयन्ति तत् सूर्य्यम् एव देवं देवतां यजन्ते, सूर्य: देव: देवता भवति सूर्य्यस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति**) फिर जब विषु-वत् [ग्रीष्म और शीत में तुल्य दिन रात वाले यज्ञ] को स्वीकार करते हैं तब सूर्य ही देव देवता को पूजते हैं, सूर्य देव देवता होता है, सूर्यदेव का सहयोग और सहवास वे पाते हैं, जो इसे स्वीकार करते हैं । ७ । (**आवृता: स्वरसामान: उक्ता:**) बार बार आने वाले स्वरसाम कहे गये । (**अथ यत् विश्वजितम् उपयन्ति तत् इन्द्रम् एव देवं देवतां यजन्ते, इन्द्र: देव: देवता भवति, इन्द्रस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति**) फिर जब विश्वजित् यज्ञ को स्वीकार करते हैं तब इन्द्र [ऐश्वर्य-वान्] ही देव देवता को पूजते हैं, इन्द्र देव देवता होता है, इन्द्र देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ८ । (**पृष्ठ्याभिप्लवौ उक्तौ**) पृष्ठ्य और अभिप्लव यज्ञ दोनों कहे गये । (**अथ यत् गवायुषीं उपयन्ति तत् मित्रावरुणौ एव देवौ देवते यजत: मित्रावरुणौ देवौ देवते भवत: मित्रावरुणयो: देवयो: सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति**) फिर जब गवायुषी [गौ विद्या वा पृथिवी और आयु अर्थात् जीवन वाले दो यज्ञों] को स्वीकार करते हैं, तब मित्र और वरुण [प्राण और अपान] दोनों देव देवता पूजे जाते हैं, मित्र और वरुण दोनों देव देवता होते हैं, मित्र और वरुण देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ९ । (**अथ यत् दशरात्रम् उपयन्ति, तत् विश्वान् एव देवान् देवतां यजन्ते, विश्वेदेवा: देवता: भवन्ति विश्वेषां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति**) फिर जब दशरात्रि यज्ञ को स्वीकार करते हैं, तब सब ही देवों देवता को पूजते हैं सब ही देव देवता होते हैं, सब ही देवों का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । १० । (**अथ यत् दाशरात्रिकं पृष्ठ्यं षडहम् उपयन्ति तत् दिश: एव देवी: देवता: यजन्ते दिश: देव्य: देवता: भवन्ति, दिशां देवीनां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति**) फिर जब दाशरात्रिक पृष्ठ्य षडह [छह दिन वाले यज्ञ] को स्वीकार करते हैं तब दिशा ही देवियों देवता को पूजते हैं दिशा देवियां देवता होती हैं, दिशा देवियों का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ११ । (**अथ यत् छन्दोमत्र्यहम् उपयन्ति तत् इमान् एव लोकान् देवान् देवतां यजन्ते इमे लोका: देवा: देवता: भवन्ति एषां लोकानां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति**) फिर जब छन्दोमत् त्र्यह [छन्दयुक्त तीन दिन वाले यज्ञ] को स्वीकार करते हैं, तब इन ही लोकों देवों देवता को पूजते हैं, यह लोक देव देवता होते हैं इन दिव्य लोकों का सहयोग और सहवास वे पाते हैं, जो इसे स्वीकार करते हैं । १२ । (**अथ यत् दशमम् अह: उपयन्ति तत् संवत्सरम्**

एव देवं देवतां यजन्ते, संवत्सरः देवः देवता भवति, संवत्सरस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब दशम अहः [दसवें दिन वाले यज्ञ] को स्वीकार करते हैं, तब संवत्सर ही देव देवता को पूजते हैं, संवत्सर देव देवता होता है, संवत्सर देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं। १३। (अथ यत् महाव्रतम् उपयन्ति तत् प्रजापतिम् एव देवं देवतां यजन्ते, प्रजापतिः देवः देवता भवति, प्रजापतेः देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब महाव्रत यज्ञ को स्वीकार करते हैं तब प्रजापति ही देव देवता को पूजते हैं, प्रजापति देव देवता होता है, प्रजापति देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं। १४। (अथ यत् उदयनीयम् अतिरात्रम् उपयन्ति तत् स्वर्गम् एव लोकम् देवं देवतां यजन्ते, स्वर्गः लोकः देवः देवता भवति, स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब उदयनीय अतिरात्र यज्ञ को स्वीकार करते हैं तब स्वर्ग ही लोक देव देवता को पूजते हैं, स्वर्ग लोक देव देवता होता है स्वर्ग लोक देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं। १५। (तत् वै एतत् संवत्सरस्य जन्म) सो यही संवत्सर का जन्म है। (यः एवं संवत्सरस्य जन्म वेद सः एतत् संवत्सरम् आप्त्वा स्वर्गे लोके प्रतिष्ठति) जो इस प्रकार संवत्सर के इस जन्म को जानता है, वह इस संवत्सर को पाकर स्वर्ग-लोक में ठहरता है। (प्रजया पशुभिः प्रतितिष्ठति, यः एवं वेद, संवत्सरेण सात्मा सलोकः भूत्वा देवान् अप्येति इति ब्राह्मणम्) वह प्रजा [संतानादि] से और पशुओं से प्रतिष्ठा पाता है जो ऐसा जानता है, और संवत्सर के साथ एक आत्मा वाला और एक लोक वाला होकर दिव्य गुणों को पाता है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १०।

भावार्थः—यहां संवत्सर यज्ञ का विशेष वर्णन है, भावार्थ कण्डिका ९ के समान है ॥ १०॥

विशेषः—इस कण्डिका का मिलान क० ७। ८। ९ से करो ॥

कण्डिका ११ ॥

स वा एष संवत्सरोऽधिदैवं चाध्यात्मं च प्रतिष्ठितः स य एवमेतत् संवत्सरमधिदैवं चाध्यात्मं च प्रतिष्ठितं वेद प्रतिष्ठति प्रतितिष्ठति प्रजया पशु-भिर्य एवं वेद स वा एष संवत्सरः ॥ ११ ॥

कण्डिका ११ ॥ संवत्सर के ज्ञान की महिमा ॥

(सः वै एषः संवत्सरः अधिदैवं च अध्यात्मं च प्रतिष्ठितः) सो यही संवत्सर अधिदैव [मुख्य देवता] और अध्यात्म [आत्मा के अधिकार वाला ज्ञान] होकर ठहरा है। (यः एवम् एतत् संवत्सरम् अधिदैवं च अध्यात्मं च प्रतिष्ठितं वेद, सः प्रतिष्ठति) जो पुरुष इस प्रकार इस संवत्सर को अधिदैव और अध्यात्म ठहरा हुआ

जानता है वह ठहरता है। (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) वह प्रजा के साथ और पशुओं के साथ प्रतिष्ठा पाता है जो ऐसा जानता है। (सः वै एषः संवत्सरः) सो यही संवत्सर है ॥ ११ ॥

भावार्थः—मनुष्य संवत्सर [यथावत् बसाने वाले काल] को बाहिर और भीतर से ठीक ठीक काम में लाने से संसार में यश पाता है ॥ ११ ॥

कण्डिका १२ ॥

स वा एष संवत्सरो बृहतीमभिसम्पन्नो द्वावक्षरावह्नां षडहो द्वौ पृष्ठचाभिप्लवौ गवायुषी दशरात्रस्तथा खलु षट्त्रिंशत् सम्पद्यन्ते षट्त्रिंशदवदाना गौः षट्त्रिंशदक्षरा बृहती बार्हतो वै स्वर्गो लोको बृहत्या वै देवाः स्वर्गे लोके यजन्ते बृहत्या स्वर्गे लोके प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद स वा एष संवत्सरः ॥ १२ ॥

कण्डिका १२ ॥ संवत्सर की बृहती छन्द से उपमा और महिमा ॥

(सः वै एषः संवत्सरः बृहतीम् अभिसंपन्नः) सो यही संवत्सर बृहती [छन्द] से यथावत् मिला हुआ है—(द्वौ अक्षरौ अह्नां षडहः द्वौ पृष्ठचाभिप्लवौ गवायुषी दशरात्रः) दो अक्षर (अह्नाम्) बहुत दिन वाले यज्ञों में (षडहः) छह दिन वाला यज्ञ है, दो पृष्ठच और अभिप्लव तथा गवायुषी [गो और आयु यज्ञ] (दशरात्रः) दश रात्रि वाला यज्ञ है। (तथा खलु षट्त्रिंशत् सम्पद्यन्ते) इस प्रकार से ही वे छत्तीस [? ?] बनते हैं [षडह, पृष्ठच और अभिप्लव तथा गवायुषी और दशरात्र वा दाशरात्रिक पदों के लिये देखो कण्डिका ९, १०]। (षट्त्रिंशदवदाना गौः षट्त्रिंशदक्षरा बृहती) छत्तीस खण्ड वाली गौ है [और गौ के समान] छत्तीस अक्षर वाला बृहती छन्द [वेदवाणी] है। (बार्हतः वै स्वर्गः लोकः) बृहती [वेदवाणी] वाला ही स्वर्ग है। (बृहत्या वै देवाः स्वर्गे लोके यजन्ते) बृहती [वेदवाणी] के द्वारा देवता [विद्वान् लोग] स्वर्ग लोक में पूजे जाते हैं। (बृहत्याः स्वर्गे लोके प्रतिष्ठति, प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) बृहती [वेदवाणी] से स्वर्ग लोक में वह ठहरता है और प्रजा के साथ और पशुओं के साथ वह प्रतिष्ठा पाता है जो ऐसा जानता है। (सः वै एषः संवत्सरः) सो यही संवत्सर है ॥ १२ ॥

भावार्थः—वेदवाणी द्वारा संवत्सर के सुप्रयोग से मनुष्य प्रतिष्ठा पावे ॥ १२ ॥

विशेषः—इस कण्डिका का मिलान करो गो० पू० ३ । १८ तथा ४ । ९, १० ॥

१२—(अभिसंपन्नः) सम्यग् युक्तः (बृहती) वाक् । वेदवाणी छन्दोभेदः (बार्हतः) बृहती—अण् । बृहत्या वेदवाण्या सम्बद्धः ॥

कण्डिका १३ ॥

स वा एष संवत्सरस्त्रिमहाव्रतश्चतुर्विंशेन महाव्रतं विषुवति महाव्रतं महाव्रत एव महाव्रतं तं ह स्मैतमेवं विद्वांसः पूर्वे त्रिमहाव्रतमुपयन्ति ते तेजस्विन आसन् सत्यवादिनः संशितव्रता य एनमद्य तथापेयुर्यथाऽऽमपात्रमुदक आसिक्ते निर्मृज्येदेवं यजमाना निर्मृज्येरन्नुपर्य्युपयन्ति तथा हास्य सत्येन तपसा व्रतेन चाभिजितमवरुद्धं भवति य एवं वेद स वा एष संवत्सरः ॥ १३ ॥

कण्डिका १३ ॥ संवत्सर और महाव्रत ॥

(सः वै एषः संवत्सरः त्रिमहाव्रतः, चतुर्विंशेन महाव्रतम्, विषुवति महाव्रतम्, महाव्रते एव महाव्रतम्) सो यही संवत्सर [यज्ञ] तीन महाव्रत वाला है, [अर्थात्] चतुर्विंश [चौबीस पक्ष वाले] के साथ महाव्रत १, विषुवान् [तुल्य दिन रात वाले काल अर्थात् मेष तुला की सङ्क्रान्ति के काल] में महाव्रत २, महाव्रत में महाव्रत ३ । (तं ह एतं त्रिमहाव्रतम् एवं पूर्वे विद्वांसः उपयन्ति स्म, ते तेजस्विनः सत्यवादिनः संशितव्रताः आसन्) उस ही तीन महाव्रत वाले [संवत्सर] को इस प्रकार पहिले विद्वानों ने स्वीकार किया, वे तेजस्वी, सत्यवादी, व्रत पूरे करने वाले हुये । (ये एनं अद्य तथा अपेयुः यथा आमपात्रम् उदके आसिक्ते निर्मृज्येत् एवं यजमानाः निमृज्येरन्) जो [याजक] इस [संवत्सर] को आज इस प्रकार नष्ट कर देवें, जैसे कच्चा [मिट्टी का] पात्र जल भर जाने पर घुल जावे, वैसे ही [उन मूर्ख याजकों द्वारा] यजमान घुल जावें । (उपरि उपयन्ति तथा ह सत्येन तपसा व्रतेन च अस्य अभिजितम् अवरुद्धं भवति, यः एवं वेद) वे [उस को] ऊपर [वर्तमान होता हुआ] स्वीकार करते हैं और भी सत्यभाषण से, [ब्रह्मचर्य्यादि] तप से, और अग्निहोत्र आदि व्रत से उस का अभिजित् [सब ओर से जीतने वाला यज्ञ] प्राप्त हो जाता है जो इस प्रकार जानता है । (सः वै एषः संवत्सरः) सो यही संवत्सर [यज्ञ] है ॥ १३ ॥

भावार्थः—विद्वान् कर्मकुशल याजकों द्वारा ही यजमानों का यज्ञ सिद्ध होता है ॥१३॥

कण्डिका १४ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूत्यं भवतीति यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवात् पृष्ठचो निर्मितः, पृष्ठचादभिजित् , अभिजितः स्वरसामानः, स्वरसामभ्यो विषुवान्, विषुवतः स्वरसामानः, स्वरसामभ्यो विश्वजित्, विश्वजितः पृष्ठचाभिप्लवौ, पृष्ठचा-

---

१३– (त्रिमहाव्रतः) त्रीणि महाव्रतानि यस्मिन् स तथाभूतः (उपयन्ति स्म) स्वीकृतवन्तः (संशितव्रताः) सम्यक्सम्पादितव्रताः (अद्य) अस्मिन् दिने । इदानीम् (अपेयुः) अप—इयुः । नाशयेयुः (आमपात्रम्) अपक्वपात्रम् (आसिक्ते) समन्तात् सिञ्चिते (निर्मृज्येत्) शोधनेन नश्येत् (निर्मृज्येरन्) नश्येयुः (अवरुद्धम्) लब्धम् ॥

भिप्लवाभ्यां गवायुषी गवायुर्भ्यां दशरात्रः, दशरात्रात्[1] महाव्रतं 'महाव्रतादुद[1]-यनीयोऽतिरात्र उदयनीयोऽतिरात्रः स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै य एवं वेद स वा एष संवत्सरः ॥ १४ ॥

कण्डिका १४ ॥ संवत्सर और महाव्रत यज्ञ के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अहः उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात्, कथम् अनाकूत्यै भवति इति) फिर जब चतुर्विंश अहः [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् को न स्वीकार करके महाव्रत को स्वीकार करे, कैसे वह [यजमान] अयोग्य संकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रम् विषुवतः पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं, उस से [वह अयोग्य संकल्प के लिये होता है] ऐसा कहे। (अभिप्लवात् पृष्ठ्यः निर्मितः) [क्योंकि] अभिप्लव [यज्ञ] से पृष्ठ्य [यज्ञ] बनाया गया है १, (पृष्ठ्यात् अभिजित्) पृष्ठ्य से अभिजित् [सब ओर से जीतने वाला यज्ञ] २, (अभिजितः स्वरसामानः) अभिजित् से स्वरसाम ३, (स्वरसामभ्यः विषुवान्) स्वरसामों से विषुवान् [ग्रीष्म और शीत के तुल्य दिन रात्रि वाले काल में यज्ञ] ४, (विषुवतः स्वरसामानः) विषुवान् से स्वरसाम ५, (स्वरसामभ्यः विश्वजित्) स्वरसामों से विश्वजित् ६, (विश्वजितः पृष्ठ्याभिप्लवौ) विश्वजित् से पृष्ठ्य और अभिप्लव ७, (पृष्ठ्याभिप्लवाभ्यां गवायुषी) पृष्ठ्य और अभिप्लव से गवायुषी [कण्डिका ९] ८, (गवायुर्भ्यां दशरात्रः) दोनों गवायु [गौ और आयु] से दशरात्र ९, (दशरात्रात् महाव्रतम्) दशरात्र से महाव्रत १०, (महाव्रतात् उदयनीयः अतिरात्रः) महाव्रत से उदयनीय अतिरात्र [बनाया गया है] ११। (उदयनीयः अतिरात्रः [अस्य] स्वर्गाय लोकाय अन्नाद्याय प्रतिष्ठित्यै, यः एवं वेद) उदयनीय अतिरात्र [उसके] स्वर्ग लोक के लिये, भोजन योग्य अन्न के लिये और प्रतिष्ठा के लिये होता है, जो ऐसा जानता है। (सः वै एषः संवत्सरः) सो यही संवत्सर है ॥१४॥

विशेषः—इस कण्डिका के साथ देखो कण्डिका १७ तथा २२ ॥

कण्डिका १५ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूत्यै भवतीति यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवात् पृष्ठ्यो निर्मितः, पृष्ठ्यादभिजित्, अभिजितः स्वरसामानः, स्वरसामभ्यो विषुवान्, विषुवतः स्वरसामानः, स्वर ामभ्यो विश्वजित्, विश्वजितः पृष्ठ्याभिप्लवौ, पृष्ठ्याभिप्लवाभ्यां गवायुषी, गवायुर्भ्यां दशरात्रोऽथ ह देवेभ्यो महाव्रतं न तस्थे

१४—(उपेत्य) स्वीकृत्य (अनुपेत्य) अस्वीकृत्य (अनाकूत्यै) नञ्+आ+कू शब्दे—क्तिन् । अयोग्यसंकल्पाय ।

---

१. पू. सं. "दशरात्राय, 'उदयनीयाय', अतिरात्राय" इति पाठः ॥ सम्पा० ॥

कथमूद्र्ध्वैः स्तोमैर्विषुवन्तमुपागातां वृत्तैर्मामिति ते देवाः इह सामिवासुरुप तं यज्ञक्रतुं जानीमो य ऊद्र्ध्वस्तोमो येनैतदहरवाप्नुयामेति तत एतं द्वादशरात्रमूद्र्ध्वस्तोमं ददृशुस्तमाहरंस्तेनायजन्त तत एभ्योऽतिष्ठंस्तिष्ठति हास्मै महाव्रतं प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद स वा एष संवत्सरः ॥१५॥

कण्डिका १५ ॥ संवत्सर और महाव्रत के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अहः उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात्, कथम् अनाकूत्यै भवति इति) फिर जब चतुर्विंश अह [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् को न स्वीकार करके महाव्रत को स्वीकार करे, कैसे वह [यजमान] अयोग्य संकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रं विषुवतः पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं उससे [वह अयोग्य संकल्प के लिये होता है] ऐसा कहे। (अभिप्लवात् पृष्ठ्यः निर्मितः) [क्योंकि] अभिप्लव [यज्ञ] से पृष्ठ्य [यज्ञ] बनाया गया है १, (पृष्ठ्यात् अभिजित्) पृष्ठ्य से अभिजित् २, (अभिजितः स्वरसामानः) अभिजित् से स्वरसाम ३, (स्वरसामभ्यः विषुवान्) स्वरसामों से विषुवान् [क० १४] ४, (विषुवतः स्वरसामानः) विषुवान् से स्वरसाम ५, (स्वरसामभ्यः विश्वजित्) स्वरसामों से विश्वजित् ६, (विश्वजितः पृष्ठ्याभिप्लवौ) विश्वजित् से पृष्ठ्य और अभिप्लव ७, (पृष्ठ्याभिप्लवाभ्यां गवायुषी) पृष्ठ्य और अभिप्लव से गवायुषी [क० ६] ८ (गवायुर्भ्यां दशरात्रः) दोनों गवायु से दशरात्र [बनाया गया है] ९। (अथ ह देवेभ्यः महाव्रतं न तस्थे कथम् ऊद्र्ध्वैः स्तोमैः विषुवन्तम् उपागाताम्) फिर भी देवताओं के लिये महाव्रत न ठहरा, किस प्रकार ऊद्र्ध्व स्तोमों [स्तोत्र विशेषों] से विषुवान् यज्ञ को स्वीकार करे। (वृत्तैः माम् इति ते देवाः इह सामिवासुः, तं यज्ञक्रतुम् उपजानीमः यः ऊद्र्ध्वस्तोमः, येन एतत् अहः अवाप्नुयाम इति) सच्चरित्रों से मुझको, तेरे लिये देवता [विद्वान् लोग] यहां मोक्ष विद्या में निवास करने वाले हैं, उस यज्ञ कर्म को समीप होकर हम जानें जो ऊद्र्ध्वस्तोम है और जिससे इस अह [दिन अर्थात् यज्ञ विशेष] को हम प्राप्त करें [इन ब्राह्मण वचनों से विषुवान् यज्ञ को स्वीकार करे]। (ततः एतं द्वादशरात्रम् ऊद्र्ध्वस्तोमं ददृशुः तम् आहरन् तेन अयजन्त ततः एभ्यः अतिष्ठन्) इसी से इस द्वादशरात्र उद्र्ध्वस्तोम को उन्हों [ऋषियों] ने देखा, उसे वे ले आये, उससे यज्ञ किया, उसीसे उन [देवताओं] के लिये वह [महाव्रत] ठहरा। (अस्मै ह महाव्रतं तिष्ठति प्रतिष्ठति, प्रजया पशुभिः प्रतितिष्ठति यः एवम् वेद) उस [पुरुष]

१५—(न) निषेधे (तस्थे) तस्थौ (उपागाताम्) उप + आ + गाङ् गतौ—लोट्। उपागच्छेत्। उपेयात् (वृत्तैः) वृतु वर्तने—क्तः। सच्चरित्रैः (सामिवासुः) कृवापाजिमि० (उ० १। १) साम्नि + वस निवासे—उण्, नकारलोपः। साम्निवासकः। मोक्षज्ञाने निवासशीलः (उप) उपेत्य (यज्ञक्रतुम्) यज्ञकर्म। यज्ञप्रज्ञाम् (अतिष्ठन्) अतिष्ठत् ॥

के लिये ही महाव्रत ठहरता है, महाव्रत अच्छे प्रकार ठहरता है, और वह प्रजा और पशुओं से प्रतिष्ठा पाता है जो ऐसा जानता है। (सः वै एषः संवत्सरः) वही यह संवत्सर है ॥ १५ ॥

कण्डिका १६ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूत्यै भवतीति यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयात् तदाहुः कति संवत्सरस्य पराञ्च्यहानि भवन्ति, कत्यर्वाञ्चि, तद्यानि सकृत् सकृदुपयन्ति तानि पराञ्चि, अथ यानि पुनः पुनरुपयन्ति तान्यर्वाञ्चि, इत्येवैनान्युपासीरन् षडहयोर्ह्यावृत्तिमन्वावर्त्तन्ते य एवं वेद स वा एष संवत्सर ॥ १६ ॥

कण्डिका १६ ॥ संवत्सर और महाव्रत के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अहः उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात् कथम् अनाकूत्यै भवति इति) फिर जब चतुर्विंश अह [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् को न स्वीकार करके महाव्रत को स्वीकार करे कैसे वह [यजमान] अयोग्य संकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रं विषुवतः पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं, उससे [वह अयोग्य संकल्प के लिये होता है]. ऐसा कहे। (तत् आहुः संवत्सरस्य कति पराञ्चि अहानि भवन्ति, कति अर्वाञ्चि) यह कहते हैं कि संवत्सर के कितने पराञ्चि [प्राचीन वा पुराने] दिन होते हैं और कितने अर्वाञ्चि [अर्वाचीन वा नूतन]। (तत् यानि सकृत् सकृत् उपयन्ति तानि पराञ्चि, अथ यानि पुनः पुनः उपयन्ति तानि अर्वाञ्चि इति एव एनानि उपासीरन्) [उत्तर] सो जिन को एक एक बार स्वीकार करते हैं वे पराञ्चि हैं, फिर जिन को बार २ स्वीकार करते हैं वे अर्वाञ्चि हैं, मनुष्य इनकी ही उपासना करें। (षडहयोः हि आवृत्तिम् अन्वावर्तन्ते यः एवं वेद) वह दोनों षड् अह [छह दिन वाले यज्ञों] की आवृत्ति निरन्तर करता रहे जो ऐसा जानता है, (सः वै एषः संवत्सरः) सो यही संवत्सर है ॥ १६ ॥

कण्डिका १७ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूत्यै भवतीति यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवं पुरस्तात्

१६—(कति) संख्याभेदपरिज्ञानाय प्रश्नः (पराञ्चि) पर + अञ्चु गतिपूजनयोः—क्विन्। परकालगतानि। पराचीनानि (अर्वाञ्चि) अवर + अञ्चु गतिपूजनयोः—क्विन्। पृषोदरादित्वात् अवरस्य 'अर्व' आदेशः। पश्चात्काले भवानि। अर्वाचीनानि (सकृत्) एकवारम् (आवृत्तिम्) पुनः पुनरभ्यासम् (अन्वावर्तन्ते) अनुगत्य प्रवर्तन्ते ॥

विषुवतः पूर्वमुपयन्ति पृष्ठचमुपरिष्टात् पिता वा अभिप्लवः पुत्रः पृष्ठ्यस्तस्मात्पूर्वे वयसि पुत्राः पितरमुपजीवन्ति पृष्ठ्यं पश्चाद्विषुवतः पूर्वमुपयन्ति अभिप्लवमुपरिष्टात् पिता वा अभिप्लवः पुत्रः पृष्ठ्यस्तस्मादुत्तमे वयसि पुत्रान् पितोपजीवति य एवं वेद तदप्येतदृचोक्तम् । शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरित्युप ह वा एनं पूर्वे वयसि पुत्राः पितरमुपजीवन्त्युपोतमे वयसि पुत्रान् पितोपजीवति य एवं वेद स वा एष संवत्सरः ॥ १७ ॥

कण्डिका १७ ॥ संवत्सर और महाव्रत के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अहः उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात् कथम् अनाकूत्यै भवति इति) फिर जब चतुर्विंश अहः [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् [तुल्य दिन रात वाले काल के यज्ञ] को न स्वीकार करके महाव्रत को स्वीकार करे, कैसे वह [यजमान] अयोग्य संकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रं विषुवतः पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं उस से [वह अयोग्य संकल्प के लिये होता है] ऐसा कहे। (पूर्वं अभिप्लवं विषुवतः पुरस्तात् उपयन्ति पृष्ठचम् उपरिष्टात् पिता वै अभिप्लवः पुत्रः पृष्ठचः, तस्मात् पूर्वे वयसि पुत्राः पितरम् उपजीवन्ति) पहिले अभिप्लव को विषुवान् से पहिले स्वीकार करते हैं और पृष्ठच [यज्ञ] को पीछे, पिता ही अभिप्लव और पुत्र पृष्ठच है, इसलिये पहिली अवस्था में पुत्र पिता के सहारे जीते हैं, (पूर्वं पृष्ठचं विषुवतः पश्चात् उपयन्ति अभिप्लवम् उपरिष्टात् पिता वै अभिप्लवः पुत्रः पृष्ठचः, तस्मात् उत्तमे वयसि पिता पुत्रान् उपजीवति यः एवं वेद) पहिले पृष्ठच को विषुवान् से पीछे स्वीकार करते हैं और अभिप्लव को पीछे, पिता अभिप्लव और पुत्र पृष्ठ्य है, इसलिये पिछली अवस्था में पिता पुत्रों के सहारे जीता है जो ऐसा जानता है।

(तत् अपि एतत् ऋचा उक्तम्) यही इस ऋचा करके कहा गया है। शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः, इति—ऋग्वेद १। ८९। ९॥ (अन्ति) हे जीवधारी

१७—(वयसि) अज गतिक्षेपणयोः—असुन्, वीभावः। अवस्थायाम् (उपजीवन्ति) आश्रित्य जीवन्ति (इत्) निश्चयेन (नु) शीघ्रम् एव (शरदः) शरदृतूपलक्षितान् (अन्ति) पदिप्रथिभ्यां नित् (उ० ४। १८३) अन प्राणने—तिः, नित्। सुपां सुलुक्० (पा० ७। १। ३९) जसो लुक्। हे अन्तयः। जीविताः (देवाः) विद्वांसः (नः) अस्मभ्यम् (चक्र) यूयं कृतवन्तः वा कुरुत, लोडर्थे—लिट् (जरसम्) वृद्धावस्थाम् (पितरः) पितृवद्रक्षितारः (नः) अस्माकम् (मध्या) सप्तम्या डादेशः। मध्ये (मा रीरिषत) रिष हिंसायाम् णिच्। मा हिंसीष्ट (आयुर्गन्तोः) जीवनस्य मार्गान्॥

---

१. पू. सं० 'उपजीवन्ति' इति पाठः॥ सम्पा०॥

(देवाः) विद्वानो ! (यत्र) जहाँ पर (नः) हमारे लिए (शतं शरदः) सौ वर्ष तक (इत्) निश्चय करके (नु) ही (तनूनाम्) अपने शरीरों के (जरसम्) बुढ़ापे को (चक्र) तुम व्यतीत करो, (यत्र) जहाँ पर (पुत्रासः) पुत्र लोग (पितरः) पिता [वयोवृद्ध और विद्यावृद्ध पिता के समान] (भवन्ति) होवें, [वहाँ] (नः) हमारे (आयुः) जीवन और (गन्तोः[1]) गतियों को (मध्या) बीच में (मा रीरिषत) मत नष्ट करो ॥

(पूर्वे उपवयसि पुत्राः ह वै एनं पितरम् उपजीवन्ति, उपोत्तमे वयसि पिता पुत्रान् उपजीवति यः एवं वेद) पहिली अवस्था में पुत्र निश्चय करके इस पिता के ही सहारे जीते हैं और पिछली अवस्था [संन्यास वा बुढ़ापे] में पिता पुत्रों के सहारे जीता है जो ऐसा जानता है । (सः वै एषः संवत्सरः) वही यह संवत्सर [यज्ञ] है ॥१७॥

भावार्थः—जैसे विषुवान् यज्ञ अभिप्लव और पृष्ठ्य यज्ञ से मिला होता है, वैसे ही पिता और पुत्र प्रीतिपूर्वक परस्पर रक्षा करें ॥ १७ ॥

कण्डिका १८ ॥

अथ हैष महासुपर्णस्तस्य यान् पुरस्ताद्विषुवतः षण्मासानुपयन्ति स दक्षिणः पक्षोऽथ यानावृत्तानुपरिष्टात् षडुपयन्ति स उत्तरः पक्षः आत्मा वै संवत्सरस्य विषुवानङ्गानि पक्षौ यत्र वा आत्मा तत्पक्षौ यत्र वै पक्षौ तदात्मा न वा आत्मा पक्षावतिरिच्यते[2] नो पक्षावात्मानमतिरिच्येते इत्येवमु हैव तदपरेषां स्विदितमह्नां परेषामित्यपरेषां चैव परेषां चेति ब्रूयात्स वा एष संवत्सरः ॥ १८ ॥

कण्डिका १८ ॥ संवत्सर बड़ा गरुड़, विषुवान् आत्मा और दोनों अर्धसंवत्सर दो पक्ष ॥

(अथ ह एषः महासुपर्णः,) फिर यही [संवत्सर] बड़ा गरुड़ है । (विषुवतः पुरस्तात् तस्य यान् षट् मासान् उपयन्ति सः दक्षिणः पक्षः, अथ उपरिष्टात् यान् आवृत्तान् षट् उपयन्ति सः उत्तरः पक्षः) विषुवान् से पहिले उस [संवत्सर] के जिन छः महीनों को स्वीकार करते हैं वह दक्षिण पक्ष [दाहिना पंख] है, फिर [विषुवान् से] पीछे जिन लौटते हुये छह [महीनों] को स्वीकार करते हैं वह उत्तर पक्ष [बायाँ पंख] है । (संवत्सरस्य वै आत्मा विषुवान् अङ्गानि पक्षौ) संवत्सर का ही आत्मा [देह] विषुवान् और अङ्ग दोनों पंख हैं । (यत्र वै आत्मा तत् पक्षौ, यत्र वै पक्षौ तत् आत्मा)

१८—(महासुपर्णः) महागरुडः । पक्षिराजः (आवृत्तान्) अभ्यस्तान् पुनः पुनर्वर्त्तमानान् (आत्मा) देहः । जीवः (तत्) तत्र (अतिरिच्यते) अतिरिणक्ति

---

१. पू. सं० "गतीः" इति पाठः ॥ सम्पा० ॥

२. कर्मणि प्रयोगोऽयम्, तदनुसारेण विभक्तिविपरिणामः भवितव्यः । मूलपाठोऽत्र भ्रष्टः प्रतीयते ॥ सम्पा० ॥

जहां पर ही आत्मा [देह] है वहां दोनों पंख हैं, जहां पर ही दोनों पंख हैं वहां आत्मा है। (आत्मा वै पक्षौ न अतिरिच्यते नो पक्षौ आत्मानम् अतिरिच्येते इति) आत्मा निश्चय करके दोनों पक्षों से भिन्न नहीं है और न दोनों पक्ष आत्मा से भिन्न हैं। (एवम् उ ह एव अपरेषाम् अह्नां तत् स्विदितं परेषाम् इति) इसी प्रकार से ही [विषुवान् से] इधर वाले दिनों का वह पसीना [निचोड़] है, जो उधर वालों का है। (परेषां च अपरेषां च एव इति ब्रूयात्) और [जो विषुवान् से] उधर वाले [दिनों] का [पसीना] है, वह इधर वालों का है–ऐसा कहना चाहिये। (सः वै एषः संवत्सरः) वही यह संवत्सर है ॥ १८ ॥

भावार्थः—संवत्सर में विषुवान् [तुल्य रात्रि दिन का काल] दो बार एक ग्रीष्म में और एक शीत में होता है और दोनों का काल परिणाम और प्रभाव तुल्य है, ऐसा ज्योतिष से जानना चाहिये ॥ १८ ॥

कण्डिका १९ ॥

तदाहुर्यद् द्वादश मासाः संवत्सरोऽथ हैतदहरवाप्नुयामेति यद्वैषुवतमपरेषां स्विदितमह्नां परेषामित्यपरेषां चैव परेषां चेति ब्रूयादात्मा, वै संवत्सरस्य विषुवानङ्गानि मासा यत्र वा आत्मा तदङ्गानि यत्राङ्गानि तदात्मा, न वा आत्माऽङ्गान्यतिरिच्येते नोऽङ्गान्यात्मानमतिरिच्यन्त इत्येवमु हैव तदपरेषां स्विदितमह्नां परेषामित्यपरेषां चैव परेषां चेति ब्रूयात्स वा एष संवत्सरः ॥ १९ ॥

कण्डिका १९ ॥ विषुवान् से संवत्सर के बारह महीने ॥

(तत् आहुः यत् द्वादश मासाः संवत्सरः) यह कहते हैं कि बारह महीने संवत्सर है, (अथ ह एतत् अहः अवाप्नुयाम यत् वैषुवतम् इति) अब ही हम वह दिन प्राप्त करें जो विषुवान् वाला [दिन] है, (अपरेषाम् अह्नां स्विदितं परेषाम् इति, परेषां च अपरेषां च एव इति ब्रूयात्) [विषुवान् से] इधर वाले दिनों का वह पसीना [निचोड़] है जो उधर वालों का है, और [विषुवान् से] उधर वाले [दिनों] का [पसीना] है, वह इधर वालों का है—ऐसा कहना चाहिये। (संवत्सरस्य वै आत्मा विषुवान् अङ्गानि मासाः) संवत्सर का ही आत्मा [देह] विषुवान् और अङ्ग दो महीने [= बारह महीने] हैं। (यत्र वै आत्मा तत् अङ्गानि यत्र अङ्गानि तत् आत्मा) जहां पर ही आत्मा है वहां अङ्ग हैं, जहां अङ्ग हैं वहां आत्मा है। (आत्मा वै अङ्गानि न अतिरिच्येते नो अङ्गानि आत्मानम् अतिरिच्यन्ते इति) आत्मा निश्चय करके अङ्गों से भिन्न नहीं है, न अङ्ग आत्मा से भिन्न हैं। (एवम् उ ह

इत्यर्थः। भिन्नं करोति (अतिरिच्येते) अतिरिङ्क्तः इत्यर्थः। भिन्नं कुरुतः (स्विदितम्) ञिष्विदा घर्मस्रुतौ—क्तः। स्वेदः। घर्मनिस्सरणम् ॥

१९—(अवाप्नुयाम) प्राप्नुयाम (वैषुवतम्) विषुवत्—अण्। विषुवतः सम्बद्धम्। अन्यत् पूर्ववत् ॥

एव अपरेषाम् अह्नां तत् स्विदितं परेषाम् इति) इसी प्रकार से ही [विषुवान् से] इधर वाले दिनों का वह पसीना [निचोड़] है, जो इधर वालों का है। (परेषां च अपरेषां च एव इति ब्रूयात्) और [जो विषुवान् से] उधर वाले [दिनों] का [पसीना] है, वह इधर वालों का है—ऐसा कहना चाहिये। (सः वै एषः संवत्सरः) वही यह संवत्सर है ॥ १६ ॥

भावार्थः—विषुवान् अर्थात् मेष-तुला की संक्रान्ति पर तुल्य दिन रात्रि का समय वर्ष में दो बार होता है, एक ग्रीष्म में दूसरा शीत में और दोनों छह मासों में ताप और शीत तुल्य होता है, इससे संवत्सर यज्ञ चाहे किसी विषुवान् से आरम्भ किया जावे ॥१६॥

कण्डिका २० ॥

तदाहुः कथमुभयतो ज्योतिषोऽभिप्लवा अन्यतरो ज्योतिस्पृष्ठ्य इत्युभयतो ज्योतिषो वा इमे लोका अग्निनेता आदित्येनामुत इत्येष ह वा एतेषां ज्योतिर्य एनं प्रमृदीव तपति देवचक्रे ह वा एते पृष्ठचं प्रतिष्ठिते पाप्मानं दृंहती परिप्लवेते तद्य एवं विदुषां दीक्षितानां पापकं कीर्त्तयेदेत एवास्य तद्देवचक्रे शिरश्छन्दतो दशरात्रमुद्धिः[1] पृष्ठचाभिप्लवौ चक्रे दशरात्रमुद्धिः पृष्ठचाभिप्लवौ चक्रे तन्त्रं कुर्वीतेति ह स्माह वास्युस्तयो स्तोत्राणि च शस्त्राणि च सञ्चारयेद्यः सञ्चारयेत्तस्मादिमे पुरुषे प्राणा नाना सन्त एकोदयाच्छरीरमधिवसति यन्न सञ्चारयेत् प्रमायुको ह यजमानः स्यादेष ह वै प्रमायुको योऽन्धो वा बधिरो वा न चाग्निष्टोमा मासि सम्पद्यन्ते न वै प्राणा प्राणैर्यज्ञस्तायत एकविंशतिरुक्थ्या एकोक्थ्यः षोडश्यन्नं वा उक्थ्यं वीर्य्यं षोडशैव तया रुद्वा स्वर्गं लोकमध्यारोहन्ति ॥ २० ॥

कण्डिका २० ॥ ज्योतिष्टोम आदि यज्ञों के विषय में प्रश्नोत्तर ॥

(तत् आहुः कथं ज्योतिषः उभयतः अभिप्लवौ, अन्यतरः ज्योतिः पृष्ठचः इति) यह कहते हैं कि किस प्रकार ज्योति [ज्योतिष्टोम] के दोनों ओर [आदि और अन्त में] दो अभिप्लव यज्ञ हैं, दोनों में कोई पृष्ठच ज्योतिष्टोम होता है। (ज्योतिषः उभयतः वै इमे लोकाः अग्निनेता आदित्येन अमुतः इति) [उत्तर] ज्योति [सूर्य] के दोनों ओर ही ये लोक अग्नि से चलाये गये सूर्य द्वारा उस [सूर्यलोक] से हैं। (एषः ह वै एतेषां ज्योतिः यः एनं प्रमृदी इव तपति) यही सूर्य इन [लोकों] के बीच में है जो [लोढ़ा से] पीसने वाले के समान इस [लोक] को तपाता है। (एते ह वै देवचक्रे पृष्ठचं प्रतिष्ठिते दृंहती पाप्मानं परिप्लवेते) यही दोनों देव [सूर्य और

२०—(उभयतः) उभयपार्श्वे । आद्यन्तयोः (ज्योतिषः) ज्योतिष्टोमस्य । सूर्यस्य (अग्निनेता) बहुवचनस्यैकवचनम् । अग्निर्नेता येषां ते अग्निनेतारः (अमुतः) तस्मात् । सूर्यलोकात् (प्रमृदी) प्र + मृद क्षोदे—क्विप् । इयाडियाजीकाराणामुपसंख्यानम् (वा० पा० ७ । १ । ३९) प्रथमायाः ईकारादेशः । प्रमर्दकः । प्रपेष्टा (इव) यथा (तपति) तापयति (देवचक्रे) ज्योतिश्चक्रे

---

१. पू० सं० "उद्धिम्" इति पाठः ॥ सम्पा० ॥

अग्नि] के चक्र पृष्ठच यज्ञ में स्थापित किये हुये दृढ़ होकर पाप [दोष] को चलायमान कर देते हैं। (तत् यः एवं विदुषां दीक्षितानां पापकं कीर्तयेत्, एते एव देवचक्रे तत् अस्य शिरः छन्दतः) सो जो मनुष्य इस प्रकार विद्वान् दीक्षित लोगों के पाप [दोष] बतावे, यही दोनों देवचक्र [दोनों पृष्ठ्य और अभिप्लव] तब उस [पाप] के शिर को हटा देते हैं। (दशरात्रम् उद्धिः पृष्ठचाभिप्लवौ चक्रे, [1]दशरात्रम् उद्धिः पृष्ठचाभिप्लवौ चक्रे) दशरात्र रथनाभि है और दोनों पृष्ठ्य अभिप्लव दो पहिये हैं, दशरात्र रथनाभि है और दोनों पृष्ठ्य अभिप्लव दो पहिये हैं [अर्थात् अवश्य हैं]। (वास्युस्तयः ह स्म आह तन्त्रं कुर्वीत इति स्तोत्राणि च शस्त्राणि च संचारयेत्) दोषनाशक [ब्रह्मा] ऐसा कहता है कि वह [यजमान] उपाय करे और स्तोत्रों और शस्त्रों [स्तुतिविधायक मन्त्रों और नियम विधायक मन्त्रों] को बोले। (यः सञ्चारयेत् तस्मात् पुरुषे इमे प्राणाः नाना सन्तः एकोदयात् शरीरम् अधिवसति) जो पुरुष [स्तोत्रों और शस्त्रों को] बोले उससे [उस] पुरुष में यह प्राण अनेक प्रकार होकर एक में उदय करने के कारण शरीर में टिकते हैं। (यत् न संचारयेत् यजमानः प्रमायुकः ह स्यात्) यदि वह [स्तोत्रों और शस्त्रों को] न बोले, यजमान मृतक ही हो जावे। (एषः ह वै प्रमायुकः यः अन्धः वा बधिरः वा न च अग्निष्टोमाः मासि सम्पद्यन्ते न वै प्राणाः प्राणैः यज्ञः तायते) वही मृतक है जो अन्धा वा बहिरा है और न [जिस करके] अग्निष्टोम महीने में किये जाते हैं और न प्राण प्राणों के साथ [किये जाते हैं और न दूसरा] यज्ञ फैलाया जाता है। (एकविंशतिः उक्थ्याः) इक्कीस उक्थ्य [यज्ञ विशेष] हैं। (एकोक्थ्यः षोडशी, अन्नं वै उक्थ्यं वीर्यं षोडश एव) एक उक्थ्य षोडशी [सोलह मन्त्र वाला] है अन्न ही उक्थ्य सम्बन्ध वाला सामर्थ्य षोडश [सोलह प्रकार] है, [वे सोलह यह हैं—चार वर्ण, चार आश्रम, श्रवण,

---

(पाप्मानम्) पापम्। दोषम् (दृंहती) दृहि वृद्धौ—शतृः। वर्धमाना। दृढा (छन्दतः) छदि संवरणे—लट्। अपवारयतः। नाशयतः (उद्धिः) उपसर्गे घोः किः (पा० ३।३।९२) उत्+डुधाञ् धारणपोषणयोः—किः, प्रधिः। रथनाभिः (चक्रे) रथचक्रद्वयं यथा (तन्त्रम्) उपायम्। यज्ञकार्यम् (वास्युस्तयः) वसिवपियजि० (उ० ४। १२५) वस वधे—इञ्। वलिमलितनिभ्यः कयन् (उ० ४। ९९) वासि+वस्त वधे—कयन्, कित्त्वात् संप्रसारणम्। वासीनां हिंसकानाम् उस्तयो हिंसकः। दोषनाशकः (शस्त्राणि) नियमान्। स्तोत्रविशेषान् (सञ्चारयेत्) सम्यक् चालयेत्। उच्चारयेत् (एकोदयात्) एकस्मिन् देहे उद्गमनात् (अधिवसति) निवसन्ति (प्रमायुकः) लषपतपदस्था० (पा० ३।२।१५४) प्र+मीञ् हिंसायाम्–उकञ्। युक् च मृतकः (षोडशी) षोडश–इनिः। षोडशमन्त्रोपेतः (षोडश) षोडशन्—डट् ततः अर्शादिअच्। विभक्तेर्लुक्। षोडशम्। षोडशावयव-

---

१. यहाँ "दशरात्रम् उद्धि पृष्ठचाभिप्लवौ चक्रे" यह दुबारा पढ़ा हुआ पाठ अपपाठ रूप ही प्रतीत होता है ॥ सम्पा० ॥

मनन, निदिध्यासन=तीन कर्म, अप्राप्त की इच्छा, प्राप्त की रक्षा, रक्षित का बढ़ाना, बढ़े हुये का अच्छे मार्ग में—व्यय करना, और सोलहवाँ मोक्ष का अनुष्ठान—जैसा दयानन्द भाष्य यजुर्वेद ९ । ३४ में व्याख्यात है]। (तया रूढ्वा स्वर्गं लोकम् अध्यारोहन्ति) उस [इष्टि] के द्वारा चढ़कर स्वर्ग लोक में चढ़ते हैं ॥ २० ॥

भावार्थः—सूर्यमण्डल प्रकाशपिण्ड है, उसके दोनों ओर आगे पीछे प्रकाश है, इसी प्रकार यज्ञ के दोनों ओर आदि अन्त में अभिप्लव अथवा पृष्ठय यज्ञ होता है ॥ २० ॥

कण्डिका २१ ॥

अथातोऽह्नामध्यारोहः । प्रायणीयेनातिरात्रेणोदयनीयमतिरात्रमध्यारोहन्ति, चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवं, पृष्ठ्येन परं पृष्ठ्यमभिजिता ऽभिजितं, स्वरसामभिः परान् स्वरसामानोऽथ हैतदहरवाप्नुयामेति यद्वैषुवतमपरेषां स्विदित-मह्नां परेषामित्यपरेषां च परेषां चेति ब्रूयात्स वा एष संवत्सरः ॥ २१ ॥

कण्डिका २१ ॥ संवत्सर का अतिरात्र आदिकों से संबन्ध

(अथ अतः अह्नाम् अध्यारोहः) अब यहां दिनों [यज्ञ विशेषों] का चढ़ाव [कहा जाता है]। (प्रायणीयेन अतिरात्रेण उदयनीयम् अतिरात्रम् अध्यारोहन्ति) प्रायणीय अतिरात्र [यज्ञ] से उदयनीय अतिरात्र को चढ़ते हैं, (चतुर्विंशेन महाव्रतम्) चतुर्विंश से महाव्रत को, (अभिप्लवेन परम् अभिप्लवम्) अभिप्लव से पिछले अभिप्लव को, (पृष्ठ्येन परं पृष्ठ्यम्) पृष्ठ्य से पिछले पृष्ठ्य को, (अभिजिता अभिजितम्) अभिजित् से अभिजित् को (स्वरसामभिः परान् स्वरसामानः) स्वरसामों से पिछले स्वरसामों को [चढ़ते हैं]। (अथ ह एतत् अहः अवाप्नुयाम यत् वैषुवतम् इति) अब हम ही वह दिन प्राप्त करें जो विषुवान् वाला [दिन] है, (अपरेषाम् अह्नां स्विदितं परेषाम् इति, परेषां च अपरेषां च इति ब्रूयात्) [विषुवान् से] इधर वाले दिनों का पसीना [निचोड़] है जो उधर वालों का है, और [विषुवान् से] उधर वाले [दिनों] का [पसीना] है, वह इधर वालों का है—ऐसा कहना चाहिये। (सः वै एषः संवत्सरः) वही यह संवत्सर है [देखो क० १९]॥ २१ ॥

भावार्थः—दोनों विषुवानों में से किसी ही विषुवान् से संवत्सर यज्ञ आरम्भ करना चाहिये। यह विषुवान् से एक ओर वाले यज्ञों का वर्णन है ॥ २१ ॥

युक्तम् । चत्वारो वर्णाश्चत्वारः आश्रमाः, श्रवणमनननिदिध्यासनानि त्रीणि कर्माणि, अलब्धस्य लिप्सा, लब्धस्य यत्नेन रक्षणं, रक्षितस्य वृद्धिः, वृद्धस्य सन्मार्गे व्ययीकरणम् एष चतुर्विधः पुरुषार्थः, एतैः पंचदशभिः प्राप्तः षोडशो मोक्षः—यथा व्याख्यातं दयानन्दभाष्ये यजुर्वेदे। ९ । ३४ । एतैः षोडशभिर्युक्तम् (रूढ्वा) अधिरुह्य ॥

२१—(अध्यारोहः) आरोहणम् (अध्यारोहन्ति) उपरिगच्छन्ति (परम्) पश्चाद्भवम् (स्वरसामानः) स्वरसाम्नः । यज्ञविशेषान् । अन्यद्गतम्—क० १९ ॥

कण्डिका २२ ॥

अथातोऽह्नां निवाहः[१] । प्रायणीयोऽतिरात्रश्चतुर्विंशायाह्ने निवहति, चतुर्विंश-महरभिप्लवाय, अभिप्लवः पृष्ठ्याय, पृष्ठ्योऽभिजिते, अभिजिद् स्वरसामभ्यः, स्वरसामानो विषुवते, विषुवान् स्वरसामभ्यः, स्वरसामानो विश्वजिते, विश्वजित् पृष्ठ्याभिप्लवाभ्यां, पृष्ठ्याभिप्लवौ गवायुभ्यां गवायुषी दशरात्राय, दशरात्रो महाव्रताय महाव्रतमुदयनीयायातिरात्राय, उदयनीयोऽतिरात्रः स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै य एवं वेद स वा एष संवत्सरः ॥ २२ ॥

कण्डिका २२ ॥ संवत्सर का अतिरात्र आदिकों से संबन्ध ॥

(अथ अतः अह्नां निवाहः) अब यहां दिनों [यज्ञ विशेषों] का उतार [कहा जाता है] । (प्रायणीयः अतिरात्रः चतुर्विंशाय अह्ने निवहति) प्रायणीय अतिरात्र चतुर्विंश दिन के लिये उतरता है, (चतुर्विंशम् अहः अभिप्लवाय) चतुर्विंश दिन अभिप्लव के लिये, (अभिप्लवः पृष्ठ्याय) अभिप्लव पृष्ठ्य के लिये, (पृष्ठ्यः अभिजिते) पृष्ठ्य अभिजित् के लिये, (अभिजित् स्वरसामभ्यः) अभिजित् स्वरसामों के लिये, (स्वरसामानः विषुवते) सब स्वरसाम यज्ञ विषुवान् के लिये, (विषुवान् स्वरसामभ्यः) विषुवान् स्वरसामों के लिये, (स्वरसामानः विश्वजिते) सब स्वरसाम विश्वजित् के लिये, (विश्वजित् पृष्ठ्याभिप्लवाभ्याम्) विश्वजित् पृष्ठ्य और अभिप्लव के लिये, (पृष्ठ्याभिप्लवौ गवायुर्भ्याम्) दोनों पृष्ठ्य और अभिप्लव दोनों गवायु के लिये, (गवायुषी दशरात्राय) दोनों गवायु दशरात्र के लिये, (दशरात्रः महाव्रताय) दशरात्र महाव्रत के लिये, (महाव्रतम् उदयनीयाय अतिरात्राय) महाव्रत उदयनीय अतिरात्र के लिये, (उदयनीयः अतिरात्रः स्वर्गाय लोकाय अन्नाद्याय प्रतिष्ठित्यै यः एवं वेद) उदयनीय अतिरात्र [उसके] स्वर्ग लोक के लिए, भोजन योग्य अन्न के लिये और प्रतिष्ठा के लिये [उतरता है], जो ऐसा जानता है । (सः वै एषः संवत्सरः) सो यही संवत्सर है [देखो क० १४] ॥ २२ ॥

भावार्थः—यहाँ विषुवान् के दूसरी ओर वाले यज्ञों का वर्णन है [देखो कण्डिका १४] ॥ २२ ॥

कण्डिका २३ ॥

आदित्याश्च ह वा आङ्गिरसश्च स्वर्गे लोकेऽस्पर्द्धन्त वयं पूर्वे स्वरेष्यामो वयं पूर्वं इति त आदित्या लघुभिः सामभिश्चतुर्भिस्तोमैर्द्वाभ्यां पृष्ठ्याभ्यां स्वर्गं लोकमभ्यप्लवन्त, यदभ्यप्लवन्त तस्मादभिप्लवोऽन्नश्च एवाङ्गिरसो गुरुभिः सामभिः

२२—(निवाहः) अधोगमनम् (निवहति) अधोगच्छति । अन्यद् गतम् ॥

---

१. पू. सं 'नीवाहः' इति पाठः ॥ सम्पा० ॥

सर्वैः[१] स्तोमैः सर्वैस्पृष्ठ्यैः स्वर्गं लोकमभ्यस्पृशन्त, यदभ्यस्पृशन्त तस्मात् स्पृश्यस्तं वा एतं स्पृशं सन्तं पृष्ठ्य इत्याचक्षते, परोक्षेण परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः। अभिप्लवात् पृष्ठ्यो निर्मितः, पृष्ठ्यादभिजित्, अभिजितः स्वरसामानः, स्वरसामभ्यो विषुवान्, विषुवतः स्वसामानः, स्वरसामभ्यो विश्वजिद्विश्वजितः पृष्ठ्याभिप्लवौ, पृष्ठ्याभिप्लवाभ्यां गवायुषी, गवायुभ्यां दशरात्रस्तानि ह वा एतानि यज्ञारण्यानि यज्ञकृत्तन्त्राणि तेषां शतं शतं रथानां न्यन्तरं तद्यथाऽरण्यान्यारूढा अशनापिपासे ते पाप्मानं दृंहती परिप्लवेते एवं हैवैते प्रप्लवन्ते ये विद्वांस उपयन्त्यथ ये विद्वांसमुपयन्ति तद्यथा प्रवाहात् प्रवाहं स्थलात् स्थलं समात्समं सुखात् सुखमभयादभयमुपसङ्क्रामन्तीत्येवं हैवैते संवत्सरस्योदृचं समश्नवामहा इति ब्राह्मणम् ॥ २३ ॥

कण्डिका २३ ॥ अभिप्लव और पृष्ठ्य की व्युत्पत्ति और दूसरे यज्ञ ॥

(आदित्याः च ह वै आङ्गिरसः च स्वर्गे लोके अस्पर्धन्त, वयं पूर्वे स्वः एष्यामः वयं पूर्वे इति) आदित्य [अखण्ड व्रतधारी सूक्ष्मदर्शी ऋषि] और आङ्गिरस [अङ्गों के रस जानने वाले स्थूलदर्शी ऋषि लोग] स्वर्ग लोक के विषय में झगड़ने लगे, हम पहिले स्वर्ग को जायेंगे, हम पहिले। (ते आदित्याः लघुभिः सामभिः चतुर्भिः स्तोमैः द्वाभ्यां पृष्ठचाभ्यां स्वर्गं लोकम् अभ्यप्लवन्त) आदित्य ऋषि सूक्ष्म सामों के द्वारा चार स्तोमों के द्वारा और दो पृष्ठ्यों के द्वारा स्वर्ग लोक को कूद कर पहुंचे। (यत् अभ्यप्लवन्त तस्मात् अभिप्लवः अन्नं च एव) जो वे कूद कर पहुँचे, इसी से अभिप्लव [कूदकर पहुँचने वाला यज्ञ हुआ] और वही अन्न है। (आङ्गिरसः गुरुभिः सामभिः सर्वैः स्तोमैः सर्वैः पृष्ठचैः स्वर्गं लोकम् अभ्यस्पृशन्त) आङ्गिरस ऋषि स्थूल सामों से, सब स्तोमों से सब पृष्ठ्यों से स्वर्ग लोक को छूकर पहुँचे। (यत् अभ्यस्पृशन्त तस्मात् [२]स्पृश्यः तं वै एतं स्पृशम् सन्तं पृष्ठचः इति आचक्षते) जो वे छूकर पहुँचे, इसी से स्पृश्य [छूने योग्य] हुआ, उस ही स्पृश्य [छूने योग्य] होते हुए को यह पृष्ठ्य यज्ञ है–ऐसा कहते हैं। (परोक्षेण) परोक्ष [आंख ओट प्रलय में वर्त्तमान ब्रह्म] के द्वारा (परोक्षप्रियाः इव हि) परोक्षप्रिय [आंख ओट भविष्य के प्रेमी] लोगों के समान ही (देवाः) देवता [विद्वान् लोग] (प्रत्यक्षद्विषः) प्रत्यक्ष [वर्तमान अवस्था] के द्वेषी [विरोधी] (भवन्ति) होते हैं [देखो—गो० पू० १। १]। (अभिप्लवात् पृष्ठचः निर्मितः) अभिप्लव से पृष्ठ्य बनाया गया है, (पृष्ठचात् अभिजित्) पृष्ठ्य

२३—(आदित्याः) अदिति—ण्यः। अखण्डव्रतधारिणो विद्वांसः। अथवा आङ्+दीपी दीप्तौ—यक्। पृषोदरादिरूपम्। आदीप्यमानाः। सूक्ष्मदर्शिनः (आङ्गिरसः) तं वा एतमङ्गरसं सन्तमङ्गिरा इत्याचक्षते—गो० पू०

---

१. पू. सं. 'सर्वै' इति पाठः ॥ सम्पा० ॥

२. सर्वत्र अर्थानुसारी सकारादिः पाठोऽत्रास्माभिः वर्द्धितः ॥ सम्पा० ॥

से अभिजित्, (अभिजितः स्वरसामानः) अभिजित् से स्वरसाम, (स्वरसामभ्यः विषुवान्) स्वरसामों से विषुवान् (विषुवतः स्वरसामानः) विषुवान् से स्वरसाम, (स्वरसामभ्यः विश्वजित्) स्वरसामों से विश्वजित्, (विश्वजितः पृष्ठ्याभिप्लवौ) विश्वजित् से पृष्ठ्य और अभिप्लव, (पृष्ठ्याभिप्लवाभ्यां गवायुषी) दोनों पृष्ठ्य और अभिप्लवों से दोनों गवायु, (गवायुर्भ्यां दशरात्रः) दोनों गवायु से दशरात्र [यज्ञ बनाया गया है]। (तानि ह वै एतानि यज्ञारण्यानि यज्ञकृत्तन्त्राणि) वे ही यज्ञ-रूप वन और यज्ञ करने वाले के तन्त्र [उपाय] हैं। (तेषां शतं शतं रथानां न्यन्तरम्) उन [यज्ञों] के बीच सौ सौ रथों [पगों वा मान विशेषों] का निश्चित अन्तर हो। (तत् यथा अरण्यानि आरूढाः पाप्मानं दृहती ते अशना-पिपासे परिप्लवेते एवं ह एव एते प्रप्लवन्ते ये विद्वांसः उपयन्ति, अथ ये विद्वांसम् उपयन्ति) सो जैसे वन में चढ़े हुये पुरुष कष्ट को बढ़ाती हुई उन दोनों भूख प्यास को लांघ जाते हैं, ऐसे ही यह [यजमान लोग यज्ञ को] पार करते हैं जो विद्वान् लोग [यज्ञ को] स्वीकार करते हैं और जो लोग विद्वान् को स्वीकार करते हैं। (तत् यथा प्रवाहात् प्रवाहं स्थलात् स्थलं समात् समं सुखात् सुखम् अभयात् अभयम् उपसङ्क्रामन्ति इति एवं ह एव एते संवत्सरस्य उदृचं समश्नवामहै इति ब्राह्मणम्) सो जैसे प्रवाह [जलबहाव] से प्रवाह को, स्थल [सूखे स्थान] से स्थल को, सम [एक से स्थान] से सम को, सुख से सुख को, और अभय से अभय को यथावत् पाते हैं, वैसे ही यह हम संवत्सर [यज्ञ] की समाप्ति वाली ऋचा को पावें यह ब्राह्मण [ब्रह्मज्ञान] है ॥ २३ ॥

भावार्थः—कोई विद्वान् सूक्ष्म से स्थूल की ओर चल कर अर्थात् कारण से कार्य का ज्ञान प्राप्त करके सुख पाते हैं और कोई स्थूल से सूक्ष्म की ओर जाकर अर्थात् कार्य से कारण को खोज कर आनन्द भोगते हैं ॥ २३ ॥

कण्डिका २४ ॥

प्रेदिर्ह वै कौशाम्बेयः कौसुरविन्दुरुद्दालक आरुणो ब्रह्मचर्य्यमुवाच तमाचार्य्यः पप्रच्छ कुमारः कति ते पिता संवत्सरस्याहान्यमन्यते[१]ति कति त्वेवेति दशेति होवाच दश वा इति होवाच दशाक्षरा विराड् वैराजो यज्ञः १। कति त्वेवेति नवेति होवाच नव वा इति होवाच नव वै प्राणाः प्राणैः यज्ञस्तायते २। कति त्वेवेत्यष्टेति होवाचाष्ट वा इति होवाचाष्टाक्षरा गायत्री गायत्रो यज्ञः ३। कति त्वेवेति सप्तेति होवाच सप्त वा इति होवाच सप्त छन्दांसि छन्दोभिर्यज्ञस्तायते ४। कति त्वेवेति

१।७। तदधीते तद्वेद (पा० ४।२।५९) अङ्गिरस्—अण्, बहुवचनस्यैक-वचनं च। आङ्गिरसाः। अङ्गानां रसवेत्तारः। स्थूलदर्शिनः (लघुभिः) सूक्ष्मैः (सामभिः) मोक्षज्ञानैः (स्पृश्यः) स्पृश सम्पर्के—क्यप्। (रथानाम्) चरणानाम् मानविशेषाणाम् (न्यन्तरम्) निश्चितव्यवधानम् (परिप्लवेते) परिप्लवन्ते। सर्वतः प्राप्नुवन्ति ॥

१. पू० सं० 'अमन्यथ' इति पाठः ॥ सम्पा० ॥

षडिति होवाच षड् वा इति होवाच षड् वा ऋतव ऋतूनामाप्त्यै ५। कति त्वेवेति पञ्चेति होवाच पञ्च वा इति होवाच पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः ६। कति त्वेवेति चत्वारीति होवाच चत्वारि वा इति होवाच चत्वारो वै वेदा वेदैर्यज्ञस्तायते ७। कति त्वेवेति त्रीणीति होवाच त्रीणि वा इति होवाच त्रिषवणो वै यज्ञः सवनैर्यज्ञस्तायते। ८। कति त्वेवेति द्वे इति होवाच द्वे वा इति होवाच द्विपाद्वै पुरुषो द्विप्रतिष्ठः पुरुषः पुरुषो वै यज्ञः ९। कति त्वेवेत्येकमिति होवाचैकम् वा इति होवाचाहरहरित्येकमेव सर्वं संवत्सरम् १०॥ २४॥

इत्यथर्ववेदस्य गोपथब्राह्मणपूर्वभागे चतुर्थः प्रपाठकः समाप्तः।

कण्डिका २४॥ प्रेदि कौशाम्बेय कौसुरविन्दु और उद्दालक आरुण से संवत्सर और यज्ञीय दिनों के विषय में प्रश्नोत्तर॥

(प्रेदिः ह वै कौशाम्बेयः कौसुरविन्दुः, उद्दालकः आरुणः ब्रह्मचर्यम् उवाच) प्रेदि [बड़ा ऐश्वर्यवान् ऋषि] कौशाम्बेय [कौशाम्बी अर्थात् पटना नगरी का रहने वाला], कौसुरविन्दु [भूमि के ऐश्वर्य का जानने वाला] था, [उसको] उद्दालक गो० पू० ३। ६ आरुण, [अरुण के पुत्र] ने ब्रह्मचर्य का उपदेश किया। (तम् आचार्यः पप्रच्छ कुमारः ते पिता संवत्सरस्य कति अहानि अमन्यत इति, कति तु एव इति) उस [प्रेदि] से आचार्य [उद्दालक] ने पूछा— हे कुमार! तेरा पिता संवत्सर यज्ञ के कितने दिन मानता था, फिर कितने। (दश इति ह) [प्रेदि] अरे दस। (उवाच दश वै इति ह) वह [उद्दालक] बोला—अरे दस ही। (उवाच दशाक्षरा विराट्, वैराजः यज्ञः) वह [प्रेदि] बोला—दस अक्षर वाला विराट् [छन्द] है और विराट् [अर्थात् वेद] से सिद्ध किया हुआ यज्ञ है। १। (कति तु एव इति), [उद्दालक] फिर कितने। (नव इति ह) [प्रेदि] अरे नौ। (उवाच नव वै इति ह) [उद्दालक] अरे नौ ही हैं। (उवाच नव वै प्राणाः प्राणैः यज्ञः तायते) [प्रेदि] बोला—नौ ही प्राण [सात मस्तक के दो नीचे के छिद्र] हैं, प्राणों से यज्ञ फैलाया जाता है। २। (कति तु एव इति) [उद्दालक] फिर कितने। (अष्ट इति ह) [प्रेदि] अरे आठ। (उवाच अष्ट वै इति ह) [उद्दालक] अरे आठ ही हैं। (उवाच अष्टाक्षरा गायत्री गायत्रः यज्ञः) [प्रेदि] आठ अक्षर [के पाद] वाली गायत्री है गायत्री से सिद्ध किया हुआ यज्ञ है। ३। (कति तु एव इति) [उद्दालक] फिर कितने। (सप्त इति ह) [प्रेदि] अरे सात। (उवाच सप्त वै

२४—(प्रेदिः) इगुपधात् कित् (उ० ४। १२०) प्र+इदि परमैश्वर्य्ये—इन् कित्, नलोपः। परमैश्वर्य्यवान्। ऋषिविशेषः (कौशाम्बेयः) तेन निर्वृत्तम् (पा० ४। २। ६८) कुशाम्ब—अण्। कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी। कुसुमपुरी। पाटलिपुत्रनगरी। पटना इति भाषायाम्। सोऽस्य निवासः (पा० ४। ३। ८९) कुशाम्बी—ढञ्। कौशाम्बीनिवासी (कौसुरविन्दुः) सुसूधाञ्गृधिभ्यः क्रन् (उ० २। २४) कु+षु प्रसवैश्वर्ययोः—क्रन्। कुसुरः भूमी-

इति ह) [उद्दालक] बोला अरे सात ही हैं। (उवाच सप्त छन्दांसि छन्दोभिः यज्ञः तायते) [प्रेदि] बोला—सात [गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्ति, त्रिष्टुप् और जगती] छन्द हैं, छन्दों से यज्ञ फैलाया जाता है। ४। (कति तु एव इति) [उद्दालक] फिर कितने, (षट् इति ह) [प्रेदि] अरे छह। (उवाच षट् वै इति ह) [उद्दालक] अरे छह ही हैं। (उवाच षट् वै ऋतवः ऋतूनाम् आप्त्यै) [प्रेदि] बोला—छह ही [वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त और शिशिर—साम० उ० ६ । १३ । २] ऋतु हैं, ऋतुओं के लाभ के लिये [यज्ञ है]। ५। (कति तु एव इति) [उद्दालक] फिर कितने। (पंच इति ह) [प्रेदि] अरे पांच। (उवाच पंच वै इति ह) [उद्दालक] अरे पांच ही हैं। (उवाच पंचपदा पङ्क्तिः पाङ्क्तः यज्ञः) [प्रेदि] बोला—पांच पाद वाली पङ्क्ति [पांच अक्षर के पांच पाद वाली पदपङ्क्ति अथवा आठ अक्षर के पांच पाद वाली पथ्यापङ्क्ति] है, पाङ्क्त [पङ्क्ति, वेदवाणी से सिद्ध किया हुआ] यज्ञ है। ६। (कति तु एव इति) [उद्दालक] फिर कितने। (चत्वारि इति ह) अरे चार। (उवाच चत्वारि वै इति ह) [उद्दालक] अरे चार ही हैं। (उवाच चत्वारः वै वेदाः, वेदैः यज्ञः तायते) [प्रेदि] चार ही वेद [ऋग्, यजुः, साम और अथर्व] हैं, वेदों से यज्ञ फैलाया जाता है। ७। (कति तु एव इति) [उद्दालक] फिर कितने। (त्रीणि इति ह) [प्रेदि] अरे तीन। (उवाच त्रीणि वै इति ह) [उद्दालक] अरे तीन ही हैं। (उवाच त्रिषवणः वै यज्ञः सवनैः यज्ञः तायते) [प्रेदि] बोला—[प्रातःसवन, माध्यन्दिन सवन और तृतीय सवन] तीन सवन वाला ही यज्ञ है, सवनों से यज्ञ फैलाया जाता है। ८। (कति तु एव इति) [उद्दालक] फिर कितने। (द्वे इति ह) [प्रेदि] अरे दो। (उवाच द्वे वै इति ह) [उद्दालक] बोला—अरे दो ही हैं (उवाच द्विपात् वै पुरुषः द्विप्रतिष्ठः पुरुषः पुरुषः वै यज्ञः) [प्रेदि] बोला—दो पांव वाला पुरुष है, दो [कर्म और ज्ञान] से प्रतिष्ठा किया गया पुरुष है, पुरुष ही यज्ञ है। ९। (कति तु एव इति) [उद्दालक] फिर कितने। (एकम् इति ह) [प्रेदि] अरे एक [दिन]। (उवाच एकं वै इति ह) [उद्दालक] अरे एक ही है। (उवाच अहः अहः इति एकम् एव सवं

श्वरः, ततः अण् स्वार्थे। कौसुरं भूम्यैश्वर्य्यम्। विन्दुरिच्छुः (पा० ३ । २ । १६९) विद ज्ञाने—उः, नुमागमः। भूम्यैश्वर्यस्य ज्ञाता (उद्दालकः) गो० पू० ३ । ६ । मुनिविशेषः (आरुणः) अरुण—अण्। अरुणपुत्रः (कुमारः) हे कुमार (वैराजः) विराजा निर्वृत्तः (गायत्रः) गायत्र्या निर्वृत्तः (पञ्च) सप्यशूभ्यां तुट् च (उ० १ । १५७) पचि व्यक्तीकरणे—कनिन्। संख्याविशेषः (पङ्क्तिः) पचि व्यक्तीकरणे विस्तारे—क्तिन् वा क्तिच्। अत्र तु—पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्० (पा० ५ । १ । ५९) पञ्चन्—तिप्रत्ययः, टिलोपः। पञ्चैव पङ्क्तिः। पदपङ्क्तिः पञ्च। पिङ्गलशास्त्रे ३ । ४६। पञ्चाक्षरयुक्ता पञ्चपदा पदपङ्क्तिः। अथवा पथ्यापञ्चभिर्गायत्रैः। पिङ्गल० ३ । ४८। अष्टाक्षरयुक्ता पञ्चपदा पथ्यापङ्क्तिः

संवत्सरम्) [प्रेदि] बोला—दिन दिन यह एक ही [मिलकर] पूरा संवत्सर यज्ञ है ।। १० ।। २४ ।।

भावार्थ:—मनुष्य को यज्ञ के अङ्ग उपाङ्गों के समान प्रत्येक पदार्थ के अङ्ग उपाङ्गों को जानकर कर्तव्य पूरा करना चाहिये ।। २४ ।।

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिम*श्रीसयाजीरावगायकवाड़ाधिष्ठित*बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदासत्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्ये पूर्वभागे चतुर्थः प्रपाठकः समाप्तः ।।

अयं प्रपाठकः प्रयागनगरे भाद्रपदमासे शुक्लद्वादश्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ।

मुद्रितम्—आषाढशुक्ला १२ संवत् १९८१ वि० ता० १३ जुलाई सन् १९२४ ई० ।।

अथ पञ्चमः प्रपाठकः ।

कण्डिका १ ।।

ओम् अभिप्लवः षडहः षडहानि भवन्ति ज्योतिर्गौरायुर्गौरायुर्ज्योतिः १, अभिप्लवः पञ्चाहः पञ्च ह्येवाहानि भवन्ति यद्ध्येव प्रथममहस्तदुत्तममहः २, अभिप्लवश्चतुरहश्चत्वारो हि स्तोमा भवन्ति त्रिवृत् पञ्चदशः सप्तदशैकविंश एव ३, अभिप्लवस्त्र्यहस्त्र्यहावृत्तिर्ज्योतिर्गौरायुर्गौरायुर्ज्योतिः ४ अभिप्लवो द्व्यहो द्वे ह्येव सामनी भवतो बृहद्रथन्तर एव ५, अभिप्लव एकाह एकाहस्य स्तोमैस्तायते ६, चतुर्णामुक्थ्यानां द्वादशस्तोत्राण्यतिरिच्यन्ते स सप्तमोऽग्निष्टोमस्तथा खलु सप्ताग्निष्टोमा मासि सम्पद्यन्त इति ब्राह्मणम् ।। १ ।।

कण्डिका १ ।। संवत्सर से अभिप्लव का सम्बन्ध ।।

(ओम् अभिप्लवः षडहः षट् अहानि भवन्ति ज्योतिः, गौः, आयुः, गौः, आयुः, ज्योतिः १) ओम् । अभिप्लव छह दिन वाला है, छह दिन यह होते हैं ज्योति, गौ, आयु, गौ, आयु, ज्योति । १ । (अभिप्लवः पञ्चाहः पञ्च हि एव अहानि भवन्ति यत् हि एव प्रथमम् अहः तत् उत्तमम् अहः २) अभिप्लव पांच दिन वाला है, क्योंकि पांच ही दिन होते हैं, जो ही पहिला दिन है वह ही पिछला दिन है [अर्थात् ज्योति ज्योति एक बार ही ज्योति है] । २ । (अभिप्लवः चतुरहः चत्वारः हि स्तोमाः

(पाङ्क्तः) पङ्क्ति–अण् । पञ्चावयवोपेतः (द्विप्रतिष्ठः) द्वाभ्यां कर्मज्ञानाभ्यां प्रतिष्ठितः (संवत्सरम्) संवत्सरयज्ञः ।।

१—(बृहद्रथन्तरे) सामविभागौ । पूर्वार्चिकोत्तरार्चिकौ (अतिरिच्यन्ते) अतिरिक्तानि अधिकानि भवन्ति ।।

भवन्ति त्रिवृत् पञ्चदशः सप्तदश एकविंशः एव ३) अभिप्लव चार दिन वाला है क्योंकि चार स्तोम होते हैं त्रिवृत्, पञ्चदश, सप्तदश, और एकविंश ही । ३ । (अभिप्लवः त्र्यहः त्र्यहा आवृत्तिः ज्योतिः गौः आयुः गौः आयुः ज्योतिः ४) अभिप्लव तीन दिन वाला है, तीन दिन वाली आवृत्ति [लौटा फेरी] है ज्योति, गौ, आयु गौ, आयु, ज्योति [अर्थात् दो दो बार आये हुये एक एक दिन होवें] । ४ । (अभिप्लव. द्व्यहः द्वे हि एव सामनी भवतः, बृहद्रथन्तरे एव ५) अभिप्लव दो दिन वाला है, क्योंकि दो ही साम [के विभाग] होते हैं बृहत् और रथन्तर [पूर्वार्चिक और उत्तरार्चिक] ही । ५ । (अभिप्लवः एकाहः एकाहस्य स्तोमैः तायते ६) अभिप्लव एक दिन वाला है, एक दिन वाले के स्तोमों से वह [यज्ञ] फैलाया जाता है. । ६ । (चतुर्णाम् उक्थ्यानां द्वादश स्तोत्राणि अतिरिच्यन्ते स सप्तमः अग्निष्टोमः ७) चार उक्थ्य यज्ञों में बारह स्तोत्र अधिक हो जाते हैं, वह सातवां अग्निष्टोम है । ७ । (तथा खलु सप्त अग्निष्टोमाः मासि सम्पद्यन्ते इति ब्राह्मणम् इस प्रकार ही सात अग्निष्टोम महीने में किये जाते हैं, यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १ ॥

कण्डिका २ ॥

अथातो गाधप्रतिष्ठा समुद्रं वा एते प्रतरन्ति ये संवत्सराय दीक्षन्ते तेषां तीर्थमेव प्रायणीयोऽतिरात्रस्तीर्थेन हि प्रतरन्ति तद्यथा समुद्रं तीर्थेन प्रतरेयुस्तादृक् तद्गाधप्रतिष्ठा १, चतुर्विंशमहर्यथोपकक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायेयुस्तादृक् तत्प्रस्नेयोऽभिप्लवः प्रस्नेयः पृष्ठ्यो गाधप्रतिष्ठा २, अभिजिद्यथोपकक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायेयुस्तादृक् तन्नीविदघ्न एव प्रथमः स्वरसामा जानुदघ्नो द्वितीयः कुल्युदघ्नस्तृतीयो गाधप्रतिष्ठा ३, विषुवान्यथोपकक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायेयुस्तादृक् तत्कुल्युदघ्न एव प्रथमोऽर्वाक् स्वरसामा जानुदघ्नो द्वितीयो नीविदघ्नस्तृतीयो गाधप्रतिष्ठा ४, विश्वजिद्यथोपकक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायेयुस्तादृक् तत् प्रस्नेयः पृष्ठ्यः प्रस्नेयोऽभिप्लवः प्रस्नेयी गवायुषी प्रस्नेयो दशरात्रो गाधप्रतिष्ठा ५, महाव्रतं यथोपकक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायेयुस्तादृक् तत्तेषां तीर्थमेवोदयनीयोऽतिरात्रस्तीर्थेन ह्युद्यन्ति तद्यथा समुद्रं तीर्थेनोदेयुस्तादृक् तत् ६, अथ ह स्माह श्वेतकेतुरारुणेयः संवत्सरस्यान्वहं दीक्षा इति तस्य ह पिता मुखमुदीक्ष्योवाच वेत्थ सुत त्वमायुष्मान् संवत्सरस्य गाधप्रतिष्ठे इति वेदेत्येतद्ध स्मैतद्विद्वानाहेति ब्राह्मणम् ॥ २ ॥

कण्डिका २ ॥ यज्ञों में गाधप्रतिष्ठा और तीर्थ ॥

(अथ अतः गाधप्रतिष्ठा) अब यहां गाध प्रतिष्ठा [गहराई की मर्य्यादा कही जाती है] । (समुद्रं वै एते प्रतरन्ति ये संवत्सराय दीक्षन्ते) समुद्र [यज्ञ] को वे

१ पू. सं. सर्वत्रैव "प्रश्नायेयुः" इति तालव्यः शकारः ॥ सम्पा० ॥

ही पार करते हैं जो संवत्सर के लिये दीक्षा पाते हैं। (तेषां तीर्थम् एव प्रायणीयः अतिरात्रः) उन लोगों का तीर्थ [पार होने का साधन घाट, नौका आदि] ही प्रायणीय अतिरात्र है। (तीर्थेन हि प्रतरन्ति तत् यथा समुद्रं तीर्थेन प्रतरेयुः तादृक् तत् गाधप्रतिष्ठा १) क्योंकि तीर्थ [नौका आदि] से ही पार करते हैं, सो जैसे समुद्र को तीर्थ से पार करें, वैसे ही यह गाधप्रतिष्ठा [यज्ञ] है। १। (चतुर्विंशम् अहः यथा उपकक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायेयुः तादृक् तत् प्रस्नेयः अभिप्लवः प्रस्नेयः पृष्ठ्यः गाधप्रतिष्ठा २) चतुर्विंश अहः [तीर्थ] - जैसे कांख प्रमाण वाले अथवा कण्ठ प्रमाण वाले जल में अथवा जहां ठहरें वहां स्नान करें, वैसे ही वह स्नान योग्य अभिप्लव और स्नान योग्य पृष्ठ्य गाधप्रतिष्ठा है। २। (अभिजित् यथा उपकक्षदघ्नं वा कण्ठदघ्नं वा यतः विश्रम्य प्रस्नायेयुः तादृक् तत् नीविदघ्नः एव प्रथमः स्वरसामा जानुदघ्नः द्वितीयः कुल्युदघ्नः तृतीयः दीपप्रतिष्ठा ३) अभिजित् [तीर्थ]—जैसे कांख प्रमाण वाले अथवा कण्ठ प्रमाण वाले जल में अथवा जहाँ ठहरें वहां स्नान करें, वैसे ही वह [अभिजित्] है—कटि प्रमाण वाला ही पहिला स्वरसाम, जानु प्रमाण वाला दूसरा और घुटने प्रमाण वाला तीसरा है, यह दीपप्रतिष्ठा है। ३। (विषुवान् यथा उपकक्षदघ्नं वा कण्ठदघ्नं वा यतः विश्रम्य प्रस्नायेयुः तादृक् तत् कुल्युदघ्नः एव प्रथमः अर्वाक् स्वरसामा जानुदघ्नः द्वितीयः नीविदघ्नः तृतीयः गाधप्रतिष्ठा ४) विषुवान् [तीर्थ]—कांख प्रमाण वाले अथवा कण्ठ प्रमाण वाले जल में अथवा जहां ठहरें वहाँ स्नान करें, वैसे ही वह [विषुवान्] है—घुटने प्रमाण वाला ही पहिला निकटवर्ती स्वरसाम, जंघा प्रमाण वाला दूसरा, कटि प्रमाण वाला तीसरा है—यह गाधप्रतिष्ठा है। ४। (विश्वजित् यथा उपकक्षदघ्नं वा कण्ठदघ्नं वा यतः विश्रम्य प्रस्नायेयुः तादृक् तत् प्रस्नेयः पृष्ठ्यः प्रस्नेयः अभिप्लवः प्रस्नेयी गवायुषी प्रस्नेयः दशरात्रः गाधप्रतिष्ठा ५) विश्वजित् [तीर्थ] - कांख प्रमाण वाले वा कण्ठ प्रमाण वाले जल में अथवा जहाँ ठहरें वहां स्नान करें वैसे ही वह [विश्वजित्] स्नान योग्य पृष्ठ्य, स्नान योग्य अभिप्लव, स्नान योग्य दोनों गवायु और स्नान योग्य दशरात्र है—यह गाधप्रतिष्ठा है। ५। (महाव्रतं यथा उपकक्षदघ्नं वा कण्ठदघ्नं वा यतः विश्रम्य प्रस्नायेयुः तादृक् तत् तेषां तीर्थम् एव उदयनीयः अतिरात्रः, तीर्थेन हि उद्यन्ति तत् यथा समुद्रं तीर्थेन उदेयुः तादृक् तत् ६) महाव्रत [तीर्थ]—जैसे कांख प्रमाण वाले वा कण्ठ प्रमाण वाले जल में अथवा

२—(गाधप्रतिष्ठा) तलस्पर्शमर्य्यादा (तीर्थम्) तरणसाधनम् (उपकक्षदघ्नम्) प्रमाणे द्वयसज्दघ्नञ्मात्रचः (पा० ५ । २ । ३७) इति दघ्नञ् । उपकक्षप्रमाणोपेतम् (विश्रम्य) विरम्य । विरामं कृत्वा (प्रस्नायेयुः) प्रकर्षेण स्नानं कुर्युः (प्रस्नेयः) प्र+ष्णा शौचे–यत् । स्नानयोग्यः, एवम् अग्रेऽपि । (नीविदघ्नः) कटिप्रमाणः (कुल्युदघ्नः) भुजिमृङ्भ्यां युक्त्युकौ (उ० ३ । २१) कुल संघाते बन्धे च—युक्। गुल्फोपरिभागप्रमाणः (आरुणेयः) अरुणापत्यम्

जहां ठहरें वहां स्नान करें, वैसे ही वह [महाव्रत] है—उन [याजकों] का तीर्थ ही उदयनीय अतिरात्र है; [क्योंकि] तीर्थ से ही पार होते हैं सो जैसे समुद्र को तीर्थ [नौका] से पार करें, वैसे ही वह [महाव्रत] है। ६। (अथ ह श्वेतकेतुः आरुणेयः आह स्म, संवत्सरस्य अनु अहं दीक्षै इति) फिर ही श्वेतकेतु [श्वेत पताका वाला] अरुण का पुत्र बोला—संवत्सर के अनुकूल हो कर मैं दीक्षा लूं। (तस्य ह पिता मुखम् उदीक्ष्य उवाच आयुष्मान् त्वं सुत संवत्सरस्य गाधप्रतिष्ठे वेत्थ इति) उसका पिता मुख देख कर बोला—बड़ी आयु वाला तू हे पुत्र ! संवत्सर [यज्ञ] की गाधप्रतिष्ठा [गहराई और मर्यादा] जानता है। (वेद इति) [पुत्र बोला] मैं जानता हूँ। (एतत् ह स्म एतत् विद्वान् आह इति ब्राह्मणम्) यही निश्चय करके, यही विद्वान् कहता है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ २ ॥

कण्डिका ३ ॥

पुरुषो वाव संवत्सरस्तस्य पादावेव प्रायणीयोऽतिरात्रः पादाभ्यां हि प्रयन्ति तयोर्यच्छुक्लं तदह्नो रूपं यत् कृष्णं तद्रात्रेर्नखानि नक्षत्राणां रूपं लोमान्योषधिवनस्पतीनामूरू चतुर्विंशमहरुरोऽभिप्लवं पृष्ठ्यं पृष्ठ्यः शिर एव त्रिवृत् त्रिवृतं ह्येव शिरो भवति त्वगस्थिमज्जामस्तिष्कं ग्रीवाः पञ्चदशश्चतुर्दश ह्येवैतस्यां कराणि भवन्ति वीर्य्यं पञ्चदशं तस्मादियमाभिरण्वीभिः सतीभिर्गुरुं भारं हरति तस्माद् ग्रीवाः पञ्चदश उरः सप्तदशौष्ठावन्ये यत्र वौष्ठावन्य उरः सप्तदशं तस्मादुरः सप्तदश उदरमेकविंशो विंशतिर्ह्येवैतस्यान्तर उदरे उत्तापानि भवन्त्युदरमेकविंशं तस्मादुदरमेकविंश. पार्श्वे त्रिणवस्त्रयोदशान्याः पर्शवोऽन्याः पार्श्वे त्रिणवस्तस्मात् पार्श्वे त्रिणवोऽनूकं त्रयस्त्रिंशो द्वात्रिंशतिर्ह्येवैतस्यां पृष्ठी कुण्डी उलानि भवन्त्यनूकं त्रयस्त्रिंशस्तस्मादनूकं त्रयस्त्रिंशस्तस्यायमेव दक्षिणो बाहुरभिजित्तस्येमे दक्षिणे त्रयः प्राणाः स्वरसामान आत्मा विषुवांस्तस्येमे सव्ये त्रयः प्राणा अर्वाक् स्वरसामानस्तस्यायं सव्यो बाहुर्विश्वजिदुक्तौ पृष्ठ्याभिप्लवौ यावर्वाञ्चौ प्राणौ तौ गवायुषी अङ्गानि दशरात्रो मुखं महाव्रतं तस्य हस्तावेवोदयनीयोऽतिरात्रो हस्ताभ्यां ह्युद्यन्ति य एवं वेद [1]स वा एष संवत्सरः ॥ ३ ॥

कण्डिका ३ ॥ मनुष्य शरीर के दृष्टान्त से संवत्सर यज्ञ का वृत्तान्त ॥

(पुरुषः वाव संवत्सरः) मनुष्य ही संवत्सर यज्ञ है। (तस्य पादौ एव प्रायणीयः अतिरात्रः) उस [मनुष्य] के दोनों पांव प्रायणीय अतिरात्र [संवत्सर के अङ्ग] हैं। (पादाभ्यां हि प्रयन्ति) दोनों पावों से ही आगे को चलते हैं। (तयोः यत् शुक्लं तत् अह्नः रूपं यद् कृष्णं तद् रात्रेः) उन दोनों [पावों] में जो श्वेतपन है वह [यज्ञ के लिये] दिन का रूप और जो कालापन है वह रात्रि का है। (नखानि

(अनु) अनुकूलो भूत्वा (उदीक्ष्य) उत्कर्षेण दृष्ट्वा (वेत्थ) जानासि ॥

१. अयं पाठः न सर्वत्र दृश्यते ॥ सम्पा० ॥

नक्षत्राणां रूपं लोमानि ओषधिवनस्पतीनाम्) नख नक्षत्रों के रूप हैं और रोम औषधि वनस्पतियों के । (ऊरू चतुर्विंशम् अहः, उरः अभिप्लवं, पृष्ठ्यं पृष्ठच :) दोनों जंघायें चतुर्विंश अहः छाती [हृदयस्थान] अभिप्लव, और पीठ पृष्ठ्य है । (शिरः एव त्रिवृत् त्रिवृतं हि एव शिरो भवति त्वक् अस्थि मज्जा मस्तिष्कम्) शिर ही त्रिवृत् है, क्योंकि तीन अवयव वाला ही शिर होता है त्वचा, हाड़, मज्जा [हाड़ों का सार] अथवा मस्तिष्क [भेजा वा घृत के रूप में चिकनाई] । (ग्रीवाः पंचदशः चतुर्दश हि एव एतस्यां कराणि भवन्ति वीर्यं पंचदशम्) ग्रीवा पचदश यज्ञ है [क्योंकि] इसमें चौदह ही [अवयव विशेष] होते हैं और पन्द्रहवां वीर्य [बल] है, (तस्मात् इयम् आभिः अण्वीभिः सतीभिः गुरुं भारं हरति तस्मात् ग्रीवाः पंचदशः) इसलिये यह [ग्रीवा] इन छोटी छोटी नाड़ियों में होती हुई के द्वारा भारी बोझ ले जाती है, इसलिये ग्रीवा पंचदश यज्ञ है । (उरः सप्तदश ओष्ठौ अन्ये यत्र वा ओष्ठौ अन्ये उरः सप्तदशं तस्मात् उरः सप्तदशः) उरः [ग्रीवा और उदर का बीच ?] सप्तदश यज्ञ है कोई कोई दोनों ओंठ [बताते हैं] और दूसरे जहां दोनों ओष्ठ हैं वहां उरः सत्रहवां [कहते हैं], इसलिये उरः सप्तदश यज्ञ है । (उदरम् एकविंशः विंशतिर्हि एव एतस्य आन्तरे उदरे उत्तापानि भवन्ति, उदरम् एकविंशम्, तस्मात् उदरम् एकविंशः) उदर [पेट] एकविंश यज्ञ है, [क्योंकि] बीस ही इसके भीतरले उदर में उत्ताप [तापवाली आंतें] हैं और उदर इक्कीसवां है, इसलिये उदर एकविंश यज्ञ है । (पार्श्वे त्रिणवः अन्याः पर्शवः त्रयोदश अन्याः पार्श्वे त्रिणवः तस्मात् पार्श्वे त्रिणवः) दोनों पार्श्व [कांख के नीचे के स्थान] त्रिणव यज्ञ है, कोई पसलियां त्रयोदश यज्ञ और कोई दोनों पार्श्व [कांख के नीचे के स्थान] त्रिणव यज्ञ है [ऐसा कहते हैं] इसलिये दोनों पार्श्व त्रिणव यज्ञ हैं । (अनूकं त्रयस्त्रिंशः, द्वात्रिंशतिः हि एव एतस्यां पृष्टी कुण्डी उलानि भवन्ति अनूकं त्रयस्त्रिंशः तस्मात् अनूकं त्रयस्त्रिंशः) अनूक [मूत्र थैली] त्रयस्त्रिंश यज्ञ है, [क्योंकि] बत्तीस ही इसमें पृष्टी, कुण्डी, और उल [नाड़ी विशेष] हैं और अनूक तैंतीसवां है, इस लिये अनूक त्रयस्त्रिंश यज्ञ है । (तस्य दक्षिणःबाहुः अयम् एव अभिजित्) उस [मनुष्य] का दाहिना बाहु ही यह अभिजित् यज्ञ है, (तस्य दक्षिणे इमे त्रयः प्राणाः स्वरसामानः) उसके दाहिने [बाहु] में यह तीन प्राण [भुजदण्ड, भुजा और हाथ] स्वरसाम यज्ञ हैं । (आत्मा विषुवान्) [उसका] आत्मा विषुवान् यज्ञ है । (तस्य सव्ये इमे त्रयः प्राणाः अर्वाक् स्वरसामानः) उसके बायें [बाहु] में [पूर्वोक्त] तीन प्राण अर्वाक् स्वरसाम यज्ञ हैं । (तस्य अयम् सव्यः बाहुः विश्वजित्) उसका यह बायां बाहु विश्वजित् यज्ञ है । (उक्तौ पृष्ठ्याभिप्लवौ) दोनों पृष्ठ्य

३—(वाव) एव (तस्य) पुरुषस्य (प्रयन्ति) प्रकर्षेण गच्छन्ति (तयोः) पादयोः (ऊरू) जंघे (पृष्ठचम्) स्वार्थे यत् । पृष्ठम् (त्रिवृतम्) त्रि + वृञ वरणे-क्तः । त्र्यवयवयुक्तम् (मज्जा) टुमस्जो शुद्धौ-अच् टाप् । अस्थिसारः (मस्तिष्कम्) मस्तकस्थो घृताकारः पदार्थः (ग्रीवाः) कन्धराः (एतस्याम्) ग्रीवायाम् (कराणि)

और अभिप्लव कह दिये हैं। (यौ अर्वाञ्चौ प्राणौ तौ गवायुषी) जो नीचे वाले दो प्राण [पायु और उपस्थ] हैं वे दो गवायुषी यज्ञ हैं। (अङ्गानि दशरात्रः, मुखं महाव्रतम्) [शेष] अङ्ग दशरात्र और मुख महाव्रत यज्ञ है। (तस्य हस्तौ एव उदयनीयः अतिरात्रः) उस [मनुष्य के] दोनों हाथ ही उदयनीय अतिरात्र यज्ञ हैं। (हस्ताभ्यां हि उद्यन्ति यः एवं वेद) वह दोनों हाथों से चढ़ता है, जो ऐसा जानता है। (सः वै एषः संवत्सरः) सो वही संवत्सर यज्ञ है ॥ ३ ॥

भावार्थः मनुष्य शरीर के अवयवों को जानकर उन्हें पुष्ट रक्खे ॥ ३ ॥

कण्डिका ४ ॥

पुरुषो वाव संवत्सरः तस्य प्राण एव प्रायणीयोऽतिरात्रः प्राणेन हि प्रयन्ति वागारम्भणीयमहर्यद्यदारभते वागारभते[१] वाचैव तदारभते । तस्यायमेव दक्षिणः पाणिरभिप्लवस्तस्येदं प्रातःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयं सवनं गायत्र्या आयतने तस्मादियमस्यै ह्रसिष्ठा । १ । तस्येदं प्रातः सवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं त्रिष्टुभ आयतने तस्मादियमस्यै वरिष्ठा । २ । तस्येदं प्रातः सवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं जगत्या आयतने तस्मादियमनयोर्वरिष्ठा । ३ । तस्येदं प्रातःसवनमिदं माध्यन्दिन सवनमिदं तृतीयसवनं पङ्क्त्या आयतने पृथुरिव वै पङ्क्तिस्तस्मादियमासां प्रतिष्ठा । ४ । तस्येदं प्रातःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं विराज आयतनेऽन्नं वै श्रीः विराडन्नाद्यस्य श्रियोऽवरुध्यै तस्मादियमासां वरिष्ठा । ५ । तस्येदं प्रातः सवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनमतिच्छन्दसाम् आयतनेऽतिच्छन्दो वै छन्दसामायतनं तस्मादिदं प्रतिष्ठं फलकम् । ६ । तस्येदं प्रातःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं सैतः सैतोभिप्लवः सैत आत्मा पृष्ठ्यः प्लवतीवाभिप्लवस्तिष्ठतीव पृष्ठ्यः प्लवत इव ह्येवमङ्गैस्तिष्ठतीवात्मना । ७ । तस्यायमेव दक्षिणः कर्णोऽभिजित् । तस्य यद् दक्षिणमक्ष्णः शुक्लं स प्रथमस्वरसामा यत् कृष्णं स द्वितीयो यन्मण्डलं स तृतीयो नासिके विषुवान्, मण्डलमेव प्रथमोऽर्वाक् स्वरसामा यत् कृष्णं स द्वितीयो यत् शुक्लं स तृतीयस्तस्यायं सव्यः कर्णो विश्वजिदुक्तौ पृष्ठ्याभिप्लवौ यावर्वाञ्चौ प्राणौ ते गवायुषी अङ्गानि दशरात्रो मुखं महाव्रतं तस्योदान एवोदयनीयोऽतिरात्र उदानेन ह्युद्यन्ति य एवं वेद स वा एष संवत्सरः ॥ ४ ॥

अवयवविशेषाः (अण्वीभिः) सूक्ष्माभिर्नाडीभिः (उरः) उरु[२] एव (आन्तरे) अन्तर–अण् । आभ्यन्तरे (उत्तापानि) तप्तानि आन्त्राणि (अन्याः) अन्ये (अनूकम्) मूत्रवस्तिः (अर्वाञ्चौ) अधोगतौ । पायूपस्थे (उद्यन्ति) उच्चैर्गच्छति ॥

---

१. पू. सं. आरम्भेत इति पाठः ॥

२. कण्डिका में उरुस् शब्द भी छाती के अर्थ में है, जो कि अपपाठ है। तदनुसार भाष्यकार ने 'उरु एव' लिखा है। यह अयुक्त है। उरः की सिद्धि ऋ गतौ धातु से अर्त्तेरुच्च (उ. ४।१९५) से असुन् करके जाननी चाहिये ॥ सम्पा० ॥

कण्डिका ४ ॥ मनुष्य शरीर के दृष्टान्त से संवत्सर यज्ञ का वृत्तान्त ॥

(पुरुषः वाव संवत्सरः) मनुष्य ही संवत्सर यज्ञ है। (तस्य प्राणः एव प्रायणीयः अतिरात्रः, प्राणेन हि प्रयन्ति) उस [मनुष्य] का प्राण ही प्रायणीय अतिरात्र यज्ञ है, प्राण से ही आगे बढ़ते हैं। (वाक् आरम्भणीयम् अहः, यत् यत् आरभते वाक् आरभते, वाचा एव तत् आरभते) वाणी आरम्भ करने योग्य दिन [यज्ञ] है, जो जो आरम्भ किया जाता है वाणी आरम्भ करती है, वाणी से ही वह आरम्भ किया जाता है। (तस्य दक्षिणः पाणिः अयम् एव अभिप्लवः) उस [मनुष्य] का दाहिना हाथ यही अभिप्लव है। (तस्य इदं प्रातःसवनम् इदम् माध्यन्दिनं सवनं इदं तृतीयं सवनं गायत्र्याः आयतने, तस्मात् इयम् अस्यै ह्रसिष्ठा १) उस [मनुष्य] का यह प्रातःसवन [प्रातःकाल का यज्ञ अर्थात् बालकपन] यह माध्यन्दिन सवन [दोपहर का यज्ञ अर्थात् यौवन], और यह तीसरा सवन [तीसरे पहर का यज्ञ अर्थात् बुढ़ापा], गायत्री [आठ अक्षर के तीन पाद वाले गायत्री छन्द] के स्थान में है, इसलिये यह [गायत्री] इस [वाणी] में अति छोटी है। १। (तस्य इदं प्रातःसवनम् इदं माध्यन्दिनं सवनम् इदं तृतीयसवनं त्रिष्टुभः आयतने, तस्मात् इयम् अस्यै वरिष्ठा २) उस [मनुष्य] का यह प्रातःसवन, यह माध्यन्दिन सवन, यह तीसरा सवन [संख्या १ देखो] त्रिष्टुप् [ग्यारह अक्षर के चार पाद वाले त्रिष्टुप् छन्द] के स्थान में है, इसलिये यह [त्रिष्टुप्] इस [गायत्री] से अधिक बड़ा है। २। (तस्य इदं प्रातःसवनम्, इदं माध्यन्दिनं सवनम् इदं तृतीयं सवनं जगत्याः आयतने, तस्मात् इयम् अनयोः वरिष्ठा ३) उस [मनुष्य] का यह प्रातःसवन, यह माध्यन्दिन सवन, और यह तीसरा सवन [सं० १] जगती [बारह अक्षर के चार पाद वाले जगती छन्द] के स्थान में है, इसलिये यह [जगती] इन दोनों [गायत्री और त्रिष्टुप्] से अधिक बड़ा है। ३। (तस्य इदं प्रातःसवनम्, इदं माध्यन्दिनं सवनम् इदं तृतीयं सवनं पङ्क्त्याः आयतने पृथुः इव वै पङ्क्तिः, तस्मात् इयम् आसां प्रतिष्ठा ४) उस [मनुष्य] का यह प्रातःसवन, यह माध्यन्दिन सवन और यह तीसरा सवन [सं० १] पङ्क्ति [पांच वा आठ अक्षर के पांच पाद वाले पंक्ति छन्द] के स्थान में है, चौड़े पदार्थ के समान ही पङ्क्ति है, इसलिये यह [पङ्क्ति] इन [गायत्री, त्रिष्टुप् और जगती] की भूमि है। ४। (तस्य इदं प्रातःसवनम्, इदं माध्यन्दिनं सवनम्, इदं तृतीयसवनं विराजः आयतने, अन्नं वै श्रीः विराट्, अन्नाद्यस्य श्रियः अवरुध्यै, तस्मात् इयम् आसां वरिष्ठा ५) उस

४—(आरभते) आरभ्यते (प्रातःसवनम्) बाल्यमिति यावत् (माध्यन्दिनं सवनम्) यौवनम् (तृतीयसवनम्) वृद्धत्वम् (आयतने) स्थाने (ह्रसिष्ठा) ह्रस्व—इष्ठन्, टाप्। ह्रस्वतमा (वरिष्ठा) उरु वर वा—इष्ठन् टाप्। उरुतमा। विस्तीर्णतमा। वरतमा। श्रेष्ठतमा (पृथुः) विस्तीर्णः (प्रतिष्ठा) भूमिः। अथवा पृथु—इष्ठन्, थस्य तः। प्रथिष्ठा। अधिकविस्तीर्णा (विराट्)

[मनुष्य] का यह प्रातःसवन, यह माध्यन्दिन सवन और यह तीसरा सवन [सं० १] विराट [दस अक्षर के चार पाद वाले विराट् छन्द] के स्थान में है, अन्न और श्री [लक्ष्मी वा शोभा] ही विराट् है, खाने योग्य अन्न और श्री की प्राप्ति के लिये यह है, इसलिये यह [विराट्] इन [गायत्री, त्रिष्टुप्, जगती और पङ्क्ति] में अति श्रेष्ठ है । ५ । (तस्य इदं प्रातःसवनम् इदं माध्यन्दिनं सवनम् इदं तृतीयसवनम् अतिछन्दसाम् आयतने, अतिछन्दः वै छन्दसाम् आयतनम्, तस्मात् इदं प्रतिष्ठं फलकम् ६) उस [मनुष्य] का यह प्रातःसवन, यह माध्यन्दिन सवन, यह तीसरा सवन [सं० १] अतिछन्दों [अतिजगती, शक्वरी, अतिशक्वरी, अष्टि, अत्यष्टि, धृति, अतिधृति अतिछन्दों] के स्थान में है, अतिछन्द ही छन्दों का स्थान है, इसलिये यह प्रतिष्ठा वाला प्रतिफल है । ६ । (तस्य इदं प्रातःसवनम्, इदं माध्यन्दिनं सवनम्, इदं तृतीयं सवनं सैतः, सैतः अभिप्लवः, सैतः आत्मा पृष्ठ्यः, प्लवति इव अभिप्लवः, तिष्ठति इव पृष्ठ्यः, प्लवते इव हि एवम् अङ्गैः, तिष्ठति इव आत्मना ७) उस [मनुष्य] का यह प्रातःसवन, यह माध्यन्दिन सवन और यह तीसरा सवन [सं० १] खेती से सिद्ध हुआ यज्ञ है, खेती से सिद्ध हुआ यज्ञ अभिप्लव है, खेती से सिद्ध हुआ यज्ञ आत्मा रूप पृष्ठ्य है, चलता है जैसे यह अभिप्लव यज्ञ है, ठहरता है जैसे यह पृष्ठ्य है, क्योंकि वह [यज्ञ] चलता है जैसे इस प्रकार अङ्गों से, और ठहरता है जैसे आत्मा से । ७ । (तस्य दक्षिणः कर्णः अयम् एव अभिजित्) उस [मनुष्य] का दाहिना कान यही अभिजित् यज्ञ है । (तस्य अक्ष्णः यत् दक्षिणं शुक्लं सः प्रथमस्वरसामा यत् कृष्णं सः द्वितीयः, यत् मण्डलं सः तृतीयः) उस [मनुष्य] के आंख का जो दाहिना श्वेतपन है वह पहिला स्वरसाम यज्ञ है, जो कालापन है वह दूसरा, और जो मण्डल [आंख का घेरा] है वह तीसरा [स्वरसाम] है । (नासिके विषुवान्) दोनों नथने विषुवान् यज्ञ हैं । (मण्डलम् एव प्रथमः अर्वाक् स्वरसामा यत् कृष्णं सः द्वितीयः, यत् शुक्लं सः तृतीयः) मण्डल [बाईं आंख का घेरा] ही पहिला अर्वाक् स्वरसाम यज्ञ है, जो कालापन है वह दूसरा है और जो श्वेतपन है वह तीसरा है । (तस्य सव्यः कर्णः अयं विश्वजित्) उस [मनुष्य] का बांयां कान यह विश्वजित् है । (उक्तौ पृष्ठ्याभिप्लवौ) दोनों पृष्ठ्य और अभिप्लव कह दिये हैं । (यौ अर्वाञ्चौ प्राणौ ते गवायुषी) जो नीचे वाले दो प्राण [पायु और उपस्थ] हैं वे दो गवायुषी यज्ञ हैं । (अङ्गानि दशरात्रः मुखं महाव्रतम्) शेष अङ्ग दशरात्र और मुख महाव्रत है । (तस्य उदानः एव उदयनीयः अतिरात्रः) उस [मनुष्य] का उदान [ऊपर चढ़ने वाला वायु] ही उदयनीय अतिरात्र यज्ञ है । (उदानेन हि उद्यन्ति यः एवं वेद) क्योंकि वह उदान वायु से

वि + राजृ दीप्तौ ऐश्वर्य्ये च—क्विप् । विविधदीप्यमाना । विविधैश्वर्ययुक्ता । छन्दोविशेषः (अतिछन्दसाम्) अतिजगतीत्याद्यतिछन्दसाम् (प्रतिष्ठम्) प्रतिष्ठायुक्तम् (फलकम्) स्वार्थे कन् । फलम् । प्रतिफलम् (सैतः) तेन निर्वृत्तम् (पा० ४ । २ । ६८) सीता—अण् । सीतया कृषिकर्मणा निष्पादितो यज्ञः (अक्ष्णः) नेत्रस्य (मण्डलम्) मडि भूषणे—कलच् । चक्राकारेण वेष्टनम् ॥

ही चढ़ता है जो ऐसा जानता है। (सः वै एषः संवत्सरः) सो यही संवत्सर यज्ञ है ॥ ४ ॥

कण्डिका ५ ॥

पुरुषो वाव संवत्सरः। पुरुष इत्येकं संवत्सर इत्येकमत्र तत्समं १, द्वे अहोरात्रे संवत्सरस्य द्वाविमौ पुरुषे प्राणा इत्यत्र तत्समं २, त्रयो वा ऋतवः संवत्सरस्य त्रय इमे पुरुषे प्राणा इत्यत्र तत्समं ३, षड् वा ऋतवः संवत्सरस्य षडिमे पुरुषे प्राणा इत्यत्र तत्समं ४, सप्त वा ऋतवः संवत्सरस्य सप्तेमे पुरुषे प्राणा इत्यत्र तत्समं ५, द्वादश मासाः संवत्सरस्य द्वादशेमे पुरुषे प्राणा इत्यत्र तत्समं ६, त्रयोदश मासाः संवत्सरस्य त्रयोदशेमे पुरुषे प्राणा इत्यत्र तत्समं ७, चतुर्विंशतिरर्द्धमासाः संवत्सरस्य चतुर्विंशोऽयं पुरुषो विंशत्यङ्गुलिश्चतुरङ्ग इत्यत्र तत्समं ८, षड्विंशतिरर्द्धमासाः सवत्सरस्य षड्विंशोऽयं पुरुषः प्रतिष्ठे षड्विंशे इत्यत्र तत्समं ९, त्रीणि च ह वै शतानि षष्टिश्च संवत्सरस्याहोरात्राणीत्येतावन्त एव पुरुषस्य प्राणा इत्यत्र तत्समं १०, सप्त च ह वै शतानि विंशतिश्च संवत्सरस्याहानि च रात्रयश्चेत्येतावन्त एव पुरुषस्यास्थीनि च मज्जानश्चेत्यत्र तत्समं ११, चतुर्दश च ह वै शतानि चत्वारिंशच्च संवत्सरस्यार्द्धाहाश्चार्द्धरात्रयश्चेत्येतावन्त एव पुरुषस्य स्थुरामांसानीत्यत्र तत्समम् १२, अष्टाविंशतिश्च ह वै शतान्यशीतिश्च संवत्सरस्य पादाहाश्च पादरात्रयश्चेत्येतावन्त एव पुरुषस्य स्नावा बन्ध्या इत्यत्र तत्समं १३, दश च ह वै सहस्राण्यष्टौ च शतानि संवत्सरस्य मुहूर्त्ताः इत्येतावन्त एव पुरुषस्य पेशशमरा इत्यत्र तत्समं १४, यावन्तो मुहूर्त्ताः पञ्चदशकृत्वस्तावन्तः प्राणाः १५, यावन्तः प्राणाः पञ्चदशकृत्वस्तावन्तोऽपानाः १६, यावन्तोऽपानाः पञ्चदशकृत्वस्तावन्तो व्यानाः १७, यावन्तो व्यानाः पञ्चदशकृत्वस्तावन्तः समानाः १८, यावन्तः समानाः पञ्चदशकृत्वस्तावन्त उदानाः १९, यावन्त उदानाः पञ्चदशकृत्वस्तावन्त्येतादीनि २०, यावन्त्येतादीनि तावन्त्येतर्हीणि २१, यावन्त्येतर्हीणि तावन्ति स्वेदायनानि २२, यावन्ति स्वेदायनानि तावन्ति क्षिप्रायणानि २३, यावन्ति क्षिप्रायणानि तावन्तो रोमकूपाः २४, यावन्तो रोमकूपाः पञ्चदशकृत्वस्तावत्यो वर्षतो धारास्तदेतत् क्रोशशतिकम्परिमाणम्। २५।

तदप्येतदृचोक्तम्।[२]श्रमादन्यत्र परिवर्त्तमानश्चरत्वासीनो यदि वा स्वपन्नपि। अहोरात्राभ्यां पुरुषः क्षणेन कतिकृत्वः प्राणति चापानति च। शतं शतानि परिवत्सराणामष्टौ च शतानि मुहूर्तान् यान् वदन्ति अहोरात्राभ्यां पुरुषः समेन कतिकृत्वः प्राणति चापानति चेति ब्राह्मणम् ॥ ५ ॥

---

१. अत्रत्यः पाठोऽतीव व्यत्यस्तः ॥

२. तुलनीय शतपथ ब्राह्मण १२, ३, २, ७ ॥ सम्पा० ॥

कण्डिका ५ ॥ मनुष्य शरीर के दृष्टान्त से संवत्सर अर्थात् वर्ष का वृत्तान्त ॥

(पुरुषः वाव संवत्सरः) मनुष्य ही संवत्सर [वर्ष, बारह महीने का काल] है। (पुरुषः एकम् इति संवत्सरः एकम् इति अत्र तत् समम् १) मनुष्य एक है और संवत्सर एक है, यह यहाँ उन दोनों में समता है। १। (संवत्सरस्य द्वे अहोरात्रे पुरुषे इमौ द्वौ प्राणौ इति अत्र तत् समम् २) संवत्सर के दो दिन रात हैं, पुरुष में यह दो प्राण [प्राण अपान] हैं, यह यहाँ उन दोनों में समता है। २। (संवत्सरस्य त्रयः वै ऋतवः पुरुषे इमे त्रयः प्राणाः इति अत्र तत् समम् ३) संवत्सर के तीन ही ऋतु [ग्रीष्म, वर्षा, और शीत] हैं, मनुष्य में यह तीन प्राण [प्राण, अपान, उदान,] हैं, यह यहाँ उन दोनों में समता है। ३। (संवत्सरस्य षट् वै ऋतवः पुरुषे इमे षट् प्राणाः इति अत्र तत् समम् ४) संवत्सर के छह ही ऋतु [वसन्त आदि] हैं, मनुष्य में यह छह प्राण हैं, यह यहाँ उन दोनों में समता है। ४। (संवत्सरस्य सप्त वै ऋतवः पुरुषे इमे सप्त प्राणाः इति अत्र तत् समम् ५) संवत्सर के सात ही ऋतु हैं, मनुष्य में यह सात प्राण [मस्तक के गोलक] हैं, यह यहाँ उन दोनों में समता है। ५। (संवत्सरस्य द्वादश मासाः पुरुषे इमे द्वादश प्राणाः इति अत्र तत्समम् ६) संवत्सर के बारह महीने [चैत्र आदि] हैं। पुरुष में यह बारह प्राण हैं, यह यहाँ उन दोनों में समता है। ६। (संवत्सरस्य त्रयोदश मासाः पुरुषे इमे त्रयोदश प्राणाः इति अत्र तत् समम् ७) संवत्सर [लोंद के वर्ष] के तेरह महीने हैं, पुरुष में यह तेरह प्राण हैं, यह यहाँ उन दोनों में समता है। ७। (संवत्सरस्य चतुर्विंशतिः अर्धमासाः, अयम् पुरुषः चतुर्विंशः विंशत्यङ्गुलिः चतुरङ्गः इति अत्र तत् समम् ८) संवत्सर के चौबीस आधे महीने हैं, और यह पुरुष चौबीस वाला [अर्थात्] बीस अङ्गुली वाला और चार अङ्ग [दो हाथ दो पाँव] वाला है, यह यहाँ उन दोनों में समता है। ८। (संवत्सरस्य षड्विंशतिः अर्धमासाः अयम् पुरुषः षड्विंशः प्रतिष्ठे षड्विंशे इति अत्र तत् समम् ९) संवत्सर [लोंद के वर्ष] के छब्बीस आधे महीने हैं, यह पुरुष छब्बीस वाला है, दो प्रतिष्ठायें [पाँव की अङ्गुलियों के स्थान] छब्बीस [जोड़] वाले हैं, यह यहाँ उन दोनों में समता है। ९। (संवत्सरस्य त्रीणि शतानि च ह वै षष्टिः च अहोरात्राणि इति, एतावन्तः एव पुरुषस्य प्राणाः, इति अत्र तत् समम् १०) संवत्सर के तीन सौ साठ [३६०] दिन रात हैं, इतने [३६०] ही पुरुष के प्राण हैं, यह यहाँ उन दोनों में समता है। १०। (संवत्सरस्य

५—(समम्) समत्वम् (चतुर्विंशः) संख्ययाऽव्ययासन्नादूराधिकसङ्ख्याःसंख्येये (पा० २। २। २५) चतुरधिका विंशतिः यत्र स चतुर्विंशः। बहुव्रीहौ संख्येये डजबहुगणात् (पा० ५। ४। ७३) चतुर्विंशति-डच्। चतुर्विंशतियुक्तः। एवम् अन्यत्रापि सिद्धिः। (मज्जानः) श्वन्नुक्षन्पूषन्प्लीहन्० (उ० १। १५९) टुमस्जो शुद्धौ—कनिन्। अस्थि-सारा: (स्थुरामांसानि) स्थुड संवरणे—कः, टाप्, डस्य रः। स्थुरा त्वचा। त्वचासहितानि मांसबन्धनानि (स्नावाः) इण्शीभ्यां वन् (उ० १। १५२) ष्णा

सप्त शतानि च विंशतिः च ह वै अहानि च रात्रयः च इति एतावन्तः एव पुरुषस्य अस्थीनि च मज्जानः च इति अत्र तत् समम् ११) संवत्सर के सात सौ बीस [३६०×२=७२०] ही दिन और रात हैं, इतने [३६०×२=७२०] ही पुरुष की हड्डियाँ और मज्जा [हड्डियों का सार] हैं, यह यहाँ उन दोनों में समता है। ११ । (संवत्सरस्य चतुर्दश शतानि च चत्वारिंशत् च ह वै अर्धाहाः च अर्धरात्रयः च इति, एतावन्तः एव पुरुषस्य स्थुरामांसानि इति अत्र तत् समम् १२) संवत्सर के चौदह सौ चालीस [७२०×२=१४४०] ही हैं, इतने [७२०×२=१४४०] ही पुरुष के खाल और मांस को ग्रन्थी हैं, यह यहाँ उन दोनों में समता है। १२ । (संवत्सरस्य अष्टाविंशतिः शतानि च अशीतिः च ह वै पादाहाः च पादरात्रयः च इति एतावन्तः एव पुरुषस्य स्नावाः बन्ध्याः इति अत्र तत् समम् १३) संवत्सर के अट्ठाइस सौ अस्सी [१४४०×२=२८८०] ही चौथाई दिन और चौथाई रात हैं इतने [१४४०×२= २८८०] ही पुरुष के पुट्ठे और बन्धन हैं, यह यहाँ उन दोनों में समता है। १३ । (संवत्सरस्य दश सहस्राणि च अष्टौ शतानि च ह वै मुहूर्त्ताः इति, एतावन्तः एव पुरुषस्य पेशशमराः इति अत्र तत् समम् १४) संवत्सर के दश सहस्र और आठ सौ [३६०×३० मुहूर्त = १०,८००] ही मुहूर्त्त हैं, इतने [१०,८००] ही पुरुष के पेशशमर [रूपसूचक अंश विशेष] हैं यह यहाँ उन दोनों में समता है। १४ । (यावन्तः मुहूर्ताः पञ्चदशकृत्वः तावन्तः प्राणाः १५) जितने मुहूर्त्त पन्द्रह बार [१०,८००×१५= १,६२,०००] हैं उतने [१,६२,०००] प्राण हैं। १५ । (यावन्तः प्राणाः पञ्चदशकृत्वः तावन्तः अपानाः १६) जितने प्राण पन्द्रह बार [१,६२,००० = १५ = २४,३०,०००] हैं उतने [२४,३०,०००] अपान हैं। १६ । (यावन्तः अपानाः पञ्चदशकृत्वः तावन्तः व्यानाः १७) जितने अपान पन्द्रह बार [२४,३०,०००×१५=३,६४,५०,०००] हैं उतने [३,६४,५०,०००] व्यान हैं। १७ । (यावन्तः व्यानाः पञ्चदशकृत्वः तावन्तः समानाः १८) जितने व्यान पन्द्रह बार [३,६४,५०,०००×१५=५४,६७,५०,०००] हैं, उतने [५४,६७,५०,०००] उतने समान हैं। १८ । (यावन्तः समानाः पञ्चदशकृत्वः तावन्तः उदानाः १९) जितने समान पन्द्रह बार [५४,६७,५०,०००×१५= ८,२०,१२,५०,०००] हैं, उतने [८,२०,१२,५०,०००] उदान हैं। १९ । (यावन्तः उदानाः पञ्चदशकृत्वः तावन्ति एतादीनि २०) जितने उदान पन्द्रह बार [८,२०, १२,५०,०००×१५ = १, २३,०१,८७,५०,०००] हैं, उतने [१,२३,०१,८७,५०,०००] एतादि हैं २० । (यावन्ति एतादीनि तावन्ति एतर्हीणि २१) जितने एतादि हैं उतने

शौचे—वन् । स्नायवः । वायुवाहिन्यो नाड्यः (बन्ध्याः) बन्ध बन्धने—क्यप्, टाप् । बन्धनानि (मुहूर्त्ताः) अञ्चिघृसिभ्यः क्तः (उ० ३ । ८९) हुर्छा कौटिल्ये—क्तः । मुडागमः, छलोपः । घटिकाद्वयकालाः । त्रिंशन्मुहूर्तमहोरात्रम् (पेशशमराः) पिश अवयवे—घञ् । अर्तिकमिभ्रमिचमिदेवि० (उ० ३ । १३२) पेश+शम शान्तौ आलोचने च—अरप्रत्ययः । रूपसूचका अंशविशेषाः । पेशस् रूपं–निघ० ३ । ७ । पेशः एव पेशस् (एतादीनि) हसिमृग्रिण्वामि० (उ० ३ । ८६) इण् गतौ–तन् ।

[१,२३,०१,८७, ५०,०००] एतर्हि हैं । २१ । (यावन्ति एतर्हीणि तावन्ति स्वेदायनानि २२) जितने एतर्हि हैं उतने [१,२३,०१,८७,५०,०००] स्वेदायन [पसीने के मार्ग] हैं । २२ । (यावन्ति स्वेदायनानि तावन्ति क्षिप्रायणानि २३) जितने स्वेदायन हैं उतने [१,२३ ०१,८७,५०,००] क्षिप्रायण [शीघ्र मार्ग] हैं । २३ । (यावन्ति क्षिप्रायणानि तावन्तः रोमकूपाः २४) जितने क्षिप्रायण हैं उतने (१,२३,०१,८७, ५०,०००) रोमकूप हैं । २४ । (यावन्तः रोमकूपाः पञ्चदशकृत्वः तावत्यः वर्षतः धाराः) जितने रोमकूप पन्द्रह बार [१,२३,०१,८७,५०,००० × १५ = १८,४५,२८, १२,५०,०००] हैं उतनी वर्षत् की धारायें [सेचनशील नाड़ियों के प्रवाह] हैं । (तत् एतत् क्रोशशतिकं परिमाणम् २५) सो यह सौ क्रोश वाला परिणाम [गणना] है । २५ ।

(तत् अपि एतत् ऋचा उक्तम्) सो यह भी इस ऋचा करके कहा गया है— (पुरुषः श्रमात् अन्यत्र परिवर्तमानः आसीनः यदि वा स्वपन् अपि चरतु अहोरात्राभ्यां क्षणेन कतिकृत्वः प्राणति च अपानति च) मनुष्य श्रम से दूसरे स्थान में लगा हुआ चाहे बैठा हुआ, चाहे सोता हुआ वर्त्तमान हो, वह दिन और रात्रि के साथ क्षण [की समता] से कितनी बार प्राण लेता है और अपान लेता है । १ । (परिवत्सराणां शतं शतानि अष्टौ च शतानि यान् मुहूर्तान् वदन्ति, पुरुषः अहोरात्राभ्यां समेन कतिकृत्वः प्राणति च अपानति च—इति ब्राह्मणम्) पुरुष परिवत्सरों के सौ सैकड़े और आठ सैकड़े जिन मुहूर्तों को कहते हैं, पुरुष दोनों दिन और रात्रि के साथ समानता से कितने बार प्राण लेता है और अपान लेता है । २ । —यह ब्राह्मण [ब्रह्मज्ञान] है । ५ ॥ [यह दोनों श्लोक ब्राह्मण वचन हैं, वेदों में नहीं हैं, इनका भावार्थ विचारणीय है ।]

भावार्थः— मनुष्य शरीर में स्थूल रूप से प्राण हृदय में १, अपान मलाशय में २, व्यान समस्त शरीर में ३, समान नाभि में ४, और उदान कण्ठ में ५, रहता है ऐसा मानते हैं । फिर जैसे जैसे नाड़ियां एक से एक सूक्ष्म होकर गणना में बढ़ती जाती हैं, वैसे ही वायु की गति भी सूक्ष्म और अधिक होकर बढ़ती जाती है । स्थान वा नाड़ियों में गति के भेद से एक ही वायु के अलग अलग नाम और काम हैं । तात्पर्य यह है कि जैसे

इति एतः । आदीयते गृह्यते आ+दा—किः । एतानां गतीनाम् आदीनि ग्रहणशीलानि अङ्गानि । नाडीविशेषाः (एतर्हीणि) इण् गतौ-तन् । सर्वधातुभ्य इन् (उ० ४ । ११८) एत+अर्ह पूजायां योग्यत्वे च—इन्, पृषोदरादि रूपम् । गतियोग्यानि अङ्गानि । नाडीविशेषाः (स्वेदायनानि) स्वेदस्य गात्रस्रवस्य अयनानि मार्गाः (क्षिप्रायणानि) क्षिप्राणि शीघ्राणि अयनानि मार्गाः येषां तानि (वर्षतः) वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च (उ० २ । ८४) वृषु सेचने प्रजनैश्वर्ययोश्च—अतिः । सेचनशीलनाडीसमूहस्य (धाराः) प्रवाहाः (क्रोशशतिकम्) क्रुश रोदने आह्वाने च—घञ् । क्रोशः महासंख्याविशेषः । तदस्य परिमाणम् (पा० ५ । १ । ५७) क्रोशशत्—ठन् । क्रोशशतयुक्तम् (परिवर्तमानः) परिवृतः (परिवत्सराणाम्) वत्सरविशेषाणाम् (समेन) समत्वेन ॥

शरीर के वायु मार्ग नाड़ियां अति सूक्ष्म और अगणित हैं, वैसे ही काल की गति अति सूक्ष्म और बिना परिमाण है ॥ ५ ॥

कण्डिका ६ ॥

संवत्सरस्य समता वेदितव्येति ह स्मा ह वा स्युरेकमेव पुरस्ताद् विषुवतोऽतिरात्रमुपयन्त्येकमुपरिष्टात् १, त्रिपञ्चाशतमेव पुरस्ताद्विषुवतोऽग्निष्टोमानुपयन्ति त्रिपञ्चाशतमुपरिष्टाद् २, विंशतिशतमेव पुरस्ताद्विषुवत उक्थ्यानुपयन्ति विंशतिशतमुपरिष्टात् ३, षडेव पुरस्ताद्विषुवतः षोडशिन उपयन्ति षडुपरिष्टात् ४, त्रिंशदेव पुरस्ताद्विषुवतः षडहानुपयन्ति त्रिंशदुपरिष्टात् ५, सैषा संवत्सरस्य समता स य एवमेतां संवत्सरस्य समतां वेद संवत्सरेण सात्मा सलोको भूत्वा देवानप्येतीति ब्राह्मणम् ॥ ६ ॥

कण्डिका ६ ॥ संवत्सर यज्ञ में विषुवान् के दोनों ओर यज्ञ की समता ॥

(संवत्सरस्य समता वेदितव्या इति) संवत्सर यज्ञ की समानता [याजकों को] जाननी चाहिये, यह वर्णन है। (ह स्मा ह वा स्युः) और वह अवश्य ही होनी चाहिये। (विषुवतः पुरस्तात् एकम् एव अतिरात्रम् उपयन्ति, एकम् उपरिष्टात् १) विषुवान् [तुल्य दिन रात्रि के काल वाले] यज्ञ से पहिले एक ही अतिरात्र यज्ञ को स्वीकार करते हैं और एक को पीछे। १। (विषुवतः पुरस्तात् त्रिपञ्चाशतम् एव अग्निष्टोमान् उपयन्ति त्रिपञ्चाशतम् उपरिष्टात् २) विषुवान् से पहिले तिरपन ही अग्निष्टोमों को स्वीकार करते हैं और तिरपन को पीछे। २। (विषुवतः पुरस्तात् विंशतिशतम् एव उक्थ्यान् उपयन्ति विंशतिशतम् उपरिष्टात् ३) विषुवान् से पहिले एक सौ बीस ही उक्थ्य यज्ञों को स्वीकार करते हैं और एक सौ बीस को पीछे। ३। (विषुवतः पुरस्तात् षट् एव षोडशिनः उपयन्ति षट् उपरिष्टात् ४) विषुवान् से पहिले छह ही षोडशी यज्ञों को स्वीकार करते हैं और छह को पीछे। ४। (विषुवतः पुरस्तात् त्रिंशत् एव षडहान् उपयन्ति त्रिंशत् उपरिष्टात् ५) विषुवान् से पहिले तीस ही षडहः [छह दिन वाले यज्ञों] को स्वीकार करते हैं और तीस को पीछे। ५। (सा एषा संवत्सरस्य समता) सो यही संवत्सर की समता है। (यः एवं संवत्सरस्य एतां समतां वेद सः संवत्सरेण स-आत्मा सलोकः भूत्वा देवान् अप्येति इति ब्राह्मणम्) जो इस प्रकार संवत्सर की इस समता को जानता है, वह संवत्सर के साथ एक आत्मा वाला और एक निवास वाला होकर दिव्य गुणों को पाता है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ ६ ॥

६—(ह स्मा ह) इति निपातत्रयसमूहः, अवधारणे। अवश्यम् एव (वा) चार्थे (स्युः) स्यात्। सा समता च अवश्यम् एव स्यात्, इत्यर्थः (उपयन्ति) स्वीकुर्वन्ति (विंशतिशतम्) संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये (पा० २।२।२५) विंशत्या अधिकम् शतम्। विंशत्युत्तरशतम् (सात्मा) समानात्मा (सलोकः) समाननिवासः (देवान्) दिव्यगुणान् (अप्येति) प्राप्नोति ॥

भावार्थः—मनुष्य लक्ष्य का आगा पीछा ठीक ठीक सोच कर उचित समय पर कार्य करे, जैसे विषुवान् के आगे पीछे विचार कर यज्ञ होते हैं ॥ ६ ॥

कण्डिका ७ ॥

अथातो यज्ञक्रमाः । अग्न्याधेयमग्न्याधेयात् पूर्णाहुतिः, पूर्णाहुतेरग्निहोत्रमग्निहोत्राद्दर्शपूर्णमासौ दर्शपूर्णमासाभ्यामाग्रयणं, आग्रयणाच्चातुर्मास्यानि, चातुर्मास्येभ्यः पशुबन्धः पशुबन्धादग्निष्टोमः, अग्निष्टोमाद्राजसूयो राजसूयाद्वाजपेयः, वाजपेयादश्वमेधः, अश्वमेधात्पुरुषमेधः, पुरुषमेधात् सर्वमेधः, सर्वमेधाद्दक्षिणावन्तो दक्षिणावद्भ्यो दक्षिणा अदक्षिणाः सहस्रदक्षिणे प्रत्यतिष्ठंस्ते वा एते यज्ञक्रमाः । स य एवमेतान् यज्ञक्रमान्वेद यज्ञेन सात्मा सलोको भूत्वा देवानप्येतीति ब्राह्मणम् ॥७॥

कण्डिका ७ ॥ पन्द्रह प्रकार के यज्ञों का क्रम, जिनमें राजसूय, वाजपेय, अश्वमेध, पुरुषमेध आदि सम्मिलित हैं ॥

(अथ अतः यज्ञक्रमाः) अब यहां यज्ञक्रम [कहे जाते हैं] । (अग्न्याधेयम्) अग्न्याधान । १ । (अग्न्याधेयात् पूर्णाहुतिः) अग्न्याधान से [पीछे] पूर्णाहुति । २ । (पूर्णाहुतेः अग्निहोत्रम्) पूर्णाहुति से पीछे अग्निहोत्र [साकल्य की आहुति] । ३ । (अग्निहोत्रात् दर्शपूर्णमासौ) अग्निहोत्र से पीछे दर्शपूर्णमास [अमावस्या और पूर्णमासी के यज्ञ] । ४ । (दर्शपूर्णमासाभ्याम् आग्रयणम्) दोनों दर्शपूर्णमासों से पीछे आग्रयण [नये अन्न का यज्ञ] । ५ । (आग्रयणात् चातुर्मास्यानि) आग्रयण से पीछे चातुर्मास्य [चार महीनों में पूरे होने वाले यज्ञ] । ६ । (चातुर्मास्येभ्यः पशुबन्धः) चातुर्मास्यों से पीछे पशुबन्ध [पशुओं के प्रबन्ध का यज्ञ] । ७ । (पशुबन्धात् अग्निष्टोमः) पशुबन्ध से पीछे अग्निष्टोम । ८ । (अग्निष्टोमात् राजसूयः) अग्निष्टोम से पीछे राजसूय [राजा के अभिषेक के यज्ञ] । ९ । (राजसूयात् वाजपेयः) राजसूय से पीछे वाजपेय [बल की रक्षा का यज्ञ] । १० । (वाजपेयात् अश्वमेधः) वाजपेय से पीछे अश्वमेध [घोड़ों के गुणों की विद्या का यज्ञ] । ११ । (अश्वमेधात् पुरुषमेधः) अश्वमेध से पीछे पुरुषमेध [पुरुषों के मेलवाला यज्ञ] । १२ । (पुरुषमेधात् सर्वमेधः) पुरुषमेध से पीछे

७—(अग्न्याधेयम्) अग्निस्थापनम् । अग्न्याधानम् (आग्रयणम्) अग्र—अयन, पृषोदरादित्वात् ह्रस्वदीर्घौ । अग्रे अयनं भोजनं शस्यादेर्येन कर्मणा तत् । नवशस्येष्टिः (चातुर्मास्यानि) चतुर्मास-ण्यः । चतुर्माससाध्या यज्ञभेदा व्रतभेदाश्च (पशुबन्धः) पशुप्रबन्धयज्ञः (राजसूयः) राजसूयसूर्य० (पा० ३ । १ । ११४) राजन्+षुञ् अभिषवे—क्यप् । दीर्घो निपातितः । राजाभिषेकयज्ञः (वाजपेयः) अचो यत् (पा० ३ । १ । ९७) वाज+पा पाने पा रक्षणे वा—यत् । वाजः, अन्ननाम—निघ० २ । ७ । बलनाम—निघ० २ । ९ । बलं रक्षणीयं यस्मिन् स यज्ञः । यद् वा अन्नं रक्षणीयं भोजनीयं यत्र सः (अश्वमेधः) अश्व+मेधृ मेधाहिंसनसंगमेषु—अङ्, टाप् । अश्वगुणेषु मेधा धारणावती बुद्धिर्यस्मिन् स यज्ञः (पुरुषमेधः) पुरुषाणां मेधः संगमो यत्र स यज्ञः (सर्वमेधः) सर्वेषु मेधा यस्मिन्

सर्वमेध [सब में धारणावती बुद्धिवाला यज्ञ] । १३ । (सर्वमेधात् दक्षिणावन्तः) सर्वमेध से पीछे दक्षिणा वाले यज्ञ । १४ । (दक्षिणावद्भ्यः दक्षिणाः अदक्षिणाः सहस्रदक्षिणे प्रत्यतिष्ठन्) दक्षिणवाले यज्ञ से पीछे बहुत दक्षिणा वाले और बड़ी से बड़ी दक्षिणा वाले यज्ञ सहस्रदक्षिणा [सहस्रों गौवों वा मुद्राओं के दान वाले यज्ञ] में ठहरते हैं । १५ । (ते वै एते यज्ञक्रमाः) सो यही यज्ञक्रम हैं । (यः एवम् एतान् यज्ञक्रमान् वेद सः यज्ञेन स-आत्मा सलोकः भूत्वा देवान् अप्येति इति ब्राह्मणम्) जो इस प्रकार इन यज्ञों के क्रमों को जानता है वह यज्ञ के साथ एक आत्मा वाला और एक निवास वाला होकर दिव्य गुणों को पाता है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ ७ ॥

भावार्थः—जो मनुष्य क्रम से एक के पीछे दूसरा काम विचार कर करते हैं, वे कृतार्थ होते हैं ॥ ७ ॥

कण्डिका ८ ॥

प्रजापतिरकामयतानन्त्यमश्नुवीयेति सोऽग्नीनाधाय पूर्णाहुत्याऽयजत सोऽन्तमेवापश्यत् १, सोऽग्निहोत्रेणेष्ट्वाऽन्तमेवापश्यत् २, स दर्शपूर्णमासाभ्यामिष्ट्वाऽन्तमेवापश्यत् ३, स आग्रयणेनेष्ट्वाऽन्तमेवापश्यत् ४, स चातुर्मास्यैरिष्ट्वाऽन्तमेवापश्यत् ५, स पशुबन्धेनेष्ट्वाऽन्तमेवापश्यत् ६, सोऽग्निष्टोमेनेष्ट्वाऽन्तमेवापश्यत् ७, स राजसूयेनेष्ट्वा राजेति नामाधत्त सोऽन्तमेवापश्यत् ८, स वाजपेयेनेष्ट्वा सम्राडिति नामाधत्त सोऽन्तमेवापश्यत् ९, सोऽश्वमेधेनेष्ट्वा स्वराडिति नामाधत्त सोऽन्तमेवापश्यत् १०, स पुरुषमेधेनेष्ट्वा विराडिति नामाधत्त सोऽन्तमेवापश्यत् ११, स सर्वमेधेनेष्ट्वा सर्वराडिति नामाधत्त सोऽन्तमेवापश्यत् १२, सोऽहीनैर्दक्षिणावद्भिरिष्ट्वाऽन्तमेवापश्यत् १३, सोऽहीनैरदक्षिणावद्भिरिष्ट्वाऽन्तमेवापश्यत् १४, स सत्रेणोभयतोऽतिरात्रेणान्ततो यजेत १५, वाचं ह वै होत्रे प्रायच्छत् प्राणमध्वर्यवे चक्षुरुद्गात्रे मनो ब्रह्मणेऽङ्गानि होत्रकेभ्य आत्मानं सदस्येभ्यः १६, एवमानन्त्यमात्मानं दत्वानन्त्यमाश्नुतेति १७, तद्या दक्षिणा आनयत्ताभिरात्मानं निष्क्रीणीय १८, तस्मादेतेन ज्योतिष्टोमनाग्निष्टोमेनात्मनिष्क्रयणेन सहस्रदक्षिणेन पृष्ठशमनीयेन त्वरेत १९, यो ह्यनिष्ट्वा पृष्ठशमनीयेन प्रैत्यात्मानं सो निष्क्रीय प्रैतीति ब्राह्मणम् २० ॥ ८ ॥

कण्डिका ८ ॥ प्रजापति की कथा जिसने बहुत यज्ञों को करके आत्मिक यज्ञ से अत्यन्त सुख पाया ॥

(प्रजापतिः अकामयत् आनन्त्यम् अश्नुवीय इति) प्रजापति [प्रजापालक यजमान] ने चाहा—मैं अनन्त सुख प्राप्त करूँ । (सः अग्नीन् आधाय पूर्णाहुत्या यजेत

सः (दक्षिणाः) दक्षिणा-अर्शआद्यच् । बहुदक्षिणावन्तः (अदक्षिणाः) नास्ति अधिका दक्षिणा यस्याः दक्षिणायाः येषु ते । सर्वथा सर्वदक्षिणायुक्ता यज्ञाः (सहस्रदक्षिणे) सहस्राणां गवादीनां मुद्रणं वा दानं यस्मिन् तस्मिन् यज्ञे (प्रत्यतिष्ठन्) प्रतिष्ठन्ति ॥

८—(प्रजापतिः) प्रजापालको यजमानः (आनन्त्यम्) अनन्त—ष्यञ् भावे स्वार्थे वा । अनन्तं सुखम् (अश्नुवीय) अहं प्राप्नुयाम् (अन्तम्)

स: अन्तम् एव अपश्यत् १) उसने अग्नियों की स्थापना करके पूर्णाहुति के साथ यज्ञ किया, उसने अन्त वाला ही सुख देखा । १ । (स: अग्निहोत्रेण इष्ट्वा अन्तम् एव अपश्यत् २) उसने अग्निहोत्र से यज्ञ करके अन्त वाला ही सुख देखा । २ । (स: दर्शपूर्णमासाभ्याम् इष्ट्वा अन्तम् एव अपश्यत् ३) उसने दोनों अमावस्या और पूर्णमासी के यज्ञों से यज्ञ करके अन्तवाला ही सुख देखा । ३ । (स: आग्रयणेन इष्ट्वा अन्तम् एव अपश्यत् ४) उसने आग्रयण [नये अन्न के यज्ञ] से यज्ञ करके अन्त वाला ही सुख देखा । ४ । (स: चातुर्मास्यैः इष्ट्वा अन्तम् एव अपश्यत् ५) उसने चातुर्मास्यों [चार महीने में पूरे होने वाले यज्ञों] से यज्ञ करके अन्तवाला ही सुख देखा । ५ । (स: पशुबन्धेन इष्ट्वा अन्तम् एव अपश्यत् ६) उसने पशुबन्ध [पशुओं के प्रबन्ध वाले यज्ञ] से यज्ञ करके अन्त वाला ही सुख देखा । ६ । (स: अग्निष्टोमेन इष्ट्वा अन्तम् एव अपश्यत् ७) उसने अग्निष्टोम यज्ञ से यज्ञ करके अन्त वाला ही सुख देखा । ७ । (स: राजसूयेन इष्ट्वा राजा इति नाम अधत्त स: अन्तम् एव अपश्यत् ८) उसने राजसूय यज्ञ करके, राजा यह नाम रखा, उसने अन्त वाला ही सुख देखा । ८ । (स: वाजपेयेन इष्ट्वा सम्राट् इति नाम अधत्त स: अन्तम् एव अपश्यत् ९) उसने वाजपेय [बलरक्षक यज्ञ] से यज्ञ करके सम्राट् [राज-राजेश्वर] यह नाम रक्खा, उस ने अन्तवाला ही सुख देखा । ९ । (स: अश्वमेधेन इष्ट्वा स्वराट् इति नाम अधत्त स: अन्तम् एव अपश्यत् १०) उसने अश्वमेध [घोड़ों के गुणों की विद्या वाले] यज्ञ से यज्ञ करके स्वराट् [स्वतन्त्र ऐश्वर्यवान् राजा], यह नाम रक्खा उसने अन्तवाला ही सुख देखा । १० । (स: पुरुषमेधेन इष्ट्वा विराट् इति नाम अधत्त स: अन्तम् एव अपश्यत् ११) उसने पुरुषमेध [पुरुषों पर निश्चल बुद्धि वाले] यज्ञ से यज्ञ करके विराट् [विविध ऐश्वर्यवान् राजा] यह नाम रक्खा, उस ने अन्त वाला ही सुख देखा । ११ । (स: सर्वमेधेन इष्ट्वा सर्वराट् इति नाम अधत्त स: अन्तम् एव अपश्यत् १२) उसने सर्वमेध [सब पर निश्चल बुद्धि वाले] यज्ञ से यज्ञ करके सर्वराट् [सब प्रकार ऐश्वर्यवान् राजा] यह नाम रक्खा, उस ने अन्त वाला ही सुख देखा] । १२ । (स: अहीनैः दक्षिणावद्भिः इष्ट्वा अन्तम् एव अपश्यत् १३) उसने अहीन [पूरी पूरी] दक्षिणा वाले यज्ञों से यज्ञ करके अन्त वाला ही सुख देखा । १३ । (स: अहीनैः अदक्षिणावद्भिः इष्ट्वा अन्तम् एव अपश्यत् १४) उस ने अहीन [पूरी पूरी] अदक्षिणा वाले [जिस दक्षिणा से कोई अधिक दक्षिणा न हो अर्थात् बड़ी से बड़ी दक्षिणा वाले] यज्ञों से यज्ञ करके अन्त वाला ही सुख देखा । १४ । (स: उभयत: अतिरात्रेण सत्रेण अन्तत: यजेत १५) उस ने दोनों ओर अतिरात्र

अम गतौ—तन् । ससीमं सुखम् (अधत्त) धृतवान् (सम्राट्) सम्+राजृ दीप्तौ ऐश्वर्ये च—क्विप् । सर्वभूमीश्वरः (स्वराट्) स्वेनैव राजते ईष्टे । स्वयम् एव ऐश्वर्यवान् राजा (विराट्) विशेषेण राजते ईष्टे । विशेषैश्वर्यवान् क्षत्रियः (सर्वराट्) सर्वेषु राजते । सर्वैश्वर्यवान् राजा (अहीनैः) गो० उ० २ । ८ । हीनतारहितैः । सम्पूर्णैः (सत्रेण) गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः । (उ० ४ । १६७) षद्लृ गतौ उपवेशने च—त्रः । यद्वा सत्+त्रैङ् पालने—कः । सीदन्ति उप-

वाले सत्र [सत्पुरुषों के रक्षक] यज्ञ से अन्त में यज्ञ किया—(**वाचं ह वै होत्रे प्रायच्छत्, प्राणम् अध्वर्यवे, चक्षुः उद्गात्रे, मनः ब्रह्मणे, अङ्गानि होत्रकेभ्यः, आत्मानं सदस्येभ्यः १६**) उस ने [अपनी] वाणी को ही होता को दिया, प्राण अध्वर्यु को, नेत्र उद्गाता को, मन ब्रह्मा को, सब अङ्ग होत्रकों [सहायक ऋत्विजों] को, आत्मा सदस्यों [न्यून और अधिक कर्म रोकने पर दृष्टि वालों] को। [अर्थात् होता आदि के सब कर्म उसने अपने आत्मा से किये]। (**एवम् आनन्त्यम् आत्मानम् दत्वा आनन्त्यम् आश्नुत इति १७**) इस प्रकार अन्तरहित आत्मबल का दान करके अनन्त सुख उसने पाया। (**तत् याः दक्षिणाः आनयत् ताभिः आत्मानं निष्क्रीणीय १८**) सो जिन दक्षिणाओं को वह लाया [उस ने दिया], उन से उस ने आत्मा को मोल लिया। १८। (**तस्मात् ज्योतिष्टोमेन अग्निष्टोमेन आत्मनिष्क्रयणेन सहस्रदक्षिणेन एतेन पृष्ठशमनीयेन त्वरेत १९**) इस लिये वह ज्योतिष्टोम, अग्निष्टोम, आत्मनिष्क्रयण [अपने को मोल लेने वाले] और सहस्र दक्षिणा वाले यज्ञ के साथ इस पृष्ठशमनीय [स्तुतियों से शान्ति योग्य] यज्ञ से शीघ्रता करे। १९। (**यः हि अनिष्ट्वा पृष्ठशमनीयेन प्रैति सः आत्मानं निष्क्रीय प्रैति इति ब्राह्मणम् २०**) जो पुरुष ही [भौतिक यज्ञों से] यज्ञ न करके पृष्ठशमनीय [स्तुतियों से शान्ति योग्य] यज्ञ के द्वारा आगे बढ़ता है, वह आत्मा को मोल लेकर आगे बढ़ता है—यह ब्राह्मण [ब्रह्मज्ञान] है। २०॥ ८॥

भावार्थः - जब मनुष्य अनेक भौतिक यज्ञों को करके अथवा न करके निरभिमान होकर उपकार में आत्मसमर्पण करता है, तब वह अत्यन्त सुख पाता है ॥ ८॥

कण्डिका ९ ॥

यद्वै संवत्सराय संवत्सरसदो दीक्षन्ते कथमेषामग्निहोत्रमनन्तरितं भवति व्रतेनेति ब्रूयात् १, कथमेषां दर्शोऽनन्तरितो भवति दध्ना च पुरोडाशेन चेति ब्रूयात् २, कथमेषां पौर्णमासमनन्तरितं भवत्याज्येन च पुरोडाशेन चेति ब्रूयात् ३, कथमेषामाग्रयणमनन्तरितं भवति सौम्येन चरुणेति ब्रूयात् ४, कथमेषां चातुर्मास्यान्यनन्तरितानि भवन्ति पयसेति ब्रूयाद् ५, कथमेषां पशुबन्धोऽनन्तरितो भवति पशुना च पुरोडाशेन चेति ब्रूयात् ६, कथमेषां सौम्योऽध्वरोऽनन्तरितो भवति ग्रहैरिति ब्रूयात् ७, कथमेषां गृहमेधोऽनन्तरितो भवति धानाकरम्भैरिति ब्रूयात् ८, कथमेषां पितृयज्ञोऽनन्तरितो भवत्यौपासनैरिति

विशन्ति यत्र यद्वा सतः सत् पुरुषान् त्रायते तत्। सत्रनामकयज्ञेन (होत्रकेभ्यः) सहायकहोतृभ्यः (सदस्येभ्यः) न्यूनातिरिक्तताविपर्य्ययपरिहारार्थं विधानदर्शिभ्यः सभासद्भ्यः (आनन्त्यम्) अन्तरहितम् (आत्मानम्) आत्मबलम् (दत्वा) समर्प्य (आश्नुत) प्राप्तवान् (निष्क्रीणीय) निष्क्रीतवान्। तुल्यमूल्येन गृहीतवान् (आत्मनिष्क्रयणेन) आत्मदानेन ग्रहणेन (पृष्ठशमनीयेन) तिथपृष्ठगूथयूथप्रोथाः (उ० २। १२) पृषु सेचने—थक्। पृष्ठैः स्तोत्रैः शमनीयेन शान्तियोग्येन यज्ञेन (त्वरेत) ञित्वरा संभ्रमे वेगे च। वेगं कुर्यात् (अनिष्ट्वा) अविहितं यज्ञम् अकृत्वा (प्रैति) प्रकर्षेण गच्छति (निष्क्रीय) मूल्येन गृहीत्वा ॥

ब्रूयात् ९, कथमेषां मिथुनमनन्तरितं भवति हिङ्कारेणेति ब्रूयात् १०, स एष: संवत्सरे यज्ञक्रतूनुपैति ११, स य एवमेतान् संवत्सरे यज्ञक्रतूनुपैति वेद यज्ञेन सात्मा सलोको भूत्वा देवान्[1] अप्येतीति ब्राह्मणम् १२ ॥ ९ ॥

कण्डिका ९ ॥ संवत्सर यज्ञ में आवश्यक कर्मों का विधान ॥

(यद् वै संवत्सराय संवत्सरसदः दीक्षन्ते कथम् एषाम् अग्निहोत्रम् अनन्तरितं भवति, व्रतेन इति ब्रूयात् १) जब संवत्सर यज्ञ के लिये संवत्सर में बैठने वाले लोग दीक्षा लेते हैं, कैसे इनका अग्निहोत्र निरन्तर [लगातार] होता है—व्रत से, यह कहना चाहिये । १ । (**कथम् एषां दर्शः अनन्तरितः भवति, दध्ना च पुरोडाशेन च इति ब्रूयात् २**) कैसे इनका अमावस्या का यज्ञ निरन्तर होता है—दही से और पुरोडाश से, यह कहना चाहिये । २ । (**कथम् एषां पौर्णमासम् अनन्तरितं भवति, आज्येन च पुरोडाशेन च इति ब्रूयात् ३**) कैसे इनका पूर्णमासी का यज्ञ निरन्तर होता है—घी से और पुरोडाश से, ऐसा कहना चाहिये । ३ । (**कथम् एषाम् आग्रयणम् अनन्तरितं भवति, सौम्येन चरुणा इति ब्रूयात् ४**) कैसे इनका आग्रयण [नये अन्न का यज्ञ] निरन्तर होता है—सौम्य [सोमलता वा ओषधियों वाले] चरु [हव्य अन्न] से: यह कहना चाहिये । ४ । (**कथम् एषां चातुर्मास्यानि अनन्तरितानि भवन्ति, पयसा इति ब्रूयात् ५**) कैसे इनके चातुर्मास्य [चार महीने में पूरे होने वाले यज्ञ] निरन्तर होते हैं—दूध से, यह कहना चाहिये । ५ । (**कथम् एषां पशुबन्धः अनन्तरितः भवति, पशुना च पुरोडाशेन च इति ब्रूयात् ६**) कैसे इनका पशुबन्ध [पशुओं के प्रबन्ध वाला] यज्ञ निरन्तर होता है—पशु से और पुरोडाश से, यह कहना चाहिये । ६ । (**कथम् एषां सौम्यः अध्वरः अनन्तरितः भवति, ग्रहैः इति ब्रूयात् ७**) कैसे इनका सौम्य [सोमलता वा ओषधियों वाला] अध्वर [हिंसा रहित यज्ञ] निरन्तर होता है—ग्रहों [ग्रहण साधनों] से, यह कहना चाहिये । ७ । (**कथम् एषां गृहमेधः अनन्तरितः भवति, धानाकरम्भैः इति ब्रूयात् ८**) कैसे इनका गृहमेध [गृहाश्रम यज्ञ] निरन्तर होता है—धाना और करम्भों [भुने जवों और दही में सने सक्तुओं] से, यह कहना चाहिये । ८ । (**कथम् एषां पितृयज्ञः अनन्तरितः भवति, औपासनैः इति ब्रूयात् ९**) कैसे इनका पितृयज्ञ [पितरों का सत्संग आदि] निरन्तर होता है—उपासना कर्मों से, यह कहना चाहिये । ९ । (**कथम् एषां मिथुनम् अनन्तरितं भवति, हिङ्कारेण इति ब्रूयात्**

९—(अनन्तरितम्) अव्यवहितम् । निरन्तरम् (सौम्येन) सोमलतायुक्तेन अमृतमयेन (चरुणा) हव्यान्नेन (पयसा) दुग्धेन (अध्वरः) हिंसारहितो यज्ञः (गृहमेधः) गृहे मेधा धारणावती बुद्धिर्यस्य सः । गृहाश्रमः (धानाकरम्भैः) धापॄवस्यज्यतिभ्यो नः (उ० ३ । ६) दधातेः—नः । टाप् । धानाः भृष्टयवाः । करम्भः । केन जलेन रभ्यते मिश्रीक्रियते । अकर्तरि च कारके संज्ञायाम् (पा० ३ । ३ । १९) क+रभ आरम्भे—घञ् । रभेरशब्लिटोः (पा० ७ । १ ६३) इति नुम् । दधिमिश्रितसक्तवः । भृष्टयवदधिमिश्रितसक्तुभिः (औपा-

---

१. पू. सं. "देवाँ॥" इति पाठः ॥ सम्पा० ॥

१०) कैसे इनका मिथुन [स्त्री पुरुषों का कर्तव्य कर्म] निरन्तर होता है—हिङ्कार [वैदिक व्यवहार] से, यह कहना चाहिये । १० । (सः एषः संवत्सरे यज्ञक्रतून् उपैति ११) यही पुरुष संवत्सर में यज्ञ कर्मों को स्वीकार करता है । (यः एवं संवत्सरे एतान् यज्ञक्रतून् उपैति स वेद यज्ञेन सात्मा सलोकः भूत्वा देवान् अप्येति इति ब्राह्मणम् १२) जो इस प्रकार संवत्सर में इन यज्ञ कर्मों को स्वीकार करता है, वह जानता है और यज्ञ के साथ एक आत्मा वाला और एक निवास वाला होकर दिव्य गुणों को पाता है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ ९ ॥

भावार्थः—विधिपूर्वक कर्म करने से मनुष्य कृतकार्य होता है ॥ ९ ॥

कण्डिका १० ॥

देवा ह वै सहस्रसंवत्सराय दिदीक्षिरे, तेषां पञ्चशतानि संवत्सराणां पर्युपेतान्यासन्नथेदं सर्वं शुश्रुवुर्ये स्तोमा यानि पृष्ठानि यानि शस्त्राणि ते देवा इह सामिवासुरुप तं यज्ञक्रतुं जानीमो यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति तदयातयाममध्ये यज्ञमपश्यंस्तेनायातयामतामापेरे व्युष्टिरासीत्तां पञ्चस्वपश्यदृचि यजुषि साम्नि शान्तेऽथ घोरे, ता वा एताः पञ्च व्याहृतयो भवन्ति ओं श्रावयास्तु श्रौषड् यज ये यजामहे वौषडिति । १ । ते देवा इह सामिवासुरुप तं यज्ञक्रतुं जानीमो यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति तत एतन्तापश्चितं सहस्रसंवत्सरस्याञ्जस्यमपश्यंस्ते ह्येव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि स खलु द्वादशमासान् दीक्षाभिरेति द्वादशमासानुपसद्भिर्द्वादशमासान् सुत्याभिरथ यद् द्वादशमासान् दीक्षाभिरेति द्वादशमासानुपसद्भिस्तेनैतावग्न्यर्कावाप्नोति अथ यद् द्वादशमासान् सुत्याभिस्तेनेदं महदुक्थ्यमवाप्नोति । २ । ते देवा इह सामिवासुरुप तं यज्ञक्रतुं जानीमो यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति तत एतं संवत्सरन्तापश्चित्तमाञ्जस्यमपश्यंस्ते ह्येव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि । ३ । ते देवा इह सामिवासुरुप तं यज्ञक्रतुं जानीमो यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति तत एतं द्वादशाहं संवत्सरस्याञ्जस्यमपश्यंस्ते ह्येव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि स खलु द्वादशाहं दीक्षाभिरेति द्वादशाहमुपसद्भिर्द्वादशाहं सुत्याभिरथ यद् द्वादशाहं दीक्षाभिरेति द्वादशाहमुपसद्भिस्तेनैतावग्न्यर्कावाप्नोत्यथ यद् द्वादशाहं सुत्याभिस्तेनेदं महदुक्थ्यमवाप्नोति । ४ । ते देवा इह सामिवासुरुप तं यज्ञक्रतुं जानीमो यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति तत एतं पृष्ठ्यं षडहं द्वादशाह-

---

सनैः) उपासना—अण् । भक्तिकर्मभिः (मिथुनम्) स्त्रीपुरुषाभ्यां कर्तव्य—कर्म (यज्ञक्रतून्) क्रतुः कर्मनाम—निघ० २ । १ । यज्ञकर्माणि (उपैति) स्वीकरोति ॥

स्याञ्जस्यमपश्यंस्ते ह्येव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि । ५ । ते देवा इह सामिवासुरुप तं यज्ञक्रतुं जानीमो यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति तत एतं विश्वजितं पृष्ठ्यं षडह-स्याञ्जस्यमपश्यंस्ते ह्येव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि । ६ । ते देवा इह सामिवासुरुप तं यज्ञक्रतुं जानीमो यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति स वा एष विश्वजिद् यः सहस्र-संवत्सरस्य प्रतिमैष ह प्रजानां प्रजापतिर्यद्विश्वजिदिति ब्राह्मणम् । ७ ॥ १० ॥

कण्डिका १० ॥ सहस्र संवत्सर यज्ञ और उस के स्थानापन्न विश्वजित् यज्ञ के विषय में कथा ॥

(देवाः ह वै सहस्रसंवत्सराय दिदीक्षिरे) देवताओं [विद्वानों] ने सहस्रसंवत्सर [सहस्र वर्ष के यज्ञ] के लिये दीक्षा ली । (तेषां संवत्सराणां पंचशतानि पर्युपेतानि आसन्) उन के पांच सौ वर्ष व्यतीत हो गये थे । (अथ इदं सर्वं शुश्रुवुः ये स्तोमाः यानि पृष्ठानि यानि शस्त्राणि) उन्होंने यह सब सुने जो स्तोम, जो पृष्ठ [वैदिक स्तोत्र] और जो शस्त्र [वैदिक स्तोत्र] हैं । (ते देवाः इह सामिवासुः, तं यज्ञक्रतुम् उपजानीमः । यः सहस्रसंवत्सरस्य प्रतिमा कः हि तस्मै मनुष्यः यः सहस्रसंवत्सरेण यजेत इति) वे विद्वान् लोग इस पर व्याकुलता में रहने वाले [हुये] उस यज्ञ कर्म को हम जान लेवें जो सहस्रसंवत्सर का प्रतिमा [स्थानापन्न] है, कौन सा वह मनुष्य है जो सहस्रसंवत्सर से यज्ञ करे । (तत् अयातयाममध्ये यज्ञम् अपश्यन्) सो उन्होंने उचित समय के न खोने में यज्ञ को देखा । (तेन अयातयाम्यम् आपेदे व्युष्टिः आसीत् तां पंचसु अपश्यत् ऋचि यजुषि साम्नि शान्ते अथ घोरे ताः वै एताः पंच व्याहृतयः भवन्ति ओं श्रावय, अस्तु श्रौषट्, यज, ये यजामहे, वौषट् इति १) उस से उचित समय के न खोने को उस [यजमान] ने पाया, प्रकाश हुआ, उस [प्रकाश] को पांच में देखा—ऋचा [स्तुति योग्य विद्या] में, यजुः [संगतिकरण विद्या] में साम [मोक्ष विद्या] में, शान्त [शान्तिमय विद्या] में और घोर [पाप नाश करने के लिये भयानक विद्या] में, वे ही यह पांच व्याहृतियां हैं—ओं श्रावय [ओम्, तू सुना], अस्तु श्रौषट् [श्रवण होवे], यज [यज्ञ कर], ये यजामहे [जो हम लोग यज्ञ करते हैं], वौषट् [आहुति पहुंचे—देखो आगे कण्डिका २१] । १ । (ते देवाः इह सामिवासुः, तं यज्ञक्रतुम् उपजानीमः यः सहस्र-संवत्सरस्य प्रतिमा, कः हि तस्मै मनुष्यः यः सहस्रसंवत्सरेण यजेत इति) वे विद्वान् लोग इस पर व्याकुलता में रहने वाले [हुये]—उस यज्ञ कर्म को हम जान लेवें जो सहस्र संवत्सर का स्थानापन्न है, कौन सा वह मनुष्य है, जो सहस्र संवत्सर से

१०—(देवाः) विद्वांसः (दिदीक्षिरे) दीक्षां चक्रिरे । दीक्षां प्राप्तवन्तः (पर्युपेतानि) सर्वतो व्यतीतानि (इह) अस्मिन् विषये (सामिवासुः) वसि-वपियजिराजि० (उ० ४ । १२५) षम वैकल्ये अवैकल्ये च—इञ् । कृवापा० (उ० १ । १) वस निवासे—उण्, बहुवचनस्यैकवचनम् । सामिवासवः ।

यज्ञ करे। (ततः सहस्रसंवत्सरस्य एतं तापश्चितम् आञ्जस्यम् अपश्यन् ते हि एव स्तोमाः भवन्ति तानि पृष्ठानि तानि शस्त्राणि) फिर उन्होंने सहस्र संवत्सर के इस तप से जाने गये गति व्यवहार को देखा, वे ही स्तोम, वे ही पृष्ठ, वे ही शस्त्र हैं। (सः खलु द्वादशमासान् दीक्षाभिः एति, द्वादशमासान् उपसद्भिः, द्वादशमासान् सुत्याभिः) वह [यजमान] निश्चय करके बारह महीनों को दीक्षाओं से पाता है, बारह महीनों को उपसदों [उपासना यज्ञों] से, और बारह महीनों को सुत्याओं [सोम निचोड़ने की क्रियाओं] से। (अथ यत् द्वादशमासान् दीक्षाभिः एति द्वादशमासान् उपसद्भिः तेन एतौ अग्न्यर्कौ आप्नोति, अथ यत् द्वादशमाशान् सुत्याभिः, तेन इदं महत् उक्थ्यम् अवाप्नोति २) फिर जब वह बारह महीनों को दीक्षाओं से पाता है और बारह महीनों को उपसदों से, उससे इन अग्नि और सूर्य [के बल] को पाता है, और जब बारह महीनों को सुत्याओं [सोम निचोड़ने की क्रियाओं] से [पाता है], उससे इस बड़े उक्थ्य [प्रशंसनीय व्यवहार] को पाता है। २। (ते देवाः इह सामिवासुः तं यज्ञक्रतुम् उपजानीमः यः सहस्रसंवत्सरस्य प्रतिमा, कः हि तस्मै मनुष्यः यः सहस्रसंवत्सरेण यजेत इति) वे विद्वान् लोग इस पर व्याकुलता में रहने वाले [हुये] उस यज्ञ कर्म को हम जान लेवें जो सहस्रसंवत्सर का स्थानापन्न है, कौन सा वह मनुष्य है जो सहस्रसंवत्सर से यज्ञ करे। (ततः एतं संवत्सरं तापश्चित्तम् आञ्जस्यम् अपश्यन् ते हि एव स्तोमाः भवन्ति तानि पृष्ठानि तानि शस्त्राणि ३) फिर उन्होंने इस संवत्सर के तप से जाने गये गति व्यवहार को देखा, वे ही स्तोम, वे ही पृष्ठ और वे ही शस्त्र हैं। ३। (ते देवाः इह सामिवासुः तं यज्ञक्रतुम् उपजानीमः यः सहस्रसंवत्सरस्य प्रतिमा, कः हि तस्मै मनुष्यः यः सहस्रसंवत्सरेण यजेत इति) वे विद्वान् लोग इस पर व्याकुलता में रहने वाले [हुये] उस यज्ञकर्म को हम जान लेवें जो सहस्रसंवत्सर का स्थानापन्न है, कौन सा वह मनुष्य है जो सहस्रसंवत्सर से यज्ञ करे। (ततः एतं द्वादशाहं संवत्सरस्य आञ्जस्यम् अपश्यन् ते हि एव स्तोमाः भवन्ति तानि पृष्ठानि तानि शस्त्राणि) फिर उन्होंने इस द्वादशाह [बारह दिन वाले [संवत्सर के गति व्यवहार को देखा, वे ही स्तोम, वे ही पृष्ठ और वे ही शस्त्र हैं। (सः खलु द्वादशाहं दीक्षाभिः एति, द्वादशाहम् उपसद्भिः, द्वादशाहं सुत्याभिः) वह [यजमान] द्वादशाह यज्ञ को दीक्षाओं से पाता है, द्वादशाह को उपसदों से और द्वादशाह को सुत्याओं से। (अथ यत् द्वादशाहं

वैकल्ये निवासिनः, बभूवुः इति शेषः (यज्ञक्रतुम्) यज्ञकर्म (प्रतिमा) स्थानापन्नः (तस्मै) चतुर्थी प्रथमायाः। सः (अयातयाममध्ये) अनष्टयोग्यसमयमध्ये (अयातयाम्यम्) उचितसमयनाशराहित्यम् (आपेदे) यजमानः प्राप्तवान् (व्युष्टिः) वि+वस निवासे यद्वा उषवधे दाहे च—क्तिन्। दीप्तिः। प्रकाशः (ऋचि) स्तुत्यविद्यायाम् (यजुषि) संगतिकरणविद्यायाम् (साम्नि) मोक्षविद्यायाम् (शान्ते) शान्तिविद्यायाम् (घोरे) भयानकविद्यायां पापनाशाय (श्रौषट्) श्रु श्रवणे—डौषट्। व्याहृतिविशेषः (वौषट्) वह प्रापणे—डौषट।

दीक्षाभिः एति द्वादशाहम् उपसद्भिः तेन एतौ अग्न्यर्कौ आप्नोति, अथ यत् द्वादशाहं सुत्याभिः, तेन इदं महत् उक्थ्यम् अवाप्नोति ४) फिर जब वह द्वादशाह को दीक्षाओं से पाता है और द्वादशाह को उपसदों से, उससे इन अग्नि और सूर्य [के बल] को पाता है, और जब द्वादशाह को सुत्याओं से [पाता है], उससे इस बड़े उक्थ्य [प्रशंसनीय व्यवहार] को पाता है । ४ । (ते देवाः इह सामिवासुः तं यज्ञक्रतुम् उप जानीमः यः सहस्रसंवत्सरस्य प्रतिमा, कः हि तस्मै मनुष्यः यः सहस्रसंवत्सरेण यजेत इति) वे विद्वान् लोग इस पर व्याकुलता में रहने वाले [हुये], उस यज्ञ कर्म को हम जान लेवें जो सहस्रसंवत्सर का स्थानापन्न है, कौन सा वह मनुष्य है जो सहस्रसंवत्सर से यज्ञ करे । (ततः एतं पृष्ठ्यं स्तोमाः भवन्ति तानि पृष्ठानि तानि शस्त्राणि ५) फिर उन्होंने इस पृष्ठ्य षडह द्वादशाह के गति व्यवहार को देखा, वे ही स्तोम, वे ही पृष्ठ्य, वे ही शस्त्र हैं । ५ । (ते देवाः इह सामिवासुः तं यज्ञक्रतुम् उपजानीमः यः सहस्रसंवत्सरस्य प्रतिमा, कः हि तस्मै मनुष्यः यः सहस्रसंवत्सरेण यजेत इति) वे विद्वान् लोग इस व्याकुलता में रहने वाले [हुये] उस यज्ञ कर्म को हम जान लेवें जो सहस्रसंवत्सर का स्थानापन्न है, कौन सा वह मनुष्य है जो सहस्रसंवत्सर से यज्ञ करे । (ततः एतं विश्वजितं पृष्ठ्यं षडहस्य आञ्जस्यम् अपश्यन्, ते हि एव स्तोमाः भवन्ति तानि पृष्ठानि तानि शस्त्राणि ६) फिर उन्होंने इस विश्वजित् पृष्ठ्य षडह के गति व्यवहार को देखा, वे ही स्तोम, वे ही पृष्ठ और वे ही शस्त्र हैं । ६ । (ते देवाः इह सामिवासुः तं यज्ञक्रतुम् उपजानीमः यः सहस्रसंवत्सरस्य प्रतिमा, कः हि तस्मै मनुष्यः यः सहस्रसंवत्सरेण यजेत इति) वे विद्वान् लोग इस पर व्याकुलता में रहने वाले [हुये] उस यज्ञ कर्म को हम जान लेवें जो सहस्रसंवत्सर का स्थानापन्न है, कौन सा वह मनुष्य है जो सहस्रसंवत्सर से यज्ञ करे । (सः वै एषः विश्वजित् यः सहस्रसंवत्सरस्य प्रतिमा एषः ह प्रजानां प्रजापतिः यत् विश्वजित् इति ब्राह्मणम्) वह ही यह विश्वजित् है जो सहस्रसंवत्सर का स्थानापन्न है, यही प्रजाओं में प्रजापति है जो विश्वजित् है यह ब्राह्मण [ब्रह्मज्ञान] है । ७ ॥ १० ॥

भावार्थः—मनुष्य अपना सामर्थ्य विचार कर कार्य आरम्भ करे ॥ १० ॥

कण्डिका ११ ॥

पुरुषं ह वै नारायणं प्रजापतिरुवाच यजस्व यजस्वेति स होवाच यजस्व यजस्वेत्येवं हात्थ मात्रिरयक्षतेमे वसवः प्रातःसवनेनागू रुद्रा माध्यन्दिने सवने आदित्यास्तृतीयसवने यज्ञवास्तुन्येव पर्य्यशिषो यज्ञवास्तुमित्येवमाशिषोऽहं वा

व्याहृतिविशेषः (तापश्चित्तम्) तपस् + चिती संज्ञाने—क्तः । स्वार्थिकोऽण् तपसा ज्ञातम् (आञ्जस्यम्) अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु—असुन्, अञ्जस्—ष्यञ् । गतिव्यवहारम् (उपसद्भिः) उपासनायज्ञैः (सुत्याभिः) सोमाभिषवक्रियाभिः (उक्थ्यम्) कथनीयम् । स्तुत्यम् ॥

एतद्वेद यज्ञे वसवः प्रातःसवनेनागू रुद्रा माध्यन्दिने सवने आदित्यास्तृतीयसवने यज्ञवास्तुन्येव पर्य्यशिषो यज्ञवास्तुमित्येवमाशिषो विद्वांसो नूनं त्वा याजयेयुरेते ह वा अविद्वांसो यत्रानृग्विद् होता भवत्ययजुर्विदध्वर्युरसामविदुद्गाताभृग्वङ्गिरोविद् ब्रह्मा यजस्वैव हन्त तु ते तद्वक्ष्यामि यथा सूत्रे मणिरिव सूत्रमेतान्युक्थाहानि भवन्ति सूत्रमिव वा मणाविति तस्माद्य एव सर्ववित्स्यात् तं ब्रह्माणं कुर्वीतैष ह वै विद्वान् सर्वविद् ब्रह्मा यद् भृग्वङ्गिरोविदेते ह वा अस्य सर्वस्य शमयितारः पालयितारस्तस्माद् ब्रह्मा स्तुते बहिःपवमाने वाचयति ॥ ११ ॥

कण्डिका ११ ॥ ऋत्विजों की योग्यता के विषय में प्रजापति और नारायण की कथा ॥

(प्रजापतिः नारायणं पुरुषं ह वै उवाच, यजस्व यजस्व इति) प्रजापति [नाम वाला] नारायण [नाम वाले, मनुष्यों के लिये ज्ञान वाले] पुरुष से बोला—तू यज्ञ कर तू यज्ञ कर । (सः ह उवाच यजस्व यजस्व इति एवं ह आत्थ, अत्रिः मा अयक्षत, इमे वसवः प्रातःसवनेन, रुद्राः माध्यन्दिने सवने, आदित्याः तृतीयसवने आगुः, यज्ञवास्तुनि एव यज्ञवास्तुं पर्यशिषः इति) वह [नारायण] भी बोला—तू यज्ञ कर तू यज्ञ कर, ऐसा ही तू कहता है, [सो] खवैये [स्वार्थी लोग] यज्ञ न करें, यह वसु [श्रेष्ठ पुरुष] प्रातःसवन में, रुद्र [पापियों को रुलाने वाले अथवा ज्ञान देने वाले लोग] माध्यन्दिन सवन में, और आदित्य [अखण्डव्रती ब्रह्मचारी लोग] तृतीय सवन में आवें । यज्ञभूमि में ही [इनके लिये] यज्ञगृह नियत कर । (एवम् आशिषः अहं वै एतत् वेद, यज्ञे वसवः प्रातःसवनेन, रुद्राः माध्यन्दिने सवने आदित्याः तृतीये सवने आगुः, यज्ञवास्तुनि एव यज्ञवास्तुं पर्यशिषः इति) [प्रजापति बोला] इस प्रकार से आशीर्वादों को मैं भी यहां जानता हूं, यज्ञ में वसु लोग प्रातःसवन में, रुद्र लोग माध्यन्दिन सवन में, और आदित्य लोग तृतीय सवन में आवें, यज्ञभूमि में ही [इनके लिये] यज्ञगृह नियत कर [यह जो तू कहता है]। (एवम् आशिषः विद्वांसः नूनं त्वा याजयेयुः) इस प्रकार आशीर्वाद जानने वाले पुरुष निश्चय करके तुझ [नारायण] से यज्ञ करावें । (एते ह वै अविद्वांसः यत्र अनृग्वित् होता, अयजुर्वित् अध्वर्युः, असामवित्

११–(नारायणम्) नर—अण् समूहार्थे इण् वा अय गतौ—ल्युट् । नाराय नरसमूहाय अयनं ज्ञानं यस्य तम् । मनुष्यविशेषम् (प्रजापतिः) प्रजापालकः । मनुष्यविशेषः (आत्थ) ब्रूञ् व्यक्तायां वाचि—लट् । त्वं कथयसि (अत्रिः) अदेस्त्रिनिश्च (उ० ४ । ६८) अद भक्षणे—त्रिप् । अत्रयः । भक्षणशीलाः (वसवः) श्रेष्ठा विद्वांसः (रुद्राः) रोदेर्णिलुक् च (उ० २ । २२) रोदयतेः—रक् णेर्लुक् । यद्वा रु गतौ वधे च—क्विप्, तुगागमः+रा दानेकः । पापिनां रोदयितारः । रुतः ज्ञानस्य दातारः (आदित्याः) अखण्डव्रतिब्रह्मचारिणः (यज्ञवास्तुनि) वसेरगारे णिच्च (उ० १ । ७०) वस निवासे—

उद्गाता अभृग्वङ्गिरोवित् ब्रह्मा भवति) वे ही अजानकार लोग होते हैं जहां ऋग्वेद [स्तुति विद्या] न जानने वाला होता, यजुर्वेद [संगतिकरण विद्या] न जानने वाला अध्वर्यु, सामवेद [मोक्षविद्या] न जानने वाला उद्गाता, और भृगु—अङ्गिराओं [प्रकाशमान ज्ञान वाले चारों वेदों] को न जानने वाला ब्रह्मा होता है। (यजस्व एव हन्त तु ते तत् वक्ष्यामि यथा सूत्रे मणिः इव, वा सूत्रम् इव मणौ, सूत्रम् एतानि उक्थाहानि भवन्ति, तस्मात् यः एव सर्ववित् स्यात् तं ब्रह्माणं कुर्वीत) तू यज्ञ ही कर, अरे भाई, तुझसे यह कहता हूं, क्योंकि सूत में मणि के समान अथवा मणि में सूत के समान [यह व्यवहार है], सूत यह सब उक्थाहानि [प्रधान स्तोत्रों के दिन] हैं [और मणि के समान याजक लोग हैं], इसलिये जो ही सब जानने वाला होवे, उसको ब्रह्मा बनावे, (एष ह वै विद्वान् सर्ववित् ब्रह्मा यत् भृग्वङ्गिरोवित्) यही विद्वान् सब जानने वाला ब्रह्मा होवे जो भृगु अङ्गिराओं [प्रकाशमान ज्ञान वाले चारों वेदों] को जानने वाला है। (एते ह वै अस्य सर्वस्य शमयितारः पालयितारः) यह ही [वेदवेत्ता लोग] इस सब यज्ञ के शान्ति देने वाले और पालन करने वाले हैं। (तस्मात् ब्रह्मा स्तुते बहिःपवमाने वाचयति) इस लिये ब्रह्मा स्तुति किये हुये बहिःपवमान [इस नाम वाले स्तोत्र] में यह बचता है [आगे क० १२ देखो] ॥ ११ ॥

भावार्थः—होता, अध्वर्यु, उद्गाता और ब्रह्मा के विषय में गो० पू० २। १८ देखो ॥ ११ ॥

कण्डिका १२ ॥

श्येनोऽसि गायत्रच्छन्दा अनु त्वारभे स्वस्ति मा सम्पारयेति । १ । स यदाह श्येनोऽसीति सोमं वा एतदाहैष ह वा अग्निर्भूत्वाऽस्मिंल्लोके संश्याययति । तद्यत्संश्याययति तस्माच्छ्येनस्तच्छ्येनस्य श्येनत्वं । २ । स यदाह गायत्रच्छन्दा अनु त्वारभ इति गायत्रेण च्छन्दसा वसुभिर्देवैः प्रातःसवनेऽस्मिंल्लोकेऽग्निं सन्तमन्वारभते । ३ । स यदाह स्वस्ति मा सम्पारयेति गायत्रेणैव च्छन्दसा वसुभिर्देवैः प्रातःसवनेऽस्मिंल्लोकेऽग्निना देवेन स्वस्ति मा सम्पारयेति । ४ । गायत्रेणैवैनन्तच्छन्दसा वसुभिर्देवैः प्रातःसवनेऽस्मिंल्लोकेऽग्निना देवेन स्वस्ति सम्पद्यते य एवं वेद । ५ ॥ १२ ॥

तुन् णित् । यज्ञभूमौ (पर्यशिषः) शिष्लृ विशेषणे—लुङ् लोडर्थे । परितः सर्वतः विशिष्टं नियतं कुरु (यज्ञवास्तुम्) यज्ञगृहम् (आशिषः) आशीर्वादान् । कल्याणवचनानि (वेद) जानामि (आगुः) आ—अगुः । आ+इण् गतौ—लुङ् लिङर्थे । आगच्छेयुः (विद्वांसः) जानन्तः (याजयेयुः) यज्ञं कारयेयुः (अभृग्वङ्गिरोवित्) भृगून् प्रकाशमानान् अङ्गिरसो वेदान् न वेत्ति जानाति सः (उक्थाहानि) वच परिभाषणे –थक् । प्रधानस्तोत्रदिनानि (शमयितारः) शान्तिकर्तारः (बहिःपवमाने) बहिष्पवमाने । एतन्नामके स्तोत्रे ॥

कण्डिका १२ ॥ प्रातःसवन की स्तुति का मन्त्र सोम विषय में ॥

(गायत्रच्छन्दाः श्येनः असि, त्वा अनु आरभे, स्वस्ति मा संपारय इति १) [इस मन्त्र को ब्रह्मा पढ़ता है-क० ११] तू गाने योग्य आनन्द कर्मों वाला महाज्ञानी परमात्मा है, तुझको निरन्तर मैं ग्रहण करता हूं, कल्याण के साथ मुझको तू यथावत् पार लगा । १ । (सः यत् आह श्येनः असि इति, सोमं वै एतत् आह) वह जो यह कहता है-तू श्येन [महाज्ञानी परमात्मा] है-इस से वह सोम [सर्वजनक अथवा सर्वेश्वर परमात्मा] को ही बताता है । (एषः ह वै अग्निः भूत्वा अस्मिन् लोके संश्याययति) यह ही [परमात्मा] अग्नि [तेजस्वी वा व्यापक] होकर इस लोक में चलता रहता है । (तत् यत् संश्याययति तस्मात् श्येनः, तत् श्येनस्य श्येनत्वम् २) सो जो वह चलता रहता है, इसी से वह श्येन [महाज्ञानी परमात्मा] है, यही महाज्ञानी का महाज्ञानीपन है । २ । (सः यत् आह गायत्रच्छन्दाः अनु त्वा आरभे इति गायत्रेण छन्दसा वसुभिः देवैः प्रातःसवने अस्मिन् लोके अग्निं सन्तम् अनु आरभते ३) वह जो कहता है-तू गाने योग्य आनन्द कर्मों वाला है तुझको निरन्तर मैं ग्रहण करता हूं-इस गाने योग्य आनन्द कर्म से वसुदेवों [श्रेष्ठ विद्वानों] के साथ प्रातःसवन के समय इस लोक में [पृथिवी पर] अग्नि [तेजस्वी वा व्यापक परमात्मा] होते हुये को वह निरन्तर ग्रहण करता है । ३ । (सः यत् आह स्वस्ति मा सम्पारय इति, गायत्रेण एव छन्दसा वसुभिः देवैः प्रातः वने अस्मिन् लोके अग्निना देवेन स्वस्तिमा संपारय इति ४) वह जो [ब्रह्मा] कहता है-कल्याण के साथ मुझको तू यथावत् पार लगा-इस से वह गाने योग्य आनन्द कर्म से वसुदेवों [श्रेष्ठ विद्वानों] के साथ प्रातःसवन के समय इस लोक में अग्नि देव [तेजस्वी परमात्मा] के साथ वह कल्याण से पार लगता है । ४ । (तत् एन गायत्रेण एव छन्दसा वसुभिः देवैः प्रात सवने अस्मिन् लोके अग्निना देवेन स्वस्ति सम्पद्यते यः एवं वेद ५) सो उस पुरुष को गाने योग्य ही आनन्द कर्म से वसुदेवों

१२-(श्येनः) श्यास्त्याह्वञविभ्य इनच् (उ० २ । ४६) श्यैङ् गतौ-इनच् । श्येनः शंसनीयं गच्छति-निरु० ४ । २४ । श्येन आदित्यो भवति श्यायतेर्गतिकर्मणः । श्येन आत्मा भवति श्यायतेर्ज्ञानकर्मणः-निरु० १४ । १३ । महाज्ञानी परमात्मा (गायत्रच्छन्दाः) अमिनक्षियजि० (उ० ३ । १०५) गै शब्दे-अत्रन् णित् । आतो युक् चिण्कृतोः (पा० ७ । ३ । ३३) इति युक् । गायत्रं गायतेः स्तुतिकर्मणः-निरु० १ । ८ । चन्देरादेश्च छः (उ० ४ । २१९) चदि आह्लादने-असुन्, चस्य छः । छन्दति अर्चतिकर्मा-निघ० ३ । १४ । गायत्राणि गानयोग्यानि छन्दांसि आह्लादकर्माणि यस्य सः (अनु) निरन्तरम् (आरभे) परिगृह्णामि । आश्रयामि (स्वस्ति) कल्याणेन (मा) माम् (सम्) सम्यक् (पारय) पार कर्मसमाप्तौ-लोट् । परतीरे गमय (सोमम्) अर्तिस्तुसुहु० । (उ० १ । १४०) षुञ् अभिषवे, षु प्रसवैश्वर्ययोः-मन् । सोमः सूर्यः प्रसवनात्, सोम आत्माप्येतस्मादेव-निरु० १४ । १२ । सर्वजनकं सर्वेश्वरं परमात्मानम् (अग्निः) तेजस्वी । सर्वव्यापकः (संश्याययति) श्यैङ् गतौ-णिच् स्वार्थे । सम्यक् गच्छति, जानाति व्याप्नोति

[श्रेष्ठ विद्वानों] के साथ प्रातःसवन के समय इस लोक में अग्निदेव [व्यापक परमात्मा] के साथ कल्याण समृद्ध करता है, जो ऐसा जानता है । ५ । ॥ १२ ॥

भावार्थः--परमेश्वर ज्ञान को मुख्य समझ कर मनुष्य को अपना कर्तव्य करना चाहिए ॥ १२ ॥

विशेषः--श्येनोऽसि''', यह अथर्ववेद ६ । ४८ । १ । के तीन पाद हैं, [पारय] पद के स्थान पर वेद में [वह] पद है ॥

कण्डिका १३ ॥

अथ माध्यन्दिने पवमाने वाचयति सम्राडसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा सम्पारयेति । १ । स यदाह सम्राडसीति सोमं वा एतदाहैष ह वै वायुर्भूत्वाऽन्तरिक्षलोके सम्राजति, तद्यत् सम्राजति तस्मात्सम्राट् तत् सम्राजस्य सम्राट्त्वं । २ । स यदाह त्रिष्टुप्छन्दा अनु त्वारभ इति त्रैष्टुभेण छन्दसा रुद्रैर्देवैर्माध्यन्दिने सवनेऽन्तरिक्षे लोके वायुं सन्तमन्वारभते । ३ । स यदाह स्वस्ति मा सम्पारयेति त्रैष्टुभेणैव च्छन्दसा रुद्रैर्देवैर्माध्यन्दिने सवनेऽन्तरिक्षलोके वायुना देवेन स्वस्ति मा सम्पारयेति । ४ । त्रैष्टुभेणैवैनं तच्छन्दसा रुद्रैर्देवैर्माध्यन्दिने सवनेऽन्तरिक्षलोके वायुना देवेन स्वस्ति सम्पद्यते य एवं वेद । ५ ॥ १३ ॥

कण्डिका १३ ॥ माध्यन्दिन सवन की स्तुति का मन्त्र सोम विषय में ॥

(अथ माध्यन्दिने पवमाने वाचयति, त्रिष्टुप्छन्दाः सम्राट असि त्वा अनु आरभे स्वस्ति मा संपारय इति १) फिर माध्यन्दिन पवमान में वह [ब्रह्मा] बांचता है--तू तीनों [आध्यात्मिक, आधिभौतिक और आधिदैविक] ताप रोकने में समर्थ सम्राट् [राजराजेश्वर परमात्मा] है, तुझको निरन्तर मैं ग्रहण करता हूं, कल्याण के साथ मुझको तू यथावत् पार लगा । १ । (सः यत् आह सम्राट असि इति सोमं वै एतत् आह) वह जो यह कहता है–तू सम्राट् [राजराजेश्वर परमात्मा] है–इस से वह सोम [सर्वजनक अथवा सर्वेश्वर परमात्मा] को ही बताता है । (एषः ह वै वायुः भूत्वा अन्तरिक्षलोके सम्राजति) यह ही [परमात्मा] वायु [अन्तर्यामी वा महाबली] होकर अन्तरिक्ष लोक [मध्य लोक] में यथावत् राज करता है । (तत् यत् सम्राजति तस्मात् सम्राट् तत् सम्राजः सम्राट्त्वं २) सो जो वह यथावत् राज करता है, इससे वह सम्राट् [राज राजेश्वर] है, यही उस सम्राट् का साम्राज्य है । २ । (सः यत् आह त्रिष्टुप्छन्दाः त्वा अनु आरभे इति, त्रैष्टुभेण छन्दसा रुद्रैः देवैःमाध्यन्दिने सवने

(श्येनत्वम्) गतिमत्त्वम् (गायत्रेण) गानयोग्येन (छन्दसा) आह्लादकर्मणा (आरभते) परिगृह्णाति (सम्पद्यते) समृद्धं करोति वर्धयति ॥

१३—(सम्राट्) राजराजेश्वरः (त्रिष्टुप्छन्दाः) ष्टुभ स्तम्भने--क्विप् । तापत्रयस्य आध्यात्मिकाधिभौतिकाधिदैविकरूपस्य स्तोभने वर्जने छन्दः स्वातन्त्र्यं यस्य सः (वायुः) गतिमान् । बलिष्ठः । वायुरिव अन्तर्यामी

अन्तरिक्षे लोके वायुं सन्तं अनु आरभते ३) वह जो कहता है--तू तीनों ताप रोकने में समर्थ [परमात्मा] है, तुझ को निरन्तर मैं ग्रहण करता हूं--तीनों ताप रोकने वाले सामर्थ्य से रुद्र देवों [पापियों को रुलाने वाले वा ज्ञान देने वाले विद्वानों] के साथ माध्यन्दिन सवन पर अन्तरिक्ष लोक में वायु [अन्तर्यामी वा महाबली परमात्मा] होते हुये को निरन्तर ग्रहण करता है । ३ । (सः यत् आह स्वस्ति मा संपारय इति त्रैष्टुभेण एव छन्दसा रुद्रैः देवैः माध्यन्दिने सवने अन्तरिक्षलोके वायुना देवेन स्वस्ति मा संपारय इति ४) वह जो कहता है–कल्याण के साथ मुझ को तू यथावत् पार लगा–तीनों ताप रोकने वाले ही सामर्थ्य से रुद्र देवों [पापियों के रुलाने वाले वा ज्ञान देने वाले विद्वानों] के साथ माध्यन्दिन सवन पर अन्तरिक्ष लोक में वायु देव [अन्तर्यामी वा महाबली परमात्मा] के साथ कल्याण से अपने को यथावत् पार करता है । ४ । (तत् एनं त्रैष्टुभेण एव छन्दसा रुद्रैः देवैः माध्यन्दिने सवने अन्तरिक्षलोके वायुना देवेन स्वस्ति संपद्यते यः एवं वेद ५) सो उस पुरुष को तीनों ताप रोकने वाले ही सामर्थ्य से रुद्र देवों [पापियों के रुलाने वाले वा ज्ञान देने वाले] विद्वानों के साथ माध्यन्दिन सवन पर अन्तरिक्ष लोक में वायु देव अन्तर्यामी [वा महाबली परमात्मा] के साथ कल्याण को वह प्राप्त करता है, जो ऐसा जानता है । ५ ॥ १३ ॥

भावार्थः - कण्डिका १२ के समान है ॥

विशेषः—सम्राडसि······, यह अथर्ववेद ६ । ४८ । ३ । के तीन पाद कुछ भेद से हैं ॥

कण्डिका १४ ॥

अथार्भवे पवमाने वाचयति स्वरोऽसि गयोऽसि जगच्छन्दा अनु त्वारभे स्वस्ति मा सम्पारयेति । १ । स यदाह स्वरोऽसीति सोमं वा एतदाहैष ह वै सूर्य्यो भूत्वाऽमुष्मिन् लोके स्वरति तद्यत् स्वरति तस्मात् स्वरस्तत् स्वरस्य स्वरत्वम् । २ । स यदाह गयोऽसीति सोमं वा एतदाहैष ह वै चन्द्रमाः भूत्वा सर्वांल्लोकान् गच्छति तद् यद् गच्छति तस्माद् गयस्तद् गयस्य गयत्वं । ३ । स यदाह जगच्छन्दा अनु त्वारभ इति जागतेन छन्दसाऽऽदित्यैर्देवैस्तृतीयसवनेऽमुष्मिन् लोके सूर्य्यं सन्तमन्वारभते । ४ । स यदाह स्वस्ति मा सम्पारयेति जागतेनैव च्छन्दसाऽऽदित्यैर्देवैस्तृतीयसवनेऽमुष्मिन् लोके सूर्य्येण देवेन स्वस्तिमा सम्पारयेति । ५ । जागतेनैवैनन्तच्छन्दसाऽऽदित्यैर्देवैस्तृतीयसवनेऽमुष्मिंल्लोके सूर्य्येण देवेन स्वस्ति सम्पद्यते य एवं वेद ॥ १४ ॥

कण्डिका १४ ॥ तृतीय सवन की स्तुति का मन्त्र सोमविषय में ॥

(अथ आर्भवे पवमाने वाचयति, जगच्छन्दाः स्वरः असि गयः असि त्वा अनु आरभे स्वस्ति मा संपारय इति १) फिर ऋभुओं [मेधावियों] के पवमान यज्ञ में वह

(सम्राजः) राजराजेश्वरस्य (सम्राट्त्वम्) साम्राज्यम् (त्रैष्टुभेण) त्रिष्टुभ्—अण् । तापत्रयनिरोधसंबन्धिनः (छन्दसा) स्वातन्त्र्येण । सामर्थ्येन (मा सम्पारय) आत्मानं सम्पारयति ॥

[ब्रह्मा] बाँचता है–तू जगत् में पूज्य परमात्मा है, सर्वगति है, तुझको निरन्तर मैं ग्रहण करता हूं, कल्याण के साथ मुझ को तू यथावत् पार लगा । १ । (सः यत् आह स्वरः असि इति सोमं वै एतत् आह) वह जो कहता है–तू पूजनीय है–इस से वह सोम [सर्वजनक अथवा सर्वेश्वर परमात्मा] को ही बताता है (एषः ह वै सूर्यः भूत्वा अमुष्मिन् लोके स्वरति) यह ही [परमात्मा] सूर्य [सर्वप्रेरक वा सूर्य समान] होकर उस लोक में पूजा जाता है । (तत् यत् स्वरति तस्मात् स्वरः, तत् स्वरस्य स्वरत्वम् २) सो जो वह पूजा जाता है, इस से पूजनीय है, वह उस पूजनीय का पूज्यपन है । २ । (सः यत् आह, गयः असि इति सोमं वै एतत् आह) वह जो कहता है–तू सर्वव्यापक परमात्मा है––इससे वह सोम [सर्वजनक अथवा सर्वेश्वर परमात्मा] को ही बताता है । (एषः ह वै चन्द्रमाः भूत्वा सर्वान् लोकान् गच्छति) यह ही [परमात्मा] चन्द्रमा [आनन्द देने वाला परमात्मा वा चन्द्र समान] होकर सब लोकों में व्यापता है । (तत् यत् गच्छति तस्मात् गयः, तद् गयस्य गयत्वम् ३) सो जो वह व्यापता है इससे वह व्यापक है, यही उस व्यापक की व्यापकता है । ३ । (सः यत् आह जगत्छन्दाः त्वा अनु आरभे इति जागतेन छन्दसा आदित्यैः देवैः तृतीयसवने अमुष्मिन् लोके सूर्यं सन्तं अनु आरभते ४) वह जो कहता है––तू जगत् में स्वतन्त्रता वाला [परमात्मा] है, तुझको निरन्तर मैं ग्रहण करता हूं––इस जगत् प्रकाशक स्वतन्त्रता से आदित्य देवों [अखण्डव्रती ब्रह्मचारियों] के साथ तृतीयसवन पर उस लोक में सूर्य [सर्वप्रेरक परमात्मा] होते हुये को वह निरन्तर ग्रहण करता है । ४ । (सः यत् आह, स्वस्ति मा संपारय इति––जागतेन एव छन्दसा आदित्यैः देवैः तृतीयसवने अमुष्मिन् लोके सूर्येण देवेन स्वस्ति मा सम्पारय इति ५) वह जो कहता है––कल्याण के साथ मुझको तू यथावत् पार लगा––इस जगत् प्रकाशक स्वतन्त्रता से आदित्य देवों [अखण्डव्रती ब्रह्मचारियों] के साथ तृतीयसवन पर उस लोक में सूर्य देव [सर्वप्रेरक परमात्मा] के साथ कल्याण से यथावत् पार लगता है । ५ । (तत् एनं जागतेन एव छन्दसा आदित्यैः देवैः तृतीयसवने अमुष्मिन् लोके सूर्येण देवेन स्वस्ति सम्पद्यते यः एवं वेद ६) सो उस पुरुष को जगत् प्रकाशक स्वतन्त्रता से आदित्य देवों [अखण्डव्रती ब्रह्मचारियों] के साथ तृतीयसवन

---

१४ (आर्भवे) ऋभु––अण् । ऋभुः=मेधावी–निघ० ३ । १५ । मेधाविनां सम्बन्धिनि (स्वरः) पुंसि संज्ञायां घः० (पा० ३ । ३ । ११८) स्वृ शब्दोपतापयोः–घः । स्वरतिरर्चतिकर्मा–निघ० ३ । १४ । पूज्यः । स्तुत्यः (गयः) अघ्न्यादयश्च (उ० ४ । ११२) गमेः–यक्, मलोपः । यद्वा गाङ् गतौ–यक्, ह्रस्वत्वम् । सर्वगतिः । सर्वव्यापकः (जगच्छन्दाः) जगति संसारे छन्दः स्वातन्त्र्यं यस्य सः (सूर्यः) षू प्रेरणे––क्यप्, रुडागमः । सर्वप्रेरकः परमात्मा । रविः (चन्द्रमाः) चन्द्रे मो डित् (उ० ४ । २२८) चन्द्र+माङ् माने–असिः डित् । चन्द्रमानन्दं मिमीतेऽसौ । आनन्दप्रदः परमात्मा । चन्द्रलोकः (जागतेन) जगत्प्रकाशकेन (छन्दसा) स्वातन्त्र्येण (सम्पद्यते) सम्यक् प्राप्नोति ॥

पर उस लोक में सूर्य देव [सर्वप्रेरक परमात्मा] के साथ कल्याण को वह प्राप्त करता है जो ऐसा जानता है। ६।॥ १४॥

भावार्थ:—पूर्ववत्॥

विशेष:—स्वरोऽसि……यह अथर्ववेद ६। ४८। ३ के तीन पाद कुछ भेद से हैं॥

कण्डिका १५॥

अथ संस्थिते संस्थिते सवने वाचयति मयि भर्गो मयि महो मयि यशो मयि सर्वमिति पृथिव्येव भर्गोऽन्तरिक्ष एव महो द्यौरेव यशोऽप एव सर्वम्। १। अग्निरेव भर्गो वायुरेव मह आदित्य एव यशश्चन्द्रमा एव सर्वं। २। वसव एव भर्गो रुद्रा एव मह आदित्या एव यशो विश्वे देवा एव सर्वं। ३। गायत्र्येव भर्गस्त्रिष्टुबेव महो जगत्येव यशोऽनुष्टुबेव सर्वं। ४। प्राच्येव भर्गः प्रतीच्येव मह उदीच्येव यशो दक्षिणैव सर्वं। ५। वसन्त एव भर्गो ग्रीष्म एव महो वर्षा एव यशः शरदेव सर्वं। ६। त्रिवृदेव भर्गः पञ्चदश एव महः सप्तदश एव यश एकविंश एव सर्वम्। ७। ऋग्वेद एव भर्गो यजुर्वेद एव महः सामवेद एव यशो ब्रह्मवेद एव सर्वं। ८। होतैव भर्गोऽध्वर्युरेव मह उद्गातैव यशो ब्रह्मैव सर्वं। ९। वागेव भर्गः प्राण एव महश्चक्षुरेव यशो मन एव सर्वम्। १०॥ १५॥

कण्डिका १५॥ संस्थित सवन में भर्ग आदि चार पदार्थों का दस प्रकार से वर्णन॥

(अथ संस्थिते संस्थिते सवने वाचयति, मयि भर्गः, मयि महः, मयि यशः मयि सर्वम् इति) अब संस्थित संस्थित [प्रत्येक समाप्त] सवन में वह [ब्रह्मा] वांचता है—मुझमें भर्ग [तेज], मुझमें महत्त्व, मुझमें यश, और मुझमें सब [ज्ञान] होवे। (पृथिवी एव भर्गः, अन्तरिक्षः एव महः, द्यौः एव यशः, अपः एव सर्वम् १) पृथिवी [भूलोक विद्या] ही तेज, अन्तरिक्ष [विद्या] ही महत्त्व, प्रकाश लोक [विद्या] ही यश और जल [विद्या] ही सब है। १। (अग्निः एव भर्गः, वायुः एव महः, आदित्यः एव यशः, चन्द्रमाः एव सर्वम् २) अग्नि [विद्या] ही तेज, वायु [विद्या] ही महत्त्व, सूर्य [विद्या] ही यश और चन्द्रमा [आनन्दप्रद विद्या] ही सब है। २। (वसवः एव भर्गः रुद्राः एव महः, आदित्याः एव यशः, विश्वे देवाः एव सर्वम् ३) वसु [श्रेष्ठ विद्वान् लोग] ही तेज, रुद्र [पापियों को रुलाने वाले विद्वान्] ही महत्त्व, आदित्य [अखण्डव्रती ब्रह्मचारी लोग] ही यश और विश्वे देवा [सब विद्वान् लोग] ही सब हैं। ३। (गायत्री एव भर्गः, त्रिष्टुप् एव महः, जगती एव यशः, अनुष्टुप् एव सर्वम् ४) गायत्री [गाने योग्य वेद विद्या] ही तेज, त्रिष्टुप् [तीन कर्म उपासना ज्ञान को स्थिर करने हारी

१५—(संस्थिते संस्थिते) प्रत्येकं समाप्ते (भर्गः) अञ्च्यञ्जियुजिभृजिभ्यः कुश्च (उ० ४। २१६) भृजी भर्जने—असुन् कुत्वं च। तेजः। प्रजा-

विद्या] ही महत्त्व, जगती [जगत् का उपकार करने वाली विद्या] ही यश और अनुष्टुप् [निरन्तर पदार्थों की स्तुति विद्या] ही सब है। ४। (प्राची एव भर्गः, प्रतीची एव महः, उदीची एव यशः, दक्षिणा एव सर्वम् ५) पूर्व दिशा [की विद्या] ही तेज, पश्चिम दिशा ही महत्त्व, उत्तर दिशा ही यश और दक्षिण दिशा ही सब है। ५। (वसन्तः एव भर्गः, ग्रीष्मः एव महः, वर्षाः एव यशः, शरद् एव सर्वम् ६) वसन्त ऋतु ही तेज, ग्रीष्म ही महत्त्व, वर्षा ही यश, और शरद् ऋतु [की विद्या] ही सब है। ६। (त्रिवृत् एव भर्गः, पञ्चदशः एव महः, सप्तदशः एव यशः, एकविंशः एव सर्वम् ७) त्रिवृत् स्तोत्र ही तेज, पंचदश यज्ञ ही महत्त्व, सप्तदश यज्ञ ही यश, और एकविंश यज्ञ ही सब है। ७। (ऋग्वेदः एव भर्गः यजुर्वेदः एव महः, सामवेदः एव यश, ब्रह्मवेदः एव सर्वम् ८) ऋग्वेद [पदार्थों की स्तुति विद्या] ही तेज, यजुर्वेद [संगतिकरण विद्या] ही महत्व, सामवेद [मोक्षविद्या] ही यश और ब्रह्मवेद [अथर्ववेद वा ब्रह्मविद्या] ही सब है। ८। (होता एव भर्गः, अध्वर्युः एव महः, उद्गाता एव यशः ब्रह्मा एव सर्वम् ९) होता ही तेज, अध्वर्यु ही महत्त्व, उद्गाता ही यश, और ब्रह्मा ही सब है। ९। (वाक् एव भर्गः, प्राणः एव महः, चक्षुः एव यशः, मनः एव सर्वम् १०) वाणी ही तेज, प्राण ही महत्त्व, आंख ही यश, और मन ही सब है। १०॥ १५॥

भावार्थः—मनुष्य तेज आदि चार पदार्थों की प्राप्ति से दस प्रकार सब वस्तुओं के तत्त्ववेत्ता होकर देश काल के विचार से सर्वोपकारी बन कर सुखी होवें॥ १५॥

विशेषः—इस कण्डिका को कण्डिका १६, १७, १८, १९ और २० से मिलाओ॥

कण्डिका १६॥

स यदाह मयि भर्ग इति पृथिवीमेवैतत् लोकानामाहाग्निं देवानां वसून् देवान् देवगणानां गायत्रं छन्दसां प्राचीन्दिशां वसन्तमृतूनां त्रिवृतं स्तोमानामृग्वेदं वेदानां हौत्रं होत्रकाणां वाचमिन्द्रियाणाम्॥ १६॥

कण्डिका १६॥ भर्ग [तेज] का वर्णन॥

(सः यत् आह, मयि भर्गः इति, पृथिवीम् एव एतत् लोकानाम् आह, अग्निं देवानां, वसून् देवान् देवगणानां, गायत्रं छन्दसां, प्राचीं दिशां, वसन्तम् ऋतूनां, त्रिवृतं स्तोमानाम्, ऋग्वेदं वेदानां, हौत्रं होत्रकाणां, वाचम् इन्द्रियाणाम्)

पतिः (महः) महत्त्वम् (यशः) कीर्तिः (पृथिवी) भूगोलविद्या (आदित्यः) आदीप्यमानः सूर्यः (चन्द्रमाः) आह्लादको लोकः। चन्द्रवत् सुखप्रदः (वसवः) श्रेष्ठविद्वांसः (आदित्याः) अखण्डव्रतिब्रह्मचारिणः (गायत्री) गानयोग्यवेदविद्या (त्रिष्टुप्) त्रि+ष्टुभु स्तम्भे—क्विप्। त्रीणि कर्मोपासनाज्ञानानि स्तोभते स्थिरीकरोति या सा विद्या (जगती) जगदुपकारिका विद्या (अनुष्टुप्) स्तोभतिअर्चतिकर्मा—निघ० ३। १४। निरन्तरस्तुतिविद्या॥

वह जो [ब्रह्मा] कहता है—मुझमें भर्ग [तेज] होवे—वह इस पृथिवी को ही लोकों में से कहता है [१], अग्नि को देवों [दिव्य पदार्थों] में [२], वसुदेवों [श्रेष्ठ विद्वानों] को देवगणों [विद्वानों के समूहों] में [३], गायत्र [गाने योग्य वेद विद्या] को छन्दों [आनन्ददायक कामों] में [४], पूर्वदिशा को दिशाओं में [५], वसन्तऋतु को ऋतुओं में [६], त्रिवृत् स्तोत्र को स्तोत्रों में [७], ऋग्वेद [पदार्थों की स्तुति विद्या] को वेदों में [८], होता को होताओं में [९], वाणी को इन्द्रियों में [वह कहता है] [१०], ॥ १६ ॥

भावार्थ : और विशेषः—कण्डिका १५ में देखो ॥ १६ ॥

कण्डिका १७ ॥

स यदाह मयि मह इत्यन्तरिक्षमेवैतल्लोकानामाह वायुं देवानां रुद्रान् देवान् देवगणानान्त्रैष्टुभं छन्दसां प्रतीचीन्दिशां ग्रीष्ममृतूनां पञ्चदशं स्तोमानां यजुर्वेदं वेदानामाध्वर्यवं होत्रकाणां प्राणमिन्द्रियाणाम् ॥ १७ ॥

कण्डिका १७ ॥ महः वा महत्त्व का वर्णन ॥

(सः यत् आह मयि महः इति, अन्तरिक्षम् एव एतत् लोकानाम् आह, वायुं देवानां, रुद्रान् देवान् देवगणानां, त्रैष्टुभं छन्दसां, प्रतीचीं दिशां, ग्रीष्मम् ऋतूनां, पंचदशं स्तोमानां, यजुर्वेदं वेदानाम्, आध्वर्यवं होत्रकाणां, प्राणम् इन्द्रियाणाम्) वह जो [ब्रह्मा] कहता है—मुझमें महः [महत्त्व] होवे—वह इस अन्तरिक्ष को ही लोकों में से कहता है [१], वायु को देवों [दिव्य पदार्थों] में [२], रुद्र देवों [पापियों को रुलाने वाले विद्वानों] को देवगणों [विद्वानों के समूहों] में [३], त्रैष्टुभ [तीन, कर्म उपासना ज्ञान को स्थिर करने वाली विद्या] को छन्दों [आनन्ददायक कर्मों] में [४], पश्चिम दिशा को दिशाओं में [५], ग्रीष्म ऋतु को ऋतुओं में [६], पंचदश स्तोत्र को स्तोत्रों में [७], यजुर्वेद [संगतिकरण विद्या] को वेदों में [८], अध्वर्यु को होताओं में [९], प्राण को इन्द्रियों में [वह कहता है] [१०] ॥ १७ ॥

भावार्थ : और विशेषः—कण्डिका १५ में देखो ॥ १७ ॥

कण्डिका १८ ॥

स यदाह मयि यश इति दिवमेवैतल्लोकानामाहादित्यं देवानामादित्यान् देवान् देवगणानां जागतं छन्दसामुदीचीन्दिशां वर्षा ऋतूनां सप्तदशं स्तोमानां सामवेदं वेदानामौद्गात्र होत्रकाणां चक्षुरिन्द्रियाणाम् ॥ १८ ॥

१६—(हौत्रम्) अण् स्वार्थे । होतारम् (होत्रकाणाम्, होतॄणम् ऋत्विजाम् ॥

१७—(आध्वर्यवम्) अण् स्वार्थे । अध्वर्युम् ॥

कण्डिका १८ ॥ यश वा कीर्ति का वर्णन ॥

(सः यत् आह मयि यशः इति दिवम् एव एतत् लोकानाम् आह, आदित्यं देवानाम्, आदित्यान् देवान् देवगणानाम्, जागतं छन्दसाम्, उदीचीं दिशां, वर्षाः ऋतूनां, सप्तदशं स्तोमानां, सामवेदं वेदानाम्, औद्गात्रं होत्रकाणां, चक्षुः इन्द्रियाणाम्) वह जो [ब्रह्मा] कहता है—मुझमें यश [कीर्ति] होवे—वह इस प्रकाश लोक को ही लोकों में से कहता है [१], सूर्य को देवों [दिव्य पदार्थों] में [२], आदित्य देवों [अखण्डव्रती ब्रह्मचारियों] को देवगणों [विद्वानों के समूहों] में [३], जागत [जगत् के उपकारक ज्ञान] को छन्दों [आनन्ददायक कर्मों] में [४], उत्तर दिशा को दिशाओं में [५], वर्षा ऋतु को ऋतुओं में [६], सप्तदश स्तोत्र को स्तोत्रों में [७], सामवेद [मोक्षविद्या] को वेदों में [८], उद्गाता को होताओं में [९], आंख को इन्द्रियों में [वह कहता है] [१०] ॥ १८ ॥

भावार्थ : और विशेषः—कण्डिका १५ में देखो ॥ १८ ॥

कण्डिका १९ ॥

स यदाह मयि सर्वमित्यप एवैतल्लोकानामाह चन्द्रमसं देवानां विश्वान् देवान् देवगणानामानुष्टुभं छन्दसां दक्षिणां दिशां शरदमृतूनामेकविंशं स्तोमानां ब्रह्मवेदं वेदानां ब्रह्मत्वं होत्रकाणां मन इन्द्रियाणाम् ॥ १९ ॥

कण्डिका १९ ॥ सर्व वा सब ज्ञान का वर्णन ॥

(सः यत् आह मयि सर्वम् इति, अपः एव एतत् लोकानाम् आह, चन्द्रमसं देवानां, विश्वान् देवान् देवगणानाम्, आनुष्टुभं छन्दसां, दक्षिणां दिशां, शरदम् ऋतूनाम्, एकविंशं स्तोमानां, ब्रह्मवेदं वेदानां, ब्रह्मत्वं होत्रकाणां, मनः इन्द्रियाणाम्) वह जो [ब्रह्मा] कहता है—मुझ में सब [ज्ञान] होवे—वह इस जल को ही लोकों में से कहता है [१] चन्द्रमा [आनन्ददायक पदार्थ वा लोक] को देवों [दिव्य पदार्थों] में [२], सब विद्वानों को देवगणों [विद्वानों के समूहों] में [३] आनुष्टुभ [निरन्तर पदार्थों के स्तुति वाले ज्ञान] को छन्दों [आनन्ददायक कर्मों] में [४], दक्षिण दिशा को दिशाओं में [५] शरद् ऋतु को ऋतुओं में [६], एकविंश स्तोत्र को स्तोत्रों में [७], ब्रह्मवेद [अथर्ववेद वा ब्रह्मविद्या] को वेदों में [८], ब्रह्म को होताओं में [९] मन को इन्द्रियों में [वह कहता है] [१०] ॥ १९ ॥

भावार्थः और विशेषः—कण्डिका १५ में देखो ॥ १९ ॥

कण्डिका २० ॥

स वा एष दशधा चतुः सम्पद्यते, दश च ह वै चतुर्विराजोऽक्षराणि तद्गर्भा उपजीवन्ति श्रीर्वै विराड् यशोऽन्नाद्यं श्रियमेव तद्विराजं यशस्यन्नाद्ये प्रतिष्ठापयति

१८–(औद्गात्रम्) अण् स्वार्थे । उद्गातारम् ॥

१९—(ब्रह्मत्वम्) ब्रह्माणम् ॥

प्रतिष्ठन्तीरिदं सर्वमनुप्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद ॥ २० ॥

कण्डिका २० ॥ दस गुणित चार पदार्थों का विराट् से सम्बन्ध ॥

(सः वै एषः दशधा चतुः सम्पद्यते) वह ही यह [ब्रह्मा] दस प्रकार चार बार [पदार्थों] को प्राप्त करता है। (दश च ह वै चतुः विराजः अक्षराणि) और भी दस चार बार [१०×४=४०] विराट् [छन्द] के अक्षर होते हैं (तं गर्भाः उपजीवन्ति) उस [विराट्] के सहारे गर्भ [गर्भ के बालक] जीते हैं। (श्रीः वै विराट् यशः अन्नाद्यम्) [क्योंकि] विराट् ही श्री [शोभा वा सम्पत्ति] है और यश खाने योग्य अन्न है। (तत् श्रियम् एव विराजं यशसि अन्नाद्ये प्रतिष्ठापयति) इसलिये विराट् अर्थात् श्री को यश अर्थात् खाने योग्य अन्न में वह स्थापित करता है। (इदं सर्वं प्रतिष्ठन्तीः अनु प्रतिष्ठति) यह सब [जगत्] ठहरी हुई [शक्तियों] के साथ ठहरा रहता है। (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) वह सन्तानों और पशुओं से प्रतिष्ठा पाता है जो ऐसा जानता है ॥ २० ॥

भावार्थ : और विशेषः—कण्डिका १५ में देखो ॥ २० ॥

कण्डिका २१ ॥

अनर्वाणं ह वै देवं दध्यङाङ्गिरसः उपसीदं ह यज्ञस्य श्रुष्टिं समश्नवामहा इति स दध्यङाङ्गिरसोऽब्रवीद्यो वै सप्तदशं प्रजापतिं यज्ञेऽन्वितं वेद नास्य यज्ञो रिष्यते[1] न यज्ञपतिं रिष्यन्त इति ता वा एताः पञ्च व्याहृतयो भवन्त्यों श्रावयास्तु श्रौषड् यज ये यजामहे वौषडिति स दध्यङाङ्गिरसोऽब्रवीन्न वयं विद्मो यदि ब्राह्मणाः[1] स्मो यद्यब्राह्मणाः स्मो यदि तस्य ऋषेः स्मो यदि नान्यस्येत्यनर्वाणश्च ह वा ऋतावन्तश्च पितरः स्वधायामावृषायन्त वयं वदामहै ३ वयं वदामहा १ इति सोऽयात् स्वायम्भुवो वा ऋतावन्तो मदेयातां[2] न वय वदामहा ३ इति तस्मात् प्रवरे प्रव्रियमाणे वाचयेद्देवाः पितर इति तिस्रो य एति संयजति स भवति यश्च न ब्रूते यश्च न ब्रूत इति ब्राह्मणम् ॥ २१ ॥

कण्डिका २१ ॥ यज्ञ के विषय में दध्यङ् और अनर्वा का वार्तालाप ॥

(अनर्वाणं ह वै देवम् आङ्गिरसः दध्यङ् उपसीदम्) प्रसिद्ध है अनर्वा [अहिं-

---

२०—(चतुः) द्वित्रिचतुर्भ्यः सुच् (पा० ५।४।१८) रात्सस्य (पा० ८।२।२४) सलोपः। चतुर्वारम् (उपजीवन्ति) आश्रित्य जीवनं कुर्वन्ति (विराट्) वि+राजृ दीप्तौ ऐश्वर्ये च—क्विप्। विराजो दिशः—पिङ्गल सूत्राणि ३।५। दशाक्षरचतुष्पादं छन्दः। श्रीः ॥

२१—(अनर्वाणम्) स्नामदिपद्यर्ति० (उ० ४।११३) ऋ गतौ हिंसायां च—वनिप्। अहिंसकम्। अनिन्द्यम्। ऋषिविशेषम् (दध्यङ्) सर्वधातुभ्यः इन्

---

१. पू. सं. रिष्यति, ब्राह्मणा इति पाठः ॥

२. अत्र द्विवचनप्रयोगोऽशुद्धः, "मदेरन्" इति भवितव्यम् ॥ सम्पा० ॥

सक] देव [विद्वान्] के पास वेदवेत्ता दध्यङ् [स्थिरता प्राप्त करने वाला] पहुँचा। (सः आङ्गिरसः दध्यङ् अब्रवीत् यज्ञस्य ह श्रुष्टिं समश्नवामहै इति) वह वेदवेत्ता दध्यङ् बोला—यज्ञ की शीघ्रता को हम मिल कर पावें। (यः वै सप्तदशं प्रजापतिं यज्ञे अन्वितं वेद, अस्य यज्ञः न रिष्यते न यज्ञपतिं रिष्यन्ते इति) [अनर्वा बोला] जो पुरुष यज्ञ में सत्रहवें [४ वेद + ४ वर्ण + ४ आश्रम = ४ पुरुषार्थ अर्थात् धर्म अर्थ काम मोक्ष इन सोलह के सहित सत्रहवें] प्रजापति [प्रजापालक परमात्मा] को यज्ञ में संगत जानता है, उसका यज्ञ नहीं नष्ट होता है और न यज्ञपति [यजमान] को वे [शत्रु] नष्ट करते हैं। (ताः वै एताः पंच व्याहृतयः भवन्ति, ओं श्रावय, अस्तु श्रौषट्, यज, ये यजामहै, वौषट् इति) और वे ही यह पांच व्याहृतियां है—ओं श्रावय [ओं, तू सुना], अस्तु श्रौषट् [श्रवण होवे], यज [यज्ञ कर], ये यजामहै [जो हम लोग यज्ञ करते हैं], वौषट् [आहुति पहुँचे—देखो क० १०]। (सः आङ्गिरसः दध्यङ् अब्रवीत् वयं न विद्मः यदि ब्राह्मणाः स्मः यदि अब्राह्मणाः स्मः यदि तस्य ऋषेः स्मः यदि अन्यस्य, न, इति) वह वेदवेत्ता दध्यङ् बोला—हम नहीं जानते यदि हम ब्राह्मण हैं, यदि अब्राह्मण हैं, यदि उस ऋषि के हैं यदि अन्य के, यह भी नहीं [जानते]। (अनर्वाणः च ह वै ऋतावन्तः च पितरः स्वधायाम् आवृषायन्ते वयं वदामहै ३ वयं वदामहै १ इति) [अनर्वा बोला] अहिंसक और सत्यवान् ही पितर [पालन करने हारे पुरुष] अन्न के विषय में इन्द्र [ऐश्वर्यवान्] के समान आचरण करते हैं, यह हम जानें यह हम जानें। (सः अयात् स्वायम्भुवः वै ऋतावन्तः मदेयातां वयं न वदामहै ३ इति) उस दध्यङ् ने जाना—स्वयम्भू [अपने आप वर्त्तमान परमात्मा] को देवता मानने वाले सत्यवान् पुरुष दीन होवें, यह हम न जानें। (तस्मात् प्रवरे प्रव्रियमाणे वाचयेत्—देवाः पितरः इति तिस्रः) इसलिये श्रेष्ठ व्यवहार वा यज्ञ के प्रवर्तमान

(उ० ४। ११८) दध दाने धारणे च—इन् + अञ्चु गतिपूजनयोः - क्विन्। धारणं स्थैर्यम् अञ्चति प्राप्नोति यः सः (आङ्गिरसः) वेदवेत्ता (उपसीदम्) उप-असीदत् (श्रुष्टिम्) श्रु गतौ श्रवणे च—क्तिन् सुडागमः। श्रुष्टीति क्षिप्रनामाशु अष्टीति—निरु० ६। १२। शीघ्रताम् (सप्तदशम्) चत्वारो वेदाः, चत्वारो वर्णाः, चत्वार आश्रमाः, धर्मार्थकाममोक्षा इति चत्वारः पुरुषार्थाः, एतैः षोडशभिः सहितं सप्तदशं प्रजापतिम् (प्रजापतिम्) प्रजास्वामिनं परमात्मानम् (अन्वितम्) अनुगतम्। संगतम् (रिष्यते) नश्यति (रिष्यन्ते) नाशयन्ति (अनर्वाणः) अदुष्टाः (ऋतावन्तः) ऋतवन्तः। सत्यवन्तः (स्वधायाम्) अन्ने—निघ० २। ७ (आवृषायन्ते) कर्तुः क्यङ् सलोपश्च (पा० ३। १। ११) आ + वृषन् वृष वा क्यङ्। समन्ताद् वृष इन्द्र इव आचरन्ति (अयात्) या गतौ = ज्ञाने—लङ् ज्ञातवान् (स्वायंभुवः) स्वयंभू—अण्। जसः सुः। स्वयम्भूः परमात्मा देवता येषां ते (मदेयाताम्) मद दैन्ये—वि० लि०। दीना दरिद्रा भवेयुः (प्रवरे) श्रेष्ठव्यवहारे। यज्ञे (प्रव्रियमाणे) प्रकर्षेण स्वीक्रियमाणे। प्रवर्तमाने (भवति) सत्तावान् भवति (न ब्रूते) असत्यं न कथयति॥

होने पर—देवाः पितरः इन तीन ऋचाओं [अथर्व० ६ । १२३ । ३—५] को [पढ़ें], (यः एति संयजति यः च न ब्रूते यः च न ब्रूते सः भवति इति ब्राह्मणम्) जो पुरुष चलता है, मिलकर यज्ञ करता है, और जो [असत्य] नहीं बोलता और जो [असत्य] नहीं बोलता, वह सत्ता वाला है, यह ब्राह्मण [ब्रह्मज्ञान] है ॥ २१ ॥

भावार्थः—सत्यवादी पुरुष का कथन प्रामाणिक और असत्यवादी का अप्रामाणिक होता है ॥ २१ ॥

विशेषः—(देवाः पितरः) यह तीन मन्त्र अथर्व० ६ । १२३ । ३—५ इस प्रकार हैं।

(देवाः पितरः पितरो देवाः । यो अस्मि सो अस्मि । १ । स पचामि स ददामि स यजे स दत्तान्मा यूषम् । २ । नाके राजन् प्रति तिष्ठ तत्रैतत् प्रतितिष्ठतु । विद्धि पूर्तस्य नो राजन्त्स देव सुमना भव । ३ ।) अर्थ—देव [विद्वान् लोग] पितर [पालने वाले] और पितर देव [विजयी] होते हैं, जो मैं सत्ता वाला हूं वह मैं सत्ता वाला हूं । १ । वह मैं पकाता हूं, वह मैं देता हूं वह मैं [विद्वानों को] पूजता हूं, वह मैं दान से पृथक् न होऊं । २ । हे राजन् [समर्थ पुरुष] सुख स्वरूप [परमात्मा] में प्रतिष्ठा पा, उसी [परमात्मा] में ही यह [तेरा पुण्य कर्म] प्रतिष्ठा पावे । हे राजन् [विद्या से प्रकाशमान] हमारे लिये अन्न आदि कर्म का ज्ञान कर, सो तू हे देव [गतिशील] प्रसन्नचित्त हो ॥

कण्डिका २२ ॥

सावित्रं ह स्म वैतं पूर्वे पुरस्तात् पशुमालभन्त इति मे तर्हि प्राजापत्यं यो ह्येव सविता स प्रजापतिरिति वदन्तस्तस्मादुसमोऽथाग्नींस्तेन यजेरंस्ते समानधिष्टचा एव स्युरोषा सम्भरणीया या उषा सम्भरणीया यान् विन्युप्याग्नींस्तया यजेरंस्तेनानाधिष्टचा एव स्युरादीक्षणीया या दीक्षणीया यान् संन्युप्याग्नींस्तया यजेरंस्ते समानधिष्टचा एव स्युरोदवसानीया या उदवसानीया यान् विन्युप्याग्नींस्तया यजेरंस्तेनानाधिष्टचा एव स्युरथ यदि यजमानस्योपतयेत् पार्श्वतोऽग्नीनाधाय तावदासीत यावद्दग्धः स्याद्यदि प्रेयात् स्वैरेव तमग्निभिर्दहेद् दश वा अग्निभिरितरे यजमाना आसत इति वदन्तस्तस्य तदेव ब्राह्मणं यददः पुरःसवने पितृमेध आशिषो व्याख्याताः ॥ २२ ॥

कण्डिका २२ ॥ मिश्रित यज्ञों का विषय ॥

(पूर्वे ह स्म वा एतं सावित्रं पशुं पुरस्तात् आलभन्ते इति तर्हि मे प्राजापत्यं यः हि एव सविता सः प्रजापतिः इति वदन्तः तस्मात् उ समः) पहिले लोग इस सविता देवता वाले पशु [पशु नामक पाक यज्ञ—क० २३] को पहिले प्राप्त करते

२२—(सावित्रम्) सवितृदेवताकम् (पूर्वे) पूर्ववर्तमाना ऋषयः (पशुम्) पशुनामकं पाकयज्ञम्—क० २३ (आलभन्ते) समन्तात् प्राप्नुवन्ति (मे) मम मते (प्राजापत्यम्) प्रजापतिदेवताकम् (सविता) सर्वप्रेरकः परमेश्वरः (प्रजा-

हैं, तब मेरा [मत है]—प्रजापति देवता वाले को [पशु नामक पाक यज्ञ को वे प्राप्त करते हैं] क्योंकि जो ही सविता [सर्वप्रेरक परमात्मा] है, वही प्रजापति [प्रजापालक परमेश्वर] है, ऐसा कहते हैं, इसलिये वह सविता और प्रजापति [नाम वाला यज्ञ] एक है। (अथ [ये] अग्नीन् तेन यजेरन् ते समानधिष्टचाः एव स्युः) फिर [जो लोग आहवनीय गार्हपत्य और दक्षिण] अग्नियों को उस [पाक यज्ञ] से यज्ञ करें वे समान प्रगल्भ [जीतने वाले] ही होवें। (आ उषा सम्भरणीया, या उषा सम्भरणीया यान् अग्नीन् विन्युप्य तया यजेरन्. तेन अनाधिष्टचाः एव स्युः) फिर उषा [उषा नामक प्रभात वेला की इष्टि] करनी चाहिये, जो उषा [इष्टि] करनी चाहिये और जिन [तीन] अग्नियों को विविध प्रकार स्थापित करके उस [उषा] के साथ उस [पाक यज्ञ] से [जो] यज्ञ करें वे अजेय ही हो जावें। (आ दीक्षणीया, या दीक्षणीया, यान् अग्नीन् सन्युप्य तया यजेरन् ते समानधिष्टचाः एव स्युः) फिर दीक्षणीया [इष्टि है] जो दीक्षणीया है और जिन अग्नियों को यथावत् स्थापित करके [उस दीक्षणीया के साथ] उस [पाक यज्ञ] से [जो] यज्ञ करें वे समान प्रगल्भ [जीतने वाले] ही होवें। (आ उदवसानीया, या उदवसानीया यान् अग्नीन् विन्युप्य तया तेन यजेरन् अनाधिष्टचाः एव स्युः) फिर उदवसानीया [इष्टि है], जो उदवसानीया है और जिन अग्नियों को विविध प्रकार स्थापित करके उस [उदवसानीया] के साथ उस [पाक यज्ञ] से यज्ञ करें वे अजेय ही हो जावें। (अथ यदि यजमानस्य पार्श्वतः उपतयेत् अग्नीन् आधाय तावत् आसीत यावत् दग्धः स्यात्) फिर यदि यजमान के पास में वह [पाक यज्ञ] आ जावे, अग्नियों को स्थापित करके वह [यजमान] तब तक बैठे जब तक वह [पाक यज्ञ] भस्म होवे। (यदि प्रेयात् तं स्वैः एव अग्निभि दहेत्) यदि वह [अग्नि] बुझ जावे उसको अपनी ही अग्नियों से जलावे। (दश इतरे यजमानाः वै अग्निभिः आसते इति वदन्तः) दश दूसरे यजमान लोग ही [तीनों] अग्नियों के साथ बैठते हैं [यज्ञ करते हैं] ऐसा कहते हैं। (तस्य तत् एव

पतिः) प्रजापालकः परमेश्वरः (वदन्तः) वदन्ति (सम) तुल्यः (अग्नीन्) आहवनीयगार्हपत्यदक्षिणाग्नीन्—गो० पू० २। २२ (तेन) पशुना पाकयज्ञेन (समानधिष्टचाः[1]) ञिधृषा प्रागल्भ्ये—क्यप्, तकारागमः धिष आदेशः। धृषेर्धिष च संज्ञायाम् (उ० २। ८२) इति निर्देशात्। तुल्यप्रगल्भाः (आ) समुच्चये (उषा) उषानामकेष्टिः (संभरणीया) सम्पादनीया (विन्युप्य) वि+नि+डुवप् बीज-सन्ताने—ल्यप्। विन्यस्य। प्रतिष्ठाप्य (अनाधिष्टचाः) नञ्+आ+ञिधृषा प्रागल्भ्ये—क्यप्, पूर्ववत्सिद्धिः। अनाधृष्याः अनभवनीयाः अजेयाः (सन्युप्य) सम्यङ्न्यस्य (उपतयेत्) तय गतौ। उपगच्छेत् (दग्धः) भस्मीभूतः (प्रेयात्) प्रगच्छेत्। नश्येत् (दहेत्) भस्मीकुर्यात्। दीपयेत् (आशिषः) आशीर्वादाः ॥

---

१. यहाँ ज०स० में "समानधिष्ण्याः" पाठ है, सानसिवर्ण···धिष्ण्यशल्याः (उ० ४। १०८) से धिष्ण्य शब्द ऋकार को इकार एवं ण्य प्रत्यय करके सिद्ध होता है। वस्तुतः यही समीचीन प्रतीत होता है। धिष्टच की सिद्धि में बाहुलक से कई कार्य माने हैं।।सम्पा०॥

ब्राह्मणम् यत् अदः) उस [यजमान] का वही ब्राह्मण [ब्रह्मज्ञान] है जो यह है। (पुरःसवने पितृमेधे आशिषः व्याख्याताः) पुरःसवन [नाम वाले] पितृमेध यज्ञ में आशीर्वाद व्याख्यात हैं ॥ २२ ॥

भावार्थः—यज्ञ विधानों को यथावत् जान कर यज्ञ करना चाहिये ॥ २२ ॥

कण्डिका २३ ॥

सायंप्रातर्होमौ स्थालीपाको नवश्च यः । बलिश्च पितृयज्ञश्चाष्टका सप्तमः पशुरित्येते पाकयज्ञाः । १ । अग्न्याधेयमग्निहोत्रं पौर्णमास्यमावास्ये । नवेष्टिश्चातुर्मास्यानि पशुबन्धोऽत्र सप्तम इत्येते हविर्यज्ञाः । २ । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशिमांस्ततः । वाजपेयोऽतिरात्रश्चाप्तोर्याम[1] अत्र सप्तम इत्येते सुत्याः ।३। केस्विद्देवाः प्रवोवाजाः केस्विद्देवा अभिद्यवः । केस्विद्देवा हविष्मन्तः किंस्विज्जिगाति सुम्नयुः । ४ । ऋतव एव प्रवोवाजा मासा देवा अभिद्यवः । अर्द्धमासा हविष्मन्तस्तज्जिगाति सुम्नयुः । ५ । कतिस्विद्रात्रयः कत्यहानि कति स्तोत्राणि कति शस्त्राण्यस्य । कतिस्वित्[2]सवनाः संवत्सरस्य स्तोत्रियाः पदाक्षराणि कत्यस्य । ६ । द्वावतिरात्रौ षट्शतमग्निष्टोमा द्वेत्रिंशतिशते उक्थ्यानाम् । द्वादशषोडशिनः षष्टिः षडहा वैषुवतश्च । ७ । अहान्यस्य विंशतिशतानि त्रीण्यहश्चैकं तावदस्य । संवत्सरस्य सवनानि सहस्रमशीति त्रीणि च संस्तुतस्य । ८ । षट्षष्टिश्च द्वे च शते च भवतस्तत शस्त्राणामयुतं चैकमस्य । स्तोत्रियाश्च नवतिसहस्रा द्वे नियुते नवतिश्चातिषट् च । ९ । अष्टौ शतान्ययुतानि त्रिंशच्चतुर्नवतिश्च पदान्यस्य । संवत्सरस्य कविभिर्मितस्यैतावती मध्यमा देवमात्रा । १० । अयुतमेकं प्रयुतानि त्रिंशद् द्वे नियुते तथा ह्यनुसृष्टानि । अष्टौ शतानि नव चाक्षराण्येतावानात्मा परमः प्रजापतेः । ११ । आद्यं वषट्कारः प्रदानान्तमेतमग्निष्टोमे पर्वशः साधु क्लृप्तम् । सौभेषजं छन्द ईप्सद्भिः यदग्नौ चतुःशतं बहुधा हूयते यत् । १२ । प्रातःसवनस्तुत एकविंशो गायत्रस्तोममित एक एव । माध्यन्दिनः सप्तदशेन क्लृप्तस्त्रयस्त्रिंशेन सवनं तृतीयम् । १३ ॥ २३ ॥

कण्डिका २३ ॥ विविध यज्ञों के विधान और गणना सहित व्याख्यान श्लोकों में ॥

(सायंप्रातर्होमौ यः नवः स्थालीपाकः च बलिः च पितृयज्ञः च अष्टका सप्तमः पशुः इति एते पाकयज्ञाः १) सायंकाल और प्रातःकाल के दो होम, और

२३—(स्थालीपाकः) स्थाल्यां पच्यते, पच्—घञ् । गव्यदुग्धेन स्थाल्यां कृतः पाकभेदः (नवः) णु स्तुतौ—अप् । स्तवः । नवीनः (बलिः) पूजोपहारः (अष्टका) इष्यशिभ्यां तकन् (उ० ३ । १४८) अशूङ् व्याप्तौ—तकन् । वैदिक-

---

१. पू. सं. "अप्तोर्यामात्र" इति पाठः, स चाशुद्धः सन्ध्यभावात् ॥

२. पू. सं. 'चित्' इति पाठः ॥ सम्पा० ॥

जो नव [नव नामक वा नवीन] स्थालीपाक है और बलि और पितृयज्ञ, अष्टका और सातवां पशु, यह [सात] पाक यज्ञ हैं । १ । (अग्न्याधेयम्, अग्निहोत्रं, पौर्णमास्यमावास्ये, नवेष्टिः,चातुर्मास्यानि,पशुबन्धः अत्र सप्तमः इति एते हविर्यज्ञाः २) अग्न्याधेय, अग्निहोत्र, पौर्णमासी और अमावास्या, नवेष्टि, चातुर्मास्य और पशुबन्ध यहां सातवां है, यह [सात] हविर्यज्ञ हैं । २ । (अग्निष्टोमः अत्यग्निष्टोमः, उक्थ्यः, ततः षोडशिमान् वाजपेयः अतिरात्रः, अप्तोर्यामः च अत्र सप्तमः इति एते सुत्याः ३) अग्निष्टोम, अत्यग्निष्टोम, उक्थ्य, फिर षोडशिमान्, वाजपेय, अतिरात्र, और अप्तोर्याम [प्राप्त हुई प्रजा के नियम—गो० उ० ५ । ६] यहां सातवां है, यह [सात] सुत्यायें [सोम निचोड़ने की क्रियायें] हैं । ३ । (केस्वित् देवाः प्रवोवाजाः केस्वित् देवाः अभिद्यवः, केस्वित् देवाः हविष्मन्तः किंस्वित् सुम्नयुः जिगाति ४) कौन से देव प्रवोवाज [ज्ञान प्राप्त कराने वाले] हैं, कौन से देव अभिद्यु [सब ओर से प्रकाश वाले] हैं, कौन से देव हविष्मान् [हवनीय पदार्थ वाले] हैं और किसको सुम्नयु [सुख प्राप्त कराने वाला पुरुष] गाता है । ४ । (ऋतवः एव प्रवोवाजाः, मासाः देवाः अभिद्यवः, अर्धमासाः हविष्मन्तः तत् सुम्नयुः जिगाति ५) [ऊपर के चार प्रश्नों के उत्तर] ऋतुयें ही प्रवोवाज [ज्ञान प्राप्त कराने वाले] हैं, महीने अभिद्यु [सब ओर से प्रकाश वाले] देव हैं, आधे महीने हविष्मान् [हवनीय पदार्थ वाले] हैं और सुम्नयु [सुख पहुंचाने वाला पुरुष] तत् [विस्तृत ब्रह्म] को गाता है । ५ । (अस्य संवत्सरस्य कतिस्विद् रात्रयः, कति अहानि, कति स्तोत्राणि, कति शस्त्राणि, कतिचित् सवनाः, स्तोत्रियाः, कति अस्य पदाक्षराणि ६) इस संवत्सर की कितनी रात्रि हैं, कितने दिन हैं, कितने स्तोत्र और कितने शस्त्र [स्तोत्र विशेष] हैं, कितने सवन और स्तोत्रिय हैं और कितने इस के पद और अक्षर हैं । ६ । (द्वौ अतिरात्रौ, षट्शतम् अग्निष्टोमाः, द्वे विंशतिशते उक्थ्यानां द्वादश षोडशिनः, षष्टिः षडहाः च वैषुवतम् ७) दो अतिरात्र [विषुवान् यज्ञ से पहिले १ और पीछे १] एक सौ छह अग्निष्टोम [विषुवान् से पहिले ५३ और पीछे ५३], दो एक सौ बीस [वा दो सौ चालीस] उक्थ्य [विषुवान् से पहिले १२० और पीछे १२०] हैं, बारह षोडशी [विषुवान् से पहिले ६ और पीछे ६] हैं और साठ षडह [विषुवान् से पहिले ३० और

कर्मविशेषः (पशुः) पाकयज्ञः (अप्तोः) आप्नोतेर्ह्रस्वश्च (उ० १ । ७५) आप्लृ व्याप्तौ लम्भने च—तु प्रत्ययः । धातोर्ह्रस्वत्वम् । आप्तायाः प्राप्तायाः प्रजायाः—गो० उ० ५ । ९ । (यामः) यम नियमने-घञ् । यामाः-गो० उ० ५ । ६ । नियमाः (अत्र) अस्मिन् यज्ञविषये (प्रवोवाजाः) सर्वधातुभ्योऽसुन् (उ० ४ । १८९) प्रुङ् गतौ-असुन् । प्रवस् + वज गतौ-घञ् । ज्ञानप्रापकाः (अभिद्यवः) अभि + द्युत दीप्तौ-डु प्रत्ययः । अभिगतदीप्तयः । प्रकाशप्रापकाः (जिगाति) गा स्तुतौ-लट् । गाति स्तौति । निघ० ३ । १४ । (सुम्नयुः) छन्दसि परेच्छायामिति वक्तव्यम् (वा० पा० ३ । १ । ८) इति क्यच् । सुम्न-क्यच्, उ प्रत्ययः । सुम्नं सुखं परेषामिच्छतीति । सुखप्रापकः (तत्) त्यजितनियजिभ्यो डित् (उ० १ । १३२)

पीछे ३०] हैं, यह विषुवान् से सम्बन्ध वाला वचन है [देखो गो० पू० ५।६]। ७। (अस्य अहानि त्रीणि विंशतिशतानि, अस्य अहः च तावत् एकम्, संस्तुतस्य संवत्सरस्य च त्रीणि सवनानि सहस्रम् अशीति ८) इस [संवत्सर] के दिन तीन बार एक सौ बीस [१२०×३ = ३६०] हैं, और इस का दिन तो एक है, और संस्तुत [स्तोत्र युक्त] संवत्सर के तीन सवन एक सहस्र और अस्सी [३६० दिन×३ सवन = १०८०] हैं [८]। (अस्य शस्त्राणां च एकम् अयुतम् द्वे च शते च ततः षट् षष्टिः च, स्तोत्रियाः च द्वे नियुते नवति सहस्रा अति षट् च नवतिः च भवतः ९) और इस [संवत्सर] के एक अयुत [दस सहस्र] दो सौ छयासठ [०,००० + २०० + ६६ = १०,२६६] शस्त्र हैं, और दो नियुत [दो लाख] नब्बे सहस्र और छह अधिक नब्बे [२,००,००० + ९०,००० + ९० + ६ = २,९०,०९६] स्तोत्रिय हैं [९]। (अस्य पदानि च त्रिंशत् अयुतानि अष्टौ शतानि चतुर्नवतिः कविभिः मितस्य संवत्सरस्य एतावती मध्यमा देवमात्रा १०) इस [संवत्सर] के तीस अयुत [तीस दस सहस्र] आठ सौ चौरानवे [३०,०००, ८९४] पद हैं, विद्वानों करके परिमाण किये हुये संवत्सर की इतनी मध्यमा देवमात्रा है [१०]। (तथा हि त्रिंशत् प्रयुतानि द्वे नियुते एकम् अयुतम् अष्टौ शतानि नव च अनुसृष्टानि अक्षराणि, प्रजापतेः एतावान् परमः आत्मा ११) और भी तीस प्रयुत [तीस दस लाख] दो नियुत [दो लाख] एक अयुत [एक दस सहस्र] आठ सौ और नौ [३० × १०,००,००० + २ × १, ०,००० + १० ००० + ८०० + ९ = ३,००,००,००० + २,००,००० + १०,००० + ८०९ = ३,०२,१०,८०९] अक्षर हैं, [गो० पू० ५। ५ से भी मिलाकर देखो] प्रजापति [संवत्सर] का इतना सब से बड़ा स्वरूप है। ११। (आद्यं प्रदानान्तम् एतं वषट्कारः अग्निष्टोमे पर्वशः साधु क्लृप्तं यत् सौभेषजं छन्दः ईप्सद्भिः यत् अग्नौ बहुधा चतुःशतं हूयते १२) आदि में रहने वाला प्रदान अन्त वाला यह वषट्कार अग्निष्टोम में पर्व पर्व पर [चतुर्दशी, अष्टमी, अमावास्या पूर्णिमा और रवि-संक्रान्ति पर] भले प्रकार ठीक किया गया है, जो उत्तम औषध वाले वेद को चाहने वाले [विद्वानों] करके जो अग्नि में अनेक प्रकार एक सौ चार बार होमा जाता

तनु विस्तारोपकृतिशब्दोपतापेषु—अदिः डित्। विस्तृतं ब्रह्म (स्तोत्रियाः) स्तोत्र—घः। यज्ञविशेषाः (वैषुवतम्) विषुवत्—अण्। विषुवतः सम्बन्धिवचनम्—क० ६ (संस्तुतस्य) स्तोत्रयुक्तस्य (अयुतम्) न युतं, नञ्समासः। दशसहस्रसंख्या (नियुते) नियूयते बहुसंख्या प्राप्यते अनेन। नि + यु मिश्रणामिश्रणयोः—क्तः। लक्षे (प्रयुतानि) प्रकर्षेण युतानि। दशलक्षसंख्याः (अनुसृष्टानि) परस्परसंयुक्तानि (पर्वशः) स्नामदिपद्यर्तिपॄशकिभ्यो वनिप् (उ० ४। ११३) पॄ पालनपूरणयोः—वनिप्। चतुर्दश्यष्टमी चैव अमावस्याच पूर्णिमा। पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ॥ १ ॥ पर्वणि पर्वणि (क्लृप्तम्) समर्थितम् (सौभेषजम्) सुभेषज—अण्। उत्तमौषधयुक्तम् (छन्दः) वेदम् (ईप्सद्भिः) प्राप्तुमिच्छद्भिः (गायत्रस्तोममितः) गानयोग्येन स्तोमेन प्रमितः ॥

है। १२। (प्रातःसवनस्तुतः गायत्रस्तोममितः एकविंशः एकः एव सप्तदशेन क्लृप्तः माध्यन्दिनः, त्रयस्त्रिंशेन तृतीय सवनम् १३) प्रातःसवन में स्तुति किया गया गायत्र [गाने योग्य] स्तोम से परिमाण किया गया एकविंश यज्ञ एक ही है, सप्तदश यज्ञ से ठीक किया हुआ माध्यन्दिन सवन है और त्रयस्त्रिंश यज्ञ से [ठीक किया हुआ] तृतीय सवन है। १३ ॥ २३ ॥

भावार्थः—याजक लोग यज्ञ में समय, हव्य द्रव्य, वेदमन्त्र और उन सब के अङ्गों की गणना और विनियोग यथावत् जानें यह कण्डिका श्लोकबद्ध है ॥ २३ ॥

कण्डिका २४ ॥

मन्थन्ति, तम् एव तत् प्रणयन्ति) फिर जब अग्नि को आगे लाते हैं, जिस उस [अग्नि] को ही वैश्वदेव यज्ञ में मथते हैं, उसको ही उससे आगे लाते हैं। (यत् मथ्यते, तस्य ब्राह्मणम् उक्तम्) जो वह [अग्नि] मथा जाता है, उसका ब्राह्मण कहा गया है [क० १६]। (अथ यत् सप्तदश सामिधेन्यः, सद्वन्तौ आज्यभागौ, विराजौ संयाज्ये, तेषां ब्राह्मणम् उक्तम्) फिर जब सत्रह सामिधेनी [अग्नि प्रज्वलित करने की ऋचायें], श्रेष्ठ पदार्थों वाले दो आज्यभाग, दो विराट् छन्द, संयाज्या [नाम ऋचायें] हैं, उनका ब्राह्मण कहा गया है [क० १६]। (अथ यत् नव प्रयाजाः, नव अनुयाजाः, नव एतानि हवींषि समानानि तु एव, पञ्च सञ्चराणि पौष्णान्तानि हवींषि भवन्ति, तेषां ब्राह्मणम् उक्तम्) फिर जो नौ प्रयाज, नौ अनुयाज, और नौ यह समान हवि भी और पांच संचार हवि पूषा प्रकरण के अन्त तक है, उनका ब्राह्मण कहा गया है [क० २०]॥ २१॥

भावार्थः—यज्ञों को यथाविधि करने से मनुष्य पापों से छूटते हैं॥ २१॥

कण्डिका २२॥

अथ यदैन्द्राग्नो द्वादशकपालो भवति, बलं वै तेज इन्द्राग्नी, बलमेव तत्तेजसि प्रतिष्ठापयति। अथ यद्वारुण्यामिक्षा, इन्द्रो वै वरुणः, स उ वै पयोभाजनः, तस्माद् वारुण्यामिक्षा। अथ यन्मारुती पयस्या, अप्सु वै मरुतः श्रितः, आपो हि पयः। अथेन्द्रस्य वै मरुतः श्रितः, ऐन्द्रं पयः, तस्मान्मारुती पयस्या। अथ यत् काय एककपालः, प्रजापतिर्वै कः, प्रजापतेराप्त्यै। अथो सुखस्य वा एतन्नामधेयं कमिति, सुखमेव तदध्यात्मन्धत्ते। अथ यत् मिथुनौ गावौ ददाति, तत् प्रजात्यै; रूपमुक्थ्या वाजिनः। अथ यदप्सु वरुणं यजति, स्व एवैनन्तदायतने प्रीणाति। अथ यत्पुरस्तात् पौर्णमासेन यजते, तथा हास्य पूर्वपक्षे वरुणप्रघासैरिष्टं भवति॥ २२॥

कण्डिका २२॥ इन्द्र-अग्नि, वरुण आदि के लिये हवि॥

(अथ यत् ऐन्द्राग्नः द्वादशकपालः भवति, बलं तेजः वै इन्द्राग्नी, बलम् एव तत् तेजसि प्रतिष्ठापयति) फिर जब इन्द्र—अग्नि देवता वाला बारह पात्र में रक्खा हुआ चरु होता है, बल और तेज ही दोनों इन्द्र और अग्नि हैं, बल को ही उससे तेज में स्थापित करता है। (अथ यत् वारुणी आमिक्षा, इन्द्रः वै वरुणः, सः उ वै पयोभाजनः, तस्मात् वारुणी आमिक्षा) फिर जब वारुणी [वरुण वा जल वाली

भोजनम् (एतस्य) तस्य पुरुषस्य (प्रणयन्ति) प्रकर्षेण प्राप्नुवन्ति (समानानि) तुल्यानि (सञ्चराणि) संचरणशीलानि (पौष्णान्तानि) पूषन्—अण् + अन्तानि। पूषाप्रकरणान्तानि॥

२२—(द्वादशकपालः) द्वादशकपालेषु संस्कृतः पुरोडाशः (प्रतिष्ठापयति) धारयति (वारुणी) वरुण—अण् ङीप्। वरुणस्येयम् ऋचा। जलसम्ब-

ऋचा] आमिक्षा [सेचन समर्थ वा छाछ] है, इन्द्र ही वरुण है, वह ही जल बांटने वाला है, इसलिये वारुणी [वरुण देवता वाली ऋचा] आमिक्षा [सेचन समर्थ] है। (अथ यत् मारुती पयस्या, अप्सु वै मरुतः श्रितः आपः हि पयः) फिर जब मारुती [मरुत् अर्थात् पवन देवता वाली ऋचा] पयस्या [जल वाली वा दधि वाली] है, "आप्" अर्थात् जल में ही पवन देवता ठहरे हैं, आप् ही जल है। (अथ इन्द्रस्य वै मरुतः श्रिताः, ऐन्द्रं पयः, तस्मात् मारुती पयस्या) फिर इन्द्र के ही आश्रित मरुत् [पवन देवता] हैं, इन्द्र देवता वाला जल है, इसलिये मारुती [अर्थात् पवन देवता वाली ऋचा] पयस्या [जल वाली वा दधि वाली] है। (अथ यत् कायः एककपालः प्रजापतिः वै कः प्रजापतेः आप्त्यै) फिर जब "काय" अर्थात् प्रजापति देवता वाला एक पात्र में रक्खा हुआ चरु होता है, प्रजापति ही "क" है, प्रजापति की प्राप्ति के लिये यह [चरु] है। (अथो सुखस्य वै कम् इति एतत् नामधेयं, सुखम् एव तत् अध्यात्मं धत्ते) फिर सुख का ही "क" यह नाम है, सुख को ही उससे आत्मा में धारण करता है। (अथ यत् मिथुनौ गावौ ददाति, तत् प्रजात्यै उक्थ्या वाजिनः रूपम्) फिर जब जोड़ा गाय बैल का वह दान करता है, यह सन्तान उत्पन्न करने के लिये हैं, उक्थ्या [प्रशंसनीया ऋचा] बलवान् का रूप है। (अथ यत् अप्सु वरुणं यजति, तत् एनं स्वे एव आयतने प्रीणाति) फिर जब जल में वरुण को पूजता है, तब इसको अपने ही घर में तृप्त करता है। (अथ यत् परस्तात् पौर्णमासेन यजते, तथा ह अस्य पूर्वपक्षे वरुणप्रघासैः इष्टं भवति) फिर जब पीछे से पौर्णमास यज्ञ के साथ वरुण का यज्ञ करता है, उसी प्रकार ही उसका पहिले पखवाड़े में वरुण के हवियों से यज्ञ होता है ॥ २२ ॥

भावार्थः—यज्ञीय पदार्थों के गुण जानकर यज्ञ करने से मनुष्यों में बल और पराक्रम बढ़ता है ॥ २२ ॥

कण्डिका २३ ॥

ऐन्द्रो वा एष यज्ञक्रतुः, यत् साकमेधाः, तद्यथा महाराजः पुरस्तात् सेनानीकानि व्यूह्याभयं पन्थानमन्वियात्, एवमेवैतत् पुरस्ताद् देवता यजन्ते, तद् यथैवादः सोमस्य महाव्रतम्, एवमेवैतदिष्टिमहाव्रतम्। अथ यदग्निमनीकवन्तं प्रथमं देवतानां यजति, अग्निर्वै देवानां मुखं, मुखत एव तद्देवान् प्रीणाति। अथ यन्माध्यन्दिने मरुतः सान्तपनान् यजति, इन्द्रो वै मरुतः सान्तपनाः, ऐन्द्रं माध्यन्दिनं, तस्मादेनानिन्द्रेणोपसंहितान् यजति। अथ यत् सायं गृहमेधीयेन चरन्ति,

---

न्धिनी (आमिक्षा) स्नुव्रश्चि० (उ० ३ । ६६) आ + मिष सेचने हिंसायां च—सः, टाप्। सेचनसमर्था। दुग्धविकारः (पयोभाजनः) जलविभाजकः (मारुती) मरुत्सम्बन्धिनी ऋक् (पयस्या) पयस्—यत्। जलवती क्रिया (आमिक्षा) दुग्धविकारदध्यादि (ऐन्द्रम्) इन्द्रदेवताकम् (कायः) क—अण्, युगागमश्च। प्रजापतिदेवताकश्चरुः (आप्त्यै) लाभाय (अध्यात्मम्) आत्मनि (मिथुनौ) स्त्रीपुंसौ (गावौ) धेनुवृषभौ (प्रजात्यै) संतानोत्पादनाय (उक्थ्या) ऋक्। (वाजिनः) बलयुक्तस्य (वरुणप्रघासैः) वरुणचरुभिः (इष्टम्) यज्ञः ॥

पुष्टिकर्म वै गृहमेधीयः, सायम्पोषः पशूनां, तस्मात् सायं गृहमेधीयेन चरन्ति । अथ यच्छ्वोभूते गृहमेधीयस्य निष्कासमिश्रेण पूर्णद[1]र्व्या चरन्ति, पूर्वेद्युः कर्मणैवैतत् प्रातः कर्मोपसन्तन्वन्ति । अथ यत् प्रातर्मरुतः क्रीडिनो य[1]जन्ति, इन्द्रो वै मरुतः क्रीडिनः, तस्मादेनानिन्द्रेणोपसंहितान् यजति । अथ यदग्निं प्रणयन्ति, यमेवामुं वैश्वदेवे मन्थन्ति, तमेव तत् प्रणयन्ति, यन्मथ्यते तस्योक्तं ब्राह्मणम् । अथ यत् सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ, विराजौ संयाज्ये, तेषामुक्तं ब्राह्मणम् । अथ यन्नव प्रयाजा नवानुयाजा अष्टौ हवींषि समानानि त्वेव षट् सञ्चराणि हवींषि भवन्त्यैन्द्राग्नान्तानि, तेषामुक्तं ब्राह्मणम् । अथ यन्महेन्द्रमन्ततो यजति, अन्तं वै श्रेष्ठी भजते तस्मादेनमन्ततो यजति अथ यद्वैश्वकर्मण एककपालः, असौ वै विश्वकर्मा, योऽसौ तपत्येतमेव तेन प्रीणाति अथ यदृषभङ्गां ददाति, ऐन्द्रो ह यज्ञक्रतुः ॥ २३ ॥

कण्डिका २३ ॥ इन्द्र, अग्नि और मरुत् देवताओं के लिए हवि ॥

(ऐन्द्रः वै एषः यज्ञक्रतुः, यत् साकमेधाः) इन्द्र [ऐश्वर्य] देवता वाला ही यह यज्ञ व्यवहार है, जो साकमेध [बल के लिए वुद्धि वाले यज्ञ] हैं। (तत् यथा महाराजः पुरस्तात् सेनानीकानि व्यूह्य अभयं पन्थानं अन्वियात्, एवम् एव एतत् पुरस्तात् देवताः यजन्ते) सो जिस प्रकार महाराजा पहिले से सेना के विभागों को व्यूह में करके निर्भय मार्ग चला जाता है, ऐसे ही इस [इन्द्र] को पहिले देवता पूजते हैं। (तत् यथा एव सोमस्य अदः महाव्रतम्, एवम् एव एतत् इष्टिमहाव्रतम्) सो जिस प्रकार ही सोम [यज्ञ] का वह महाव्रत है, वैसे ही यह इष्टि महाव्रत है। (अथ यत् अनीकवन्तम् अग्निं देवतानां प्रथमं यजति, अग्निः वै देवानां मुखं, मुखतः एव तत् देवान् प्रीणाति) फिर जो सेना [शिखा धूम आदि] वाले अग्नि को देवताओं में पहिले वह पूजता है, अग्नि ही देवताओं का मुख [प्रधान] है, मुख से ही उस [यज्ञ] से देवताओं को तृप्त करता है। (अथ यत् माध्यन्दिने सान्तपनान् मरुतः यजति, इन्द्रः वै सान्तपनाः मरुतः, ऐन्द्रं माध्यन्दिनं, तस्मात् एनान् इन्द्रेण उपसंहितान् यजति) फिर जब मध्याह्न में भली भांति तपाने वाले मरुत् [पवन वा किरण] देवताओं को वह यज्ञ करता है, इन्द्र [सूर्य] ही भलीभांति तपाने वाले मरुत् हैं, इन्द्र देवता वाला माध्यन्दिन [दोपहर का सवन] है, इसलिये इन [मरुतों] को इन्द्र के साथ-साथ यज्ञ करता है। (अथ यत् सायं गृहमेधीयेन चरन्ति, पुष्टिकर्म वै गृहमेधीयः, सायं पशूनां पोषः,

---

२३ - (साकमेधाः) शक्लृ शक्तौ—घञ्+मेधृ मेधायाम्—घञ् । शस्य सः । शाकाय शक्तये मेधा येषु ते यज्ञाः (सेनानीकानि) अनिहृषिभ्यां किच्च (उ० ४ । १७) अन जीवने—ईकन् कित् । सेनाविभागान् (व्यूह्य) सैन्यसंन्निवेशेन स्थापयित्वा (अनीकवन्तम्) सेनावत् शिखाधूमादियुक्तम् (सान्तपनान्) सम्+तप तापे ऐश्वर्य्ये च—णिच्—ल्युट् । सन्तापकारकान् (उपसंहितान्) उप+सम्+

---

१. पू. सं० 'पूर्णा दर्व्या' 'यजति' इति पाठः ॥ सम्पा० ॥

तस्मात् सायं गृहमेधीयेन चरन्ति) फिर जब सायंकाल में गृहमेधीय [गृहस्थ के कर्तव्य धर्म] के साथ व्यवहार करते हैं, पुष्टिकारक कर्म ही गृहमेधीय है, सायंकाल में पशुओं का पोषण होता है, इसलिये सायंकाल में गृहमेधीय [गृहस्थ के कर्तव्य धर्म] से व्यवहार करते हैं। (अथ यत् श्वोभूते गृहमेधीयस्य निष्कासमिश्रेण पूर्णदर्व्या चरन्ति पूर्वेद्युः कर्मणा एव एतत् कर्म प्रातः उपसन्तन्वन्ति) फिर जब आगामी कल्य में हुये गृहमेधीय [गृहस्थ के कर्तव्य धर्म] के निकास और संयोग के साथ पूर्ण दर्वी [भोजन पात्र] के द्वारा व्यवहार करते हैं. बीते हुये कल्य के कर्म से ही इस कर्म को प्रातःकाल विस्तृत करते हैं। (अथ यत् प्रातः क्रीडिनः मरुतः यजन्ति, इन्द्रः वै क्रीडिनः मरुतः तस्मात् एनान् इन्द्रेण उपसंहितान् यजति) फिर जब प्रातःकाल खिलाड़ी मरुत् देवताओं को यज्ञ करते हैं, इन्द्र ही खिलाड़ी मरुत् है, इसलिये इन [मरुतों] को इन्द्र के साथ-साथ यज्ञ करता है। (अथ यत् अग्नि प्रणयन्ति यम् एव अमुं वैश्वदेवे मन्थन्ति तम् एव तत् प्रणयन्ति) फिर जब अग्नि को आगे लाते हैं, जिस उस [अग्नि] को ही वैश्वदेव यज्ञ में मथते हैं, उसको ही उससे आगे लाते हैं। (यत् मथ्यते, तस्य ब्राह्मणम् उक्तम्) जो वह [अग्नि] मथा जाता है, उसका ब्राह्मण कहा गया है। [क० १९, २१]। (अथ यत् सप्तदश सामिधेन्यः, सद्वन्तौ आज्यभागौ, विराजौ संयाज्ये, तेषां ब्राह्मणम् उक्तम्) फिर जब सत्रह सामिधेनी [अग्नि प्रज्वलित करने की ऋचायें], श्रेष्ठ पदार्थ वाले दो आज्यभाग, दो विराट् छन्द संयाज्या [नाम ऋचायें] हैं, उनका ब्राह्मण कहा गया है [क० १९, २१]। (अथ यत् नव प्रयाजाः नव अनुयाजाः, अष्टौ हवींषि समानानि तु एव, षट् सञ्चराणि ऐन्द्राग्नान्तानि हवींषि भवन्ति तेषां ब्राह्मणम् उक्तम्) फिर जो नौ प्रयाज, नौ अनुयाज, और आठ समान हवि भी और छह सञ्चार हवि इन्द्र और अग्नि के प्रकरण तक हैं उनका ब्राह्मण कहा गया है [क० २२]। (अथ यत् महेन्द्रम् अन्ततः यजति, अन्तं वै श्रेष्ठी भजते तस्मात् एनम् अन्ततः यजति) फिर जब महेन्द्र [परमेश्वर] को अन्त में यज्ञ करता है, अन्त को ही श्रेष्ठी [सेठ, बड़ा धनी] सेवता है, इसलिये इस [महेन्द्र] को अन्त में वह यज्ञ करता है। (अथ यत् वैश्वकर्मणः एककपालः, असौ वै विश्वकर्मा, यः असौ तपति, एतम् एव तेन प्रीणाति) फिर जब विश्वकर्म देवता वाला एक पात्र में धरा चरु होता है, वह ही विश्वकर्मा [सबका बनाने वाला ईश्वर] है जो वह तपाता है, इसको ही उस [यज्ञ] से तृप्त करता है। (अथ यत् ऋषभं गां ददाति, ऐन्द्रः ह यज्ञक्रतुः) फिर जब बैल और गाय [क० २२] को वह देता है, इन्द्र [तेज वा ऐश्वर्य] देवता वाला ही यह यज्ञ व्यवहार है ॥ २३ ॥

दधातेः—क्तः। संयुक्तान् (गृहमेधीयेन) गृहमेधिन्—छः। गृहस्थकर्तव्येन धर्मेण यज्ञेन (चरन्ति) व्यवहरन्ति (श्वोभूते) आगामिदिवसभूते (निष्कासमिश्रेण) निस्+कासृ शब्दे—घञ्+मिश्र योजने—अच्। निःसारेण सह संयोगेन (पूर्णदर्व्या) दृ विदारणे—विन्। पूर्णचमसेन (पूर्वेद्युः) गतदिवसे (उपसन्तन्वन्ति) यथावत् विस्तारयन्ति (श्रेष्ठी) बहुधनी (भजते) सेवते (वैश्वकर्मणः) विश्वकर्मन्—अण्। विश्वकर्मदेवताकः (विश्वकर्मा) सर्वकर्ता। सूर्यः परमेश्वरः (ऋषभम्) वृषभम् (गाम्) धेनुम् ॥

भावार्थः—प्रातःसवन, माध्यन्दिन सवन और तृतीयसवन में देवताओं के गुण कर्म स्वभाव जानकर यज्ञ करना चाहिये ॥ २३ ॥

कण्डिका २४ ॥

अथ यदपराह्णे पितृयज्ञेन चरन्ति, अपराह्णभाजो वै पितरः तस्मादपराह्णे पितृयज्ञेन चरन्ति। तदाहुर्यदपरपक्षभाजो वै पितरः, कस्मादेनान् पूर्वपक्षे यजन्तीति। देवा वा एते पितरः, तस्मादेनान् पूर्वपक्षे यजन्तीति। अथ यदेकाᳫँ सामिधेनीन्त्रिरन्वाह, सकृदु ह वै पितरः, तस्मादेकां सामिधेनीन्त्रिरन्वाह। अथ यद्यजमानस्यार्षेऽन्वाह, नेद्यजमानं प्रमृणजानीति। अथ यत् सोमम्पितृमन्तं पितॄन् सोमवतः पितॄन् बर्हिषदः पितॄनग्निष्वात्तानित्यावाहयन्ति, न हैके स्वं महिमानमावाहयन्ति, यजमानस्यैष महिमेति वदत आवाहयेदिति, त्वेव स्थितमग्नेर्ह्येष महिमा भवति, ओं स्वधेत्याश्रावयति, अस्तु स्वधेति प्रत्याश्रावयति, स्वधाकारो हि पितॄणाम्। अथ यत् प्रयाजानुयाजेभ्यो बर्हिष्मन्तावुद्धरति, प्रजा वै बर्हिः, नेत् प्रजां पितृषु दधातीति[1] ते वै षट् सम्पद्यन्ते, षड् वा ऋतवः, ऋतवः पितरः, पितॄणामाप्त्यै ॥ २४ ॥

कण्डिका २४ ॥ पितरों के लिये हवि ॥

(अथ यत् अपराह्णे पितृयज्ञेन चरन्ति) फिर जब तीसरे पहर [दिन के तीन भागों में से तीसरे भाग में] पितृयज्ञ [माता पिता आदि पालक ज्ञानियों के सत्कार] से वे व्यवहार करते हैं, (अपराह्णभाजः वै पितरः तस्मात् अपराह्णे पितृयज्ञेन चरन्ति) तीसरे पहर में भाग वाले ही पितर [पालनकर्ता ज्ञानी पुरुष] हैं, इसलिये तीसरे पहर में पितृयज्ञ से वे व्यवहार करते हैं। (तत् आहुः यत् अपरपक्षभाजः वै पितरः, कस्मात् एनान् पूर्वपक्षे यजन्ति इति) यह कहते हैं कि दूसरे पक्ष [श्रेणी वा पङ्क्ति] में भाग वाले ही पितर हैं, किसलिये इनको पहिले पक्ष [श्रेणी] में यज्ञ करते हैं। [उत्तर] (देवाः वै एते पितरः तस्मात् एनान् पूर्वपक्षे यजन्ति इति) देव [विजय चाहने वाले वीर] ही यह पितर लोग हैं, इसलिये इनको पहिले पक्ष में [पहिली श्रेणी में] यज्ञ करते हैं। (अथ यत् एकां सामिधेनीं त्रिः अन्वाह) फिर जो एक सामिधेनी [अग्नि प्रदीप्त करने की ऋचा] को तीन बार वह बोलता है। (सकृत् उ ह वै पितरः तस्मात् एकां सामिधेनीं त्रिः अन्वाह) [उत्तर] उचित काम करने वाले ही निश्चय करके पितर [माता पिता आदि ज्ञानी पुरुष] हैं, इसलिये एक सामिधेनी को वह तीन बार [आदर के लिये] पढ़ता है। (अथ यत् यजमानस्य आर्षे अन्वाह) फिर जब यजमान के आर्ष

२४—(अपराह्णे) त्रिधाविभक्तदिनस्य तृतीयभागे (अपराह्णभाजः) अपराह्णहविर्भागिनः (अपरपक्षभाजः) द्वितीयश्रेणिभागिनः (पूर्वपक्षे) प्रथमश्रेण्याम् (अन्वाह) पठति (सकृत्) एकवारम् अथवा, समानं साधु, समानस्य

---

[1] पू. सं. "दधानि" इति पाठः ॥ सम्पा० ॥

यज्ञ में [ऋषियों के लिये सत्कार में एक सामिधेनी ऋचा को तीन बार] पढ़ता है। (यजमानं नेत् प्रमृणजानीति) [उत्तर] वह यजमान को नहीं मारता है [अमर करता है]। (अथ यत् पितृमन्तं सोमं, सोमवतः पितॄन्, बर्हिषदः पितॄन्, अग्निष्वात्तान् पितॄन् आवाहयन्ति) फिर जब श्रेष्ठ माता पिता वाले सोम [प्रेरक पुरुष] को, सोम [बड़े ऐश्वर्य] वाले पितरों [माता पिता आदि ज्ञानियों] को, वृद्धिकारक व्यवहार में बैठने वाले पितरों को और अग्निष्वात्ता [अग्नि अर्थात् बिजुली सूर्य और अग्नि विद्या तथा शारीरिक और आत्मिक तेज ग्रहण करने वाले] पितरों को वे बुलाते हैं [अथर्व० १८ । ४ । ७१-७४ भी देखो]। (एके ह स्वं महिमानं न आवाहयन्ति यजमानस्य एव एषः महिमा इति वदतः आवाहयेत् इति, तु अग्नेः एव हि एषः महिमा स्थितं भवति) कोई कोई अपनी महिमा को नहीं बुलवाते हैं—यह यजमान की ही महिमा है—ऐसा कहते हुए पुरुषों को वह बुलवावे, किन्तु अग्नि [विद्वान् पुरुष] की ही यह महिमा स्थित होती है। (ओं स्वधा इति आश्रावयति, स्वधा अस्तु इति प्रत्याश्रावयति, स्वधाकारः हि पितॄणाम्) ओम् स्वधा [यह अन्न वा जल] है—ऐसा वह बोलता है, स्वधा होवे—ऐसा वह उत्तर में बोलता है, स्वधाकार [अन्न वा जल का व्यवहार] ही पितरों के लिये है। (अथ यद् प्रयाजानुयाजेभ्यः बर्हिष्मन्तौ उद्धरति, प्रजा वै बर्हिः प्रजां पितृषु नेत् दधाति इति) फिर जब प्रयाज अनुयाज यज्ञों के लिये दो बर्हि [वृद्धिकारक व्यवहार वा कुश] वाले मन्त्रों का वह बोलता है, प्रजा ही बर्हि [कुश घास के समान वृद्धिकारक] है, प्रजा को पितरों में वह नहीं धारण करता है [अर्थात् प्रजा से पितरों का अधिक आदर करता है]। (ते वै षट् सम्पद्यन्ते, षट् वै ऋतवः, ऋतवः पितरः, पितॄणाम् आप्त्यै)

सः+करोतेः—क्विप् । तुगागमः विभक्तिलोपः । साधुकर्माणः । उचितकर्मकर्तारः (आर्षे) ऋषिनिमित्ते (नेत्) निषेधे (प्रमृणजा[1]नीति) पारयतेरजिः (उ० १ । १३६) प्र+मृण हिंसायाम्—अजिः । प्रमृणज्-क्विप् । नामधातोः-शप् श्ना इति द्वौ विकरणौ । प्रकर्षेण मृणति हिनस्ति (सोमम्) प्रेरकपुरुषम् (पितृमन्तम्) प्रशस्तमातापितृभ्यां युक्तम् (पितॄन्) मातापित्रादिपालकज्ञानिनः (सोमवतः) परमैश्वर्ययुक्तान् (बर्हिषदः) बर्हिषि वृद्धिकरे व्यवहारे सदनशीलान् (अग्निष्वात्तान्) अग्नि+सु+आङ्+ददातेः—क्तः । अग्निः सूर्यविद्युदग्निविद्या शारीरिकात्मिकतेजो वा आत्तं गृहीतं यैस्तान् (एके) केचित् (वदतः) कथयतः (स्थितम्) स्थितः (स्वधा) अन्नम्—निघ० २ । ७ । उदकम्—निघ० १ । १२ । (आश्रावयति) उच्चारयति (प्रत्याश्रावयति) अङ्गीकरोति (बर्हिष्मन्तौ) वृद्धिकरव्यवहारयुक्तौ मन्त्रौ (ते) पितरः ॥

---

१ शब्दों की इस प्रकार असाधारण सिद्धि का उदाहरण मिलना अत्यन्त दुर्लभ है। बार २ व्याकरण के नियमों की उपेक्षा करने के बाद भी यह शब्द भली प्रकार सिद्ध नहीं हो सका है। वास्तव में तो बाहुलक से श्नम् विकरणयुक्त मृज् धातु के लोट् लकार उत्तम पुरुष एकवचन का "प्रमृणजानि" प्रयोग समीचीन जान पड़ता है ॥ सम्पा० ॥

वे [पितर लोग यज्ञ में] छह ही सम्पन्न किये जाते हैं, छह ही ऋतुयें हैं, ऋतुओं [के समान वृद्धिकारक] पितर हैं, पितरों की तृप्ति के लिये [यह यज्ञ है] ॥ २४ ॥

भावार्थः—यज्ञ में पितर लोगों का यथावत् सत्कार करने से यजमान की महिमा बढ़ती है ॥ २४ ॥

कण्डिका २५ ॥

अथ यज्जीवनवन्तावाज्यभागौ भवतः, यजमानमेव तज्जीवयतः। अथ यदेकैकस्य हविषस्तिस्रस्तिस्रो याज्या भवन्ति, ह्वयत्येवैनां प्रथमया, द्वितीयया गमयति, प्रैव तृतीयया यच्छति। अथो देवयज्ञमेवैनं पितृयज्ञेन व्यावर्त्तयन्ति, अथो दक्षिणासंस्थो वै पितृयज्ञः, तमेवैतदुदक्सꣳस्थं कुर्वन्ति। अथ यदग्निं कव्यवाहनमन्ततो यजति, एतद् स्विष्टकृतो वै पितरः, तस्मादग्निं कव्यवाहनमन्ततो यजति। अथ यदिडामुपहूयावघ्राय न प्राश्नन्ति, पशवो वा इडा, नेत्पशून् प्रमृणजानीति। अथ यत् सूक्तवाके यजमानस्याशिषोऽन्वाह, नेद्यजमानं प्रमृणजानीति। अथ यत् पत्नीन्न संयाजयन्ति, नेत्पत्नीं प्रमृणजानीति। अथ यत् पवित्रवति मार्जयन्ते, शान्तिर्वै भेषजमापः, शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते। अथ यदध्वर्युः पितृभ्यो निपृणाति, जीवानेव तत् पितॄननु मनुष्याः पितरोऽनुप्रवहन्ति। अथो देवयज्ञमेवैनं पितृयज्ञेन व्यावर्त्तयन्ति। अथो दक्षिणासंस्थो वै पितृयज्ञः तमेवैतदुदक्संस्थं कुर्वन्ति। अथ यत् प्राञ्चोऽभ्युत्क्रम्यादित्यमुपतिष्ठन्ते देवलोको वा आदित्यः, पितृलोकः पितरः, देवलोकमेवैनं पितृलोकादुपसङ्क्रामन्तीति। अथ यद्दक्षिणाञ्चोऽभ्युत्क्रम्याग्नीनुपतिष्ठन्ते, प्रीत्यैव तद्देवेष्वन्ततोद्ध्वं चरन्ति। अथ यदुदञ्चोऽभ्युत्क्रम्य त्रैयम्बकैर्यजन्ते, रुद्रमेव तत् स्वस्याꣳ दिशि प्रीणन्ति। अथो देवयज्ञमेवैनं पितृयज्ञेन व्यावर्त्तयन्ति। अथो दक्षिणासꣳस्थो वै पितृयज्ञः, तमेवैतदुदक्सꣳस्थं कुर्वन्ति। अथ यदन्तत आदित्येष्टचा यजति इयं वा अदितिरस्यामेवैनमन्ततः प्रतिष्ठापयति। अथ यत्परस्तात् पौर्णमासेन यजते, तथाहास्य पूर्वपक्षे साकमेधैरिष्टं भवति ॥ २५ ॥

कण्डिका २५ ॥ पितृयज्ञ के साथ देवयज्ञ आदि का विधान ॥

(अथ यत् जीवनवन्तौ आज्यभागौ भवतः, यजमानम् एव तत् जीवयतः) फिर जब दो जीवन साधन वाले आज्यभाग [घृत की आहुति वाले मन्त्र] होते हैं, यजमान को ही वे दोनों जीवन देते हैं। (अथ यत् एकैकस्य हविषः तिस्रः तिस्रः याज्याः भवन्ति, एनान् एव प्रथमया ह्वयति, द्वितीयया गमयति, तृतीयया एव प्रयच्छति) फिर जब एक एक हवि की तीन तीन याज्या [ऋचायें] होती हैं, पहिली से ही इन [पितरों] को वह बुलाता है, दूसरी से वह चलाता है और तीसरी से ही वह

२५—(जीवनवन्तौ) जीवनसाधनयुक्तौ (हविषः) ग्राह्यपदार्थस्य। अन्नस्य (ह्वयति) आह्वयति (एनान्) पितॄन् (गमयति) प्रापयति (प्रयच्छति)

दान करता है। (अथो एनं देवयज्ञम् एव पितृयज्ञेन व्यावर्त्तयन्ति) फिर इस देवयज्ञ [विद्वानों के सत्कार] को ही पितृयज्ञ [पितरों माता पिता आदि पालक विद्वानों के सत्कार] के साथ वर्त्तमान करते हैं। (अथो दक्षिणासंस्थः वै पितृयज्ञः, तम् एव एतत् उदक्संस्थं कुर्वन्ति) फिर दक्षिण दिशा में रक्खा हुआ ही पितृयज्ञ है, उसको ही इससे उत्तर दिशा में रक्खा हुआ करते हैं। (अथ यत् कव्यवाहनम् अग्निम् अन्ततः यजति, एतत् स्विष्टकृतः वै पितरः, तस्मात् कव्यवाहनम् अग्निम् अन्ततः यजति) फिर जब कव्यवाहन [विद्वानों को हितकारक पदार्थ पहुंचाने वाले] अग्नि [तेजस्वी पुरुष] का सत्कार करता है, इससे सुन्दर इष्ट व्यवहार करने वाले ही पितर लोग होते हैं, इसलिये कव्यवाहन [विद्वानों को हितकारक पदार्थ पहुँचाने वाले] अग्नि [तेजस्वी पुरुष] का सत्कार करते हैं। (अथ यत् इडाम् उपहूय अवघ्राय न प्राश्नन्ति, पशवः वै इडाः पशून् नेत् प्रमृणजानीति) फिर जब अन्न को मंगा कर और सूंघ कर वे अब खाते हैं, पशु [सब जीव] ही अन्न [अन्न के आश्रित] हैं, पशुओं [जीवों] को वह नहीं मारता है। (अथ यत् सूक्तवाके यजमानस्य आशिषः अन्वाह, यजमानं नेत् प्रमृणजानीति) फिर जब सूक्तवाक [सुन्दर कहे हुये वाक्य वाले यज्ञ] में यजमान के आशीर्वादों को वह पढ़ता है, यजमान को वह नहीं मारता है। (अथ यत् पत्नीं न सयाजयन्ति, पत्नीं नेत् प्रमृणजानीति) फिर जब [यजमान की] पत्नी से अब वह यज्ञ कराते हैं, पत्नी को वह नहीं मारता है [सुरक्षित करता है]। (अथ यत् पवित्रवति मार्जयन्ते, शान्तिः वै भेषजम् आपः, शान्तिः एव एषां भेषजम् अन्ततः यज्ञे क्रियते) फिर जब जल वाले [पात्र] में शुद्ध करते हैं, शान्ति ही औषध जल है, शान्ति ही इनकी औषधि अन्त में यज्ञ में की जाती है। (अथ यत् अध्वर्युः पितृभ्यो निपृणाति, तत् मनुष्याः पितरः पितॄन् अनु जीवान् एव अनुप्रवहन्ति) फिर जब अध्वर्यु पितरों [पालक विद्वानों] को परिपूर्ण करता है, मननशील और पालनकर्ता पुरुष तब पितरों के पीछे-पीछे जीवों को चलाते रहते हैं। (अथो एनं देवयज्ञम् एव पितृयज्ञेन व्यावर्त्तयन्ति) फिर इस देवयज्ञ [विद्वानों के सत्कार] को ही पितृयज्ञ [पितरों माता पिता आदि पालक

ददाति (व्यावर्त्तयन्ति) वर्त्तमानं कुर्वन्ति (दक्षिणासंस्थः) दक्षिणस्यां दिशि सम्यक् स्थितः (उदक्संस्थम्) उत्तरस्यां दिशि सम्यक् स्थितम् (अग्निम्) विद्वांसं पुरुषम् (कव्यवाहनम्) कवि-यत्। कव्यपुरीषपुरीष्येषु ञ्युट् (पा० ३ । २ । ६५) कव्य + वहेर्ञ्युट्। कविर्मेधाविनाम—निघ० ३ । १५ । कविभ्यो मेधाविभ्यो हितपदार्थानां प्रापकम् (इडाम्) अन्नम्—निघ० २ । ७ । (पशवः) जीवाः (प्रमृणजानीति) क० २४। प्रकर्षेण मृणति हिनस्ति (आशिषः) आशीर्वादान् (न) सम्प्रति (पवित्रवति) उदक्नाम—निघ० १ । १२ । (मार्जयन्ते) शोधयन्ति (पितृभ्यः) पितॄन् (निपृणाति) पॄ पालनपूरणयोः—लट्। नितरां पालयति पूरयति वा (अनु) अनुसृत्य (प्राञ्चः) पूर्वदिक्स्थाः पुरुषाः (अभ्युत्क्रम्य) अभित उत्थाय (आदित्यम्) आदीप्यमानं सूर्य्यम् (उपतिष्ठन्ते) सेवन्ते (उपसङ्क्रामन्ति) उपसंगत्य गच्छन्ति प्राप्नुवन्ति (दक्षिणाञ्चः) दक्षिणदिक्स्थाः (उदञ्चः) उत्तरदिक्स्थाः (त्र्यैम्बकैः) त्रि + अम्ब गतौ—

विद्वानों के सत्कार] के साथ वर्त्तमान करते हैं। (अथो दक्षिणासंस्थः वै पितृयज्ञः, तम् एव एतत् उदक्संस्थं कुर्वन्ति) फिर दक्षिण दिशा में रक्खा हुआ ही पितृयज्ञ है, उसको ही इससे उत्तर दिशा में रक्खा हुआ करते हैं। (अथ यत् प्राञ्चः अभ्युत्क्रम्य आदित्यम् उपतिष्ठन्ते, देवलोकः वै आदित्यः, पितृलोकः पितरः, एनम् एव देवलोकं पितृलोकात् उपसङ्क्रामन्ति इति) फिर जब पूर्ववाले पुरुष उठ करके सूर्य को सेवते हैं, देवलोक [विद्वानों का स्थान] ही सूर्य [समान] है, पितृलोक [पितरों का स्थान] पितर [पालन करने वाले पदार्थ] हैं, इस देव लोक को ही पितृलोक से चलकर अच्छे प्रकार प्राप्त करते हैं। (अथ यत् दक्षिणाञ्चः उत्क्रम्य अग्नीन् उपतिष्ठन्ते प्रीत्या एव तत् देवेषु अन्ततः ऊर्द्ध्वं चरन्ति) फिर जब दक्षिण दिशा वाले उठकर अग्नियों को सेवते हैं, प्रीति के साथ ही तब विद्वानों के बीच अन्त में वे ऊंचे चलते हैं। (अथ यत् उदञ्चः अभ्युत्क्रम्य त्रैयम्बकैः यजन्ते, रुद्रम् एव तत् स्वस्यां दिशि प्रीणन्ति) फिर जब उत्तर वाले पुरुष उठकर त्रैयम्बक [अर्थात् त्र्यम्बक, तीनों कालों और तीनों लोकों में नेत्र वाले परमेश्वर] को देवता रखते हुये हवियों से वे पूजते हैं, रुद्र [दुष्टों को रुलाने वाले परमात्मा] को ही तब अपनी दिशा में वे प्रसन्न करते हैं। (अथो एनं देवयज्ञम् एव पितृयज्ञेन व्यावर्त्तयन्ति) फिर इस देवयज्ञ [विद्वानों के सत्कार] को ही पितृयज्ञ [पितरों माता पिता आदि पालक विद्वानों के सत्कार] के साथ वर्त्तमान करते हैं। (अथो दक्षिणासंस्थः वै पितृयज्ञः, तम् एव एतत् उदक्संस्थं कुर्वन्ति) फिर दक्षिण दिशा में रखा हुआ ही पितृयज्ञ है, उसको ही इससे उत्तर दिशा में रखा हुआ करते हैं। (अथ यत् अन्ततः आदित्येष्टचा यजति, इयं वै अदितिः, अस्याम् एव एनम् अन्ततः प्रतिष्ठापयति) फिर जब अन्त में अदिति देवता वाली इष्टि से वह यज्ञ करता है, यह [पृथिवी] ही अदिति [अदीन देवमाता, दिव्य पदार्थों को उत्पन्न करने वाली] है, इस [पृथिवी] पर ही इस [यजमान] को अन्त में वह प्रतिष्ठित करता है। (अथ यत् परस्तात् पौर्णमासेन यजते, तथा ह अस्य पूर्वपक्षे साकमेधैः इष्टं भवति) फिर जब पीछे से पौर्णमास यज्ञ के साथ वह यज्ञ करता है, उसी प्रकार ही उसका पहिले पखवाड़े में साकमेधों [क० २३ बल के लिये बुद्धि वाले यज्ञों] से यज्ञ होता है ॥ २५ ॥

भावार्थः--जैसे यज्ञ में यज्ञदेवताओं के लिये यज्ञपदार्थ एक स्थान से दूसरे ऊंचे स्थान को लाये जाते हैं, वैसे ही मनुष्य एक पद से दूसरे उच्च पद को चढ़ते जावें ॥ २५ ॥

ण्वुल् । तन्वादीनां छन्दसि बहुलम् (वा० पा० ६ । ४ । ७७) इति इयङ् । त्रिषु कालेषु लोकेषु च अम्बकं नेत्रं यस्य स त्र्यम्बकः त्रियम्बकः । ततः अण् । त्रियम्बकदेवताकैः (आदित्येष्टचा) अदिति—ण्यः । अदितिदेवताकयेष्टचा (इयम्) दृश्यमाना पृथिवी (अदितिः) अदीना देवमाता—निरु० ४ । २२ । दिव्यपदार्थानां जनयित्री (साकमेधैः) क० २३ । शाकाय बलाय मेधा येषु तैर्यज्ञैः ॥

कण्डिका २६ ॥

त्रयोदशं वा एतं मासमाप्नोति, यच्छुनासीर्य्येण यजते, एतावान्वै संवत्सरः, यावानेष त्रयोदशो मासः । अथ यदग्निं प्रणयन्ति, यमेवामुं वैश्वदेवे मन्थन्ति, तमेव तत् प्रणयन्ति, यन्मथ्यते, तस्योक्तं ब्राह्मणं, यद्यु न मथ्यते पौर्णमासमेव तन्त्रं भवति, प्रतिष्ठा वै पौर्णमासं, प्रतिष्ठित्या एव । अथ यद्वायुं यजति, प्राणो वै वायुः प्राणमेव तेन प्रीणाति । अथ यच्छुनासीरं यजति, संवत्सरो वै शुनासी[1]रः, संवत्सरमेव तेन प्रीणाति । अथ यत्सूर्य्यं यजति, असौ वै सूर्य्यः, योऽसौ तपति, एतमेव तेन प्रीणाति । अथ यच्छ्वेता दक्षिणा ददाति, एतस्यैव तद्रूपं क्रियते । अथ यत् प्रायश्चित्तप्रतिनिधिं कुर्वन्ति, स्वस्त्ययनमेव तत् कुर्वन्ति, यज्ञस्यैव शान्तिर्यजमानस्य भैषज्याय । तैर्वा एतैश्चातुर्मास्यैर्देवाः सर्वान् कामानाप्नुवन्, सर्वा इष्टीः सर्वममृतत्वम् । स वा एष प्रजापति[2]श्चतुर्विंशः, यच्चातुर्मास्यानि, तस्य मुखमेव वैश्वदेवं, बाहू वरुणप्रघासाः प्राणोऽपानो व्यान इत्येतास्तिस्र इष्टयः, आत्मा महाहविः, प्रतिष्ठा शुनासीरं स वा एष प्रजापतिरेव संवत्सरः, यच्चातुर्मास्यानि, सर्वं वै प्रजापतिः, सर्वं चातुर्मास्यानि, तत्सर्वेणैव सर्वमाप्नोति य एवं वेद यश्चैवं विद्वांश्चातुर्मास्यैर्यजते चातुर्मास्यैर्यजते ॥ २६ ॥

इति अथर्ववेदस्य गोपथब्राह्मणोत्तरभागे प्रथमः प्रपाठकः समाप्तः ॥

कण्डिका २६ ॥ तेरहवें महीने और शुनासीर यज्ञ के साथ अग्नि, वायु, सूर्य, संवत्सर और चातुर्मास्यों का वर्णन ॥

(त्रयोदशं वै एतं मासम् आप्नोति, यत् शुनासीर्य्येण यजते) तेरहवें ही इस महीने को वह [यजमान] प्राप्त होता है जो शुनासीर [इन्द्र, वायु वा सूर्य--आगे देखो] देवता वाले हवि से यज्ञ करता है। (एतावान् वै संवत्सरः, यावान् एषः त्रयोदशः मासः) इतना ही संवत्सर [यज्ञ] है जितना [जहां तक] यह तेरहवां महीना है। (अथ यत् अग्निं प्रणयन्ति, यम् एव अमुं वैश्वदेवे मन्थन्ति तम् एव तत् प्रणयन्ति) फिर जब अग्नि को आगे लाते हैं, जिस उस [अग्नि] को ही वैश्वदेव यज्ञ में मथते हैं उसको ही उससे आगे लाते हैं, (यत् मथ्यते, तस्य ब्राह्मणम् उक्तम्) जो वह [अग्नि] मथा जाता है, उसका ब्राह्मण कहा गया है [क० २१]। (यदि उ न मथ्यते पौर्णमासम् एव तन्त्रं भवति) जो वह [अग्नि] अब नहीं मथा जाता है, पौर्णमास यज्ञ ही प्रधान होता है, (पौर्णमासं वै प्रतिष्ठा, प्रतिष्ठित्यै एव) पौर्णमास

२६--(शुनासीर्य्येण) द्यावापृथिवीशुनासीरमरुत्त्व० (पा० ४ । २ । ३२) शुनासीर—यत् । शुनासीरदेवताकेन यज्ञेन (तन्त्रम्) तनु विस्तारे—ष्ट्रन् । तत्रि कुटुम्बधारणे—घञ् वा । कुटुम्बकृत्यम् । प्रधानम् (प्रतिष्ठा) यज्ञसमाप्तिः ।

---

१. जर्मनसंस्करणे सर्वत्र "शुनासीर" इत्येव पाठः ॥

२. अत्र ज. सं. "संवत्सरः" इत्यधिकः पाठः ॥ सम्पा० ॥

यज्ञ ही प्रतिष्ठा [यज्ञ की समाप्ति का व्रत] है, वह प्रतिष्ठा [कीर्ति] के लिये ही है। (अथ यत् वायुं यजति, प्राणः वै वायुः, प्राणम् एव तेन प्रीणाति) फिर जब वायु को यज्ञ करता है, प्राण ही वायु है, प्राण को ही उससे वह तृप्त करता है। (अथ यत् शुनासीरं यजति, संवत्सरः वै शुनासीरः, संवत्सरम् एव तेन प्रीणाति) फिर जब शुनासीर [सुन्दर बड़ी वीर अग्रगामी सेना वाले सेनापति इन्द्र] को वह यज्ञ करता है, संवत्सर ही शुनासीर [बड़े सेनापति के समान] है, संवत्सर को ही उससे वह तृप्त करता है। (अथ यत् सूर्यं यजति, असौ वै सूर्यः, यः असौ तपति, एतम् एव तेन प्रीणाति) फिर जब सूर्य को यज्ञ करता है, वही सूर्य है जो वह तपाता है, इसको ही उससे वह तृप्त करता है। (अथ यत् शेताः दक्षिणाः ददाति, एतस्य एव तत् रूपं क्रियते) फिर जब शेता [सूक्ष्म कर्म करने वाला यजमान] दक्षिणायें देता है, इस [यजमान] का ही वह रूप किया जाता है। (अथ यत् प्रायश्चित्तप्रतिनिधिं कुर्वन्ति, स्वस्त्ययनम् एव तत् कुर्वन्ति) फिर जब प्रायश्चित [पापशोधन] रूप प्रतिनिधि यज्ञ करते हैं, स्वस्त्ययन [स्वस्तिवाचन] ही तब वे करते हैं, (यज्ञस्य एव शान्तिः यजमानस्य भैषज्याय) यज्ञ की ही शान्ति यजमान की ओषधि के लिये है। (तैः वै एतैः चातुर्मास्यैः देवाः सर्वान् कामान् सर्वाः इष्टीः सर्वम् अमृतत्वम् आप्नुवन्) उन ही इन चातुर्मास्य यज्ञों से देवताओं ने सब कामनाओं, [अर्थात्] सब इष्टियों [सत्क्रियाओं] और सब अमरपन को पाया है। (सः वै एषः प्रजापतिः चतुर्विंशः, यत् चातुर्मास्यानि) वह ही यह प्रजापति चौबीस अवयव [अर्धमास] वाला है, जो चातुर्मास्य यज्ञ हैं, (तस्य मुखम् एव वैश्वदेवम्, बाहू वरुणप्रघासाः, प्राणः अपानः व्यानः इति एताः तिस्रः इष्टयः, आत्मा महाहविः प्रतिष्ठा शुनासीरम्) उस [प्रजापति] का मुख ही वैश्वदेव यज्ञ है, दोनों भुजायें श्रेष्ठ अन्न हैं, प्राण, अपान, व्यान यह तीन इष्टियां [यज्ञ] हैं, आत्मा महाहवि है, प्रतिष्ठा [ठहराव वा आश्रय] शुनासीर [इन्द्र का हवि] है। (सः वै एषः प्रजापतिः एव संवत्सरः, यत् चातुर्मास्यानि) वह ही यह प्रजापति ही संवत्सर है जो चातुर्मास्य हैं। (सर्वं वै प्रजापतिः, सर्वं चातुर्मास्यानि, तत् सर्वेण एव सर्वम् आप्नोति, यः एवं वेद यः च एवं विद्वान् चातुर्मास्यैः यजते चातुर्मास्यैः यजते) सब ही प्रजापति है, सब ही चातुर्मास्य हैं, इस लिये सबके साथ ही वह सब पाता है, जो ऐसा जानता है और जो ऐसा विद्वान् चातुर्मास्य यज्ञों से यज्ञ करता है, चातुर्मास्य यज्ञों से यज्ञ करता है ॥ २६ ॥

स्थितिः। आश्रयः (सुनासीरः, शुनासीरः) कृशॄपृकटिपटिशौटिभ्य ईरन् (उ० ४। ३०) सु + णासृ शब्दे—ईरन्, सस्य शः विकल्पेन। सुष्ठु नासीरम् अग्रसैन्यं यस्य सः। सेनापतिरिन्द्रः। शुनासीरौ शुनो वायुः शु एत्यन्तरिक्षे सीरः आदित्यः सरणात्— निरु० ९। ४० (शेता) शिञ् निशाने–तृच्। सूक्ष्मकर्मा। यजमानः (प्रायश्चित्त-प्रतिनिधिम्) पापशोधनप्रतिनिधिरूपं यज्ञम् (इष्टीः) यजेः—क्तिन्। सत्क्रियाः (वरुणप्रघासाः) श्रेष्ठान्नानि ॥

भावार्थः—देश और काल का विचार करके संसार के पदार्थों से उपकार लेकर मनुष्य उन्नति करें ॥ २६ ॥

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिम*श्रीसयाजीरावगायकवाडाधिष्ठित*बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदासत्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्य उत्तरभागे प्रथमः प्रपाठकः समाप्तः ॥

अयं प्रपाठकः प्रयागनगरे कार्तिकमासे शुक्लपक्षे द्वादश्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ।

मुद्रितम्—भाद्रकृष्णा ८ संवत् १९८१ वि० ता० २२ अगस्त सन् १९२४ ई० ॥

अथ द्वितीयः प्रपाठकः ।

कण्डिका १ ॥

ओम् । मांꣳसीयन्ति वा आहिताग्नेरग्नयः, त एनमेवाग्रेऽभिध्यायन्ति यजमानं, य एतमैन्द्राग्नं पशुं षष्ठे षष्ठे मासे आलभते, तेनैवेन्द्राग्निभ्यां ग्रसितमात्मानं निरवदयत । आयुष्काम आलभेत, प्राणापानौ वा इन्द्राग्नी, प्राणापानावेवात्मनि धत्तो, आयुष्मान् भवति । प्रजाकाम आलभेत, प्राणापानौ वा इन्द्राग्नी, प्राणापानौ प्रजा अनु प्रजायन्ते, प्रजावान् भवति । पशुकाम आलभेत, प्राणापानौ वा इन्द्राग्नी, प्राणापानौ पशवोऽनु प्रजायन्ते, पशुमान् भवति । यामं शुकं हरितमालभेत शठं वायःकामः, एता नाम यः[१] पितृलोके स्यामित्येतेन ह वै यमोऽमुष्मिंल्लोक आर्ध्नोत्, पितृलोक एवार्ध्नोति । त्वाष्ट्रं वडवमालभेत प्रजाकामः, प्रजापतिर्वै प्रजाः सिसृक्षमाणः स द्वितीयं मिथुनमन्वाविन्दत्, स त्वाष्ट्रं वडवमपश्यत्, त्वष्टा हि रूपाणां प्रजनयिता, तेन प्रजा असृजत्, तेन मिथुनमविन्दत् । प्रजावान् मिथुनवान् भवति, य एवं वेद, यश्चैवं विद्वानेतमालभते, योनीन् वा एष काम्यान् पशूनालभते, योनीष्ट्वैन्द्राग्नेन काम्यं पशुमालभन्त इष्ट्वालम्भः समृद्ध्यै ॥ १ ॥

१. "वा यः कामयेत अनामयः" इति पाठान्तरम् ॥ सम्पा० ॥

कण्डिका १ ॥ इन्द्र—अग्नि अर्थात् प्राण और अपान के लिये यज्ञ के लाभ ॥

(ओम् । आहिताग्नेः अग्नयः वै मांसीयन्ति) अग्नि स्थापित करने वाले की [यजमान की आहवनीय आदि] अग्नियाँ मननसाधक [बुद्धिवर्धक फल, बादाम अखरोट आदि हव्य] पदार्थों को चाहती हैं । (ते एनम् एव यजमानम् अग्रे अभिध्यायन्ति, यः एतम् ऐन्द्राग्नं पशुं षष्ठे षष्ठे मासे आलभते) वे [याजक लोग] इस ही यजमान को पहिले अच्छे प्रकार ध्यान में करते हैं, जो इस इन्द्र—अग्नि [प्राण अपान] देवता वाले पशु [जीव] को छठे छठे महीने अच्छे प्रकार प्राप्त होता है । (तेन एव इन्द्राग्निभ्यां ग्रसितम् आत्मानम् निरवदयत) इस कारण से ही इन्द्र और अग्नि [प्राण और अपान] से खाये गये आत्मा की वह निन्दा करता है । (आयुष्कामः आलभेत, प्राणापानौ वै इन्द्राग्नी, प्राणापानौ एव आत्मनि धत्तः, आयुष्मान् भवति) आयु [जीवन] चाहने वाला पुरुष [प्राण और अपान देवता वाले जीव को छठे छठे महीने] अच्छे प्रकार प्राप्त करे, दोनों प्राण और अपान ही इन्द्र और अग्नि हैं, दोनों प्राण और अपान ही आत्मा को पुष्ट करते हैं, वह [यजमान] बड़ी आयु वाला होता है । (प्रजाकामः आलभेत, प्राणापानौ वै इन्द्राग्नी, प्राणापानौ अनु प्रजाः प्रजायन्ते, प्रजावान् भवति) प्रजायें चाहने वाला पुरुष [प्राण और अपान देवता वाले जीव को···] अच्छे प्रकार प्राप्त करे, दोनों प्राण और अपान ही इन्द्र और अग्नि हैं, दोनों प्राण और अपान के साथ साथ प्रजायें उत्पन्न होती हैं; वह उत्तम प्रजाओं वाला होता है । (पशुकामः आलभेत, प्राणापानौ वै इन्द्राग्नी, प्राणापानौ अनु पशवः प्रजायन्ते, पशुमान् भवति) पशुओं [जीवों] को चाहने वाला पुरुष [प्राण और अपान देवता वाले जीव को···] अच्छे प्रकार प्राप्त करे, दोनों प्राण और अपान ही इन्द्र और अग्नि हैं, प्राण और अपान के साथ साथ पशु उत्पन्न होते हैं, वह उत्तम पशु वाला होता है । (अयः[1]-कामः यामं शुकं शठं हरितं वा आलभेत, एता नाम यः पितृलोके स्याम् इति एतेन

१—(मांसीयन्ति) मनेर्दीर्घश्च (उ० ३ । ६४) मन ज्ञाने—सप्रत्ययो दीर्घश्च । मांसं माननं वा मानसं वा मनोऽस्मिन्त्सीदतीति वा—निरु० ४ । ३ । सुप आत्मनः क्यच् (पा० ३ । १ । ८) मांस—क्यच् । मांसानि मननसाधकान् बुद्धिवर्धकान् पदार्थान् फल—बादाम—अक्षोटादीन् इच्छन्ति होमकरणाय (आहिताग्नेः) स्थापित-पावकस्य यजमानस्य (अग्नयः) आहवनीयादयः (अभिध्यायन्ति) सर्वतश्चिन्त-यन्ति (आ) समन्तात् (लभते) प्राप्नोति (ग्रसितम्) भक्षितम् (निरवदयत) निर्वादः, अपवादः । अपवादयति तिरस्करोति (आत्मनि) आत्मानम् (धत्तः) पोषयतः (यामम्) यम—अण् । यमो यच्छतीति सतः—निरु० १० । १९ । मध्यस्थानो वायुः । वायुदेवताकम् (शुकम्) शुक गतौ—कः । पक्षिविशेषम् (हरितम्) हृसृरुहियुषिभ्य इतिः (उ० १ । ९७) हृञ् हरणे—इतिः । अश्वम् ।

१. पृ. ३०४ की टि. में प्रदर्शित पाठभेदानुसार 'यामं शुकं हरितमालभेत शठं वा, यः कामयेत अनामयः······' यह अन्वय अर्थसङ्गत है ॥ सम्पा० ॥

ह वै यमः अमुष्मिन् लोके आध्नोंत्, पितृलोके एव आध्नोंति) सुवर्ण चाहने वाला पुरुष यम [वायु] देवता वाले शुक [सुग्गा पक्षी] और शठ [प्रशंसनीय] घोड़े को अच्छे प्रकार प्राप्त करे, मैं चलने वाला [पुरुषार्थी] प्रसिद्ध हूं, जो पितृलोक [माता पिता आदि पालक विद्वानों की सभा] में रहूं—इस [मन्त्र] से ही यम [संयमी, जितेन्द्रिय पुरुष] उस लोक [दूर देश] में समृद्ध होता है, वह पितृलोक में ही समृद्ध होता है। (प्रजाकामः त्वाष्ट्रं वडवम् आलभेत) प्रजायें चाहने वाला पुरुष त्वष्टा [सूक्ष्मकर्ता परमात्मा] देवता वाले, बल पहुंचाने वाले पराक्रम को अच्छे प्रकार प्राप्त होवे। (प्रजाः सिसृक्षमाणः सः प्रजापतिः वै द्वितीयं मिथुनम् अन्वाविन्दत्) प्रजाओं को उत्पन्न करने की इच्छा करते हुए उस प्रजापति ने दूसरे जोड़े को प्राप्त किया। (सः त्वाष्ट्रं वडवम् अपश्यत्, त्वष्टा हि रूपाणां प्रजनयिता, तेन प्रजाः असृजन्, ते मिथुनम् अविन्दत्) उसने त्वष्टा देवता वाले, बल पहुँचाने वाले पराक्रम को देखा, त्वष्टा [सूक्ष्म बनाने वाला परमात्मा] ही रूपों को उत्पन्न करने वाला है, उससे प्रजायें उत्पन्न हुए, उससे उसने जोड़े को पाया। (प्रजावान् मिथुनवान् भवति, यः एवं वेद यः च एव विद्वान् एतम् आलभते) वह उत्तम प्रजाओं वाला और उत्तम मिथुन [जोड़ों पुत्र पुत्रियों] वाला होता है, जो ऐसा जानता है, और जो ऐसा विद्वान् इस [यज्ञ] को अच्छे प्रकार प्राप्त होता है। (एषः वै काम्यान् योनीन् पशून् आलभते, ऐन्द्राग्नेन तु काम्यं योनिः[1] पशुम् आलभन्ते इष्ट्वा अलम्भः मृध्यै) वह ही पुरुष चाहने योग्य योनियों [घरों] और पशुओं को अच्छे प्रकार प्राप्त होता है, और इन्द्र और अग्नि [प्राण और अपान] देवता वाले यज्ञ से चाहने योग्य घर और पशु को वे अच्छे प्रकार प्राप्त होते हैं और यज्ञ करके [उनका] आरम्भ [उद्यम] समृद्धि के लिये होता है ॥ १ ॥

भावार्थ :—मनुष्य को योग्य है कि सुग्गे के समान अन्तरिक्षगामी और अश्व के समान भूगामी होकर न्यून से न्यून छठे छठे महीने यज्ञ करके अपनी अनेक प्रकार की उन्नति की जाँच करके उचित व्यवहार करे ॥ १ ॥

कण्डिका २ ॥

पञ्चधा वै देवा व्युदक्रामन्[2], अग्निर्वसुभिः, सोमो रुद्रैः, इन्द्रो मरुद्भिः, वरुण आदित्यैः, बृहस्पतिर्विश्वैर्देवैः। ते देवा अब्रुवन्, असुरेभ्यो वा इदं भ्रातृव्येभ्यो

(शठम्) शठ हिंसायां श्लाघायां च - अच्। श्लाघ्यम् (वा) चार्थे (अयःकामः) सर्वधातुभ्योऽसुन् (उ० ४ । १८९) इण् गतौ—असुन्। अयः, हिरण्यनाम—निघ० १ । २ । सुवर्णेच्छुकः (एता) इण् गतौ—तृच्। गमनशीलः (यमः) संयमी पुरुषः (आध्नोंत्) समृद्धो भवति (त्वाष्ट्रम्) त्वष्टा तनूकर्ता परमात्मा। त्वष्टृदेवताकम् (वडवम्) वल+वा गतौ—कः। बलप्रापकं पराक्रमम् (सिसृक्षमाणः) स्रष्टुमिच्छन् (मिथुनवान्) पुत्रपुत्रीवान् (योनीन्) गृहनाम—निघ० ३ । ४ । (योनिः) योनिम्। गृहम् (तु) समुच्चये (आलम्भः) आरम्भः। उद्यमः ॥

---

१. 'योनिः इष्ट्वा' इस पदच्छेद के अनुसार कण्डिका का पाठ योनिरिष्ट्वा होना चाहिये ॥
२. पू सं. व्युत्क्रामन् इति पाठः ॥ सम्पा० ॥

रुध्याम, यन्मिथो विप्रियाः[1] स्मः, या न इमाः प्रियास्तन्वस्ताः समवद्यामहा इति । ताः समवाद्यन्त, ताभ्यः सन्निर्ऋच्छात्, यो नः प्रथमोऽन्योऽन्यस्मै द्रुह्यादिति । यत्तन्वः समवाद्यन्त तत् तानूनप्तृस्य तानूनप्त्रत्वम्[2] । ततो देवा अभवन् परासुराः । तस्माद्यस्तानूनप्तणां[3] प्रथमो द्रुह्यति, स आर्त्तिमार्च्छति । यत्तानूनप्त्रं समवद्यति, भ्रातृव्याभिभूत्यै भवति, आत्मना परास्याप्रियो भ्रातृव्यो भवति ॥ २ ॥

कण्डिका २ ॥ देवताओं ने पांच प्रकार से चढ़ाई करके असुरों को जीता ॥

(पंचधा वै देवाः व्युदक्रामन् अग्निः वसुभिः, सोमः रुद्रैः, इन्द्रः मरुद्भिः, वरुणः आदित्यैः, बृहस्पतिः विश्वैः देवैः) पाँच प्रकार से ही देवताओं [विजय चाहने वाले पुरुषों] ने चढ़ाई की—अग्नि [प्रतापी पुरुष] ने वसुओं [निवास कराने वाले पुरुषों] के साथ, सोम [प्रेरक पुरुष] ने रुद्रों [दुष्टों के रुलाने वाले वीरों] के साथ, इन्द्र [परम ऐश्वर्य वाले पुरुष] ने मरुतों [शत्रुओं के मारने वाले वीरों] के साथ, वरुण [वैरियों को घेरने वाले पुरुष] ने आदित्यों [अखण्ड व्रतधारी शूरों] के साथ और बृहस्पति [बड़े बड़े सेना के रक्षक पुरुष] ने विश्वदेवों [सब दिव्य पदार्थों] के साथ। (ते देवाः अब्रुवन्, असुरेभ्यः भ्रातृव्येभ्यः वै इदं रुध्याम, यत् मिथः विप्रियाः स्मः, नः याः इमाः प्रियाः तन्वः ताः समवद्यामहै इति) वे देवता बोले—असुर शत्रुओं से अवश्य इस [राज्य] को हम रोकें [बचावें] जिससे हम आपस में विशेष प्रिय हों, हमारे जो यह प्यारे शरीर [शरीर के समान सेना वाले] हैं, उनको हम बलवान् करें। (ताः समवाद्यन्त, ताभ्यः सन्[4]निर्ऋच्छात्, यः नः प्रथमः अन्योन्यस्मै द्रुह्यात् इति)· उन [शरीरों] को उन्होंने बलवान् किया [और कहा] उन [शरीरों] से वह सर्वथा निर्बल हो जावे, जो हमारा प्रधान होकर आपस में अनिष्ट चीते। (यत् तन्वः समवाद्यन्त, तत् तानून-

---

२—(पञ्चधा) पञ्चप्रकारेण (देवाः) विजिगीषवः (व्युदक्रामन्) अध्यारुहन् (अग्निः) प्रतापी पुरुषः (वसुभिः) निवासयितृभिः (सोमः) प्रेरकः सेनापतिः (रुद्रैः) दुष्टरोदकैः शूरैः (इन्द्रः) परमैश्वर्य्यवान् (मरुद्भिः) शत्रुमारकवीरैः (वरुणः) आच्छादकः (आदित्यैः) अखण्डव्रतिवीरैः (बृहस्पतिः) बृहतां सैन्यानां पालकः (विश्वैः) सर्वैः (देवैः) दिव्यपदार्थैः (इदम्) राज्यम् (रुध्याम) रुन्ध्याम (तन्वः) शरीराणि (समवद्यामहै) सम्+अव+दो अवखण्डने इत्यस्य रूपम्। अवदानं पराक्रमः। सम्यक् पराक्रमयाम। पराक्रमयुक्ताः करवाम। (सन्निर्ऋच्छात्) सम्+निर्+ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु—लेट्। सर्वथा निर्बलो भवेत् (द्रुह्यात्) अनिष्टं चिन्तयेत् (तानूनप्त्रस्य) नप्तृनेष्टृत्वष्टृ० (उ० २।९५) तनू+न+पत्लृ गतौ—तृच्, नञः प्रकृतिभावः, अत् इति शब्दलोपः,

---

१. पू. सं. 'विभ्रियास्मः' इति पाठः ॥ २. पू. सं. तानूनप्तृत्वमिति पाठः ॥
३. अत्र तानूनप्त्राणामिति शुद्धः पाठः भवितव्यः ॥
४. यहाँ सः निर्ऋच्छात् पाठ संगत प्रतीत होता है ॥ सम्पा० ॥

प्तृस्य तानूनप्त्रत्वम्) जो उन्होंने तनू [शरीरों] को बलवान् किया, वह तनूनप्ता [शरीरों के रक्षक] का तानूनप्त्रत्व [शरीरों का रक्षकपन] है । (ततः देवाः असुराः परा-अभवन्) उससे देवताओं ने असुरों को हरा दिया । (तस्मात् यः तानूनप्तॄणां प्रथमः द्रुह्यति, सः आर्तिम् आर्च्छति) इसलिये जो शरीर रक्षकों का प्रधान अनिष्ट चीतता है, वह सब ओर से पीड़ा पाता है । (यत् तानूनप्त्रं समवद्यति भ्रातृव्याभिभूत्यै भवति, आत्मना अस्य अप्रियः भ्रातृव्यः परा भवति) जो पुरुष शरीरों के रक्षक वीर को बलवान् करता है, वह शत्रुओं के हराने के लिये समर्थ होता है, और आत्मबल से उसका कुप्रिय शत्रु हार जाता है ॥ २ ॥

भावार्थ :—मनुष्य शारीरिक आत्मिक और सामाजिक पुष्टि से सेना की यथावत् व्यूहरचना करके शत्रुओं को हरावे और ध्यान रक्खें कि उनका प्रधान सेनापति सर्वथा उनका शुभचिन्तक होवे ॥ २ ॥

विशेषः—इस कण्डिका को अथ० १९ । १३ । १—११ से मिलाओ, उसका एक मन्त्र यहाँ दिया जाता है—

इन्द्र एषां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभि-भञ्जतीनां जयन्तीनां मरुतो यन्तु मध्ये ॥ अथ० १९ । १३ । ९, ऋग्० १० । १०३ । ८, यजु० १७ । ४० साम उ० ९ । ३ । ३ । (इन्द्रः) इन्द्र [महाप्रतापी मुख्य सेनापति] (एषाम्) इन [वीरों] का (नेता) नेता [होवे], (बृहस्पतिः) बृहस्पति [बड़े अधिकारों वाला सेनानायक] (दक्षिणा) दाहिनी ओर और (यज्ञः) पूजनीय (सोमः) सोम [प्रेरक, उत्साहक सेनाधिकारी] (पुरः) आगे (एतु) चले । (मरुतः) मरुद्गण [शूरवीर पुरुष] (अभिभञ्जतीनाम्) कुचल डालती हुयी, (जयन्तीनाम्) विजयिनी (देवसेनानाम्) विजय चाहने वालों की सेनाओं के (मध्ये) बीच में (यन्तु) चलें ॥

कण्डिका ३ ॥

पञ्चकृत्वोऽवद्यति, पाङ्क्तो यज्ञः, पञ्चधा हि ते ताः समवाद्यन्त । आपतये त्वा गृह्णामीत्याह, प्राणो वा आपतिः, प्राणमेव तेन प्रीणाति । परिपतये त्वेत्याह मनो वै परिपतिः मन एव तेन प्रीणाति । तनूनप्त्र इत्याह, तन्वो हि ते ताः समवाद्यन्त । शाक्वरायेत्याह, शक्तꣳ हि ते ताः समवाद्यन्त । शक्मन ओजिष्ठायेत्याह, ओजिष्ठं हि ते तदात्मनः समवाद्यन्त । अनाधृष्टमित्याह, अनाधृष्टं ह्येतत् । अनाधृष्यमित्याह, अनाधृष्यं ह्येतत् । देवानामोज इत्याह, देवानाꣳ ह्येतदोजः । अभिशस्तिपा इत्याह, अभिशस्तिपा ह्येतत् । अनभिशस्ते ऽन्यमित्याह, अनभिशस्तेनꣳ

स्वार्थे-अण् । तनूनप्तुः । शरीरस्य न पातयितुः । देहरक्षकस्य (तानूनप्त्रत्वम्) शरीररक्षकत्वम् (असुराः) असुरान् (प्रथमः) प्रधानः (आर्तिम्) पीडाम् (आर्च्छति) आ + ऋच्छ गतौ । समन्तात् प्राप्नोति (तानूनप्त्रम्) तनूनप्तारम् (समवद्यति) सम्यक् पराक्रमिणं करोति ॥

ह्येतदनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्प[१]तिः । अञ्जसा सत्यमुपगेषं[१] स्विते मा धा इत्याह, यथा यजुरेवैतत् ॥ ३ ॥

कण्डिका ३ ॥ यजुर्वेद के मन्त्र के आश्रय से यज्ञ कर्म ॥

(पंचकृत्वः अवद्यति, पाङ्क्तः यज्ञः, पंचधा हि ते ताः समवाद्यन्त) पाँच प्रकार से वह [यजमान] पराक्रमी होता है, पाँच प्रकार से प्रकाशित यज्ञ है, पाँच प्रकार से ही उन [देवताओं] ने उन [शरीरों] को समर्थ किया है [ऊपर क० २ देखो]। (आपतये त्वा गृह्णामि इति आह, प्राणः वै आपतिः, प्राणम् एव तेन प्रीणाति) धनादि प्राप्ति के लिये तुझे मैं ग्रहण करता हूं—यह [यजुर्वेद मन्त्र भाग] वह कहता है, प्राण ही अच्छे प्रकार प्रयत्न है, प्राण को ही उससे वह [यजमान] तृप्त करता है। (परिपतये त्वा इति आह, मनः वै परिपतिः, मनः एव तेन प्रीणाति) सब ओर से ऐश्वर्य्य के लिये तुझे [मैं ग्रहण करता हूं—यह भाग] वह कहता है, मन ही सब ओर से ऐश्वर्य है, मन ही को उससे वह तृप्त करता है। (तनूनप्त्रे इति आह, ते हि ताः तन्वः समवाद्यन्त) तनूनप्ता [शरीर को न गिराने वाले] के लिये [तुझे ग्रहण करता हूं—यह भाग] वह बोलता है, उन [देवताओं] ने उन शरीरों को समर्थ किया है। (शाक्वराय इति आह, शक्तं हि ते ताः समवाद्यन्त) सामर्थ्य के लिये [तुझे ग्रहण करता हूं—यह भाग] वह बोलता है, समर्थ ही वह [मन] है, उन्होंने उन [शरीरों] को समर्थ किया है। (शक्मने ओजिष्ठाय इति आह, तत् ओजिष्ठं हि ते आत्मनः समवाद्यन्त) समर्थ महाबली पुरुष के लिये [तुझे ग्रहण करता हूं—यह भाग] वह बोलता है, उससे महाबली को ही उन्होंने अपने से समर्थ किया है। (अनाधृष्टम् इति आह, अनाधृष्टं हि एतद्) अपमान नहीं किया गया [बल है—यह भाग] वह बोलता है, अपमान नहीं किया गया ही यह [ब्रह्म बल] है। (अनाधृष्यम् इति आह, अनाधृष्यं हि एतद्) आगे को अपमान के अयोग्य [बल है—यह भाग] वह बोलता है, आगे को अपमान के अयोग्य ही यह [ब्रह्म

३—(पाङ्क्तः) गो० पू० ४ । २४ । पङ्क्ति—अण् । पङ्क्त्या पञ्चप्रकारेण प्रकाशितः (आपतये) सर्वधातुभ्य इन् (उ० ४ । ११८) आ+पत्लृ गतौ ऐश्वर्य्ये च—इन् । आगमाय । धनादिप्राप्तये (परिपतये) पत्यते, ऐश्वर्यकर्मा—निघ० २ । २१ । परि+पत ऐश्वर्ये—इन् । सर्वत ऐश्वर्याय (तनूनप्त्रे) क० २ । शरीरस्य न पातयित्रे (शाक्वराय) कॄगॄशॄवृञ्चतिभ्यः ष्वरच् (उ० २ । १२१) शक्लृ शक्तौ-ष्वरच् । शक्वरः शक्तिमान् । ततो भावे—अण् । शक्तिमत्त्वाय । सामर्थ्याय (शक्तम्) समर्थम् (शक्मने) अशिशकिभ्यां छन्दसि (उ० ४ । १४७) शक्लृ शक्तौ—मनिन् । समर्थाय पुरुषाय (ओजिष्ठाय) बलवत्तमाय (अनाधृष्टम्) अतिरस्कृतम् (अनाधृष्यम्) अतिरस्करणीयम् (देवानाम्) विदुषाम् (ओजः) बलम् (अभिशस्तिपाः) अभिशस्तेर्हिंसनात् पाता रक्षिता (अनभिशस्तेन्यम्) अनभिशस्ते+णीञ् प्रापणे—

---

१. अस्यां कण्डिकायाम् पू० सं० 'आयतये', 'आयतिः', 'तपस्तपस्पति', 'उपगेषाम्' इति पाठास्तत्रास्माभिः मन्त्रानुसारिणः संशोधिताः ॥ सम्पा० ॥

बल] है। (देवानाम् ओजः इति आह, देवानां हि एतत् ओजः) विद्वानों का बल [तू है—यह भाग] वह बोलता है, विद्वानों का ही यह [ब्रह्म] बल है । (अभिशस्तिपाः इति आह, अभिशस्तिपाः हि एतत्) हिंसा से बचाने वाला [तू है —यह भाग] वह बोलता है, हिंसा से बचाने वाला ही यह [ब्रह्म] है । (अनभिशस्तेन्यम् इति आह, अनभिशस्तेनं हि एतत्, दीक्षापतिः मे दीक्षाम् अनुमन्यताम्, तपः अनु तपस्पतिः) अहिंसित कर्म में ले जाने वाला [तू है—यह मन्त्र भाग] वह बोलता है, अहिंसित कर्म में ले जाने वाला ही यह [ब्रह्म] है, दीक्षापति [ब्रह्मा] मेरी दीक्षा को स्वीकार करे और तप का पति मेरे तप को स्वीकार करे । (अञ्जसा सत्यम् उपगेषं स्विते मा धाः यथा एतत् यजुः एव) तेज के साथ वा सहज से सत्य [यथार्थ व्यवहार] को मैं आदर से खोजता रहूं, अच्छे चले हुए मार्ग में मुझे धारण कर, यह [मन्त्र भाग] वह बोलता है, जैसा यह ही यजुर्वेद [का मन्त्र] है ।। ३ ।।

भावार्थः—मनुष्य अपने कर्तव्य की सिद्धि के लिये उसके सूक्ष्म अवयवों को गम्भीरता से विचार लेवे ।। ३ ।।

विशेषः—इस कण्डिका में यजुर्वेद अध्याय ५ मन्त्र ५ के प्रतीक कुछ भेद से दिये हैं, वह मन्त्र अर्थ सहित दिया जाता है जिससे पद और आशय मिलाने में सुगमता होवे । (आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वन ओजिष्ठाय । अनाधृष्टमस्यनाधृष्यं देवानामोजोऽनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमञ्जसा सत्यमुपगेषꣳस्विते मा धाः) [हे परमेश्वर !] (त्वा) तुझको (आपतये) सब प्रकार पाने के लिये, (परिपतये) सब ओर से ऐश्वर्य के लिये, (तनूनप्त्रे शाक्वराय) शरीर को न गिराने वाले सामर्थ्य के लिये और (ओजिष्ठाय शक्वने) अत्यन्त पराक्रमी समर्थ पुरुष के हित के लिये (गृह्णामि) ग्रहण करता हूं । (अभिशस्तिपाः) हिंसा से बचाने वाला तू (देवानाम्) विद्वानों का (अनाधृष्टम्) अपमान नहीं किया गया, (अनाधृष्यम्)

क्विप् । आर्षं पुंस्त्वम्, द्वितीया प्रथमार्थे । अनभिशस्तेनी । अनभिशस्ते अहिंसिते व्यवहारे प्रापकम् (अनभिशस्तेनम्) अनभिशस्ते + नयतेः— डः । अहिंसिते कर्मणि प्रापकम् (अञ्जसा) अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु—असुन् । कान्त्या । ज्ञानेन । सहजेन (सत्यम्) यथार्थव्यवहारम् (उप) आदरेण (गेषम्[1]) गेषृ अन्वेषणे—विधिलिङ् । आर्षं परस्मैपदत्वम् । अहं गेषेय । अन्वेषणेन प्राप्नुयाम् (स्विते) सु + इण् गतौ—क्तः । सुगते मार्गे (मा) माम् (धाः) धेहि ।।

---

१. दुरूहेयं व्युत्पत्तिः "उपगेषम्" शब्दस्य । वस्तुतस्तु आशिषि लिङि लुङि वा रूपमेतत् । तथा च लिङि—कै गै शब्दे इति धातोः आशिषि लिङि, छन्दस्युभयथा (पा० ३ । ४ । ११७) इति सार्वधातुकत्वाद् अङ् । आतो लोप इटि च (पा० ६ । ४ । ६४) इत्याकारस्य लोपे ऽङोऽकारात् यासुटः अतो येयः (पा० ७ । २ । ८०) इतीयादेशः, आर्धधातुकत्वात् सलोपाभावः, लोपो व्योर्वलि (पा० ६ । १ । ६६) इति यलोपः ।

लुङि विस्तरभिया अत्र न प्रदर्श्यंते द्र० यजु० वि० भा० भ० पृ० ४३३ ।। सम्पा० ।।

आगे को नहीं अपमान योग्य, (अनभिशस्ति) हिंसा के अयोग्य (अनभिशस्तेन्यम्) अहिंसित कर्म में ले चलने वाला (ओजः असि) बल है। (स्विते) सुन्दर चले हुए [मार्ग] में (मा धाः) मुझे तू धारण कर। (अञ्जसा) तेज के साथ वा सहज से (सत्यम् उपगेषम्) सत्य को मैं खोजता रहूं ॥ ३ ॥

कण्डिका ४ ॥

घृतं वै देवा वज्रं कृत्वा सोममघ्नन्। स्रुचौ बाहू, तस्मात् स्रुचौ सौमी-माहुतिं नासाते। अवधीयेत सोमः, तस्मात् स्रुचौ चाज्यं चान्तिकमाहार्षीत्। अन्तिकमिव खलु वा अस्यैतत् प्रचरन्ति, यत्तानूनप्त्रेण प्रचरन्ति। अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद इत्याह, यदेवास्यापवायते यन्मीयते, तदेवास्यै-तेनाप्याययन्ति। आ तुभ्यमिन्द्रः प्यायतामात्वमिन्द्राय प्यायस्वेत्याह, उभावे-वेन्द्रञ्च सोमं चाप्याययन्ति। आप्याययास्मान्त्सखीन् सन्या मेधया प्रजया धने-नेत्याह. ऋत्विजो वा एतस्य सखायः, तानेवास्यैतेनाप्याययन्ति। स्वस्ति ते देव सोम सुत्यामुदृचमशीयेत्याह, आशिषमेवैतामाशास्ते, प्र वा एतस्माल्लोकाच्च्यवन्ते, ये सोममाप्याययन्ति। अन्तरिक्षदेवत्यो हि सोमः आप्यायत एष्टा राय एष्टा वामानि प्रैषे भगाय ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति, द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिंल्लोके प्रतितिष्ठति प्रतितिष्ठति ॥ ४ ॥

कण्डिका ४ ॥ सोम यज्ञ में त्रुटि की यजुर्वेद मन्त्र से पूर्ति ॥

(देवाः वै घृतं वज्रं कृत्वा सोमम् अघ्नन्) देवों [ऋत्विजों] ने घृत [घी वा प्रकाश] को वज्र बनाकर सोम [ओषधिराज] को पीड़ित किया। (स्रुचौ बाहू, तस्मात् स्रुचौ सौमीम् आहुतिं न आसाते) दोनों स्रुचा [घृतपात्र] दो भुजायें हैं, इसलिये दोनों स्रुचायें सोम देवता वाली आहुति को नहीं छोड़ते। (सोमः अवधीयेत, तस्मात् स्रुचौ च आज्यं च अन्तिकम् आहार्षीत्) सोम ध्यान में किया जावे, इसलिये दोनों स्रुचाओं और घी को समीप में वह [यजमान] लावे। (अन्तिकम् इव खलु वै अस्य एतत् प्रचरन्ति, यत् तानूनप्त्रेण प्रचरन्ति) समीप रक्खे हुये के समान ही इस [सोम] के लिये यह [कर्म] वे करते हैं, जो तनूनप्ता देवता वाले [शरीर को न गिराने वाले चरु] से वे करते हैं। (देव सोम ते अंशुः—अंशुः एकधनविदे इन्द्राय आप्यायताम्—

४—(अघ्नन्) अपीडयन् (आसाते) अस्यतः। क्षिपतः (अवधीयेत) अव+दधातेः कर्मणि—विधिलिङ्। अवधाने ध्याने क्रियेत (अन्तिकम्) समीपम्। समीपस्थम् (आहार्षीत्) आहरेत्। आनयेत् (तानूनप्त्रेण) तनूनप्तृदेवताकेन चरुणा (अंशुरंशुः) मृगय्वादयश्च (उ० १। ३७) अंश विभाजने—कुः[1]। अवयवोऽवयवः। अङ्गमङ्गम् (देव) दिव्यगुणयुक्त। (सोम) हे ऐश्वर्यवन् पुरुष औषध वा (आ) समन्तात् (प्यायताम्) वर्धताम् (इन्द्राय) परमैश्वर्यवते

---

१. अत्र नित्यवीप्सयोः (पा० ८। १। ४) इत्यनेन "अंशुः" शब्दस्य द्विर्वचनम् ॥ सम्पा० ॥

इति आह, यत् एव अस्य अपवायते, यत् मीयते, तत् एव अस्य एतेन आप्याययन्ति) हे दिव्यगुण वाले सोम ! तेरा अंश अंश एक धर्म से धन पाने वाले इन्द्र [बड़े ऐश्वर्य्य वाले पुरुष] के लिये सब ओर से बढ़े—यह [यजुर्वेद मन्त्र भाग] वह कहता है, जो कुछ भी इस [सोम] का सूख जाता है, जो कुछ मुरझा जाता है, इससे उसको ही इस [प्रयत्न] से वे अच्छे प्रकार बढ़ाते हैं । (इन्द्रः तुभ्यम् आ प्यायताम्, त्वम् इन्द्राय आप्यायस्व इति आह, उभौ एवं इन्द्रं च सोमं च आप्याययन्ति) इन्द्र तेरे लिये भले प्रकार बढ़े, तू इन्द्र के लिये भले प्रकार बढ़—यह [मन्त्र भाग] वह बोलता है, दोनों ही इन्द्र और सोम को वे भले प्रकार बढ़ाते हैं । (अस्मान् सखीन् सन्या मेधया प्रजया धनेन आप्यायय इति आह, ऋत्विजः वै एतस्य सखायः, अस्य तान् एतान् एव आप्याययन्ति) हम मित्रों के दान से, निश्चल बुद्धि से, प्रजा से और धन से तू भले प्रकार बढ़ा—यह [मन्त्र भाग वह बोलता है], ऋत्विज् लोग ही इस [सोम] के मित्र हैं, इसके उन इनको ही वे भले प्रकार बढ़ाते हैं । (देव सोम ते स्वस्ति, सुत्याम् उदृचम् अशीय इति आह, एताम् आशिषम् एव आशास्ते, एतस्मात् लोकात् वै प्रच्यवन्ते, ये सोमम् आ प्याययन्ति) हे दिव्य गुण वाले सोम ! तेरे लिये मंगल हो, सोम निचोड़ने की क्रिया और समाप्ति सूचक ऋचा को मैं प्राप्त होऊं—यह [मन्त्र भाग] वह बोलता है, इस आशीर्वाद को ही वह कहता है, इस लोक में ही वे अच्छे प्रकार चलते हैं, जो सोम को भले प्रकार बढ़ाते हैं । (अन्तरिक्षदेवत्यः हि सोमः आप्यायते, एष्टाः रायः एष्टा वामानि प्रइषे भगाय, ऋतवादिभ्यः ऋतम् नमः, दिवे पृथिव्यै नमः इति, द्यावापृथिवीभ्याम् एव नमस्कृत्य अस्मिन् लोके प्रतितिष्ठति प्रतितिष्ठति) अन्तरिक्ष [मध्य में दिखाई देते हुये] लोक देवता वाला ही सोम [ओषधिराज] भले

पुरुषाय (एकधनविदे) एकेन धर्मेण धनं विन्दति लभते यः, तस्मै (अपवायते) ओवै शोषणे यद्वा वा गतिगन्धनयोः—कर्मणि लट् । शुष्यते (मीयते) मीञ् हिंसायाम्–कर्मणि लट् । हिंस्यते । नाश्यते (प्याययन्ति) वर्धयन्ति (प्यायस्व) वर्धस्व (सन्या) हृपिषिरुहि० (उ० ४ । ११९) षणु दाने—इन् । दानेन (सन्न्या) सम्+णीञ् प्रापणे—क्विप् । सम्यक् नेत्र्या (स्वस्ति) कल्याणम् (सुत्याम्) सोमाभिषवक्रियाम् (उदृचम्) उत्तमां समाप्तिसूचिकाम् ऋचम् (अशीय) प्राप्नुयाम् (आशिषम्) आङ्–शास आशीर्वादे–क्विप् । मङ्गलप्रार्थनाम् (आशास्ते) आशीर्वादं कथयति (प्र) प्रकर्षेण (एतस्मात् लोकात्) एतस्मिन् लोके (च्यवन्ते) गच्छन्ति–निघ० २ । १४ । (एष्टाः) सर्वत इष्टाः । अभीष्टाः । अभीष्टानि वा (वामानि) अर्तिस्तुसुहु० (उ० १ । १४०) वा गतौ—मन् । वामस्य वननीयस्य—निरु० ४ । २६ । शोभनानि वस्तूनि (प्र) प्रकर्षेण (इषे) अन्नाय (भगाय) ऐश्वर्याय (ऋतम्) सत्यव्यवहारम् (ऋतवादिभ्यः) सत्यकथनशीलेभ्यः (नमः) अन्नम्–निघ० २ । ७ (दिवे) प्रकाशमानाय परमात्मने (नमः) सत्कारः (पृथिव्यै) विस्तृताय परमेश्वराय (द्यावापृथिवीभ्याम्) प्रकाशभूमिहितार्थम् (नमस्कृत्य) आदृत्य परमात्मानम् ॥

प्रकार बढ़ता है, अभीष्ट धन और अभीष्ट सुन्दर पदार्थ अन्न के लिये और ऐश्वर्य के लिये भले प्रकार हों, सत्यवादियों के लिये सत्य व्यवहार और अन्न हो, प्रकाशमान विस्तृत परमेश्वर के लिये नमस्कार [आदर क्रिया] होवे—यह [मन्त्र भाग वह कहता है], प्रकाश और भूमि के हित के लिये ही [परमात्मा को] नमस्कार करके इस लोक में वह प्रतिष्ठा पाता है, प्रतिष्ठा पाता है [अवश्य ही बड़ाई पाता है] ॥ ४ ॥

भावार्थः—मनुष्यों को चाहिये कि ओषधियों के अंश अंश का गुण जानें और उनसे ठीक ठीक उपयोग लेकर धन प्राप्त करके सुखी रहें ॥ ४ ॥

(देवः) प्रकाशमानः (सविता) लोकप्रेरकः सूर्य इव परमात्मा (अनूनः) न्यूनतारहितः। परिपूर्णः (उपवाच्यः) प्रतिपाद्यः (वि भजति) विभज्य ददाति (द्रविणम्) धनम् (अग्नयः) ईश्वरतेजांसि (अप्सु) जलेषु (अवस्कन्नम्) अवगतम्। ज्ञातम् (स्वगाकरोति) स्वग, स्वगि सर्पणे—अच्। सुखप्रियादानुलोम्ये (पा० ५। ४। ६३) स्वगशब्दात् कृञो योगे—डाच् बाहुलकात् आनुलोम्ये। स्वगं सर्पणं व्यापनं करोति (सुकृतीनाम्) पुण्यकर्मणाम् (हविषाम्) ग्राह्यव्यवहाराणाम् (प्रतिष्ठा) स्थितिस्थानम् (वैप्रुषान्) विप्रुष्—अण्। विविधपूर्तियुक्तान् (होमान्) ग्राह्यव्यवहारान् (जुह्वति) गृह्णन्ति (द्रप्सः) वृतृवदिवचि० (उ० ३। ६२) दृप हर्षमोहनयोः—सप्रत्ययः। हर्षकारी परमात्मा (चस्कन्द) स्कन्दिर् गतिशोषणयोः—लिट्। स्कन्दति। गच्छति। व्याप्नोति (विप्रुषः) वि+प्रुष स्नेहनसेचनपूरणेषु—क्विप्। विविधपूर्तयः (स्कन्दन्ति) व्याप्नुवन्ति (अंशुः) विभागः (स्वगाकरोति) स्वगाकुर्वन्ति। व्यापनं कुर्वन्ति (आहुतीनाम्) दानादानक्रियाणाम् (स्तोकः) ष्टुच प्रसादे दीप्तौ च—वञ्। प्रसन्नकरः। दीप्यमानः। सूक्ष्मविषयः (धिषणायाः) धृषेर्धिष च संज्ञायाम्

इति, बाहुभिः अभिच्युतः अंशुः अधिषवणाभ्याम् अधिस्कन्दति) जो तेरा अंश [हमारे] भुजाओं पर गिरा हुआ प्रकाश वा भूमि की गोद से व्यापक है [उसी मन्त्र का भाग भेद से]--बाहुओं द्वारा प्राप्त हुआ अंश दोनों [अमृत के] निचोड़ स्थानों [प्रकाश और भूमि] से ऊपर व्यापक होता है। (अध्वर्योः वा पवित्रात् परि यः ते मनसा वषट्कृतं तं जुहोमि इति) और जो यज्ञ करने वाले के शुद्ध व्यवहार से चारों ओर तेरी प्राप्ति के लिये मनन के साथ प्राप्त किये हुये उसको मैं ग्रहण करता हूँ--[यह बोलता है]। (तद् यथा वषट्कृतम्, एवं स्वाहाकृतं हुतं भवति) सो जैसे वषट्कृत [प्राप्त किया हुआ कर्म] होता है, उसी प्रकार स्वाहाकृत [सत्यवाणी से किया हुआ] यज्ञ होता है ॥ १२ ॥

भावार्थः जैसे ऋत्विज् लोग सोम यज्ञ को विज्ञानपूर्वक करते हैं, वैसे ही सब मनुष्य अपने कर्तव्य को विचारपूर्वक करें ॥ १२ ॥

विशेषः—प्रतीक वाले मन्त्रों में से एक एक अर्थ सहित लिखे जाते हैं, शेष मन्त्र वेद में देखें--

१—ये अग्नयो अप्स्वन्तर्ये वृत्रे ये पुरुषे ये अश्मसु । य आविवेशोषधीर्यो वनस्पतींस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् । अथ० ३ । २१ । १ । (ये) जो (अग्नयः) अग्नियें [ईश्वर के तेज] (अप्सु अन्तः) जल के भीतर (ये) जो (वृत्रे) मेघ में (ये) जो (पुरुषे) पुरुष [मनुष्य शरीर] में और (ये) जो (अश्मसु) शिलाओं में हैं। (यः) जिस [अग्नि] ने (ओषधीः) औषधियों [अन्न सोमलता आदि] में और (यः) जिसने (वनस्पतीन्) वनस्पतियों [वृक्ष आदि] में (आविवेश) प्रवेश किया है, (तेभ्यः) उन (अग्निभ्यः) अग्नियों [ईश्वर तेजों] को (एतत्) यह (हुतम्) दान [आत्मसमर्पण] (अस्तु) होवे ॥

२—द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः । समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः । अथ० १८ । ४ । २८ यजु० १३ । ५. भेद से ऋ० १० । १७ । ११ । (द्रप्सः) हर्षकारक परमात्मा (पृथिवीम्) पृथिवी और (द्याम् अनु) प्रकाश में (च) और (इमम्) इस (योनिम् अनु) घर [शरीर] में (च) और [उस शरीर में भी] (चस्कन्द) व्यापक है (यः) जो [शरीर] (पूर्वः) पहिला है। (समानम्) [सर्वसाधारण] (योनिम् अनु) कारण में (संचरन्तम्) विचरते हुये (द्रप्सम्) हर्षकारक परमात्मा को (सप्त) सात

(उ० २ । ८२) ञिधृषा प्रागल्भ्ये--क्युः, धिषादेशः, यद्वा धिषि धारणे—क्युः। धिषणे द्यावापृथिवीनाम---निघ० ३ । ३० । प्रकाशस्य भूमेर्वा (अधिषवणाभ्याम्) सोमस्य अमृतस्य निष्पीडनस्थानाभ्याम्। द्यावापृथिवीभ्याम् (पवित्राद्) शुद्धव्यवहाराद् (जुहोमि) गृह्णामि (वषट्कृतम्) वहनेन कृतम् (स्वाहाकृतम्) सत्यवाण्या कृतम् ॥

[मस्तक के सात गोलक] (होत्राः अनु) विषय ग्रहण करने वाली शक्तियों के साथ (जुहोमि) मैं ग्रहण करता हूं ॥

३—(यस्ते द्रप्स स्कन्दति—इत्यादि) यजुर्वेद ७ । २६ के भाग कुछ भेद से यहां दिये हैं, वह मन्त्र यह है । (यस्ते द्रप्स स्कन्दति यस्ते अंशुर्ग्रावच्युतो धिषणयो-रुपस्थात् । अध्वर्य्योर्वा परि वा यः पवित्रात्तन्ते जुहोमि मनसा वषट्कृतं स्वाहा । देवानामुत्क्रमणमसि) [हे ईश्वर !] (यः ते द्रप्सः) जो तेरा हर्षकारक व्यवहार [सर्वत्र] (स्कन्दति) व्यापक है, और (यः ते अंशुः) जो तेरा विभाग (धिषणयोः) प्रकाश और भूमि की (उपस्थात्) गोद से (ग्रावच्युतः) मेघमण्डल में छूटा हुआ [व्यापक है], (वा वा) अथवा (यः) जो [विभाग] (अध्वर्योः) यज्ञ करने वाले के (पवित्रात्) शुद्ध व्यवहार से (परि) सब ओर [व्यापक है], (मनसा) विचार के साथ और (स्वाहा) सत्यवाणी के साथ (वषट्कृतम्) प्राप्त किये हुये (तम्) उस [विभाग] को (ते) तेरी प्राप्ति के लिये (जुहोमि) मैं ग्रहण करता हूं (देवानाम् उत्क्रमणम् असि) [हे परमात्मन् !] तू विद्वानों के ऊंचे चढ़ने का साधन है ॥

कण्डिका १३ ॥

ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन् । तं वसिष्ठ एव प्रत्यक्षमपश्यत् । सोऽबिभेत्, इतरेभ्य ऋषिभ्यो मा प्रवोचदिति । सोऽब्रवीत्, ब्राह्मणन्ते वक्ष्यामि, यथा त्वत्पुरोहिताः प्रजाः प्रजनि[1]ष्यन्ते, अथेतरेभ्य ऋषिभ्यो मा प्रवोचदिति । तस्मा एतान् स्तोमभागानुवाच । ततो वसिष्ठपुरोहिताः प्रजाः प्रा[1]जायन्त । स्तोमो वा एतेषां भागः, तत् स्तोमभागानां स्तोमभाग*त्त्वम्[2] । रश्मिरसि क्षयाय त्वेति, क्षयो वै देवाः देवेभ्य एव* यज्ञं प्राह । प्रेतिरसि धर्मणे त्वेति, धर्मो मनुष्याः, मनुष्येभ्य एव यज्ञं प्राह । अनितिरसि सन्धिरसि प्रतिधिरसीति, त्रयो वै लोकाः लोकेष्वेव यज्ञं प्रतिष्ठापयति । विष्टम्भोऽसीति, वृष्टिमेवावरुन्धे । प्रावोस्यह्नांसीति, मिथुनमेव करोति । उशिगसि प्रकेतोऽसि सुदितिरसीति, अष्टौ वसव एकादश रुद्रा द्वादशादित्या वाग् द्वात्रिंशी स्वरस्त्रयस्त्रिंशस्त्रयस्त्रिंशत् देवा देवेभ्य एव यज्ञं प्राह । ओजोऽसि पितृभ्यस्त्वेति बलमेव तत् पितॄननुसन्तनोति । तन्तुरसि प्रजाभ्यस्त्वेति, प्रजा एव पशूननुसन्तनोति । रेवदस्योषधीभ्यस्त्वेति, ओषधीष्वेव यज्ञं प्रतिष्ठापयति । पृतनाषाडसि पशुभ्यस्त्वेति, प्रजा एव पशूननुसन्तनोति । अभिजिदसीति, वज्रो वै षोडशी व्यावृत्तोऽसौ वज्रः, तस्मादेषोऽन्येभ्यो व्यावृत्तः । नाभुरसीति, प्रजापतिर्वै सप्तदशः, प्रजापतिमेवावरुन्धे ॥ १३ ॥

---

१ पू. सं. "प्रजनयिष्यन्ते, प्रजायन्त" इति पाठः ॥

२. पुष्पाङ्कितः पाठः पूर्वसंस्करणे चतुर्दश्यां कण्डिकायां स्थापितः आसीत् । अर्थसंगत्याऽस्माभिरत्र स्थाप्यते, जर्मनसंस्करणेऽप्यत्रैवायं पाठः ॥ सम्पा० ॥

कण्डिका १३ ॥ आख्यायिका—वसिष्ठ ने इन्द्र को देखा और इन्द्र ने उसे स्तोम भागों द्वारा ब्रह्मज्ञान बताया ॥

(ऋषयः वै इन्द्रं प्रत्यक्षं न अपश्यन्) ऋषियों [इन्द्रियों] ने निश्चय करके इन्द्र [बड़े ऐश्वर्य वाले परमात्मा] को साक्षात् न देखा। (तं वसिष्ठः एव प्रत्यक्षम् अपश्यत्) उसको वसिष्ठ [अत्यन्त वसने वाले जीवात्मा] ने ही साक्षात् देखा। (सः अबिभेत्, इतरेभ्यः ऋषिभ्यः मा प्रवोचत् इति) वह [इन्द्र] डरा—यह [वसिष्ठ] नीच ऋषियों [इन्द्रियों] से न कह देवे। (सः अब्रवीत् ब्राह्मणं ते वक्ष्यामि, यथा त्वत् पुरोहिताः प्रजाः प्रजनिष्यन्ते) वह [इन्द्र] बोला—[हे वसिष्ठ] मैं तुझे ब्राह्मण [ब्रह्मज्ञान] बताऊंगा, जिससे तुझे पुरोहित [मुखिया] रखती हुई प्रजायें उत्पन्न होंगी। (अथ इतरेभ्यः ऋषिभ्यः मा प्रवोचत्) इसलिये नीच ऋषियों [इन्द्रियों] से आप न कहें। (तस्मै एतान् स्तोमभागान् उवाच) उस [वसिष्ठ] को यह [आगे वाले] स्तोमभाग [स्तुतियों के भाग] उसने बताये। (ततः वसिष्ठपुरोहिताः प्रजाः प्राजायन्त) फिर वसिष्ठ [जीवात्मा] को पुरोहित रखती हुई प्रजायें [इन्द्रिय आदि] उत्पन्न हुये। (स्तोमः वै एतेषां भागः, तत् स्तोमभागानां स्तोमभागयज्ञं प्राह) स्तोम [स्तुतियोग्य व्यवहार] ही इन [मनुष्यों] का भाग [सेवनीय है इसलिये स्तुति योग्य व्यवहार के सेवन करने वाले पुरुषों के स्तुति योग्य व्यवहार से सेवनीय यज्ञ [पूजनीय कर्म] को वह [इन्द्र परमात्मा वेद द्वारा] बताता है[1]। (प्रेतिः असि धर्मणे त्वा इति १, धर्मः मनुष्याः, मनुष्येभ्यः एव यज्ञं प्राह) [हे परमात्मन् !] तू उत्तमता से व्यापक है, धर्म [वेदविहित व्यवहार] के लिए तुझे [ग्रहण करता हूं], धर्म वाले ही मनुष्य हैं, मनुष्यों को

१३—(ऋषयः) ऋषी गतौ दर्शने च—इन् कित्। सप्त ऋषयः प्रतिहिताः शरीरे—यजु० ३४। ५५। सप्त ऋषयः षडिन्द्रियाणि विद्या सप्तमी—निरु० १२। ३७। इन्द्रियाणि (इन्द्रम्) परमैश्वर्यवन्तं परमात्मानम् (वसिष्ठः) वस निवासे—तृच्। तुश्छन्दसि (पा० ५। ३। ५९) वसितु—इष्ठन्। तुरिष्ठेमेयस्सु (पा० ६। ४। १५४) तृशब्दलोपः। अतिशयेन वसिता निवासकः। जीवात्मा (इतरेभ्यः) पामरेभ्यः (त्वत्पुरोहिताः) प्रत्ययोत्तरपदयोश्च (पा० ७। २। ९८) युष्म् इत्यस्य त्व इत्यादेशः। त्वं पुरोहितः प्रधानो यासां ताः (रश्मिः) अश्नोतेरश्च (उ० ४। ४६) अशूङ् व्याप्तौ-मिः, धातोः रशादेशः। व्यापकः। किरणः। प्रकाशः (क्षयाय) निवासाय (प्रेतिः) क्तिच्क्तौ च संज्ञायाम् (पा० ३। ३। १७४) प्र+इण् गतौ-क्तिच्। प्रकर्षेण गन्ता। व्यापकः (धर्मणे) शास्त्रविहितव्यवहाराय

---

१. यहाँ पाठच्युति होने से भाष्यकार का यह अर्थ असम्बद्ध है। कण्डिका में हमारे द्वारा परिवर्धित पाठ का निम्न तात्पर्यार्थ है—यह स्तोमों का स्तोमभागत्व है। [हे यज्ञ] तुम क्षयों के लिए प्रकाशस्वरूप हो। देवताओं को क्षय कहते हैं। इस प्रकार देवताओं के लिए यज्ञ का सम्बन्ध इन्द्र ने बताया ॥ सम्पा० ॥

ही यज्ञ [पूजनीय कर्म] वह बताता है । (अनितिः असि, सन्धिः असि, प्रतिधिः असि इति २, ३, ४, त्रयः वै लोकाः लोकेषु एव यज्ञं प्रतिष्ठापयति) [हे परमात्मन् !] तू जिलाने वाला है, तू संयोग करने वाला है, तू प्रत्यक्ष धारण करने वाला है--तीन ही लोक [तीन धाम-स्थान, नाम और जन्म--निरु० ६ । २८] हैं, लोकों में ही यज्ञ [पूजनीय कर्म को वह [यजमान] स्थापित करता है । (विष्टम्भः असि इति ५, वृष्टिम् एव अवरुन्धे) [हे परमात्मन् !] तू विविध प्रकार थामने वाला है--इस [स्तुति] से वह [यजमान] वृष्टि [आनन्द वृष्टि] पाता है । (अह्नांसि प्रावः असि इति ६, मिथुनम् एव करोति) [हे परमात्मन् !] तू व्याप्त वस्तुओं का बड़ा रक्षक है--इससे वह [यजमान] मिथुन [स्थिर ज्ञान] उत्पन्न करता है । (उशिक् असि, प्रकेतः असि, सुदितिः असि इति ७, ८, ९) [हे परमात्मन् !] तू कामना योग्य है, तू बड़ा ज्ञानी है, तू बड़ा दानी है--[यह स्तुति करता है] । (अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः, वाक् द्वात्रिंशी, स्वरः त्रयस्त्रिंशः, त्रिंशत् देवाः, देवेभ्यः एव यज्ञं प्राह) आठ वसु [पृथिवी आदि] हैं, ग्यारह रुद्र [प्राण और जीवात्मा] हैं, बारह आदित्य [महीने] हैं, वाणी [जिह्वा] बत्तीसवीं और स्वर [उच्चारण व्यवहार] तैंतीसवाँ है, यह तैंतीस देवता हैं, इन देवताओं के हित [सुधार] के लिये ही यज्ञ [पूजनीय कर्म] वह [इन्द्र] बताता है । (ओजः असि पितृभ्यः त्वा इति १०, तत् बलम् एव पितॄन् अनु सन्तनोति) [हे परमात्मन् !] तू बल है पितरों [पालन करने वाले ज्ञानियों] के लिये तुझे [ग्रहण करता हूं], इस [मन्त्र] से वह [यजमान] बल को पितरों के पीछे पीछे फैलाता है । (तन्तुः असि प्रजाभ्यः त्वा इति ११, प्रजाः एव पशून् अनु सन्तनोति) [हे परमात्मन् !] तू तन्तु [फैलाने वाला] है, प्रजाओं के लिये तुझे [स्वीकार करता हूं]—इस मन्त्र से प्रजाओं को ही वह [यजमान] पशुओं के पीछे पीछे फैलाता है । (रेवत् असि ओषधीभ्यः त्वा इति १२, ओषधीषु एव यज्ञं प्रतिष्ठापयति) [हे परमात्मन् !] तू धनवान्

(त्वा) त्वां, गृह्णामि इति शेषः (धर्मः) धर्म—अर्शआद्यच्, विभक्तेः सु—(पा० ७ । १ । ३९) धर्मयुक्ताः (अनितिः) अन प्राणने—क्तिच्, इट् च । अन्तर्गतण्यर्थः । जीवयिता (सन्धिः) सम्यक्धारकः । संयोजकः (प्रतिधिः) प्रत्यक्षधारकः (विष्टम्भः) विशेषेण स्तम्भकः । आश्रयदाता (वृष्टिम्) आनन्दवर्षम् (अवरुन्धे) प्राप्नोति (प्रावः) प्र + अव रक्षणे—घञ् । प्रकर्षेण रक्षकः (अह्नांसि) उदके नुट् च (उ० ४ । १९७) अह व्याप्तौ—असुन्, नुट् च । अह्नसां व्याप्तपदार्थानाम् (मिथुनम्) क्षुधिपिशिमिथिभ्यः कित् (उ० ३ । ५५) मिथ वधे मेधायां सङ्गमे च—उनन् कित् । स्थिरस्थानम् (उशिक्) वशः कित् (उ० २ । ७१) वश कान्तौ—इजिः, कित् । कमनीयः (प्रकेतः) प्र+कित ज्ञाने—अच् । प्रकर्षेण ज्ञाता (सुदितिः) सु+दाण् दाने—क्तिच् । महादाता (स्वरः) उच्चारणव्यवहारः (अनु) अनुसृत्य (रेवत्) रयि[1]--मतुप्, सम्प्रसारणं गुणश्च, मस्य वः । धनयुक्तं ब्रह्म

---

१. रयेर्मतौ बहुलम् (६ । १ । ३७) इस वार्तिक से मतुप् परे रहते 'रयि' को सम्प्रसारण हुआ है ॥ सम्पा० ॥

[ब्रह्म] है, ओषधियों [अन्न सोमलता आदि] के लिये तुझे [स्वीकार करता हूं]—ओषधियों में ही वह [यजमान] यज्ञ को स्थापित करता है। (पृतनाषाट् असि, पशुभ्यः त्वा इति १३, प्रजाः एव पशून् अनु सन्तनोति) [हे परमात्मन् !] तू संग्राम जिताने वाला है, पशुओं के लिये तुझे [स्वीकार करता हूं]—इस मन्त्र से वह [यजमान] प्रजाओं को ही पशुओं के पीछे पीछे बढ़ाता है। (अभिजित् असि इति १४, वज्रः वै षोडशी, व्यावृत्तः असौ वज्रः, तस्मात् एषः अन्यैः व्यावृत्तः) [हे परमात्मन् !] तू विजयी है, वज्र [समान] ही षोडशी [प्रश्नोपनिषद् ६ । ४, गो० पू० १ । ८—प्राण, श्रद्धा, आकाश, वायु, प्रकाश, जल, पृथिवी, इन्द्रिय, मन, अन्न, वीर्य, तप, मन्त्र, कर्म, लोक और नाम—इन सोलह कलाओं का स्वामी परमात्मा] है, वह शत्रु निवारक वज्र रूप है, इसलिये यह [परमात्मा] वैरियों का रोकने वाला है। (नाभुः असि इति १५, प्रजापतिः वै सप्तदशः, प्रजापतिम् एव अवरुन्धे) [हे परमात्मन् !] तू शत्रुनाशक है—यहां प्रजापति [प्रजापालक परमात्मा] सत्रह [गो० पू० १ । ५ चार दिशा, चार विदिशा, एक ऊपर की, एक नीचे की, दश दिशाओं, सत्त्व, रज और तम तथा ईश्वर, जीव और प्रकृति और संसार] का स्वामी है, प्रजापति [इन्द्र अर्थात् परमात्मा] को वह [यजमान] पाता है ॥ १३ ॥

भावार्थः—मनुष्य ईश्वर की उपासना प्रार्थना से पुरुषार्थ करके अपनी उन्नति करे और परम आनन्द पावे ॥ १३ ॥

विशेषः—इस कण्डिका में पन्द्रह स्तुति मन्त्र ब्राह्मण वचन हैं ॥

कण्डिका १४ ॥

अधिपतिरसि धरुणोऽसि सꣳसर्पोऽसि वयोधा असीति, प्राणोऽपानश्चक्षुः श्रोत्रमित्येतानि वै पुरुषमकरन्। प्राणानुपैति, प्रजात्या एव। त्रिवृदसि प्रवृदसि स्ववृदस्यनुवृदसीति, मिथुनमेव करोति। आरोहोऽसि प्ररोहोऽसि संरोहोऽस्यनुरोहोऽसीति, प्रजापतिरेव। वसुकोऽसि वस्यष्टिरसि वेषश्रीरसीति, प्रति[1]ष्ठितिरेव। आक्रमोऽसि सङ्क्रमोऽस्युत्क्रमोऽस्युत्क्रान्तिरसीति, ऋद्धिरेव। यद्यद्वै सविता

(पृतनाषाट्) छन्दसि सहः (पा० ३ । २ । ६३) पृतना+षह अभिभवे—ण्विः। सहेः साडः सः (पा० ८ । ३ । ५६) सस्य षः। पृतना संग्रामनाम—निघ० २ । १७। संग्रामजेता (षोडशी) गो० पू० १ । ८। प्राणादिषोडशकलानां स्वामी (व्यावृत्तः) कर्तरि क्तः। निवारकः (अन्यैः) अन्येषां शत्रूणाम् (नाभुः) कृवापाजि० (उ० १ । १) णभ हिंसायाम्—उण्। शत्रुपीडकः (सप्तदशः) गो० पू० १ । ५। प्राणश्रद्धाकाशादीनां सप्तदशपदार्थानां स्वामी ॥

१. अत्र प्रति इत्यनन्तरं "गत्वम् रश्मिरसि क्षयाय त्वेति क्षयो वै देवाः देवेभ्य एव" इत्यन्तः पाठः जर्मनसंस्करणे त्रयोदश्यां कण्डिकायां वर्त्तते। अर्थसङ्गत्याऽस्माभिरपि तत्रैव स्थापितः। द्र० पृ० ३३५ सम्पादकीया टि० २ ॥ सम्पा० ॥

देवेभ्यः प्रासुवन्, तेनाध्नुवत् सवितृप्रसूता एव स्तु[1]वन्त्यृध्नुवन्ति । बृहस्पतये स्तुतेति, बृहस्पतिर्वा आङ्गिरसो देवानां ब्रह्मा । तदनुमत्यैव ओं भूर्जनदिति, प्रातः-सवन ऋग्भिरेवोभयतोऽथर्वाङ्गिरोभिर्गुप्ताभिर्गुप्तैः स्तुतेत्येव । ओं भुवो जनदिति, माध्यन्दिने सवने यजुर्भिरेवोभयतोऽथर्वाङ्गिरोभिर्गुप्ताभिर्गुप्तैः स्तुतेत्येव । ओं स्वर्जनदिति, तृतीयसवने सामभिरेवोभयतोऽथर्वाङ्गिरोभिर्गुप्ताभिर्गुप्तैः स्तुतेत्येव । अथ यद्यहीन उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामो वा स्यात्, सर्वाभिः सर्वाभिरत ऊर्ध्वं व्याहृतिभिरनुजानाति । ओं भूर्भुवः स्वर्जनद् वृधत् करद् गुहन् महत्तच्छमोमिन्द्रवन्त स्तुतेति, सेन्द्रान्मापगायत सेन्द्रांꣳस्तुत इत्येव । इन्द्रियवान् न्यृद्धिमान् वशीयान् भवति य एवं वेद, यश्चैवं विद्वान् स्तोमभागैर्यजते ॥ १४ ॥

कण्डिका १४ ॥ आगे और स्तोम भागों और व्याहृतियों का वर्णन ॥

(अधिपतिः असि १) [हे परमात्मन् !] तू अधिपति [बड़ा राजा] है, (धरुणः असि २) तू धारण करने वाला है, (संसर्पः असि ३) तू भले प्रकार व्यापक है, (वयोधाः असि ४) तू अन्न धारण करने वाला है, (प्राणः अपानः चक्षुः श्रोत्रम् इति एतानि वै पुरुषम् अकरन्) [इस प्रकार परमात्मा की स्तुति द्वारा पराक्रम और स्वास्थ्य होने से] प्राण [भीतर जाने वाला श्वास], अपान [बाहर जाने वाला श्वास], नेत्र और कान, इन्होंने ही पुरुष बनाया है। (प्रजात्यै एव प्राणान् उपैति) [मनुष्य] उत्तम जन्म [जीवन] के लिये ही प्राणों को पाता है। (त्रिवृत् असि ५) [हे परमात्मन् !] तू तीनों [भूत भविष्य वर्तमान काल] में वर्तमान है, (प्रवृत् असि ६) उत्तमता से वर्तमान है, (स्ववृत् असि ७) तू अपने आप वर्तमान है, (अनुवृत् असि ८) तू निरन्तर वर्तमान है—(मिथुनम् एव करोति) इससे [मनुष्य] स्थिर ज्ञान ही करता है। (आरोहः असि ९) [हे परमात्मन् !] तू चढ़ने वाला है, (प्ररोहः असि १०) तू उपजाने वाला है, (संरोहः असि ११) तू बढ़ाने वाला है, (अनुरोहः असि १२) तू निरन्तर वर्तमान है—(प्रजापतिः एव) इससे [मनुष्य] प्रजापति [प्रजापालक] ही होता है। (वसुकः असि १३) [हे परमात्मन्] तू ढक लेने वाला है, (वस्यष्टिः

१४—(अधिपतिः) सर्वोपरि राजा (धरुणः) कॄवृदारिभ्य उनन् (उ० ३। ५३) धृञ् धारणे—उनन्। धर्ता (संसर्पः) सम्यग् व्यापकः (वयोधाः) वयसि धाञः (उ० ४। २२९) वयः+डुधाञ् धारणपोषणयोः—असिः। वयः, अन्ननाम—निघ० २। ७। अन्नधारकः (प्रजात्यै) प्रकृष्टजन्मने। उत्तमजीवनाय (त्रिवृत्) त्रिषु भूतभविष्यवर्तमानकालेषु वर्तमानः (प्रवृत्) प्रकर्षेण वर्तमानः (स्ववृत्) आत्मना वर्तमानः (अनुवृत्) निरन्तरं वर्तमानः (मिथुनम्) क० १३। स्थिरज्ञानम् (आरोहः) आ+रुह बीजजन्मनि प्रादुर्भावे च—घञ्। आरोहणशीलः (वसुकः) उलूकादयश्च (उ० ४। ४१) वस आच्छादने—उकप्रत्ययः। आच्छादकः

---

१. पू. सं. 'स्तुवन्' इति पाठः ॥ सम्पा० ॥

असि १४) तू बस्तियों में व्यापक है, (वेषश्रीः असि १५ इति प्रतिष्ठितिरेव[1]) तू व्याप्त पदार्थों में शोभा देने वाला है—इससे [मनुष्य का] प्रतिष्ठापक है।। (आक्रमः असि १६) [हे परमात्मन्!] तू चढ़ाई करने वाला है, (सङ्क्रमः असि १७) तू संयोग करने वाला है, (उत्क्रमः असि १८) तू ऊँचा चढ़ने वाला है, (उत्क्रान्तिः असि १९ इति ऋद्धिः एव) तू ऊपर को डग मारने वाला है [देखो यजु० १५।९], इससे [मनुष्य को] ऋद्धि [संपत्ति] होती है। (यत् यत् वै सविता देवेभ्यः प्रासुवत्, तेन आर्ध्नुवन् सवितृप्रसूताः एव स्तुवन्ति ऋध्नुवन्ति) जो जो ही सविता [सर्वजनक परमात्मा] ने विद्वानों के लिये प्रेरणा की है, उससे वे बढ़े हैं, परमात्मा से प्रेरणा किये हुये ही वे स्तुति करते हैं, बढ़ते हुये रहते हैं [देखो क० १०]। (बृहस्पतये स्तुत इति, बृहस्पतिः वै देवानाम् आङ्गिरसः ब्रह्मा) बृहस्पति [बड़ी वेदवाणियों के पालन करने वाले विद्वान्] के लिये तुम स्तुति करो—बृहस्पति ही विद्वानों में वेद जानने वाला ब्रह्मा है। (तत् अनुमत्या एव ओम् भूः जनत् इति प्रातःसवने ऋग्भिः एव उभयतः अथर्वाङ्गिरोभिः गुप्ताभिः गुप्तैः स्तुत इति एव) उस ब्रह्मा की अनुमति से—ओं भूः जनत् [यह व्याहृति है]—प्रातःसवन यज्ञ में ऋग् मन्त्रों द्वारा ही दोनों ओर से [आदि और अन्त में] निश्चल ब्रह्म के ज्ञानों से रक्षा की हुयी [व्याहृतियों] से रक्षा किये हुये [स्तोमों] द्वारा तुम स्तुति ही करो। (ओं भुवः जनत् इति, माध्यन्दिने सवने यजुर्भिः एव उभयतः अथर्वाङ्गिरोभिः गुप्ताभिः गुप्तैः स्तुत इति एव) ओं भुवः जनत् [यह व्याहृति है] माध्यन्दिन सवन में यजुर्मन्त्रों द्वारा ही दोनों ओर से [आदि और अन्त में] निश्चल ब्रह्म के ज्ञानों से रक्षा की हुई [व्याहृतियों] से रक्षा किये हुये [स्तोमों] द्वारा, तुम स्तुति ही करो। (ओं स्वः जनत् इति, तृतीयसवने सामभिः एव उभयतः अथर्वाङ्गिरोभिः गुप्ताभिः गुप्तैः स्तुत इति एव) ओं स्वः जनत् [यह व्याहृति है]—तृतीयसवन में साममन्त्रों द्वारा ही दोनों ओर से [आदि और अन्त में] निश्चल ब्रह्म के ज्ञानों से रक्षा की हुई [व्याहृतियों] से रक्षा किये हुये [स्तोमों] द्वारा, तुम स्तुति ही करो। (अथ यदि अहीनः उक्थ्यः षोडशी वाजपेयः अतिरात्रः अप्तोर्यामः वा स्यात्, अतः ऊर्ध्वं सर्वाभिः सर्वाभिः व्याहृतिभिः अनुजानाति) फिर जो अहीन, [गो० उ० २।८]

(वस्यष्टिः) खनिकष्यज्यसिवसि० (उ० ४। १४०) वस निवासे—इप्रत्ययः। अशूङ् व्याप्तौ संघाते च—तिप्रत्ययः। वसि—अष्टिः। वसिषु वस्तिषु व्यापकः (वेषश्रीः) विष्लृ व्याप्तौ—घञ्+श्रीः। वेषाणां श्रीः यस्मात् सः। व्याप्तपदार्थशोभाप्रदः (आक्रमः) आ+क्रमु पादविक्षेपे घञ्। आक्रमकः। (सङ्क्रमः) संयोजकः (उत्क्रम) ऊर्ध्वं गन्ता (उत्क्रान्तिः) ऊर्ध्वं पादविक्षेपणशीलः (अथर्वाङ्गिरोभिः) निश्चलज्ञानैः (उभयतः) आद्यन्तयोः (गुप्ताभिः) रक्षिताभिः, व्याहृतिभिः (गुप्तैः) रक्षितैः, स्तोमैः (अप्तोः) गो० पू० ५।२३। प्राप्तायाः प्रजायाः (यामः)

---

१. इससे आगे १३ वीं कण्डिका का कुछ पाठ लेखक प्रमाद से यहाँ आ गया था, जिसे हमने पृ० ३३८ टि० १ में दिखा दिया है। पाठक इस अंश का अर्थ यथास्थित १३ वीं कण्डिका पृ० ३३६ की टि० १ में देख लें।। सम्पा०।।

उक्थ्य, षोडशी [गो० उ० २ । १४] वाजपेय, अतिरात्र अथवा अप्तोर्याः [गो० पू० ५ । २३] यज्ञ होवे उससे उपरान्त [अर्थात् तीन तीन व्याहृतियों के अनुष्ठान के पीछे] सब ही व्याहृतियों से वह [ब्रह्मा] आज्ञा देता है । (ओं भूर्भुवः स्वः जनत् वृधत् करत् गुहत् महत् तत् शम् ओम् इन्द्रवन्तः स्तुत इति, सेन्द्रान् मा, अपगायत सेन्द्रान् स्तुत इति एव) ओम् [सर्वरक्षक परमेश्वर है गो० पू० १ । ५ । तथा १६] भूः भुवः स्वः [सर्वाधार, सर्वव्यापक और सुखस्वरूप परमात्मा है, गो० पू० १ । ६], जनत् वृधत्, करत्, गुहत्, महत्, तत्, शम्, ओम्, [उत्पन्न करने वाला-गो०पू० १ । ८, बढ़ती वाला, बनाने वाला, सबमें अन्तर्यामी, पूजनीय, फैला हुआ ब्रह्म-गो०पू० १ । १०, शान्तिकारक-गो०पू० १ । ११ और रक्षक ब्रह्म है, इन व्याहृतियों के साथ] इन्द्रवान् [इन्द्र वाले मन्त्रों का प्रयोग करते हुये] तुम स्तुति करो, इन्द्र सहित [इन्द्र वाले मन्त्रों सहित स्तोमों] को बुरी ध्वनि से मत गाओ, इन्द्र सहित [स्तोमों] को ही गाओ । (इन्द्रियवान् न्यृद्धिमान् वशीयान् भवति, यः एवं वेद, यः च एवं विद्वान् स्तोमभागैः यजते) वह पुरुष पुष्ट इन्द्रियों वाला, नित्य सम्पत्ति वाला और अत्यन्त जितेन्द्रिय [वा स्वतन्त्र] होता है, जो ऐसा जानता है, और जो ऐसा जानकार पुरुष स्तोम भागों से यज्ञ [पूजनीय कर्म] करता है ॥ १४ ॥

भावार्थ :—जो मनुष्य परमात्मा के गुणों के गूढ़ विचार से पदार्थों के विज्ञान द्वारा आत्मोन्नति करते हैं, वे ही पराक्रमी जन महाधनी होकर संसार में यशस्वी होते हैं ॥ १४ ॥

कण्डिका १५ ॥

यो ह वा आयतांश्च प्रतियतांश्च स्तोमभागान् विद्यात् स[1] विष्पर्धमानयोः सवृतसोमयोः, ब्रह्मा स्यात्[2] स्तुतेषे स्तुतोर्जे स्तुत देवस्य सवितुः सवे बृहस्पतिं वः प्रजापतिं वो वसून् वो देवान् रुद्रान्वो देवानादित्यान्वो देवान् साध्यान्वो देवाना-प्त्यान्वो देवान्विश्वान्वो देवान् सर्वान्वो देवान्विश्वतस्परि हवामहे जनेभ्योऽस्माकमस्तु केवल इतः कृणोतु वीर्य्यम्, इत्येते ह वा आयताश्च प्रतियताश्च स्तोमभागाः, ताञ्जपन्नुपर्युपरि परेषां ब्रह्माणमवेक्षेत । तत एषामधःशिरा ब्रह्मा पतति, ततो यज्ञः, ततो यजमानः । यजमानेऽधःशिरसि पतिते स देशोऽधःशिराः पतति । यस्मिन्नर्धे यजन्ते देवाश्च ह वा असुराश्च, सवृतसोमौ[3]यज्ञावतनुताम् । अथ बृहस्पतिराङ्गिरसो देवानां ब्रह्मा, स आयतांश्च प्रतियतांश्च स्तोमभागान् जपन्नु-

गो० पू० ५ । २३ । नियमः (सेन्द्रान्) इन्द्रसहितान् स्तोमान् (मा) निषेधे (अपगायत) अपगानेन कुत्सितध्वनिना कुरुत (इन्द्रियवान्) पुष्टेन्द्रिययुक्तः (न्यृद्धमान्) नित्यसम्पत्तिमान् (वशीयान्) वश+ईयसुन् । अतिशयेन जितेन्द्रियः, स्वतन्त्रः ।।

१. पू. सं. 'च' इति पाठः ॥ २. पू. सं. "ब्रह्मास्याः" इति पाठः ॥

३. पू० सं० "सवृतसोमः" इति पाठः ॥ सम्पा० ॥

पर्य्यु[^1]पर्यसुराणां ब्रह्माणमवैक्ष[^1]त । तत एषामधःशिरा ब्रह्माऽपतत्, ततो यज्ञः, ततोऽसुरा इति ॥ १५ ॥

कण्डिका १५ ॥ स्तोम भागों से शत्रुओं का नाश ॥

(यः ह वै विष्पर्धमानयोः सवृतसोमयोः आयतान् च प्रतियतान् च स्तोम-भागान् विद्यात्, स ब्रह्मा स्यात्, देवस्य सवितुः सवे वः बृहस्पतिं प्रजापतिम् इषे स्तुत ऊर्जे स्तुत स्तुत) जो [परमात्मा] ही विविध प्रकार लगातार उन्नति वाले दो समान स्वीकार किये हुये सोम यज्ञ वालों के लम्बे और चौड़े स्तोम भागों [स्तुति योग्य व्यवहार के भागों] को निश्चय करके जाने वह ब्रह्मा होवे [तुम] प्रकाशमान प्रेरक [परमात्मा] की प्रेरणा में अपने बीच [उस] बृहस्पति [बड़े बड़े लोकों के पालक] और प्रजापति [प्रजापालक परमात्मा] की अन्न के लिये स्तुति करो, पराक्रम के लिये स्तुति करो, स्तुति करो । (वः वसून्, वः देवान् रुद्रान्, वः देवान्, आदित्यान्, वः देवान् साध्यान्, वः देवान् आप्त्यान्, वः विश्वान् देवान्, वः सर्वान् देवान् वः देवान् विश्वतः जनेभ्यः परिह्वामहे, अस्माकं केवलः अस्तु) तुम वसुओं [निवास कराने वालों] को, तुम विजयी रुद्रों [शत्रुओं के रुलाने वालों] को, तुम कामना योग्य आदित्यों [अखण्ड-व्रतियों] को, तुम गति वाले साध्यों [व्यवहार साधकों] को, तुम दिव्य गुण वाले आप्त [यथार्थ वक्ता] पुरुषों में रहने वालों को, तुम सब आनन्ददायकों को, तुम सब व्यवहार-कुशलों को, और तुम सब स्तुति योग्यों को सब प्राणियों के लिए सब प्रकार हम बुलाते हैं । वह [परमात्मा] हमारा सेवनीय होवे (इतः वीर्यं कृणोतु) इस [व्यवहार] से वह [परमात्मा] वीरत्व करे—(इति एते ह वै आयताः च प्रतियताः च स्तोमभागाः, तान् जपन् उपरि उपरि परेषां ब्रह्माणम् अवेक्षेत) यह ही निश्चय करके लम्बे और चौड़े स्तोम भाग [स्तुति योग्य व्यवहारों के भाग] हैं, उनको जपता हुआ [विचारता हुआ] ऊपर ऊपर होकर बैरियों के ब्रह्मा [पुरोहित] को निहारे [उसके छल बल रोके] । (ततः एषां ब्रह्मा अधःशिराः पतति, ततः यज्ञः, ततः यजमानः) इस [व्यवहार] से इन [बैरियों] का ब्रह्मा औंधे सिर गिरता है, उससे यज्ञ [संगति व्यवहार], उससे यजमान [औंधे सिर गिरता है] । (यजमाने अधःशिरसि पतिते सः देशः अधःशिराः पतति) यजमान के औंधे सिर गिरने पर वह देश औंधे सिर गिरता है । (यस्मिन् अर्द्धे

१५—(आयतान्) आ+यमु उपरमे—क्तः, वा यती प्रयत्ने—अच् । दीर्घान् (प्रतियतान्) विस्तृतान् (स्तोमभागान्) स्तुत्यव्यवहारभागान् (विद्यात्) जानाति (विष्पर्धमानयोः) विविधा स्पर्धा क्रमोन्नतिर्ययोस्तयोः (सवृतसोमयोः) समान-स्वीकृतसोमयज्ञयोः (इषे) अन्नाय (ऊर्जे) पराक्रमाय (सवितुः) प्रेरकस्य परमेश्व-रस्य (सवे) प्रेरणायाम् (बृहस्पतिम्) बृहतां लोकानां पालकं परमात्मानम् (वः) युष्माकं मध्ये (वः) युष्मान् (वसून्) निवासनशीलान् (रुद्रान्) शत्रुरोदकान् (आदित्यान्) अखण्डव्रतिनः पुरुषान् (साध्यान्) व्यवहारसाधकान् (आप्त्यान्)

---

[^1]: १. पू. सं. 'अवेक्षेत' इति पाठः ॥ सम्पा० ॥

देवाः च ह वै असुराः च यजन्ते, सवृतसोमौ यज्ञौ अतनुताम्) जिस ऋद्धि युक्त व्यवहार में देव [विद्वान् लोग] और असुर [अविद्वान्] यज्ञ करते हैं, दो समान स्वीकार किये हुये सोम यज्ञ विस्तृत होवें । (अथ आङ्गिरसः बृहस्पतिः देवानां ब्रह्मा, सः आयतान् च प्रतियतान् च स्तोमभागान् जपन् उपरि उपरि असुराणां ब्रह्माणम् अवैक्षत) फिर वह वेदवेत्ता बृहस्पति देवताओं का ब्रह्मा है, उसने आयतों [लम्बे] और प्रतियतों [चौड़े] स्तोमभागों को जपते हुवे [विचारते हुवे] ऊपर ऊपर रहकर असुरों के ब्रह्मा को निहारा । (ततः एषां ब्रह्मा अधःशिराः अपतत्, ततः यज्ञः, ततः असुराः इति) उससे इन [असुरों] का ब्रह्मा नीचे सिर गिर गया, उससे यज्ञ और उससे असुर [नीचे सिर] गिर गये ॥ १५ ॥

भावार्थः—जहाँ पर दो पुरुष शत्रुता करके समान प्रयत्न करते हैं, वहाँ जिसका ब्रह्मा वा पुरोहित अधिक चतुर होता है, वह विजय पाता है ॥ १५ ॥

कण्डिका १६ ॥

देवा यज्ञं पराजयन्त, तमाग्नीध्रात्पुनरुपाजयन्त, तदेतद्यज्ञस्यापराजितं, यदाग्नीध्रं यदाग्नीध्रा[1]द्धिष्ण्यान्विहरति । तत एवैनं पुनस्तनुते पराजित्यै । अप खलु वा एते गच्छन्ति, ये बहिष्पवमानं सर्पन्ति । बहिष्पवमाने स्तुत आह अग्नी[2]त्, अग्नीन्विहर, बर्हिःस्तृणीहि, पुरोडाशानलङ्कुर्विति । यज्ञमेवापराजित्य पुनस्तन्वाना आयन्त्यङ्गारैर्द्वे सवने विहरति, शलाकाभिस्तृतीयसवनं सशुक्रत्वाय । अथो सम्भवत्येवमेवैतत्, दक्षिणतो वै देवानां यज्ञं रक्षांस्यजिघांसन्, तान्याग्नीध्रेणापाघ्नत । तस्माद्दक्षिणामुखस्तिष्ठन्नग्नीत् प्रत्याश्रावयति, यज्ञस्याभिजित्यै रक्षसामपहत्यै रक्षसामपहत्यै ॥ १६ ॥

कण्डिका १६ ॥ आग्नीध्र द्वारा यज्ञ की सिद्धि ॥

(देवाः यज्ञम् पराजयन्त) देवताओं ने यज्ञ को हरा दिया । (तम् आग्नीध्रात् पुनः उपाजयन्त) उसको वे आग्नीध्र [अग्नि प्रज्वलन स्थान] से फिर जीत कर लाये । (तत् एतत् यज्ञस्य अपराजितम्, यत् आग्नीध्रम् यत् आग्नीध्रात् धिष्ण्यान् विहरति)

आप्त—यत् । आप्तेषु यथार्थवक्तृषु भवान् (विश्वतः) सर्वेभ्यः । सर्वान् (परि) सर्वतः (हवामहे) आह्वयामः (जनेभ्यः) जनानां हिताय (केवलः) सेवनीयः (वीर्यम्) वीरत्वम् (परेषाम्) शत्रूणाम् (अवैक्षत) अवेक्षणेन प्रतिजागरणेन अपश्यत् (एषाम्) परेषाम् । शत्रूणाम् (अर्द्धे) ऋद्धियुक्ते व्यवहारे (सवृतसोमौ) समानस्वीकृतसोमौ (अतनुताम्) विस्तृतौ भवताम् ॥

१६—(परा अजयन्त) पराजितवन्तः (आग्नीध्रात्) अग्निगृहात् (उप-अजयन्त) उपेत्य जितवन्तः (अपराजितम्) अपराजयत्वम् (धिष्ण्यान्) सानसि·

---

१. पू. सं. 'आग्नीध्रा' इति पाठः ॥
२. पू. सं. 'अग्नीन्' इति पाठः ॥ सम्पा० ॥

सो यह ही यज्ञ का न हार जाना है, जो आग्नीध्र है; और जो आग्नीध्र से धिष्णियों [यज्ञ अग्नियों] को वह विस्तृत करता है। (ततः एव एनं पुनः अपराजित्यै तनुते) फिर ही इस [यज्ञ] को न हराने के लिये वह विस्तृत करता है। (एते वै खलु अपगच्छन्ति, ये बहिष्पवमानं सर्पन्ति) वे लोग निश्चय करके नहीं हटते हैं, जो बहिष्पवमान [बाहिरले पवित्र स्थान विशेष] में जाते हैं। (बहिष्पवमाने स्तुते अग्नीत् आह—अग्नीन् विहर, बर्हिः स्तृणीहि, पुरोडाशान् अलङ्कुरु इति) बहिष्पवमान की स्तुति किये जाने पर अग्नीत् [अग्नि प्रदीपक ऋत्विज्] कहता है—तू अग्नियों को विस्तृत कर, आसन बिछा और पुरोडाशों [पक्वान्न विशेषों] को सजा। (यज्ञम् एव अपराजित्य पुनः तन्वानाः आयन्ति, अङ्गारैः द्वे सवने विहरति, शलाकाभिः सशुक्रत्वाय तृतीयसवनम्) यज्ञ को न हरा कर फिर [उसको] फैलाते हुये वे आते हैं, अङ्गारों [निर्धूम अग्नियों] से दोनों सवनों [प्रातःसवन, माध्यन्दिन सवन] को वह विस्तृत करता है, और शलाकाओं से समान वीरत्व के लिये तृतीय सवन को [विस्तृत करता है]। (अथो एवम् एव एतत् सम्भवति, दक्षिणतः वै देवानां यज्ञं रक्षांसि अजिघांसन्, तानि आग्नीध्रेण अपाघ्नत) फिर ऐसा ही यह हो सकता है—दक्षिण [दक्षिण आदि] दिशा में ही देवताओं के यज्ञ को राक्षसों ने नाश करना चाहा, उनको आग्नीध्र [अग्नि प्रज्वालन] द्वारा [देवताओं ने] हरा दिया। (तस्मात् दक्षिणामुखः तिष्ठन् अग्नीत् यज्ञस्य अभिजित्यै रक्षसाम् अपहत्यै रक्षसाम् अपहत्यै प्रत्याश्रावयति) इसलिये दक्षिण मुख बैठा हुआ अग्नीत् [अग्नि प्रदीपक ऋत्विज्] यज्ञ की पूरी जीत के लिये और राक्षसों की हार के लिये, राक्षसों की हार के लिये स्तुति सुनाता है॥ १६॥

भावार्थः—जैसे यज्ञ में अग्नि प्रज्वलित करके यज्ञ के विघ्नों को हटाते हैं, वैसे ही मनुष्य पराक्रम बढ़ाकर शत्रुओं का नाश करें॥ १६॥

कण्डिका १७॥

तदाहुः, अथ कस्मात् सौम्य एवाध्वरे प्रवृत्ताहुतीर्जुह्वति, न हविर्यज्ञ इति। अकृत्स्ना वा एषा देवयज्या, यद्धविर्यज्ञः। अथ हैषैव कृत्स्ना एषा देवयज्या, यत् सौम्योऽध्वरः, तस्मात् सौम्य एवाध्वरे प्रवृताहुतीर्जुह्वति। जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाग् यद्वाचो मधुमत्तमं, तस्मिन्मा धाः स्वाहा वाचे स्वाहा वाचस्पतये स्वाहा सरस्वत्यै स्वाहा सरस्वत्या इति, पुरस्तात् स्वाहाकारेण जुहोति। तस्माद्वाग् अत ऊर्ध्वमुत्सृष्टा यज्ञं वहति। मनसोन्तरा, मनसा हि मनः प्रीतम्। तदु हैके सप्ताहुतीर्जुह्वति, सप्त छन्दांसि प्रवृत्तानि प्रतिमन्त्रमिति वदन्तः। यथा मेखला पर्य्यस्यते मेध्यस्य चामेध्यस्य च विहृत्या एवं हवैते न्युप्यन्ते मेध्यस्य चामेध्यस्य च

वर्णसिपर्णसि० (उ० ४। १०७) ञिधृषा प्रागल्भ्ये—ण्यप्रत्ययः, ऋकारस्य इकारः, यद्वा धिष शब्दे—ण्यः। अग्नीन् (विहरति) विस्तारयति (अपराजित्यै) अपराभवाय (खलु) निषेधे (अङ्गारैः) अङ्गिमदिमन्दिभ्य आरन् (उ० ३। १३४) अगि गतौ—आरन्। निर्धूमाग्निभिः (सशुक्रत्वाय) समानवीर्यत्वाय (सम्भवति) समर्थो भवति (अपाघ्नत) पराजितवन्तः। नाशितवन्तः॥

विहृत्यै यज्ञस्य विहृत्यै । प्राचीनं हि धिष्ण्येभ्यो देवानां लोकाः, प्रतीचीनं मनुष्याणाम् । तस्मात् सोमं पिबता प्राञ्चो धिष्ण्या नोपसर्प्याः । जनं ह्येतद्देवलोकं ह्यध्यारोहन्ति, तेषामेतदायतनं चोदयनं च, यदाग्नीध्रं च सदश्च । तद्योऽविद्वान् सञ्चरति, आर्त्तिमार्च्छति । अथ यो विद्वान् सञ्चरति, न स धिष्णीयामार्त्तिमार्च्छति ॥ १७ ॥

कण्डिका १७ ॥ प्रवृत्त आहुतियों का वर्णन ॥

(तत् आहुः, अथ कस्मात् सौम्ये एव अध्वरे प्रवृत्ताहुतीः जुह्वति न हविर्यज्ञे इति) यह कहते हैं–फिर किस लिये सोम वाले ही यज्ञ में प्रवृत्ताहुति [लगातार आहुतियों] को वे देते हैं और हविर्यज्ञ में नहीं । (अकृत्स्ना वै एषा देवयज्या, यत् हविर्यज्ञः) [उत्तर] असम्पूर्ण ही यह देवयज्या है जो हविर्यज्ञ है । (अथ ह एषा एषा एव कृत्स्ना देवयज्या, यत् सौम्यः अध्वरः, तस्मात् सौम्ये एव अध्वरे प्रवृत्ताहुतीः जुह्वति) फिर यह ही निश्चय करके सम्पूर्ण देवयज्या है, जो सोम वाला यज्ञ है, इसलिये सोम वाले ही यज्ञ में प्रवृत्त आहुतियां वे देते हैं । (वाचे जुष्टः भूयासम्, वाचस्पतये जुष्टः, देवि वाक् यत् वाचः मधुमत्तमम्, तस्मिन् मा धाः स्वाहा, वाचे स्वाहा, वाचस्पतये स्वाहा, सरस्वत्यै सरस्वत्यै स्वाहा इति पुरस्तात् स्वाहाकारेण जुहोति) मैं वाणी के लिये प्रसन्न होऊँ, वाचस्पति [वाणी के स्वामी परमात्मा] के लिये प्रसन्न [होऊँ] हे देवि वाणी ! जो वाणी का अत्यन्त मधुर कर्म है उसमें मुझको स्वाहा [सुवाणी के साथ] धारण कर, वाणी के लिए स्वाहा [सुन्दर वाणी वा आहुति] है, वाचस्पति के लिये स्वाहा है, सरस्वती [विज्ञानवती विद्या] के लिए, सरस्वती के लिए स्वाहा है—इस मन्त्र से पहिले स्वाहा शब्द के साथ वह हवन करता है । (तस्मात् वाक् अतः ऊर्ध्वम् उत्सृष्टा यज्ञं वहति) इसलिए इसके उपरान्त वाणी छुटी हुई होकर यज्ञ को ले चलती है । (मनसः अन्तरा मनसा हि मनः प्रीतम्) मन के भीतर मन के साथ ही मन प्रसन्न रहता है ।

(तत् उ ह एके सप्त आहुतीः जुह्वति, सप्त छन्दांसि प्रतिमन्त्रं प्रवृत्तानि इति वदन्तः) फिर कोई कोई सात आहुतियाँ देते हैं—सात छन्द एक-एक मन्त्र में प्रवृत्त हैं—ऐसा कहते हुये । (यथा मेखला मेध्यस्य च अमेध्यस्य च विहृत्यै पर्यस्यते, एवं ह एव एते मेध्यस्य च अमेध्यस्य च यज्ञस्य विहृत्यै विहृत्यै न्युप्यन्ते) [उत्तर] जिस प्रकार मेखला [यज्ञ सीमा] पवित्र वस्तु के और अपवित्र वस्तु के अलग करने के लिए डाली जाती है, वैसे ही यह [पदार्थ] पवित्र एवं अपवित्र वस्तु के [पवित्र हुए २] यज्ञ के विस्तार के लिए, विस्तार के लिए ही [अग्नि में] डाले जाते हैं । (धिष्ण्येभ्यः हि प्राचीनं देवानां लोकाः, प्रतीचीनं मनुष्याणाम्) अग्नियों से पूर्व दिशा वाला स्थान ही देवताओं केऔर पश्चिम

१७—(जुह्वति) प्रक्षिपन्ति (अकृत्स्ना) असम्पूर्णा (जुष्टः) प्रीतः । सेवितः (मधुमत्तमम्) अतिशयेन माधुर्य्ययुक्तं कर्म (सरस्वत्यै) विज्ञानयुक्तायै वाचे (पुरस्तात्) अग्रे (उत्सृष्टा) त्यक्ता (प्रीतम्) प्रसन्नम् (मेखला) यज्ञसीमा (मेध्यस्य) पवित्रपदार्थस्य (अमेध्यस्य) अपवित्रव्यवहारस्य (विहृत्यै) वि+हृञ् हरणे—क्तिन् । पृथक्करणाय । विस्ताराय (प्राचीनम्) पूर्वदिशि वर्तमानं स्थानम्

दिशा वाला स्थान मनुष्यों के लोक हैं। (तस्मात् सोमं पिबता प्राञ्चः धिष्ण्याः न उपसर्प्याः) इसलिए सोम पीने वाले पुरुष करके पूर्व दिशा वाली अग्नियें अब न प्राप्त की जावें। (एतत् हि जनं देवलोकं हि अध्यारोहन्ति) इससे ही जन [महत्लोक से ऊपर वाले] देवलोक को ही वे चढ़ जाते हैं। (तेषाम् एतत् आयतनम् च उदयनं च, यत् आग्नीध्रं च सदः च) उनका यह विश्राम स्थान और उदय स्थान है जो आग्नीध्र [अग्नि प्रज्वलन] और सदः [बैठक] है। (तत् यः अविद्वान् सञ्चरति, आर्तिम् आर्च्छति) इसलिए जो अजानकार [यज्ञ] करता है, वह पीड़ा पाता है। (अथ यः विद्वान् सञ्चरति, सः धिष्णीयाम् आर्तिं न आर्च्छति) और जो विद्वान् [यज्ञ] करता है, वह अग्नि सम्बन्धी पीड़ा नहीं पाता है॥ १७॥

भावार्थ :—मनुष्यों को चाहिये कि सदा समय के अनुकूल वाणी बोलें, पवित्र और अपवित्र की सीमा करें और यथायोग्य सब को बैठक देवें॥ १७॥

कण्डिका १८॥

प्रजापतिर्वै यज्ञः, तस्मिन् सर्वे कामाः सर्वा इष्टीः सर्वममृतत्वम्। तस्य हैते गोप्तारः, यद्धिष्ण्याः[1], तान् सदः प्रस्रप्स्य[2]न् नमस्करोति, नमो नम इति। न हि नमस्कारमतिदेवाः, ते ह नमसिताः कर्त्तारमतिसृजन्तीति। तत एतं प्रजापतिं यज्ञं प्रपद्यते, नमो नम इति। न हि नमस्कारमतिदेवाः, स तत्रैव यजमानः सर्वान् कामानाप्नोति सर्वान् कामानाप्नोति॥ १८॥

कण्डिका १८॥ प्रजापति को नमस्कार॥

(प्रजापतिः वै यज्ञः, तस्मिन् सर्वे कामाः सर्वाः इष्टीः सर्वम् अमृतत्वम्) प्रजापति [प्रजापालक] ही यज्ञ [संगति व्यवहार] है, उसमें सब मनोरथ, सब यज्ञ क्रियायें और सब अमरपन [मोक्ष आनन्द] है। (तस्य ह एते गोप्तारः यत् धिष्ण्याः, तान् सदः प्रस्रप्स्यन् नमस्करोति, नमो नमः इति) उसके ही यह रक्षक हैं, जो अग्नि देवता वाले [ऋत्विज्] हैं, उनको सद [यज्ञशाला] में जाने की इच्छा करता हुआ [यजमान] नमस्कार करता है—नमो नमः [बहुत बहुत नमस्कार है]। (देवाः नमस्कारम् अति न हि, ते ह नमसिताः कर्तारम् अतिसृजन्ति) देवता [विद्वान् लोग] नमस्कार

(प्रतीचीनम्) पश्चिमदिशि वर्त्तमानं स्थानं (प्राञ्चः) पूर्वदिशि वर्तमानाः (न) सम्प्रति। निषेधे (जनम्) महोलोकादूर्ध्वलोकम् (आयतनम्) विश्रामस्थानम् (उदयनम्) उदयस्थानम् (धिष्णीयाम्) अग्निसम्बन्धिनीम्॥

१८—(इष्टीः) पूर्वसवर्णदीर्घः। इष्टयः। यज्ञक्रियाः (धिष्ण्याः) अग्निदेवताकाः। ऋत्विजः (प्रस्रप्स्यन्) प्रगमिष्यन् (अति) अतिक्रम्य। तिरस्कृत्य (कर्तारम्) नमस्कर्तारम् (अतिसृजन्ति) आशीर्वादं ददति॥

१. पू. सं. "धिष्ण्यीयः" इति पाठः॥

२. पू. सं. "प्रसृप्स्यन् मस्करोति" इति पाठः॥ सम्पा०॥

का तिरस्कार करके नहीं रहते, वे अवश्य [दूसरों से] नमस्कार किये गये नमस्कार करने वाले को [आशीर्वाद] देते हैं [यह गोप्ताओं को आशीर्वाद का विषय हुआ]। (ततः एतं प्रजापतिं यज्ञं प्रपद्यते, नमो नमः इति) फिर इस प्रजापति यज्ञ में वह [यजमान] पहुँचता है—नमो नमः [कहता है]। (देवाः नमस्कारम् अति न हि, सः यजमानः तत्र एव सर्वान् कामान् आप्नोति सर्वान् कामान् आप्नोति) देवता [विद्वान् लोग] नमस्कार का तिरस्कार करके नहीं रहते, वह यजमान उस [नमस्कार करने] में सब मनोरथों को पाता है, सब मनोरथों को पाता है ॥ १८ ॥

भावार्थ :—बड़े बड़ों की आदरपूर्वक सम्मति मानने से मनुष्य के मनोरथ सिद्ध होते हैं ॥ १८ ॥

कण्डिका १९ ॥

यो वै सदस्यान् गन्धर्वान् वेद, न सदस्यामार्त्तिमार्च्छति। सदः प्रसृप्सन् ब्रूयादुपद्रष्ट्रे नम इति, अग्निर्वै द्रष्टा, तस्मा उ एवात्मानं परिदधाति सर्वमायुरेति न पुरा जरसः प्रमीयते, य एवं वेद। १। सदः प्रसृप्य ब्रूयादुपश्रोत्रे नम इति। वायुर्वा उपश्रोता, तस्मा उ एवात्मानं परिदधाति सर्वमायुरेति न पुरा जरसः प्रमीयते, य एवं वेद। २। सदः प्रसर्पन् ब्रूयात्, अनुख्यात्रे नम इति आदित्यो वा अनुख्याता तस्मा उ एवात्मानं परिदधाति सर्वमायुरेति न पुरा जरसः प्रमीयते, य एवं वेद। ३। सदः प्रसृप्तो ब्रूयात्, उपद्रष्ट्रे नम इति। ब्राह्मणो वा उपद्रष्टा, तस्मा उ एवात्मानं परिदधाति सर्वमायुरेति न पुरा जरसः प्रमीयते, य एवं वेद। ४। एते वै सदस्या गन्धर्वाः। स य[1] एवमेतान् सदस्यान् गन्धर्वानविद्वान् सदः प्रसर्पति, स सदस्यामार्त्तिमार्च्छति। अथ यो विद्वान् सञ्चरति, न सदस्यामार्त्तिमार्च्छति। एतेन ह स्म वा अङ्गिर[2]सः सर्वं सदः पर्य्याहुः, ते न सदस्यामार्त्तिमार्च्छन्ति। अथ यान् कामयेत न सदस्यामार्त्तिमार्च्छेयुरिति, तेभ्य एतेन सर्वं सदः परिब्रूयात्ते न सदस्यामार्त्तिमार्च्छन्ति। अथ यं कामयेत प्रमीयेतेति, तमेतेभ्य आवृश्चेत् प्रमीयते ॥ १९ ॥

कण्डिका १९ ॥ सदस्य गन्धर्वों को नमस्कार ॥

(यः वै सदस्यान् गन्धर्वान् वेद, सदस्याम् आर्त्तिं न आर्च्छति) जो [यजमान] सदस्य [यज्ञशाला में बैठने वाले] गन्धर्वों [वेदवाणी वा पृथिवी धारण करने वाले विद्वानों] को जानता है, वह यज्ञशाला में होने वाली पीड़ा को नहीं पाता है। (सदः प्रसृप्सन् ब्रूयात्, उपद्रष्ट्रे नमः इति) सद [यज्ञशाला] में जाना चाहता हुआ [यजमान] बोले—उपद्रष्टा [अधिक देखने वाले] को नमस्कार है, (अग्निः वै द्रष्टा तस्मै उ एव

१९—(सदस्यान्) सदसि यज्ञशालायां भवान् (गन्धर्वान्) गां वाणीं पृथिवीं गतिं वा धरतीति गन्धर्वः। कृगृशृदृभ्यो वः (उ० १। १५५) गो+धृञ् धारणे—वप्रत्ययः, गोशब्दस्य गम्। वेदवाणीधारकान् भूमिधारकान् (उपद्रष्ट्रे)

---

१. पू. सं. "यः" इति नास्ति ॥ २. पू. सं. 'आङ्गिरसः' इति पाठः ॥ सम्पा० ॥

आत्मानं परिदधाति, सर्वम् आयुः एति, जरसः पुरा न प्रमीयते, यः एवं वेद १) अग्नि ही द्रष्टा [देखने वाला, ज्योति वाला] है, उसके लिये [उसके समान बल पाने के लिये] ही अपने को वह सब प्रकार पुष्ट करता है, पूर्ण आयु पाता है, और बुढ़ापे से पहिले नहीं मरता, जो ऐसा जानता है । १ । (सदः प्रसृप्य ब्रूयात्—उपश्रोत्रे नमः इति) सद [यज्ञशाला] को चलकर वह बोले--उपश्रोता [बहुत सुनने वाले] के लिये नमस्कार है । (वायुः वै उपश्रोता, तस्मै उ एव आत्मानं परिदधाति, सर्वम् आयुः एति, जरसः पुरा न प्रमीयते, यः एवं वेद २) वायु ही उपश्रोता [भले प्रकार सुनने वाला, सुनने का साधन] है, उसके लिये [उसके समान बल पाने के लिये] ही अपने को वह सब प्रकार पुष्ट करता है, पूर्ण आयु पाता है, और बुढ़ापे से पहिले नहीं मरता, जो ऐसा जानता है । २ । (सदः प्रसर्पन् ब्रूयात्, अनुख्यात्रे नमः इति) यज्ञशाला में आगे को चलता हुआ वह बोले--अनुख्याता [निरन्तर प्रसिद्धि करने वाले] के लिये नमस्कार है । (आदित्यः वै अनुख्याता तस्मै उ एव आत्मानं परिदधाति, सर्वम् आयुः एति, जरसः पुरा न प्रमीयते, यः एवं वेद ३) प्रकाशमान सूर्य ही [अनुख्याता] प्रसिद्धि करने वाला है, उसके लिये [उसके समान बल पाने के लिये] ही वह अपने को सब प्रकार पुष्ट करता है, सम्पूर्ण आयु पाता है, और बुढ़ापे से पहिले नहीं मरता, जो ऐसा जानता है । ३ । (सदः प्रसृप्तः ब्रूयात्, उपद्रष्ट्रे नमः इति) यज्ञशाला में पहुँचा हुआ वह कहे—उपद्रष्टा [भली भांति देखने वाले] के लिये नमस्कार है । (ब्राह्मणः वै उपद्रष्टा तस्मै उ एव आत्मानं परिदधाति, सर्वम् आयुः एति, जरसः पुरा न प्रमीयते, यः एवं वेद ४) ब्राह्मण [वेदवेत्ता ब्रह्मा] ही उपद्रष्टा है, उसके लिये [उसके समान बल पाने के लिये] ही वह अपने को सब प्रकार पुष्ट करता है, सम्पूर्ण आयु पाता है, और बुढ़ापे से पहिले नहीं मरता, फिर जो ऐसा जानता है । ४ । (एते वै सदस्याः गन्धर्वाः) यह ही सदस्य [यज्ञशाला में बैठने वाले] गन्धर्व [वेदवाणी वा पृथिवी के धारण करने वाले] हैं । (सः यः एवम् एतान् सदस्यान् गन्धर्वान् अविद्वान् सदः प्रसर्पति, सः सदस्याम् आर्तिम् आर्च्छति) फिर जो इस प्रकार इन सदस्य गन्धर्वों को न जानता हुआ पुरुष यज्ञशाला में धुस जाता है, वह यज्ञशाला सम्बन्धी पीड़ा पाता है । (अथ यः विद्वान् सञ्चरति सदस्याम् आर्तिम् न आर्च्छति) फिर जो [इनको] जानता हुआ पुरुष [यज्ञशाला में] चलता है, वह यज्ञशाला सम्बन्धी पीड़ा नहीं पाता । (एतेन ह स्म वै अङ्गिरसः सर्वं सदः पर्य्याहुः, ते सदस्याम् आर्तिं न आर्च्छन्ति) इस [व्यवहार] से ही आङ्गिरस [वेदवेत्ता लोग] सब यज्ञशाला का बखान करते हैं, वे यज्ञ सम्बन्धी पीड़ा नहीं पाते । (अथ यान् कामयेत सदस्याम् आर्तिं न आर्च्छेयुः इति, तेभ्यः एतेन सर्वं सदः परिब्रूयात्, ते सदस्याम् आर्तिं न आर्च्छन्ति) फिर वह जिन [पुरुषों] को चाहे—यह लोग यज्ञशाला सम्बन्धी पीड़ा न पावें—उनसे इस

उप+दृशिर् प्रेक्षणे—तृच् । अधिकदर्शकाय (परिदधाति) सर्वतः पोषयति । समर्पयति (प्रमीयते) प्रम्रियते (उपश्रोत्रे) अधिकश्रवणसाधकाय (अनुख्यात्रे) निरन्तरख्यापकाय । प्रसिद्धिकारकाय (अविद्वान्) अजानन् (अङ्गिरसः) वेदवेत्तारः ॥

प्रकार सब यज्ञशाला को वह [ब्रह्मा] बता देवे, वे यज्ञशाला सम्बन्धी पीड़ा नहीं पाते हैं। (अथ यं कामयेत प्रमीयेत इति, तम् एतेभ्यः आवृश्चेत् प्रमीयते) फिर जिस [पुरुष] को चाहे—वह मर जावे, उसको इन [लोगों] के हित के लिये वह छेद डाले, वह मर जाता है ॥ १६ ॥

भावार्थः—मनुष्य सत्कर्मियों के आदर और दुष्कर्मियों के निरादर से संसार में बड़ाई पाते हैं ॥ १६ ॥

कण्डिका २० ॥

तदाहुः यदैन्द्रो यज्ञोऽथ कस्मात् द्वावेव प्रातःसवने प्रस्थितानां प्रत्यक्षादैन्द्रीभ्यां यजतो होता चैव ब्राह्मणाच्छंसी च । इदं ते सोम्यं मध्विति होता यजति । इन्द्र त्वा वृषभं वयमिति ब्राह्मणाच्छंसी, नानादेवत्याभिरितरे, कथं तेषामैन्द्रचो भवन्ति । मित्रं वयं हवामह इति, मैत्रावरुणो यजति । वरुणं सोमपीतय इति, यद्वै किञ्च पीतवत्, तदैन्द्रं रूपं, तेनेन्द्रं प्रीणाति । मरुतो यस्य हि क्षय इति, पोता यजति । स सुगोपातमो जन इति, इन्द्रो वै गोपाः, तदैन्द्रं रूपं तेनेन्द्रं प्रीणाति । अग्ने पत्नीरिहावहेति, नेष्टा यजति । त्वष्टारं सोमपीतय इति, यद्वै किञ्च पीतवत्, तदैन्द्रं रूपं, तेनेन्द्रं प्रीणाति । उक्षान्नाय वशान्नायेत्याग्नीध्रो यजति । सोमपृष्ठाय वेधस इति, इन्द्रो वै वेधाः, तदैन्द्रं रूपं, तेनेन्द्रं प्रीणाति । प्रातर्यावभिरागतं देवेभिर्जेन्यावसू, इन्द्राग्नी सोमपीतय इति स्वयं समृद्धा अच्छावाकस्यैवमु हैता ऐन्द्रचः भवन्ति, यन्नानादेवत्याः तेनान्या देवताः प्रीणाति । यद्गायत्र्यः तेनाग्नेय्यः, तस्मादेता-भिस्त्रयमवाप्तं भवति ॥ २० ॥

कण्डिका २० ॥ प्रातःसवन में इन्द्र आदि के लिये हवि का निर्णय ॥

(तत् आहुः, यत् ऐन्द्रः यज्ञः, अथ कस्मात् द्वौ एव होता च एव ब्राह्मणाच्छंसी च प्रातःसवने प्रस्थितानां प्रत्यक्षात् ऐन्द्रीभ्यां यजतः) फिर वे [ब्रह्मवादी] कहते हैं—जब इन्द्र देवता वाला यज्ञ है, फिर क्यों दो ही होता और ब्राह्मणाच्छंसी [दूसरे ऋत्विजों को छोड़कर] प्रातःसवन में उपस्थित [सोमयज्ञों] के बीच प्रत्यक्ष दो इन्द्र देवता वाली ऋचाओं से यज्ञ करते हैं। (इदं ते सोम्यं मधु—इति होता यजति, इन्द्र त्वा वृषभं वयम् इति ब्राह्मणाच्छंसी, नानादेवत्याभिः इतरे, कथं तेषाम् ऐन्द्रचः भवन्ति) इदं ते सोम्यं मधु—इस मन्त्र से होता यज्ञ करता है, इन्द्र त्वा वृषभं वयम्—इससे ब्राह्मणाच्छंसी; और अनेक देवता वाली ऋचाओं से दूसरे [ऋत्विज् यज्ञ करते हैं] कैसे इन लोगों की इन्द्र देवता वाली ऋचायें हैं। (मित्रं वयं हवामहे—इति मैत्रावरुणः यजति, वरुणं सोमपीतये—इति वै यत् किंच पीतवत्, तत् ऐन्द्रं रूपम्,

---

२०—(यत्) यस्मात् कारणात् (ऐन्द्रः) इन्द्रदेवताकः (प्रस्थितानाम्) उपस्थितानां सोमयागानां मध्ये (प्रत्यक्षात्) श्रोत्रप्रत्यक्षेण (सोम्यम्) अमृतमयम् (मधु) मधुरं रसम् (वृषभम्) बलिष्ठम् (ऐन्द्रचः) इन्द्र—अण्, ङीप्, इन्द्रसम्बंधिन्यः

तेन इन्द्रं प्रीणाति) मित्रं वयं हवामहे--इस मन्त्र से मैत्रावरुण [प्राण और अपान की विद्या जानने वाला] यज्ञ करता है, वरुणं सोमपीतये--[उस मन्त्र के सोमपीतये पद में] जो कुछ पीत शब्द वाला पद है, वह इन्द्र का रूप है, उससे इन्द्र को वह प्रसन्न करता है। (मरुतो यस्य हि क्षये—इति पोता यजति, स सुगोपातमो जनः—इति इन्द्रः वै गोपाः, तत् ऐन्द्रं रूपं, तेन इन्द्रं प्रीणाति) मरुतो यस्य हि क्षये--इस मन्त्र से पोता यज्ञ करता है, स सुगोपातमो जनः—[उस मन्त्र के सुगोपातम शब्द में] इन्द्र ही गोपा [पृथिवी का रक्षक] है, वह इन्द्र का रूप है, उससे इन्द्र को वह प्रसन्न करता है। (अग्ने पत्नीरिहावह—इति नेष्टा यजति, त्वष्टारं सोमपीतये—इति यत् वै किंच पीतवत्, तत् ऐन्द्रं रूपं तेन इन्द्रं प्रीणाति) अग्ने पत्नीरिहावह—इस मन्त्र से नेष्टा [नेता पुरुष] यज्ञ करता है, त्वष्टारं सोमपीतये--[उस मन्त्र के सोमपीतये पद में] जो कुछ पीत शब्द वाला पद है, वह इन्द्र का रूप है, उससे इन्द्र को वह प्रसन्न करता है। (उक्षान्नाय वशान्नाय—इति आग्नीध्रः यजति, सोमपृष्ठाय वेधसे--इति इन्द्रः वै वेधाः, तत् ऐन्द्रं रूपं, तेन इन्द्रं प्रीणाति) उक्षान्नाय वशान्नाय—इस मन्त्र से आग्नीध्र [अग्नि जलाने वाला पुरुष] यज्ञ करता है, सोमपृष्ठाय वेधसे—[उस मन्त्र के इस भाग में] इन्द्र ही वेधा [बुद्धिमान्] है, वह इन्द्र का रूप है, उससे वह इन्द्र को प्रसन्न करता है। (प्रातर्यावभिरागतं देवेभिर्जेन्यावसू इन्द्राग्नी सोमपीतये--इति अच्छावाकस्य स्वयं समृद्धाः एवम् उ ह एताः ऐन्द्र्यः भवन्ति) प्रातर्यावभिरागतं……यह सब अच्छावाक [ऋत्विज्] की अपने आप समृद्ध [सम्पूर्ण ऋचायें] इस प्रकार से ही इन्द्र देवता वाली हैं। (यत् नानादेवत्याः, तेन अन्याः देवताः प्रीणाति) जो अनेक देवता वाली ऋचायें हैं, उससे दूसरे देवताओं को वह प्रसन्न करता है। (यत् गायत्र्यः, तेन आग्नेय्यः) जो गायत्री

ऋचः (मित्रम्) प्राणम् (वरुणम्) अपानम् (पीतवत्) पीतशब्दयुक्तं पदम् (प्रीणाति) तोषयति (मरुतः) हे शूरविद्वांसः ! (क्षये) क्षि निवासगत्योः, ऐश्वर्य्ये च—अच् । ऐश्वर्य्ये (सुगोपातमः) अतिशयेन सुष्ठु पृथ्वीरक्षकः (पत्नीः) पालनशक्तीः (वह) द्विकर्मकः । प्रापय (त्वष्टारम्) सूक्ष्मकर्तारं गुणम् (उक्षान्नाय) श्वन्नुक्षन्पूषन्० (उ० १ । १५९) उक्ष सेचने वृद्धौ च--कनिन् । उक्षा महन्नाम--निघ० ३ । ३ । उक्षभ्यो महद्भ्यः प्रबलेभ्योऽन्नं यस्मात् तस्मै । प्रबलानां भोजनदात्रे (वशान्नाय) वशिरण्योरुपसंख्यानम् (वा० पा० ३ । ३ । ५८) वश स्पृहायाम्--अप्,--टाप् । वशाभ्यो वशीभूताभ्यः प्रजाभ्योऽन्नं यस्मात् तस्मै । निर्बलप्रजानां भोजनदात्रे (सोमपृष्ठाय) पृषु सेचने--थक् । ऐश्वर्यस्य सेचकाय वर्धकाय (वेधसे) मेधाविने--निघ० ३ । १५ (प्रातर्यावभिः) प्रातर्गामिभिः (आगतम्) आगच्छतम् (देवेभिः) देवैः । विद्वद्भिः (जेन्यावसू) वृञ एण्यः (उ० ३ । ९८) जि जये--एण्यः, स च डित्[1] । जयशीलधनवन्तौ (गायत्र्यः) गायत्रीछन्दोभिर्युताः (आग्नेयः) अग्निदेवताकः (त्रयम्) इन्द्रनानादेवताग्नयः—इति त्रिविधदेवतासम्बद्धं त्रित्वम् (अवाप्तम्) प्राप्तम् ॥

---

१. वस्तुतः उक्त प्रक्रिया के अनुसार इस शब्द का सिद्ध होना असम्भव है। इसे अव्युत्पन्न माना जा सकता है ॥ सम्पा० ॥

छन्द वाली हैं, उससे वे अग्नि देवता वाली ऋचायें हैं। (तस्मात् एताभिः त्रयम् अवाप्तं भवति) इसलिये इन [ऋचाओं] से [इन्द्र, नाना देवता और अग्नि का] त्रित्व पाया जाता है ॥ २० ॥

भावार्थ :—विद्वानों [देवताओं,] की स्तुति उनके गुण कर्म स्वभाव के अनुसार होनी चाहिये ॥ २० ॥

विशेषः १—इस कण्डिका को ऐतरेय ब्रा० ६ । १० से मिलाओ ॥

विशेषः २—(वावेव) के स्थान पर (द्वावेव) ऐतरेय ब्राह्मण से, और (जन्यावसू) के स्थान पर (जेन्यावसू) ऐ० ब्रा० और वेद से शुद्ध किया है ॥

विशेषः ३—सङ्केत वाले मन्त्र अर्थ सहित यहाँ लिखे जाते हैं ॥

१—इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः। जुषाण इन्द्र तत् पिब—ऋ० सा० भा० ८ । ६५ । ८ ॥ (इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले राजन्] (ते इदं सोम्यं मधु) तेरे लिये यह अमृतमय रस (नरः) नेता लोगों ने (अद्रिभिः) शिलवट्टाओं द्वारा (अधुक्षन्) दुहा है, (तत्) उसको (जुषाणः) प्रसन्न होकर (पिब) तू पी ॥

२—इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे। स पाहि मध्वो अन्धसः—अथ० २० । १ । १, ऋ० ३ । ४० । १ ॥ (इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले राजन्] (त्वा वृषभम्) तुझ बलिष्ठ को (सुते) सिद्ध किये हुये (सोमे) ऐश्वर्य वा ओषधियों के समूह में (वयं हवामहे) हम बुलाते हैं। (सः) सो तू (मध्वः) मधुर गुण वाले (अन्धसः) अन्न की (पाहि) रक्षा कर ॥

३—मित्रं वयं हवामहे वरुणं सोमपीतये। जज्ञाना पूतदक्षसा—ऋ० १ । २३ । ४ ॥ (वयम्) हम (जज्ञाना) विज्ञान कराने वाले, (पूतदक्षसा) पवित्र बल वाले (मित्रम्) प्राण वायु (वरुणम्) और अपान वायु को (सोमपीतये) अमृत पीने के लिए (हवामहे) बुलाते हैं ॥

४—मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः—अथ० २० । १ । २ । ऋ० १ । ८६ । १ और यजु० ८ । ३१ ॥ (विमहसः) हे विविध पूजनीय (मरुतः) शूर विद्वानों ! (यस्य) जिस [राजा] के (क्षये) ऐश्वर्य्य में (दिवः) उत्तम व्यवहारों की (पाथ) तुम रक्षा करते हो, (सः हि) वह ही (सुगोपातमः) अच्छे प्रकार पृथिवी का अत्यन्त पालने वाला (जनः) पुरुष है ॥

५—अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारं सोमपीतये—ऋ० १ । २२ । ९ । यजु० २६ । २० ॥ (अग्ने) हे विज्ञानी पुरुष ! (इह) यहां पर (देवानाम्) विजय चाहने वाले वीरों की (उशतीः) कामना करती हुई (पत्नीः) पालन शक्तियों को (त्वष्टारम्) सूक्ष्म करने वाले गुण को (सोमपीतये) अमृत पीने के लिए (उप आ वह) तू ला ॥

६--उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये--अथ० २० । १ । ३ । ऋ० ८ । ४३ । ११ ॥ (उक्षान्नाय) प्रबलों के अन्नदाता, (वशान्नाय) वशीभूत [निर्बल प्रजाओं] के अन्नदाता, (सोमपृष्ठाय) ऐश्वर्य के सींचने वाले, (वेधसे) बुद्धिमान् (अग्नये) अग्नि [समान तेजस्वी राजा] को (स्तोमैः) स्तुति योग्य व्यवहारों से (विधेम) हम पूजा करें ॥

७--प्रातर्यावभिरागतं देवेभिर्जेन्यावसू । इन्द्राग्नी सोमपीतये--ऋ० ८ । ३८ । ७ ॥ (जेन्यावसू) हे जयशील धन वाले (इन्द्राग्नी) इन्द्र और अग्नि दोनों [विजुली और अग्नि के समान राजा और मन्त्री] (प्रातर्यावभिः) प्रातःकाल चलने वाले (देवेभिः) विद्वानों के साथ (सोमपीतये) अमृत पीने के लिए (आ गतम्) तुम आओ ॥

कण्डिका २१ ॥

ते वै खलु सर्व एव माध्यन्दिने प्रस्थितानां प्रत्यक्षादैन्द्रीभिर्यजन्ति, अभितृण्णवतीभिरेके पिबा सोममभि यमुग्र तर्द इति, होता यजति । स ईम्पाहि य ऋजीषी तरुत्र इति, मैत्रावरुणः । एवा पाहि प्रत्नथा मन्दतु त्वेति, ब्राह्मणाच्छंसी । अर्वाङेहि सोमकामन्त्वाहुरिति, पोता । तवायं सोमस्त्वमेह्यर्वाङिति, नेष्टा । इन्द्राय सोमाः प्रदिवो विदाना इति, अच्छावाकः । आपूर्णो अस्य कलशः स्वाहेति आग्नीध्रः । एवमु हैता अभितृण्णवत्यो भवन्ति । इन्द्रो वै प्रातः सवनन्नाभ्यजयत्, स एताभिर्माध्यन्दिनं सवनमभ्यतृणत्[1], तद्यदेताभिर्माध्यन्दिनं सवनमभ्यतृणत्[1], तस्मादेता अभितृण्णवत्यो भवन्ति ॥ २१ ॥

कण्डिका २१ ॥ माध्यन्दिन सवन में इन्द्र को हवि ॥

(ते वै खलु सर्वे एव माध्यन्दिने प्रस्थितानां प्रत्यक्षात् ऐन्द्रीभिः यजन्ति, एके अभितृण्णवतीभिः) वे सब ही [ऋत्विज्] माध्यन्दिन सवन में उपस्थित [सोम यज्ञों] के बीच प्रत्यक्ष इन्द्र शब्द वाली ऋचाओं से यज्ञ करते हैं और कोई कोई अभितृण्णवती [अभि सहित तृद धातु के रूप वाली ऋचाओं] से [यज्ञ करते हैं, जैसे]—(पिबा सोममभि यमुग्र तर्दः—इति होता यजति, स ईम् पाहि यः ऋजीषी तरुत्रः—इति मैत्रावरुणः, एवा पाहि प्रत्नथा मन्दतु त्वा--इति ब्राह्मणाच्छंसी) पिबा सोममभि......—इस मन्त्र से होता यज्ञ करता है, स ईम् पाहि......—इससे मैत्रावरुण,

---

२१—(प्रस्थितानाम्) उपस्थितसोमयागानां मध्ये (अभितृण्ण[2]वतीभिः) अभिपूर्वस्य तृदिर् हिंसानादरयोः इति धातोः रूपं यासु ताभिः ऋग्भिः (उग्र) तेजस्विन् (तर्दः) नाशितवानसि (ईम्) प्राप्तं वस्तु (ऋजीषी) अर्जेर्ऋज च (उ० ४ । २८) अर्ज अर्जने—ईषन् कित्, ऋजीष—इनिः । सरलस्वभावः (तरुत्रः) अशित्रादिभ्य इत्रोत्रौ (उ० ४ । १७३) तॄ प्लवनसंतरणयोः अभिभवे च—उत्रप्-

---

१. पू. सं. अभ्यतृणवत् इति पाठः ॥

२. अभि + तृण्ण + मतुप् + ङीप् यह इसका विभज्यान्वाख्यान है ॥ सम्पा० ॥

एवापाहि प्रत्नथा......—इससे ब्राह्मणाच्छंसी [यज्ञ करता है, इन तीन मन्त्रों में अभि सहित तृद धातु और इन्द्र शब्द का प्रयोग है]॥

(अर्वाङेहि सोमकामं त्वाहुः—इति पोता, तवायं सोमस्त्वमेह्यर्वाङ्—इति नेष्टा, इन्द्राय सोमाः प्रदिवो विदानाः—इति अच्छावाकः, आपूर्णो अस्य कलशः स्वाहा—इति आग्नीध्रः) अर्वाङेहि...—इस मन्त्र से पोता, तवायं सोम...—इससे नेष्टा, इन्द्राय सोमाः......—इससे अच्छावाक, आपूर्णो अस्य.....इससे आग्नीध्र [यज्ञ करता है, यह चार मन्त्र इन्द्र शब्द के प्रयोग वाले हैं]॥

(एवम् उ ह एताः अभितृण्णवत्यः भवन्ति) इस प्रकार [माध्यन्दिन सवन में प्रयोग से] ही यह ऋचायें अभितृण्णवती [अभि सहित तृद धातु के प्रयोग वाली] होती हैं। (इन्द्रः वै प्रातःसवनं न अभ्यजयत्, सः एताभिः माध्यन्दिनं सवनम् अभ्यतृणत्) इन्द्र ने ही प्रातःसवन में विजय नहीं पाया, उसने इन ऋचाओं से माध्यन्दिन सवन को वश में किया। (तत् यत् एताभिः माध्यन्दिनं सवनम् अभ्यतृणद् तस्मात् एताः अभितृण्णवत्यः भवन्ति) सो जो इन ऋचाओं से माध्यन्दिन सवन को उसने वश में किया, इसलिये यह ऋचायें अभितृण्णवती [अभि सहित तृद मारना, अनादर करना धातु के प्रयोग वाली] हैं ॥ २१ ॥

भावार्थः—कण्डिका २० के अनुसार है ॥ २१ ॥

विशेषः १—इस कण्डिका को ऐ० ब्रा० ६ । ११ से मिलाओ ॥

विशेषः २—(अभितृणवतीभिः तथा अभितृणवत्यः) के स्थान पर (अभितृण्णवतीभिः तथा अभितृण्णवत्यः) और (आर्वाङ्) के स्थान पर (अर्वाङ्) पद ऐतरेय ब्राह्मण से शुद्ध किया है ॥

विशेषः ३—संकेत वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान इन्द्र । वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रममित्रिया शवोभिः—ऋ० ६ । १७ । १ ॥ (उग्र इन्द्र) हे तेजस्वी इन्द्र ! [बड़े ऐश्वर्य वाले राजन्] (सोमं पिब) सोम [तत्त्वरस] को पी, (यम् अभि) जिस [सोम] के लिये (महि गव्यं गृणानः) बड़े गौवों के घृत की स्तुति करते हुये तूने (ऊर्वम्) मारने योग्य शत्रु को (तर्दः) मारा है, (यः) जिस तूने (धृष्णो) हे निर्भय ! (वज्रहस्त) हे वज्र हाथ में रखने वाले ! (शवोभिः) अपने बलों से (विश्वा वृत्रम् अमित्रिया) सब रोकने वाले वैरियों को (वि वधिषः) विशेष करके नाश किया है ॥

त्ययः । अभिभविता । विजेता (प्रत्नथा) पूर्वं यथा (मन्दतु) हर्षयतु (अर्वाङ्) अभिमुखः (सोमकामम्) ऐश्वर्यं कामयमानम् (अभ्यतृणत्) अभितः तर्द्दनमकरोत् । दृढबन्धनेन स्थापितवान् (अभितृण्णवत्यः) अभिपूर्वस्य तृदिर्धातोः रूपयुक्ताः ॥

(प्रजापतिः हि एतेभ्यः पञ्चभ्यः प्राणेभ्यः देवान् ससृजे) प्रजापति [इन्द्रिय आदि प्रजा के पालक यज्ञ] ने ही इन पांच प्राणों से देवताओं को उत्पन्न किया [देखो कण्डिका ११] । (यत् उ च इदं किंच पाङ्क्तं तत् सृष्ट्वा व्याज्वलयत्) और जो कुछ भी पाङ्क्त [पङ्क्ति पांच वा विस्तार में होने वाला] है, उसको उत्पन्न करके उसने विविध प्रकार प्रकाशित किया । (ते ह देवाः ऊचुः, अयं मयोभूः पिता म्लानः, पुनः इमं समीर्य उत्थापयामः इति) वे ही देवता बोले—यह सुख पहुँचाने वाला पिता [प्रजापति] मुरझाया हुआ है, फिर इसको हम मिलकर उठावें । (सः ह सत्त्वम् आख्याय अभ्युपतिष्ठते) वह [प्रजापति] ही सत्त्व [पौरुष] दिखा कर सब ओर उपस्थित हुआ । (यदि ह वै अपि निर्णिक्तस्य एव कुलस्य सन्व्युक्षेण यजते, सत्त्वं ह एव आख्याय अभ्युपतिष्ठते) जब ही मनुष्य निश्चय करके शुद्ध किये हुये ही कुल के संयोग बढ़ाने से यज्ञ करता है, वह पुरुषार्थ ही दिखाकर सब ओर उपस्थित होता है । (यः वै प्रजापतिः सः यज्ञः) जो ही प्रजापति है वह यज्ञ है । (सः एतैः एव पञ्चभिः प्राणैः समीर्य उत्थापितः) वह [प्रजापति वा यज्ञ] इन ही पांच प्राणों से मिल कर उठाया गया है । (ये ह वै एनं पञ्चभिः प्राणैः समीर्य उदस्थापयन्, ताः उ एव एताः पञ्च देवताः उक्थे शस्यन्ते) जिन ही [देवताओं] ने इस [प्रजापति वा यज्ञ] को पांच प्राणों से मिल कर उठाया है, वे ही यह पाँच देवता उक्थ [स्तोत्र] में स्तुति किये जाते हैं ॥ १२ ॥

भावार्थः—कण्डिका ११ के विषय का विशेष वर्णन है ॥ १२ ॥

कण्डिका १३ ॥

तदाहुः, यद् द्वयोर्देवतयो स्तुवत इन्द्राग्न्योरिति, अथ कस्माद्भूयिष्ठो देवता उक्थे शस्यन्त इति । अन्तो वा आग्निमारुतमन्तरुक्थान्यन्त आश्विनं कनीयसीषु देवतासु स्तुवते, अन्तेष्विति । अथ कस्माद् भूयिष्ठो देवता उक्थे शस्यन्त इति । द्वे द्वे उक्थमुखे भवतः, तद्यद् द्वे द्वे ॥ १३ ॥

१२—(देवान्) इन्द्रियाणां दिव्यव्यापारान् (ससृजे) सृष्टवान् (पाङ्क्तम्) पङ्क्तिभवम् । पञ्चभवम् । विस्तारयुक्तम् (व्याज्वलयत्) विशेषेण अदीपयत् (म्लानः) म्लै हर्षक्षये--क्तः । ग्लानियुक्तः (मयोभूः) मिञ् हिंसायाम् —असुन् । मिनोति हिनस्ति दुःखम् । मयः सुखम्--निघ० ३ । ६ । मयः+भू सत्तायाम्—क्विप् । सुखस्य भावयिता प्रापकः (सत्त्वम्) सत्ताम् । पौरुषम् (आख्याय) व्याख्याय । प्रसिद्धं कृत्वा (निर्णिक्तस्य) णिजिर् शोचे--क्तः । निरन्तरशोधितस्य (सन्व्युक्षेण) उक्ष सेचने वृद्धौ च घञ् । उक्षणः उक्षतेर्वृद्धिकर्मण उक्षन्त्युदकेनेति वा--निरु० १२ । ९ । संयोगवर्धनेन (समीर्य) संगत्य ॥

कण्डिका १३ ॥ उक्थ में दो इन्द्र और अग्नि की स्तुति रहते हुये बहुत देवताओं की स्तुति का विचार ॥

(तत् आहुः, यत् द्वयोः देवतयोः इन्द्राग्न्योः स्तुवते इति, अथ कस्मात् भूयिष्ठः देवताः उक्थे शस्यन्ते इति) फिर लोग कहते हैं--जब दो देवताओं इन्द्र और अग्नि [मन और वाणी, क० ११] की स्तुति करते हैं, फिर किस लिये बहुत से देवता उक्थ [स्तोत्र] में स्तुति किये जाते हैं। (अन्तः वै आग्निमारुतम्, अन्तः उक्थानि, अन्तः आश्विनम्, अन्तेषु कनीयसीषु देवतासु स्तुवते इति) अन्त ही अग्नि और मरुत् देवता वाला स्तोत्र है, अन्त उक्थ हैं, अन्त दोनों अश्वियों का स्तोत्र है, अन्तों [स्तोत्रों के अन्तों] में छोटे-छोटे देवताओं की स्तुति करते हैं। (अथ कस्मात् भूयिष्ठः देवताः उक्थे शस्यन्ते इति) फिर किस लिये बहुत से देवता उक्थ में स्तुति किये जाते हैं। [शंका समाधान] (द्वे द्वे उक्थमुखे भवतः, तत् यत् द्वे, द्वे) दो दो उक्थमुख [उक्थ के आरम्भ के स्तोत्र] होते हैं, इस लिये जो दो हैं, [वे] दो [देवता] हैं ॥ १३ ॥

भावार्थः--कण्डिका ११ का विशेष वर्णन है ॥ १३ ॥

विशेषः--मिलाओ कण्डिका ११ से ॥

कण्डिका १४ ॥

अथ यदैन्द्रावारुणं मैत्रावरुणस्योक्थं भवति। ऐन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भवति। ऐन्द्रावैष्णवमच्छावाकस्योक्थं भवति। द्वे संशस्यंस्त ऐन्द्रं च वारुणञ्चैकमैन्द्रावारुणं भवति। द्वे संशस्यंस्त ऐन्द्रं च बार्हस्पत्यञ्चैकमैन्द्राबार्हस्पत्यं भवति। द्वे संशस्यंस्त ऐन्द्र च वैष्णवञ्चैकमैन्द्रावैष्णवं भवति। द्वे द्वे उक्थमुखे भवतः, तद्यद् द्वे द्वे ॥ १४ ॥

कण्डिका १४ ॥ तीन ऋत्विजों के अलग अलग उक्थ और दो दो देवता वाले उक्थ हैं ॥

(अथ यत् मैत्रावरुणस्य ऐन्द्रावारुणम् उक्थं भवति) फिर जो मैत्रावरुण [ऋत्विज्] का इन्द्र और वरुण [मन और प्राण--क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उस का वर्णन]। (ब्राह्मणाच्छंसिनः ऐन्द्राबार्हस्पत्यम् उक्थं भवति) ब्राह्मणाच्छंसी [ऋत्विज्] का इन्द्र और बृहस्पति [मन और आँख] देवता वाला उक्थ होता है, (अच्छावाकस्य ऐन्द्रावैष्णवम् उक्थं भवति) और अच्छावाक [ऋत्विज्] का

१३--(आहुः) कथयन्ति (स्तुवते) स्तुवन्ति। स्तुतिं कुर्वन्ति (भूयिष्ठः) बहु--इष्ठन्। पुंस्त्वमेकवचनत्वं चार्षम्। भूयिष्ठाः। बहुतमाः (आश्विनम्) अश्विनोरिदम् अण् अश्विदेवताकं स्तोत्रम् (कनीयसीषु) युवाल्पयोः कनन्यतरस्याम् (पा० ५। ३। ६४) अल्प--ईयसुन्, ङीप् कन् इत्यादेशः अल्पतरासु ॥

१४--(संशस्यम्) संशस्ये। स्तोतव्ये (स्तः) भवतः ॥

इन्द्र और विष्णु [मन और कान] देवता वाला उक्थ होता है। (द्वे ऐन्द्रं च वारुणं च संशस्यं स्तः, एकम् ऐन्द्रावारुणं भवति) [इस लिये] इन्द्र और वरुण [मन और प्राण] देवता वाले [स्तोत्र] स्तुति योग्य हैं, एक इन्द्र और वरुण देवता वाला उक्थ होता है, (द्वे ऐन्द्रं च बार्हस्पत्यं च संशस्यं स्तः, एकम् ऐन्द्राबार्हस्पत्यं भवति) दो इन्द्र और बृहस्पति [मन और आंख] देवता वाले [स्तोत्र] स्तुति योग्य हैं, एक इन्द्र और बृहस्पति [मन और आँख] देवता वाला [उक्थ] होता है, (द्वे ऐन्द्रं च वैष्णवं च संशस्यं स्तः, एकम् ऐन्द्रावैष्णवं भवति) दो इन्द्र और विष्णु [मन और कान] देवता वाले [स्तोत्र] स्तुति योग्य हैं, एक इन्द्र और विष्णु [मन और कान] देवता वाला [उक्थ] होता है। (द्वे द्वे उक्थमुखे भवतः, तत् यत् द्वे द्वे) दो उक्थमुख [उक्थ के आरम्भ के स्तोत्र] होते हैं, इस लिये जो दो हैं, [वे] दो [देवता] हैं ॥१४॥

भावार्थः—कण्डिका ११ का विशेष वर्णन है ॥ १४ ॥

विशेषः—मिलाओ कण्डिका ११ ॥

कण्डिका १५ ॥

अथ यदैन्द्रावारुणं मैत्रावरुणस्योक्थं भवति । इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रताविदृचाभ्यनूक्तम् । मद्वद्धि तृतीयसवनम् । एह्यू षु ब्रवाणि त आग्निरगामि भारत इति मैत्रावरुणस्य स्तोत्रियानुरूपौ । चर्षणीधृतं मघवानमुक्थ्यमित्युक्थमुखम् । तस्योपरिष्टाद् ब्राह्मणम् । अस्तभ्नाद् द्यामसुरो विश्ववेदा इति वारुणं सांशंसिकम् । अहञ्चेति वरुणोऽब्रवीद्देवतयोः संशंसायानतिशंसाय । इन्द्रावरुणा युवमध्वराय न इति पर्य्यास ऐन्द्रावारुणे । ऐन्द्रावारुणमस्यैतन्नित्यमुक्थम् । तदेतत् स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति । द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त विजित्या एव । अथो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै सैकपादिनी भवति । एकपादिन्या होता परिदधाति । यत्र होतुर्होत्रकाणां युञ्जन्ति, तत् समृद्धन्तद्वै खल्वा वां राजानावध्वरे ववृत्यामिति । एवमेव केवलपर्य्यासं कुर्य्यात् । केवलसूक्तं केवलसूक्तमेवोत्तरयोर्भवति । इन्द्रावरुणा मधुमत्तमस्येति यजति । एते एव तद् देवते यथाभागं प्रीणाति, वषट्कृत्यानुवषट्करोति । प्रत्येवाभिमृशन्ते नाप्याययन्ति न ह्यनाराशंᳯ साः सीदन्ति ॥ १५ ॥

कण्डिका १५ ॥ एकाह यज्ञ के तृतीयसवन के उक्थ में मैत्रावरुण ऋत्विज् के मन्त्र ॥

(अथ यत् मैत्रावरुणस्य ऐन्द्रावारुणम् उक्थं भवति) फिर जो मैत्रावरुण [ऋत्विज्] का इन्द्र और वरुण [मन और प्राण क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उसका वर्णन]। (इन्द्रावरुणा सुतपौ इमं सुतं सोमं पिबतं मद्यं धृतव्रतौ— इति ऋचा अभ्यनूक्तम्) इन्द्रावरुणा सुतपौ·· ·····१—इस ऋचा करके अनुकूल कहा गया है। (मद्वत् हि तृतीयसवनम्) हर्ष युक्त [अथवा मद शब्द वाला] ही तृतीयसवन

१५—(मद्वत्) मदी हर्षे - क्विप्, मतुप् । हर्षयुक्तम् । मदशब्दयुक्तम् (आ

है। (एहि उ षु ब्रवाणि ते, आग्निरगामि भारतः—इति मैत्रावरुणस्य स्तोत्रियानुरूपौ) एहि उ षु ब्रवाणि ते......२--आ अग्निः अगामि भारतः......३—यह दो मन्त्र मैत्रावरुण के स्तोत्रिय और अनुरूप हैं। (चर्षणीधृत मघवानम् उक्थ्यम्......इति उक्थमुखम्) चर्षणीधृतं मघवानम् उक्थ्यम्......४--यह मन्त्र [मैत्रावरुण का] उक्थमुख है। (तस्य उपरिष्टात् ब्राह्मणम्) उसके उपरान्त ब्राह्मण है। (अस्तभ्नाद् द्याम् असुरः विश्ववेदाः, इति वारुणं सांशंसिकम्) अस्तभ्नाद् द्याम् असुरः विश्ववेदाः ....५—यह मन्त्र वरुण देवता वाला सांशंसिक [यथार्थ प्रशंसायुक्त उक्थ] है। (अहं च इति वरुणः अब्रवीत् देवतयोः संशंसाय अनतिशंसाय) और मैं—यह वरुण ने कहा [क० ११], वह दो देवताओं की यथार्थ प्रशंसा के लिये है जो अत्युक्ति बिना प्रशंसा हो। (इन्द्रावरुणा युवम् अध्वराय नः.... इति ऐन्द्रावारुणे पर्य्यासः) इन्द्रावरुणा युवम् अध्वराय नः......६—यह मन्त्र इन्द्र और वरुण वाले [उक्थ] में पर्य्यास [अन्त] है। (अस्य ऐन्द्रावारुणम् एतत् नित्यम् उक्थम्) इस [मैत्रावरुण ऋत्विज्] का इन्द्र और वरुण देवता वाला यह नित्य उक्थ है। (तत् एतत् स्वस्मिन् आयतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति) सो यह [उक्थ] अपने स्थान में और अपनी प्रतिष्ठा में [यजमान को] स्थापित करता है। (एताः देवताः द्वन्द्वं वै भूत्वा विजित्यै एव व्यजयन्त) इन देवताओं ने दो दो होकर विजय के लिये ही विजय पाया है। (अथो द्वन्द्वस्य एव मिथुनस्य प्रजात्यै सा एकपादिनी भवति) फिर दो दो [देवता] वाले ही मिथुन [ज्ञान वा जोड़] की उत्पत्ति के लिए वह [स्तुति वा ऋचा] एक पाद वाली होती है। (एकपादिन्या होता परिदधाति) एक पाद वाली [ऋचा] से होता परिधानीया इष्टि करता है। (यत्र होतुः होत्रकाणां युञ्जन्ति, तत् समृद्धम्) जहाँ होता के होत्रक लोगों [सहायक ऋत्विजों] का वे योग करते हैं, वह समृद्ध [सफल] होता है। (तत् वै खलु—आ वां राजानौ अध्वरे ववृत्याम् इति) वह ही यह मन्त्र है--आ वां राजानौ अध्वरे ववृत्याम्......७--(एवम् एव केवलपर्यासं कुर्यात्) इस प्रकार से

इहि) आगच्छ (ब्रवाणि) कथयानि (ते) तुभ्यम् (आ) समन्तात् (अग्निः) अग्निरिव तेजस्वी पुरुषः (अगामि) गम्यते (भारतः) भृमृदृशियजि० (उ० ३। ११०) भृञ् भरणे—अतच्। प्रज्ञादिभ्यश्च (पा० ५। ४। ३८) स्वार्थे--अण्। भारताः, ऋत्विजः—निघ० ३। १८। भर्ता। पोषकः (चर्षणीधृतम्) मनुष्याणां धर्तारम् (मघवानम्) बहुधनयुक्तम् (उक्थ्यम्) प्रशंसनीयम् (अस्तभ्नात्) स्थापितवान् (द्याम्) सूर्यलोकम् (असुरः) असुरिति प्रज्ञानाम-निरु० १०। ३४। रो मत्वर्थीयः। प्रज्ञावान् (विश्ववेदाः) वेदो धनम्—निघ० २। १०। सर्वधनः (सांशंसिकम्) संशंस—ठक्। सम्यक् प्रशंसायुक्तमुक्थम् (संशंसाय) प्रशंसनाय (अनतिशंसाय) अत्युक्तिरहिताय प्रशंसनाय। यथावत् प्रशंसनाय (द्वन्द्वम्) द्वन्द्वं रहस्यमर्यादावचन० (पा० ८। १। १५) द्वि द्वि. पूर्वपदस्य इकारस्य अम्, उत्तरस्य इकारस्य अत्वम्। द्वंद्वे (मिथुनम्) मिथृ वधे मेधायां च-उनन्। ज्ञानम्। युगलम् (एकपादिनी) एकपादयुक्ता ऋक् (परिदधाति) परिधानीयां यजति (वाम्)

ही केवलपर्यास [एक देवता के स्तोत्र वाला अन्तिम उक्थ] करे। (केवलसूक्तं केवलसूक्तम् एव उत्तरयोः भवति) केवलसूक्त, केवलसूक्त [एक देवता की स्तुति वाला सूक्त] ही पिछले दो [देवताओं] का होता है। (इन्द्रावरुणा मधुमत्तमस्य......इति यजति) इन्द्रावरुणा मधुमत्तमस्य .....८—इस मन्त्र से वह याज्या आहुति देता है। (एते एव देवते तत् यथाभागं प्रीणाति, वषट्कृत्य अनुवषट्करोति) इन ही दो देवताओं को उससे अपने अपने भाग के अनुसार वह प्रसन्न करता है और वषट्कार करके अनुवषट्कार [अन्तिम आहुति दान] करता है। (प्रति एव अभिमृशन्ते, अनाराशंसाः न आप्याययन्ति न हि सीदन्ति) वे [ऋषि लोग] प्रत्यक्ष ही विचारते हैं—नरों [नेताओं] की स्तुति विना यज्ञ [यजमान को] न बढ़ाते हैं और नहीं चलते हैं [नहीं आप बढ़ते हैं। देखो क० ३] ॥ १५ ॥

भावार्थः—योग्य पुरुष योग्य देवता की स्तुति योग्य विचारों से करे ॥ १५ ॥

विशेषः—नीचे शुद्धि पत्र देखो ॥

अशुद्ध	शुद्ध	प्रमाण
एत्यू	एह्यू	वेदमन्त्र
ता अग्नि	त आग्नि	,,
मघवानमुक्थम्	मघवानमुक्थ्यम्	,,
अस्तभ्नाद्याम्	अस्तभ्नाद् द्याम्	,,
नित्युक्थम्	नित्यमुक्थम्	कण्डिका १६, १७
राजानामध्वरे	राजानावध्वरे	वेदमन्त्र
ऽववृत्याम्	ववृत्याम्	,,

विशेषः—२—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं।

१—इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रतौ......॥ यह मन्त्र आ चुका है, गो० ब्रा० उ० २ । २२, विशेषः ३ ॥

२—एह्यू षु ब्रवाणि ते...... ॥ आ चुका है—गो० ब्रा० उ० ४ । ११, विशेषः ॥

३—आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः—ऋ० ६ । १६ । १९ ॥ (दिवोदासस्य) प्रकाश के देने वाले का (भारतः) पोषण करने वाला, (वृत्रहा) शत्रुओं को मारने वाला, (पुरुचेतनः) बहुत चेतना वाला, (सत्पतिः) सत्पुरुषों का पालने वाला (अग्निः) अग्नि [के समान तेजस्वी पुरुष] (आ अगामि) सब ओर से प्राप्त किया जाता है ॥

४—चर्षणीधृतं मघवानमुक्थ्य १ मिन्द्रं गिरो बृहतीरभ्यनूषत । वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे—ऋ० ३ । ५१ । १, सा० पू० ४ । ९ । ५ ॥ (बृहतीः) बड़े विषय वाली (गिरः) [विद्वानों की] वाणियाँ (चर्षणीधृतम्) मनुष्यों के धारण

युवाम् (राजानौ) ऐश्वर्यवन्तौ (अध्वरे) हिंसारहितयागे (आ ववृत्याम्) आवर्तयामि । आह्वयामि ॥

करने वाले, (मघवानम्) बहुत धन वाले, (उक्थ्यम्) प्रशंसा योग्य, (वावृधानम्) बढ़ते हुये, (पुरुहूतम्) बहुत पुकारे गये (अमर्त्यम्) अमर, (सुवृक्तिभिः) सुन्दर ग्रहण योग्य क्रियाओं से (जरमाणम्) स्तुति किये जाते हुये (इन्द्रम्) इन्द्र [बड़े ऐश्वर्य्य वाले राजा] की (दिवेदिवे) दिन दिन (अभि) सब ओर से (अनूषत) बड़ाई करें ॥

५—अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः । आसीदद् विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि—ऋ० ८ । ४२ । १ ॥ (असुरः) बुद्धिमान्, (विश्ववेदाः) सम्पूर्ण धन वाले परमात्मा ने (द्याम्) सूर्य लोक को (अस्तभ्नात्) थांभा है, और (पृथिव्याः) पृथिवी की (वरिमाणम्) चौड़ाई को (अमिमीत) नापा है। (सम्राट्) सम्राट् [वह राजराजेश्वर परमात्मा] (विश्वा) सब (भुवनानि) भुवनों में (आ असीदत्) आकर बैठा है, (तानि इत्) वे ही (विश्वा) सब (वरुणस्य) वरुण [स्वीकार करने योग्य परमेश्वर] के (व्रतानि) कर्म हैं ॥

६—इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् । दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः—ऋ० ७ । ८२ । १ ॥ (इन्द्रावरुणा) हे इन्द्र और वरुण ! [बड़े ऐश्वर्य वाले राजा और स्वीकार करने योग्य मन्त्री] (युवम्) तुम दोनों (अध्वराय) हिंसा रहित यज्ञ के लिये (नः) हमारी (विशे) प्रजा को और (जनाय) कुटुम्बियों को (महि) बड़ा (शर्म) स्थान (यच्छतम्) दो (यः) जो [शत्रु] (दीर्घप्रयज्युम्) बड़े यज्ञ करने वाले पुरुष को (अति) उल्लंघन करके (वनुष्यति) मारे, [उसको और] (दूढ्यः) दुर्बुद्धियों को (पृतनासु) संग्रामों में (वयं जयेम) हम जीतें ॥

७—आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः । प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति—ऋ० ७ । ८४ । १ ॥ (राजानौ) हे राजाओ (इन्द्रावरुणा) इन्द्र और वरुण ! [बड़े ऐश्वर्य वाले राजा और स्वीकार करने योग्य मन्त्री] (वाम् तुम दोनों को (अध्वरे) हिंसारहित यज्ञ में (हव्येभिः) देने और लेने योग्य पदार्थों और (नमोभिः) सत्कारों से (आ ववृत्याम्) मैं लौटाऊँ । (बाह्वोः) [हमारी] दोनों भुजाओं में (दधाना) रक्खी हुई (घृताची) घृत पहुँचाने वाली [चमची] (त्मना) अपने आप (विषुरूपा) नानाविध स्वभाव वाले (वाम्) तुम दोनों को (परि) सब ओर से (प्र जिगाति) पहुँच जाती है ।

८—इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् । इदं वामन्धः परिषिक्तमासद्यास्मिन् बर्हिषि मादयेथाम्—अथर्व० ७ । ५८ । २, ऋ० ६ । ६८ । ११ ॥ (वृषणा) हे बलिष्ठ ! (इन्द्रावरुणा) बिजुली और वायु [के समान राजा और प्रजाजनो] तुम (मधुमत्तमस्य) अत्यन्त ज्ञानयुक्त, (वृष्णः) बल करने वाले (सोमस्य) ऐश्वर्य की (आ वृषेथाम्) भले प्रकार वर्षा करो । (वाम्) तुम दोनों का (इदम्) यह (परिषिक्तम्) सब प्रकार सींचा हुआ (अन्धः) अन्न है, (अस्मिन्) इस (बर्हिषि) वृद्धि कर्म में (आसद्य) बैठ कर (मादयेथाम्) आनन्दित करो ॥

कण्डिका १६ ॥

अथ यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भवति इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू इत्यृचाभ्यनूक्तं मद्वद्धि तृतीयसवनम् । वयमु त्वामपूर्व्य यो न इदमिदं पुरेति ब्राह्मणाच्छंसिन स्तोत्रियानुरूपौ । प्र मंहिष्ठाय बृहते बृहद्रय इत्युक्थमुखम् । ऐन्द्रं जागतं, जागताः पशवः, पशूनामाप्त्यै । जागतमु वै तृतीयसवनं तृतीयसवनस्य रूपम् । उदप्रुतो न वयो रक्षमाणा इति बार्हस्पत्यं सांशंसिकम् । अहञ्चेति बृहस्पतिरब्रवीत्, देवतयोः संशंसायानतिशंसाय । अच्छाम इन्द्रं मतयः स्वर्विद इति पर्य्यास ऐन्द्राबार्हस्पत्ये । ऐन्द्राबार्हस्पत्यमस्यैतन्नित्यमुक्थम् । तदेतत् स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति । द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त विजित्या एव, अथो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै । बृहस्पतिर्नः परि पातु पश्चादित्यैन्द्राबार्हस्पत्या परिदधाति । इन्द्राबृहस्पत्योरेव यज्ञं प्रतिष्ठापयति, उतोत्तरस्मादधरादघायोरिन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोत्विति । सर्वाभ्य एव दिग्भ्य आशिषमाशास्ते, नार्त्वीयं कामं कामयते । सोऽस्मै कामः समृध्यते, य एवं वेद, यश्चैवं विद्वान् ब्राह्मणाच्छंस्येतया परिदधाति । बृहस्पते युवमिन्द्रश्च वस्व इति यजति । एते एव तद्देवते यथाभागं प्रीणाति वषट्कृत्यानुवषट् करोति प्रत्येवाभिमृशन्ते नाप्याययन्ति न ह्यनाराशंसाः सीदन्ति ॥ १६ ॥

कण्डिका १६ ॥ एकाह यज्ञ के तृतीय सवन के उक्थ में ब्राह्मणाच्छंसी ऋत्विज् के मन्त्र ॥

(अथ यत् ब्राह्मणाच्छंसिनः ऐन्द्राबार्हस्पत्यम् उक्थं भवति) फिर जो ब्राह्मणाच्छंसी [ऋत्विज्] का इन्द्र और बृहस्पति [मन और आँख—क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उसका वर्णन]। (इन्द्रश्च सोमं पिबतं बृहस्पते अस्मिन् यज्ञे मन्दसाना वृषण्वसू ···इति ऋचा अभ्यनूक्तम्) इन्द्रः च सोमं पिबतं··· १—इस ऋचा करके अनुकूल कहा गया है। (मद्वत् हि तृतीयसवनम्) हर्ष युक्त [अथवा मद शब्द वाला] ही तृतीय सवन है। (वयमु त्वामपूर्व्य, यो नः इदमिदं पुरा—इति ब्राह्मणाच्छंसिनः स्तोत्रियानुरूपौ) वयम् उ त्वाम् अपूर्व्य······२, और, यः न इदमिदं पुरा······३—यह दो मन्त्र ब्राह्मणाच्छंसी के स्तोत्रिय और अनुरूप हैं। (प्र मंहिष्ठाय बृहते बृहद्रये·····इति उक्थमुखम्) प्र मंहिष्ठाय बृहते बृहद्रये······

१६—(बृहस्पते) हे बृहत्या वेदवाण्या रक्षक विद्वन् (मन्दसाना) मदि आमोदस्तुतिदीप्त्यादिषु—असानच् । आमोदयितारौ (वृषण्वसू) यौ वृष्णो बलवतो वीरान् वासयतस्तौ (अपूर्व्य) स्वार्थे-यत् नास्ति पूर्वः श्रेष्ठो यस्मात् सः अपूर्वः, अपूर्व्यः । हे अनुपम (इदमिदम्) बहुनिर्दिष्टम् (पुरा) अग्रे (मंहिष्ठाय) मंहतेर्दानकर्मा—निघ० ३ । २० । महि वृद्धौ दाने च—तृच्, मंहितृ—इष्ठन्, तृलोपः । दातृतमाय (बृहते) गुणैर्महते (बृहद्रये) रै शब्दस्य ऐकारस्य एकारः । प्रभूतधनाय (जागतम्) जगत्

४—यह मन्त्र [ब्राह्मणाच्छंसी का] उक्थमुख है । (ऐन्द्रं जागतं, जागताः पशवः, पशूनाम् आप्त्यै) इन्द्र देवता वाला [स्तोत्र] जगत् का हितकारी है, जगत् के हितकारी पशु हैं, पशुओं की प्राप्ति के लिये [यह स्तोत्र है] । (जागतम् उ वै तृतीयसवनं तृतीयसवनस्य रूपम्) जगत् का हितकारी ही तीसरा सवन है [और पूर्वोक्त कर्म] तृतीय सवन का रूप है । (उदप्रुतो न वयो रक्षमाणाः······इति बार्हस्पत्यं सांशंसिकम्) उदप्रुतः न वयः रक्षमाणाः······५—यह मन्त्र बृहस्पति देवता वाला सांशंसिक [यथार्थ प्रशंसायुक्त उक्थ] है । (अहं च इति बृहस्पतिः अब्रवीत्, देवतयोः संशंसाय अनतिशंसाय) और मैं—यह बृहस्पति ने कहा [क० ११], वह दो देवताओं की यथार्थ प्रशंसा के लिये है जो अत्युक्ति बिना प्रशंसा हो । (अच्छा म इन्द्रं मतयः स्वर्विदः······इति ऐन्द्राबार्हस्पत्ये पर्य्यासः) अच्छा मे इन्द्रं मतयः स्वर्विदः······ ६—यह मन्त्र इन्द्र और बृहस्पति वाले [उक्थ] में पर्य्यास [अन्त] है । (अस्य ऐन्द्राबार्हस्पत्यम् एतत् नित्यम् उक्थम्) इस [ब्राह्मणाच्छंसी ऋत्विज्] का इन्द्र और बृहस्पति देवता वाला यह नित्य उक्थ है । (तत् एतत् स्वस्मिन् आयतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति) सो यह [उक्थ] अपने स्थान में और अपनी प्रतिष्ठा में [यजमान को] स्थापित करता है । (एताः देवताः द्वन्द्वं वै भूत्वा विजित्यै एव व्यजयन्त) इन देवताओं ने दो दो होकर विजय के लिए ही विजय पाया है । (अथो द्वन्द्वस्य एव मिथुनस्य प्रजात्यै) फिर दो दो [देवता] वाले ही मिथुन [ज्ञान वा जोड़] की उत्पत्ति के लिये है । (बृहस्पतिर्नः परि पातु पश्चात्··· इति ऐन्द्राबार्हस्पत्या परिदधाति) बृहस्पतिः नः परि पातु पश्चात्······ ७—इस इन्द्र और बृहस्पति वाली [ऋचा] से वह परिधानीया इष्टि करता है । (इन्द्राबृहस्पत्योः एव यज्ञं प्रतिष्ठापयति) इन्द्र और बृहस्पति के ही यज्ञ को वह स्थापित करता है । (उत उत्तरस्मात् अधरात् अघायोः इन्द्रः पुरस्तात् उत मध्यतः नः सखा सखिभ्यः वरिवः कृणोतु इति) उत उत्तरस्माद्···यह [पूर्वोक्त मन्त्र ७ के तीन पाद बोले जाते हैं] (सर्वाभ्यः एव दिग्भ्यः आशिषम् आशास्ते, अत्वींयं कामं न कामयते) सब ही दिशाओं से वह आशीर्वाद चाहता है और निन्दा योग्य कामना नहीं चाहता । (सः कामः अस्मै समृध्यते, यःएवं वेद, यः च एवं विद्वान् ब्राह्मणाच्छंसी एतया परिदधाति) वह काम [कामना योग्य पदार्थ] उस के लिये समृद्ध [सफल] होता है, जो ऐसा जानता है, और ऐसा

अण् । जगते हिताय (उदप्रुतः) प्रुङ् गतौ—क्विप् । उदकं प्राप्ताः (न) यथा (वयः) पक्षिणः (रक्षमाणाः) आत्मानं पालयन्तः (अच्छ) सुष्ठु (मे) मम (मतयः) बुद्धयः (स्वर्विदः) सुखस्य लम्भयित्र्यः (बृहस्पतिः) बृहतां शूराणां रक्षकः सेनापतिः (नः) अस्मान् (परि) सर्वतः (पातु) रक्षतु (ऐन्द्राबार्हस्पत्या) विभक्तेर्लुक् । ऐन्द्राबार्हस्पत्यया ऋचा (उत) अपि च (उत्तरस्मात्) ऊर्ध्वलोकात् (अधरात्) अधस्तनलोकात् (अघायोः) पापेच्छुकात् । दुराचारिणः (पुरस्तात्) अग्रे (नः) अस्मभ्यम् (सखा) सुहृत् (सखिभ्यः) मित्राणां हिताय (वरिवः) वृञ् वरणे यङ्लुकि—ऋतश्च (पा० ७ । ४ । ९२) अभ्यासस्य

विद्वान् ब्राह्मणाच्छंसी [ऋत्विज्] इस [स्तुति] से परिधानीया इष्टि करता है। (बृहस्पते युवम् इन्द्रश्च वस्व:······इति यजति) बृहस्पते युवम् इन्द्रः च वस्वः'' ८--इस मन्त्र से वह याज्या आहुति देता है। (एते एव देवते तत् यथाभागं प्रीणाति वषट्कृत्य अनुवषट्करोति) इन ही दोनों देवताओं को उससे अपने अपने भाग के अनुसार वह प्रसन्न करता है और वषट्कार करके अनुवषट्कार [अन्तिम आहुति दान] करता है। (प्रति एव अभिमृशन्ते, अनाराशंसाः न आप्याययन्ति न हि सीदन्ति) वे [ऋषि लोग] प्रत्यक्ष ही विचारते हैं—नरों [नेताओं] की स्तुति बिना यज्ञ [यजमान को] न बढ़ाते हैं और नहीं चलते हैं [नहीं आप बढ़ते हैं। देखो क० ३]॥ १६ ॥

भावार्थः—कण्डिका १५ के समान है ॥ १६ ॥

विशेष : १—(बृहद्रथ) के स्थान पर (बृहद्रय) वेदमन्त्र से शुद्ध किया है ॥

विशेषः २--प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१--इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू। आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम्---अथर्व० २० । १३ । १, ऋग्० ४ । ५० । १० ॥ (बृहस्पते) हे बृहस्पति ! [बड़ी वेदवाणी के रक्षक विद्वान्] (च) और (इन्द्रः) हे इन्द्र ! [अत्यन्त ऐश्वर्य वाले राजन्] (मन्दसाना) आनन्द देने वाले, (वृषण्वसू) बलवान् वीरों के निवास कराने वाले तुम दोनों (सोमम्) सोम [उत्तम ओषधियों के रस] को (अस्मिन्) इस (यज्ञे) यज्ञ [राजपालन व्यवहार] में (पिबतम्) पीओ। (स्वाभुवः) अच्छे प्रकार सब ओर होने वाले (इन्दवः) ऐश्वर्य (वाम्) तुम दोनों में (आ विशन्तु) प्रवेश करें, (अस्मे) हम को (सर्ववीरम्) सबको वीर बनाने वाला (रयिम्) धन (नि) नियम पूर्वक (यच्छतम्) तुम दोनों दो ॥

२--वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः। वाजे चित्रं हवामहे - अथर्व २० । १४ । १, ऋग्० ८ । २१ । १, साम० पू० ५ । २ । १० ॥ (अपूर्व्य) हे अनुपम ! [राजन्] (कत् चित्) कुछ भी (स्थूरम्) स्थिर वस्तु (न) नहीं (भरन्तः) रखते हुये, (अवस्यवः) रक्षा चाहने वाले (वयम्) हम (वाजे) संग्राम के बीच (चित्रम्) विचित्र स्वभाव वाले (त्वाम्) तुझ को (उ) ही (हवामहे) बुलाते हैं ॥

३--यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे। सखाय इन्द्रमूतये—अथर्व० २० । १४ । ३, ऋग्० ८ । २१ । ९, साम० उ० ५ । २ । २ ॥ (यः) जो [पराक्रमी] (नः) हमारे लिये (इदमिदम्) इस--इस (वस्यः) उत्तम वस्तु

रिगागमः, वरिवो धननाम--निघ० २ । १० । वरणीयं धनम् (कृणोतु) करोतु (अर्त्वीयम्) भृमृशीङ्० (उ० १ । ७) ऋत जुगुप्सायाम्--उप्रत्ययः। अतु--छः। निन्दायोग्यम् (युवम्) युवाम् (वस्वः) वसुनः। धनस्य। अन्यत् पूर्ववत् क० १५ ॥

को (पुरा) पहिले (प्र) अच्छे प्रकार (आनिनाय) लाया है, (तम् उ) उस ही (इन्द्रम्) इन्द्र [महाप्रतापी वीर] को, (सखाय:) हे मित्रो ! (व:) तुम्हारी (ऊतये) रक्षा के लिये (स्तुषे) मैं सराहता हूं ।।

४--प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे । अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम्-अथर्व० २० । १५ । १, ऋग्० १ । ५७ । १ ।। (मंहिष्ठाय) अत्यन्त दानी, (बृहते) महागुणी, (बृहद्रये) महाधनी, (सत्यशुष्माय सच्चे बलवान् [सभाध्यक्ष] के लिये (तवसे) बल पाने को (मतिम्) बुद्धि (प्र) उत्तम रीति से (भरे) मैं धारण करता हूँ (प्रवणे) ढालू स्थान में (अपाम् इव) जलों के [प्रवाह के] समान, (यस्य) जिस [सभाध्यक्ष] का (दुर्धरम्) बेरोक (विश्वायु) सब को जीवन देने वाला (राध:) धन (शवसे) बल के लिये (अपा-वृतम्) फैला हुआ है ।।

५--उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषा: । गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन्—अथर्व २० । १६ । १, ऋग्० १० । ६८ । १ ।। (उदप्रुत:) जल को प्राप्त हुये, (रक्षमाणा:) अपनी रक्षा करते हुये (वय: न) पक्षियों के समान, (वावदत:) बार बार गरजते हुये (अभ्रियस्य) बादल के (घोषा: इव) शब्दों के समान (गिरिभ्रज:) पहाड़ों से गिरते हुये, (मदन्त:) तृप्त करते हुये (ऊर्मय: न) जल के प्रवाहों के समान, (अर्का:) पूजनीय पण्डितों ने (बृहस्पतिम्) बृहस्पति [बड़ी वेदवाणी के रक्षक महाविद्वान्] को (अभि) सब ओर से (अनावन्) सराहा है ।।

६—अच्छा म इन्द्रं मतय: स्वर्विद: सध्रीचीर्विश्वा उशतीरनूषत । परिष्व-जन्ते जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये--अथर्व० २० । १७ । १, ऋग्० १० । ४३ । १ ।। (स्वर्विद:) सुख पहुँचाने वाली, (सध्रीची:) आपस में मिली हुई, (उशती:) कामना करती हुई, (विश्वा:) सब (मे) मेरी (मतय:) बुद्धियों ने (इन्द्रम्) इन्द्र [महाप्रतापी राजा] को (अच्छ) अच्छे प्रकार से (अनूषत) सराहा है और (ऊतये) रक्षा के लिये [ऐसे, उसे] (परिष्वजन्ते) सब ओर से घेरती हैं, (यथा) जैसे (जनय:) पत्नियाँ (पतिम्) [अपने अपने] पति को और (न) जैसे (शुन्ध्युम्) शुद्ध आचार वाले (मघवानम्) महाधनी (मर्यम्) मनुष्य को [लोग घेरते हैं] ।।

७—बृहस्पतिर्न: परि पातु पश्चादुतोत्तरस्मादधरादघायो: इन्द्र: पुरस्तादुत मध्यतो न: सखा सखिभ्यो वरिव: कृणोतु--अथर्व० २० । १७ । ११, ऋग्० १० । ४३ । ११ ।। (बृहस्पति:) बृहस्पति [बड़े शूरों का रक्षक सेनापति] (न:) हमें (पश्चात्) पीछे से, (उत्तरस्मात्) ऊपर से (उत) और (अधरात्) नीचे से (अघायो:) बुरा जीतने वाले शत्रु से (परि पातु) सब प्रकार बचावे । (इन्द्र:) इन्द्र [बड़े ऐश्वर्य वाला राजा] (पुरस्तात्) आगे से (उत) और (मध्यत:) मध्य से (न:) हमारे लिये (वरिव:) सेवनीय धन (कृणोतु) करे, (सखा) [जैसे] मित्र (सखिभ्य:) मित्रों के लिये [धन करता है] ।।

८—बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः—अथर्व० २०। १७। १२, ऋ० ७। ९७। १० ॥ (बृहस्पते) हे बृहस्पति ! [बड़ी वेदवाणी के रक्षक विद्वान्] (च) और (इन्द्रः) हे इन्द्र ! [महाप्रतापी राजन्] (युवम्) तुम दोनों (दिव्यस्य) आकाश के (उत) और (पार्थिवस्य) पृथिवी के (वस्वः) धन के (ईशाथे) स्वामी हो। (स्तुवते) स्तुति करते हुये (कीरये) विद्वान् को (रयिम्) धन को (चित्) अवश्य (धत्तम्) तुम दोनों दो, [हे वीरो !] (यूयम्) तुम सब (स्वस्तिभिः) सुखों के साथ (सदा) सदा (नः) हमें (पात) रक्षित रक्खो ॥

कण्डिका १७ ॥

अथ यदैन्द्रावैष्णवमच्छावाकस्योक्थं भवति इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधानेत्यृचाभ्यनूक्तम्। मद्वद्धि तृतीयसवनम्। अधा हीन्द्र गिर्वण इयन्त इन्द्र गिर्वण इत्यच्छावाकस्य स्तोत्रियानुरूपौ। ऋतुर्जनित्री तस्या अपस्परीत्युक्थमुखम्। तस्योक्तं ब्राह्मणं, नूमर्तो दयते सनिष्यन्निति वैष्णवं सांशंसिकम्। अहञ्चेति विष्णुरब्रवीत्, देवतयोः संशंसायानतिशंसाय। सं वां कर्मणा समिषा हिनोमीति पर्य्यास ऐन्द्रावैष्णवे। ऐन्द्रावैष्णवमस्यैतन्नित्यमुक्थम्। तदेतत् स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति। द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त विजित्या एव। अथो द्वन्द्वस्यैव मिथुनस्य प्रजात्या उभा जिग्यथुर्न पराजयेथे इत्यैन्द्रावैष्णव्यर्चा परिदधाति, इन्द्राविष्णोरेव यज्ञं प्रतिष्ठापयति। इन्द्राविष्णू पिबतं मध्वो अस्येति यजति। एते एव तद्देवते यथाभागं प्रीणाति वषट्कृत्यानुवषट्करोति। प्रत्येत्राभिमृशन्ते नाप्याययन्ति न ह्यनाराशंसाः सीदन्ति ॥ १७ ॥

कण्डिका १७ ॥ एकाह यज्ञ के तृतीयसवन के उक्थ में अच्छावाक ऋत्विज् के मन्त्र ॥

(अथ यत् अच्छावाकस्य ऐन्द्रावैष्णवम् उक्थं भवति) फिर जो अच्छावाक [अच्छे बोलने वाले ऋत्विज्] का इन्द्र और विष्णु [मन और कान—क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उसका वर्णन]। (इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना······इति ऋचा अभ्यनूक्तम्) इन्द्राविष्णू मदपती ··· १—इस ऋचा करके अनुकूल कहा गया है। (मद्वत् हि तृतीयसवनम्) हर्ष युक्त [अथवा मद शब्द वाला] ही तृतीय सवन है। (अधा हीन्द्र गिर्वणः · इयं त इन्द्र गिर्वणः···इति अच्छावाकस्य स्तोत्रियानुरूपौ) अधा हि इन्द्र गिर्वणः··· २—और, इयं ते इन्द्र

१७—(इन्द्राविष्णू) वायुविद्युताविव सभासेनेशौ (मदपती) आनन्दस्य पालकौ (मदानाम्) आनन्दानाम् (सोमम्) ऐश्वर्यम् (आ यातम्) आगच्छतम् (द्रविणो) द्रविणा उ इति पदद्वयमेकीभूय द्रविणो इति सिद्धम्। द्रविणा द्रविणानि धनानि उ अपि (दधाना) दधानौ। धरन्तौ (अध) अद्य। सम्प्रति (हि) एव (गिर्वणः) स्तुतिभिः सेवनीय (ऋतुः) वर्षाकालः (जनित्री)

गिर्वणः······३—यह दो मन्त्र अच्छावाक के स्तोत्रिय और अनुरूप हैं। (ऋतुर्जनित्री तस्या अपस्परि······इति उक्थमुखम्) ऋतुः जनित्री तस्याः अपः परि······४—यह मन्त्र [अच्छावाक का] उक्थमुख है। (तस्य उक्तं ब्राह्मणम्) उसका ब्राह्मण कहा गया है। (नू मर्त्तो दयते सनिष्यन्······इति वैष्णवं सांशंसिकम्) नु मर्त्तः दयते सनिष्यन्······५—यह मन्त्र विष्णु देवता वाला सांशंसिक [यथार्थ प्रशंसा युक्त उक्थ] है। (अहं च इति विष्णुः अब्रवीत्, देवतयोः संशंसाय अनतिशंसाय) और मैं—यह विष्णु ने कहा [क० ११], वह देवताओं की यथार्थ प्रशंसा के लिये है जो अत्युक्ति बिना प्रशंसा हो। (सं वां कर्मणा समिषा हिनोमि······, इति ऐन्द्रावैष्णवे पर्य्यासः) सं वां कर्मणा······६—यह मन्त्र इन्द्र और विष्णु वाले [उक्थ] में पर्यास [अन्त] है। (अस्य ऐन्द्रावैष्णवम् एतत् नित्यम् उक्थम्) इस [अच्छावाक] का इन्द्र और विष्णु देवता वाला यह नित्य उक्थ है। (तद् एतत् स्वस्मिन् आयतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति) सो यह [उक्थ] अपने स्थान में और अपनी प्रतिष्ठा में [यजमान को] स्थापित करता है। (एताः देवताः द्वन्द्वं वै भूत्वा विजित्यै एव व्यजयन्त) इन सब देवताओं ने दो दो होकर विजय के लिये ही विजय पाया है। (अथो द्वन्द्वस्य एव मिथुनस्य प्रजात्यै) फिर दो दो [देवता] वाले ही मिथुन [ज्ञान वा जोड़ा] की उत्पत्ति के लिये है। (उभा जिग्यथुर्न पराजयेथे ···इतिऐन्द्रावैष्णव्या ऋचा परिदधाति) उभा जिग्यथुः न······७—इस इन्द्र और विष्णु वाली ऋचा से वह परिधानीया इष्टि करता है। (इन्द्राविष्णोः एव यज्ञं प्रतिष्ठापयति) इन्द्र और विष्णु के यज्ञ को वह स्थापित करता है। (इन्द्राविष्णू पिबतं मध्वो अस्य ···इति यजति) इन्द्राविष्णू पिबतम् ···८—इस मन्त्र से वह याज्या आहुति देता है। (एते एव देवते तद् यथाभागं प्रीणाति वषट्कृत्य अनुवषट्करोति) इन ही दो देवताओं को उससे अपने अपने भाग के अनुसार वह प्रसन्न करता है और वषट्कार करके अनुवषट्कार [अन्तिम आहुति दान] करता है। (प्रति एव अभिमृशन्ते, अनाराशंसाः न आप्याययन्ति न हि सीदन्ति) वे [ऋषि लोग] प्रत्यक्ष ही विचारते हैं—नरों [नेताओं] की स्तुति

जनयित्री। जननी (अपः) जलानि (परि) सर्वतः (नु) शीघ्रम् (मर्त्तः) मनुष्यः (दयते) धनमादत्ते (सनिष्यन्) सर्वधातुभ्यः इन् (उ० ४। ११८) षणु दाने—इन्। सुप आत्मनः क्यच् (पा० ३। १। ८) सनि—क्यच्, लालसायां सुगागमः, ततः शतृ।[1] दातव्यधनमिच्छन् (सम्) सम्यक् (वाम्) युवाम् (कर्मणा) ईप्सिततमेन व्यापारेण (इषा) अन्नेन (हिनोमि) वर्धयामि (उभा) उभौ। इन्द्राविष्णू (जिग्यथुः) लिटि रूपम्। युवां जितवन्तौ शत्रून् (न) निषेधे (पराजयेथे) पराजयं प्राप्नुथः (मध्वः) मधुरस्य। अन्यत् पूर्ववत्॥

---

१. रूपसिद्धि की प्रक्रिया के इतने लम्बे व्यायाम की अपेक्षा लृडन्त सन् धातु से 'लृटः सद्वा' के नियम के अनुसार शतृ प्रत्यय होकर प्रथमा के एकवचन में 'सनिष्यन्' बनाना अधिक श्रेयस्कर है॥ सम्पा०॥

बिना यज्ञ [यजमान का] न बढ़ाते हैं और नहीं चलते हैं [नहीं आप बढ़ते है । देखो क० ३] ॥ १७ ॥

भावार्थः—कण्डिका १५ के समान है ॥ १७ ॥

विशेषः १—(मदयती) के स्थान पर (मदपती) और (अपसस्परि) के स्थान पर (अपस्परि) वेद मन्त्र से शोधा है ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना । सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः—ऋग्० ६ । ६९ । ३ ॥ (इन्द्राविष्णू) हे इन्द्र और विष्णु [वायु और बिजुली के समान सभापति और सेनापति] (मदानाम्) आनन्दों के बीच (मदपती) आनन्द के पालने वाले और (द्रविणो) धनों के भी (दधाना) धारण करने वाले तुम दोनों (सोमम्) ऐश्वर्य को (आ यातम्) प्राप्त होओ । (मतीनाम्) मनुष्यों के (शस्यमानासः) बोले हुये (स्तोमासः) स्तोम [स्तुति व्यवहार] (अक्तुभिः) तेजों और (उक्थैः) वेद स्तोत्रों के साथ (वाम्) तुम दोनों को (सं सम् अञ्जन्तु) बहुत अच्छे प्रकार प्रकट करें ।

२—अधा हीन्द्र गिर्वण उप त्वा कामान् महः ससृज्महे । उदेव यन्त उदभिः—अथर्व० २० । १०० । १, ऋ० ८ । ९८ । ७, [सायण भाष्य ८७] साम० उ० १ । १ । तृच २३ (गिर्वणः) हे स्तुतियों से सेवनीय (इन्द्र) इन्द्र ! [महाप्रतापी राजन्] (अध हि) अब ही (त्वा) तुझे (महः) अपनी बड़ी (कामान्) कामनाओं को, (उदा) जल [जल की बाढ़] के पीछे (उदभिः) दूसरे जलों की बाढ़ों के साथ (यन्तः इव) चलते हुये पुरुषों के समान हमने (उप) आदर से (ससृज्महे) समर्पण किया है ॥

३—इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः । मन्दानो अस्य बर्हिषो वि राजसि—ऋ० ८ । १३ । ४ ॥ (गिर्वणः) हे स्तुतियों से सेवनीय (इन्द्र) इन्द्र ! [महाप्रतापी राजन्] (ते) तेरे लिये (सुन्वतः) तत्त्वरस निचोड़ने वाले पुरुष की (इयम्) यह (रातिः) दान क्रिया (क्षरति) बहती है, (मन्दानः) हर्ष करता हुआ तू (अस्य बर्हिषः) इस वृद्धि कारक व्यवहार का (वि) विशेष करके (राजसि) राजा है ॥

४—ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते । तदाहना अभवत् पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यम्—ऋ० २ । १३ । १ ॥ (ऋतुः) ऋतु [वर्षाकाल] (जनित्री) [प्रत्येक पदार्थ की] जननी है, (तस्याः परि) उस [जननी] से (जातः) उत्पन्न होकर वह [पदार्थ] (मक्षु) शीघ्र (अपः) जलों में (आ अविशत्) सब प्रकार से प्रवेश करता है, (यासु) जिन [जलों] में (वर्धते) वह बढ़ता है । (तत्) इससे वह [पदार्थ] (आहनाः) पाने योग्य (अभवत्) होता है, और (पयः) रस की (पिप्युषी) बढ़ाने वाली [वह जननी ऋतु होती है] । (तत्)

तब (अंशोः) अंशु [ओषधि के डांठल] का (पीयूषम्) पीने योग्य रस (प्रथमम्) मुख्य करके (उक्थ्यम्) प्रशंसनीय [अथवा उक्थ नामक यज्ञ के योग्य] होता है ॥

५—नू मर्तो दयते सनिष्यन् यो विष्णव उरुगायाय दाशत् । प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमा विवासात्—ऋग्० ७ । १०० । १ ॥ (सनिष्यन्) भक्ति चाहता हुआ (मर्तः) वह मनुष्य (नु) शीघ्र (दयते) [मनोरथ] पाता है, (यः) जो (उरुगायाय) बहुत गाने योग्य (विष्णवे) विष्णु [व्यापक परमात्मा] को (दाशत्) देवे [आत्मदान करे] और (यः) जो (सत्राचा) सत्य को प्राप्त हुये (मनसा) मन से (एतावन्तम्) इतने बड़े (नर्यम्) नरों के हितकारी [विष्णु] को (प्र यजाते) अच्छे प्रकार पूजे और (आविवासात्) सब ओर से सेवे ॥

६—सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य । जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता—ऋ० ६ । ६९ । १ ॥ (इन्द्राविष्णू) हे इन्द्र और विष्णु [सूर्य और बिजुली के समान सभापति और सेनापति] (वाम्) तुम दोनों को (अस्य) इस (अपसः पारे) कर्म के पार में (कर्मणा) अत्यन्त चाहे हुये व्यापार और (इषा) अन्न से (सं सं हिनोमि) मैं बढ़ाता हूं, (यज्ञम्) यज्ञ [संगति करण व्यवहार] को (जुषेथाम्) सेवो (च) और (नः) हमको (अरिष्टैः) बेरोक (पथिभिः) मार्गों से (पारयन्ता) पार करते हुये तुम दोनों (द्रविणम्) धन वा यश (धत्तम्) दो ॥

७—उभा जिग्यथुर्न परा जयेथे न पराजिग्ये कतरश्चनैनयोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्—अथर्व० ७ । ४४ । १, ऋ० ६ । ६९ । ८ ॥ (विष्णो) हे विष्णु ! [बिजुली के समान व्याप्त होने वाले सभापति] (च) और (इन्द्रः) हे इन्द्र ! [वायु के समान ऐश्वर्यवान् सेनापति] (उभा) तुम दोनों ने [शत्रुओं को] (जिग्यथुः) जीता है, और तुम दोनों (न) कभी नहीं (परा जयेथे) हारते हो, (एनयोः) इन [तुम] दोनों में से (कतरः चन) कोई भी (न) नहीं (परा जिग्ये) हारा है । (यत्) जब (अपस्पृधेथाम्) तुम दोनों ललकारे हो (तत्) तब (सहस्रम्) असंख्य [शत्रु सेना दल] को (त्रेधा) तीन विधि पर [ऊंचे, नीचे और मध्य स्थान में] (वि) बिविध प्रकार से (ऐरयेथाम्) तुम दोनों ने निकाल दिया है ॥

८—इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् । आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे—ऋग्० ६ । ६९ । ७ ॥ (दस्रा) हे दुःखनाशक (इन्द्राविष्णू) इन्द्र और विष्णु ! [वायु और बिजुली के समान अध्यापक और उपदेशक] तुम दोनों (अस्य) इस (मध्वः) मधुर (सोमस्य) सोम [ओषधियों के रस] का (पिबतम्) पान करो और (जठरम्) पेट को (आ पृणेथाम्) अच्छे प्रकार भरो । (वाम्) तुम दोनों को (मदिराणि) आनन्द देने वाले (अन्धांसि) अन्न (अग्मन्) प्राप्त हुये हैं, (मे) मेरे (ब्रह्माणि) स्तोत्रों और (हवम्) पुकार को (उप शृणुतम्) तुम दोनों समीप से सुनो ॥

कण्डिका १८ ॥

अथाध्वर्य्यो शꣳशꣳसावोमिति स्तोत्रियायानुरूपायोक्थमुखाय परिधानीयाया इति चतुश्चतुराह्वयन्ते। चतस्रो वै दिशः, दिक्षु तत् प्रतितिष्ठन्ते। अथो चतुष्पादः पशवः, पशूनामाप्त्यै। अथो चतुष्पर्वाणो हि तृतीयसवने होत्रकाः तस्माच्चतुः सर्वे त्रैष्टुभं जागतानि शंसन्ति। जागतं हि तृतीयसवनम्। अथ हैतत् त्रैष्टुभान्यप्रतिभूतमिव हि प्रातःसवने मरुत्वतीये तृतीयसवने च होत्रकाणां शस्त्रम्। धीतरसं वा एतत्सवनं, यत्तृतीयसवनम्। अथ हैतदधीतरसं शुक्रियं छन्दः, यत् त्रिष्टुभा यातयामसवनस्यैव तत् सरसतायै। सर्वे समवतीभिः परिदधति, तद्यत्समवतीभिः परिदधति। अन्तो वै पर्य्यासोऽन्त उदर्कोऽन्तः, सजाया उ ह वा अवेनायान्तेनैवान्तं परिदधति। सर्वे मद्वतीभिर्यजन्ति। तद्यन्मद्वतीभिर्यजन्ति सर्वे सुतवतीभिः पीतवतीभिरूपाभिर्यजन्ति। यद्यज्ञेऽभिरूपं तत्समृद्धम्। सर्वेऽनुवषट् कुर्वन्ति, स्विष्टकृत्त्वा अनुवषट्कारो नेत् स्विष्टकृतमन्तरयामेति। असौ वै लोकस्तृतीयसवनं, तस्य पञ्च दिशः, पञ्चोक्थानि तृतीयसवनस्य। स एतैः पञ्चभिरुक्थैः एताः पञ्च दिश आप्नोति। तद्यदेषां लोकानां रूपं, या मात्रा। तेन रूपेण तया मात्रयेमांल्लोकानृध्नोतीमांल्लोकानृध्नोतीति ॥ १८ ॥

कण्डिका १८ ॥ एकाह यज्ञ के तृतीयसवन में (शंशंसावोम्) इस मन्त्र को चार चार बार बोलें ॥

(अथ अध्वर्य्यो शंशंसावोम् इति, स्तोत्रियाय अनुरूपाय उक्थमुखाय परिधानीयायै इति चतुः चतुः आह्वयन्ते) फिर (अध्वर्य्यो शंशंसाव ओम्) हे अध्वर्यो ! हम दोनों स्तुति करें, हां—इस मन्त्र से स्तोत्रिय [स्तुति योग्य व्यवहार] के लिये, अनुरूप [विषय की अनुकूलता] के लिये, उक्थमुख [यज्ञ की मुख्यता] के लिये और परिधानीया [समाप्ति क्रिया] के लिये—इस प्रकार चार-चार बार वे बोलते हैं। (चतस्रः वै दिशः, दिक्षु तत् प्रतितिष्ठन्ते) चार ही दिशायें हैं, दिशाओं में उससे वे [याजक] प्रतिष्ठा पाते हैं। (अथो चतुष्पादः पशवः पशूनाम् आप्त्यै) फिर चार पांव वाले पशु होते हैं, पशुओं की प्राप्ति के लिये [यह यज्ञ] है। (अथो तृतीयसवने चतुष्पर्वाणः हि होत्रकाः) फिर तृतीयसवन में चार अङ्ग वाले ही सहायक होता लोग होते हैं। (तस्मात् चतुः सर्वे त्रैष्टुभं जागतानि शंसन्ति) इसलिये चार बार वे सब त्रिष्टुप् [कर्म उपासना ज्ञान के सहारे वाले अथवा त्रिष्टुप्] छन्दों वाले स्तोत्रों से जगत् के हितकारी कर्म वे बोलते हैं। (जागतं हि तृतीयसवनम्) जगत् का हितकारी ही तीसरा सवन है। (अथ ह एतत् त्रैष्टुभानि प्रातःसवने मरुत्वतीये तृतीयसवने च

१८—(शंशंसाव) पूर्वाक्षरस्य द्वित्वमार्षम्—गो० उ० ३। १०, १६ तथा ४। ४। शंसाव। आवाम् शंसनं स्तोत्रं करवाव (ओम्) अनुमतौ (त्रैष्टुभम्) त्रैष्टुभानि। त्रिष्टुप्छन्दोयुक्तानि। कर्मोपासनाज्ञानयुक्तानि (जागतानि)

होत्रकाणाम् अप्रतिभूतम् इव हि शस्त्रम्) फिर यह ही त्रिष्टुप् छन्द वाले स्तोत्र प्रातःसवन में, मरुत्वतीय [माध्यन्दिन सवन] में और तीसरे सवन में सहायक होता लोगों का अप्रतिभूत [प्रतिभू अर्थात् स्थानी बिना] ही शस्त्र [स्तोत्र] हैं [अर्थात् त्रिष्टुप् तीनों सवनों में अवश्य बोला जाता है]। (धीतरसं वै एतत् सवनम्, यत् तृतीयसवनम्) पी चुके हुये रस वाला ही यह सवन है, जो तीसरा सवन है [तीसरे सवन से पहिले सोमरस पी लिया जाता है फिर किस लिये तीसरा सवन है—इस प्रश्न का समाधान इस प्रकार है]। (अथ ह एतत् अधीतरसं शुक्रियं छन्दः, यत् त्रिष्टुभा यातयामसवनस्य एव तत् सरसतायै) फिर यह बिना पी चुके हुये रस वाला, वीर्यवान् छन्द [स्तोत्र] है, जो त्रिष्टुप् [तीनों सवनों में ठहरने वाले छन्द] के साथ बीते हुये योग्य समय वाले सवन के रसीलेपन के लिये है [देखो–ऐतरेय ब्रा० ६। १२]। (सर्वं समवतीभिः परिदधति, यत् तत् समवतीभिः परिदधति) वे सब समवती ऋचाओं से [सम शब्द वाली ऋचाओं से जैसे—समं ज्योतिः सूर्येण······अथर्व० ४। १८। १, इत्यादि मन्त्रों से] समाप्त करते हैं, क्योंकि वहां समवती ऋचाओं से वे समाप्त करते हैं। (अन्तः वै पर्यासः, अन्तः उदर्कः, अन्तः सजायाः उ ह वै अवेनाय अन्तेन एव अन्तं परिदधति=परिदधाति) अन्त ही पर्यास [विराम] है, अन्त ही उदर्क [अवसान वा विच्छेद अर्थात् रोक] है, अन्त ही संगति के रक्षक के लिये अन्त के साथ ही अन्त को समाप्त करता है। [एक एक विषय पर रुककर दूसरे को आरम्भ करके समाप्त किया जाता है]। (सर्वे मद्वतीभिः यजन्ति, यत् तत् मद्वतीभिः यजन्ति) वे सब मद्वती [मद शब्द वाली] ऋचाओं से यज्ञ करते हैं [याज्या ऋचा बोलते हैं], क्योंकि वहां मद्वती ऋचा से वे यज्ञ करते हैं। (सर्वे सुतवतीभिः पीतवतीभिः अभिरूपाभिः यजन्ति) वे सब सुतवती [सुत शब्द वाली] ऋचाओं से, पीतवती [पीत शब्द वाली] ऋचाओं से और अभिरूप [विषय के अनुकूल] ऋचाओं से यज्ञ करते हैं। [मद्वती, सुतवती और पीतवती ऋचाओं के लिये देखो ऋग्० १। १६। ८। और बहुवचन शब्द होने से ब्राह्मण में समस्त इस नौ ऋचा वाले सूक्त का ग्रहण अभीष्ट है। अभिरूप शब्द से यह प्रयोजन है कि अभीष्ट देवता की स्तुति में उस देवता के सूचक पद आ जावें]। (यत् यज्ञे अभिरूपं, तत् समृद्धम्) जो यज्ञ में विषय के अनुकूल कर्म है, वह समृद्ध है। (सर्वे स्विष्टकृत्वा अनुवषट् कुर्वन्ति) सब स्विष्टकृत् मन्त्र [यदस्य कर्मणोऽत्यरीरिच········देखो––गो० उ० ३। १] पढ़कर अनुवषट् [समाप्ति सूचक पद] पढ़ते हैं। (अनुवषट्कारः स्विष्टकृतं नेत् अन्तरयाम इति) अनुवषट्कार स्विष्टकृत् मन्त्र को कभी भी बीच [व्यवधान] से नहीं लेता [स्विष्टकृत् के पीछे ही अनुवषट् होता है]। (असौ वै लोकः तृतीयसवनम्)

जगतीछन्दोयुक्तानि। जगते हितानि (अप्रतिभूतम्) प्रतिभूरहितम्। स्थानिना रहितम् (धीतरसम्) धेट् पाने––क्तः। पीतसारम् (अधीतरसम्) अपीतसारम्। सर्वरसोपेतम् (शुक्रियम्) शुक्र––घन्। वीर्ययुक्तम्। (यातयामसवनस्य) गतयोग्यकालसवनस्य (सरसतायै) सरसत्वाय (सजायाः) षञ्ज सङ्गे––कः, टाप्। सङ्गतेः (अवेनाय) श्यास्त्याह्वञविभ्य इनच् (उ० २। ४६) अव रक्षणादौ

वह ही [सूर्य] लोक तीसरा सवन है। (तस्य पञ्च दिशः, तृतीयसवनस्य पञ्च उक्थानि) उस [सूर्य लोक] की पांच दिशायें [पूर्व, दक्षिण, पश्चिम, उत्तर और एक ऊपर नीचे की दिशा] हैं और तीसरे सवन के पांच उक्थ [समवती, मद्वती, सुतवती, पीतवती और अभिरूपा ऋचाओं वाले स्तोत्र] हैं। (सः एतैः पञ्चभिः उक्थैः, एताः पञ्चदिशः आप्नोति) वह [यजमान] इन पांच प्रकार वाले स्तोत्रों से इन पांच दिशाओं को पाता है। (तत् यत् एषां लोकानां रूपं या मात्रा) क्योंकि वह इन लोकों का रूप [आकार] है जो मात्रा [परिमाण] है। (तेन रूपेण तया मात्रया इमान् लोकान् ऋध्नोति, इमान् लोकान् ऋध्नोति इति) उस ही रूप [आकार] से और उस मात्रा [परिमाण] से इन लोकों को वह समृद्ध करता है, इन लोकों को वह समृद्ध करता है [अवश्य समृद्ध करता है] ॥ १८ ॥

भावार्थः—मनुष्यों को योग्य है कि देश और काल का विचार करके कार्य करें जिससे उन्हें सफलता प्राप्त हो ॥ १८ ॥

विशेषः १—(शस्त्रं) के स्थान पर (शस्त्रं) ठीक है, और (सरस्वतायै) के स्थान पर (सरसतायै) ऐ० ब्रा० ६ । १२ से शुद्ध किया है ॥

विशेषः २—इस कण्डिका को प्रातःसवन में गो० उ० ३ । १६ और माध्यन्दिन सवन में उ० ४ । ४ से मिलाओ और वहां पर ही प्रयोजनीय मन्त्र हैं ॥

कण्डिका १९ ॥

तदाहुः, किं षोडशिनः षोडशित्वं षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिरक्षरैरादत्ते, द्वे वा अक्षरे अतिरिच्येते, षोडशिनोऽनुष्टुभमभिसम्पन्नस्य। वाचो वा एतौ स्तनौ, सत्यानृते वाव ते, अवत्यैनं सत्यम् नैनमनृतं हिनस्ति, य एवं वेद ॥ १९ ॥

इत्यथर्ववेदस्य गोपथब्राह्मणस्य चतुर्थः प्रपाठकः समाप्तः ॥ ४ ॥

कण्डिका १९ ॥ एकाह यज्ञ में षोडशी शब्द की व्याख्या ॥

(तत् आहुः, षोडशिनः किं षोडशित्वम्) वे कहते हैं—षोडशी [सोलह अङ्ग वाले यज्ञ] का क्या षोडशित्व [सोलहपन] है ? [इस का समाधान] (षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिः अक्षरैः आदत्ते) सोलह स्तोत्रों और सोलह शस्त्रों को [आधे आधे अनुष्टुप् छन्द के] सोलह अक्षरों से वह [अध्वर्यु] ग्रहण करता है। (अनुष्टुभम् अभिसम्पन्नस्य षोडशिनः द्वे अक्षरे वै अतिरिच्येते) अनुष्टुप् रखने वाले षोडशी [स्तोत्र] के दो दो अक्षर बढ़ जाते हैं [आधे अनुष्टुप् के १६ अक्षरों के आदि और अन्त में ओम् शब्द बोलने से १८ अक्षर होते हैं—इस का समाधान]।

—इनच् = एनच् । अविनाय । रक्षकाय (अन्तरयाम) गो० उ० ३ । १६ । अन्तर्याति । अन्तरेण गच्छति । अन्यद् गतम्—गो० उ० ३ । १६ ॥

१९—(आदत्ते) गृह्णाति (अतिरिच्येते) अधिके भवतः (अभिसम्प-

(वाचः वै एतौ स्तनौ, ते वाव सत्यानृते) वाणी के [स्त्रीलिङ्ग होने से] यह दोनों स्तन [कुच वा चूची] हैं जो ही सत्य और झूठ हैं । (सत्यम् एनम् अवति अनृतम् एनं न हिनस्ति, यः एवं वेद) सत्य उसकी रक्षा करता है और झूठ उसको नहीं सताता है जो ऐसा जानता है ।। १९ ।।

भावार्थ :--मनुष्य को उन्नति के लिये सत्य का ग्रहण और असत्य का त्याग करना चाहिये ।। १९ ।।

विशेषः १--एकाह यज्ञ समाप्त हुआ ।।

विशेषः २ - इस कण्डिका को मिलाओ--ऐ० ब्रा० ४ । १ ।।

विशेषः ३--(ते वा) के स्थान पर (द्वे वा) ऐ० ब्रा० से शुद्ध किया है ।।

इति श्रीमद्राजाधिराज-प्रथितमहागुणमहिम-*श्रीसयाजीराव-गायकवाडाधिष्ठित*-बड़ोदेपुरीगत-श्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन ***श्री पण्डित क्षेमकरणदास त्रिवेदिना*** अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्य उत्तरभागे चतुर्थः प्रपाठकः समाप्तः ।।

अथ प्रपाठकः प्रयागनगरे माघमासे शुक्लचतुर्दश्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ।।

मुद्रितम्—आश्विनशुक्ला ४ संवत् १९८१ वि० ता० २ अक्तूबर सन् १९२४ ई० ।।

अथ पञ्चमः प्रपाठकः ।।

कण्डिका १ ।।

ओम् । अहर्वै देवा आश्रयन्त रात्रीमसुराः । तेऽसुराः समावद्वीर्य्या एवासन्, नो व्यावर्त्तन्त । सोऽब्रवीत् इन्द्रः, कश्चाहं चेमानसुरान् रात्रीमन्ववैष्यामहा इति । स देवेषु न प्रत्यविन्दत्, अबिभयू रात्रेस्तमसः । मृत्योस्तम इव हि रात्रिः, मृत्युर्वै तमः, तस्माद्धाप्येतर्हि भूयानिव नक्तम् । स यावन्मात्रमिवाप[1]क्रम्य बिभेति, तं वै छन्दांस्येवान्ववायन् । तद्यच्छन्दांस्येवान्ववायन्, तस्मादिन्द्रश्च छन्दांसि च रात्रिं वहन्ति, न निविच्छस्यते न पुरोरुङ् न धाय्या नान्या देवता । इन्द्रश्च ह्येव छन्दांसि च रात्रिं वहन्ति तान्वै पर्य्यायैः पर्य्यायमनुदन्त । यत् पर्य्यायैः पर्य्यायमनुदन्त, तस्मात् पर्य्यायाः, तत् पर्य्यायाणां पर्य्यायत्वम् । तान्वै प्रथमैरेव पर्य्यायैः पूर्वरात्रादनुदन्त, मध्यमैर्मध्यरात्रादुत्तमैरपररात्रात् । अपिशर्वर्या अपिस्मसीत्य-

---

न्नस्य) अभिप्राप्तस्य (स्तनौ) स्तन मेघशब्दे—अच् । स्त्रीणाम् अङ्गभेदौ (सत्यानृते) सत्यं यथार्थवदनं च अनृतं मिथ्यावदनं च (अवति) रक्षति (हिनस्ति) दुःखयति ।।

---

१. पू. सं. "आप्रक्रम्य" इति पाठः ।। सम्पा० ।।

ब्रुवन् । तद्यदपिशर्वर्या अपिस्मसीत्यब्रुवन्, तदपिशर्वराणामपिशर्वरत्वम् । शर्वराणि खलु ह वा अस्यैतानि छन्दांसीति ह स्माह । एतानि ह वा इन्द्रं राञ्यास्तमसो मृत्योरभिपत्यावारयन्, तदपिशर्वराणामपिशर्वरत्वम् ॥ १ ॥

कण्डिका १ ॥ आख्यायिका–अतिरात्र यज्ञ में से इन्द्र और छन्दों ने तीन पर्य्यायों में असुरों को निकाल दिया ॥

(ओम्) ओम् [हे परमेश्वर] । (देवाः वै अहः आश्रयन्त, असुराः रात्रीम्) देवताओं ने दिन [प्रकाश वा ज्ञान] का आश्रय लिया और असुरों ने रात्रि [अन्धकार वा अज्ञान] का । (ते असुराः समावद्वीर्याः एव आसन् नो व्यावर्तन्त) वे असुर [देवताओं के] तुल्य पराक्रमी निश्चय करके थे, [इसलिये] वे न हटे । (सः इन्द्रः अब्रवीत् कः च अहं च इमान् असुरान् रात्रीम् अनु अवैष्यामहै इति) वह इन्द्र बोला—कौन और मैं [हम दोनों] इन असुरों को रात्रि में ढूंढ़कर निकाल दें । (सः देवेषु न प्रत्यविन्दत्, रात्रेः तमसः अबिभयुः) उसने देवताओं में ढूंढ़कर [किसी को भी] न पाया, वे रात्रि के अन्धकार से डर गये । (मृत्योः तमः इव हि रात्रिः, मृत्युः वै तमः) मृत्यु के अन्धकार के समान ही रात्रि है, मृत्यु [के समान] ही अन्धकार है । (तस्मात् ह अपि एतर्हि नक्तं भूयान् इव सः यावन्मात्रम् इव अपक्रम्य बिभेति) इसलिये ही अब भी रात्रि में अधिकतर वह [प्रत्येक मनुष्य] थोड़ा भी बाहर जाकर डरता है । (छन्दांसि एव तं वै अनु अवायन्) छन्द [आह्लादक गायत्री आदि] ही उस [इन्द्र] के साथ साथ चले । (तत् यत् छन्दांसि एव अनु अवायन्, तस्मात् इन्द्रः च छन्दांसि च रात्रिं वहन्ति, न निवित् शस्यते न पुरोरुक् न धाय्या, न अन्या देवता) सो जो छन्द ही साथ साथ चले, इसलिये इन्द्र और छन्द रात्रि [अतिरात्र यज्ञ] को चलाते हैं, न निवित् [निश्चित विद्या स्तुति विशेष] बोली जाती है, न पुरोरुक् [आगे से प्रसन्न करने वाली स्तुति विशेष] न धाय्या [धारण करने योग्य, सामिधेनी ऋचा] न दूसरा देवता । (इन्द्रः च हि एव छन्दांसि च रात्रिं वहन्ति, तान् वै पर्य्यायैः पर्य्यायम् अनुदन्त) इन्द्र और छन्दों ने ही रात्रि [अतिरात्र यज्ञ] को चलाया, उन्होंने उन [असुरों] को ही पर्य्यायों [क्रम क्रम से] घेरकर निकाल दिया । (यत् पर्य्यायैः पर्य्यायम् अनुदन्त, तस्मात् पर्य्यायाः, तत् पर्य्यायाणां पर्य्यायत्वम्)

१–(आश्रयन्त) आ–अश्रयन्त । आश्रितवन्तः । सेवितवन्तः (समावद्वीर्याः) पूर्वपदस्य दीर्घत्वं मतुपो योजनं चार्षम् । समवीर्याः । तुल्यपराक्रमाः (नो) निषेधे (व्यावर्तन्त) वि+आ+वृतु वर्तने—लङ् । निवृत्ता अभवन् (अनु) अनुगम्य (अवैष्यामहै) अव+आ+इष गतौ—लोट् । निःसारयाम (प्रत्यविन्दत) प्रतीक्ष्य प्राप्तवान् (अबिभयुः) भीताः अभवन् (तमसः) अन्धकारात् (एतर्हि) इदानीम् (भूयान्) बहुतरः (यावन्मात्रम्) यत्किंचित् (इव) एव । अपि (छन्दांसि) गायत्र्यादीनि छन्दांसि (अन्ववायन्) अनु+अव+इण् गतौ—लङ् । अनुगम्य प्राप्ताः (रात्रिम्) रात्रिभवमतिरात्रयज्ञम् (वहन्ति)

जो पर्यायों से घेरकर [उनको] उन्होंने निकाला, इसलिये वे पर्य्याय [घूमकर आने वाले] हैं, वह ही पर्य्यायों का पर्य्यायपन है । (तान् वै प्रथमैः एव पर्य्यायैः पूर्वरात्रात् अनुदन्त, मध्यमै मध्यरात्रात्, उत्तमैः अपररात्रात्) उन [असुरों] को उन्होंने पहिले पर्य्यायों [घूमकर आने के व्यवहारों] के द्वारा रात्रि के पहिले भाग से निकाला, मध्यमों के द्वारा मध्यरात्रि से और पिछलों के द्वारा पिछली रात्रि से । (अपिशर्वर्याः अपिस्मसि—इति अब्रुवन्) वे [छन्द] बोले--निश्चित रात्रि से [असुरों के निकालने को] हम उपस्थित हुये हैं । (तत् यत् अपिशर्वर्याः अपिस्मसि, इति अब्रुवन्, तत् अपिशर्वराणाम् अपिशर्वरत्वम्) जो उन [छन्दों] ने कहा--निश्चित रात्रि से [असुरों के निकालने को] हम उपस्थित हुये हैं, इसलिये अपिशर्वरों [निश्चित नाश करने वालों] का अपिशर्वरत्व [निश्चित नाश करने वाला व्यवहार] है । (शर्वराणि खलु ह वै अस्य एतानि छन्दांसि इति ह स्म आह) [निश्चय करके असुरों के] नाश करने वाले इस [यज्ञ] के यह छन्द हैं--यह वह [ऋषि] कहता है । (एतानि ह वै इन्द्रं रात्र्याः मृत्योः तमसः अभिपत्य अवारयन्, तत् अपिशर्वराणाम् अपिशर्वरत्वम्) इन [छन्दों] ने ही इन्द्र को रात्रि के मृत्यु [के समान] अन्धकार से निकाल कर स्वीकार किया, इसलिये अपिशर्वरों [निश्चित नाश करने वालों] का अपिशर्वरत्व [निश्चित नाश करने वाला व्यवहार] है ॥ १ ॥

भावार्थः—मनुष्यों को चाहिये कि सदा सावधान रह कर पर्यायों अर्थात् पहरुओं द्वारा परस्पर रक्षा करें जिससे निशाचर चोर डाकू आदि कष्ट न देवें ॥ १ ॥

विशेषः—इस कण्डिका को मिलाओ--ऐ० ब्रा० ४ । ५ ॥

कण्डिका २ ॥

प्रथमेषु पर्य्यायेषु स्तुवते, प्रथमान्येव पदानि पुनराददते । यदेवैषां मनोरथा आसन्, तदेवैषान्तेनाददते । मध्यमेषु पर्य्यायेषु स्तुवते, मध्यमान्येव पदानि पुनराददते । यदेवैषामश्वा गाव आसन्, तदेवैषां तेनाददते । उत्तमेषु पर्य्यायेषु स्तुवते, उत्तमान्येव पदानि पुनराददते । यदेवैषां वासो हिरण्यं मणिरध्या-

---

निर्वहन्ति (निवित्) सत्सूद्विषद्रुहदुहयुजविद० (पा० ३ । २ । ६१) नि+विद ज्ञाने—क्विप् । निवित्, वाङ्नाम—निघ० १ । ११ । निश्चितविद्या । स्तुतिविशेषः (पुरोरुक्) पुरः+रुच दीप्तावभिप्रीतौ च—क्विप् । स्तुतिविशेषः (धाय्या) पाय्यसान्नाय्यनिकाय्यधाय्या० (पा० ३ । १ । १२९) दधातेर्ण्यत् । अग्निज्वालनार्था ऋक् । सामिधेनी (पर्य्यायैः) परि+इण् गतौ—घञ् । अनुक्रमैः (पर्य्यायम्) पर्य्याय—णमुल् । परीत्य (अनुदन्त) निःसारितवन्तः (पूर्वरात्रात्) रात्रिप्रथमभागात् (अपिशर्वर्याः) कॄगॄशॄवृञ्चतिभ्यः ष्वरच् (उ० २ । १ ।१) शॄ हिंसायाम्—ष्वरच्, ङीष् । निश्चयेन रात्रेः सकाशात् (अपिस्मसि) अपिस्मः । निश्चयेन तिष्ठामः (अपिशर्वराणाम्) निश्चयेन असुरादिनाशकानाम् (शर्वराणि) असुरनाशकानि (अभिपत्य) उद्धृत्य (अवारयन्) स्वीकृतवन्तः ॥

त्समासीत्, तदेवैषां तेनाददते । आ द्विषतो वसु दत्ते, निरेवैनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते, य एवं वेद ॥ २ ॥

कण्डिका २ ॥ अतिरात्र यज्ञ के तीन पर्य्यायों में तीन प्रकार से स्तुति ॥

(प्रथमेषु पर्य्यायेषु स्तुवते, प्रथमानि एव पदानि पुनः आददते) पहिले पर्य्यायों में वे [ऋत्विज्] स्तुति करते हैं, [मन्त्रों के] पहिले ही पदों को वे दो बार लेते हैं [बोलते हैं] । (यत् एव एषां मनोरथाः आसन्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] के मनोरथ होते हैं, उनके उन [मनोरथों] को उसके द्वारा वे ले लेते हैं । (मध्यमेषु पर्य्यायेषु स्तुवते, मध्यमानि एव पदानि पुनः आददते) मध्य वाले पर्य्यायों में वे स्तुति करते हैं, [मन्त्रों के] मध्य वाले ही पदों को वे दो बार लेते हैं । (यत् एव एषाम् अश्वाः गावः आसन्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] के घोड़े और गौयें हैं उनके उनको ही वे उस के द्वारा ले लेते हैं । (उत्तमेषु पर्य्यायेषु स्तुवते, उत्तमानि एव पदानि पुनः आददते) पिछले पर्यायों में वे स्तुति करते हैं, [मन्त्रों के] पिछले ही पदों को वे दो बार लेते हैं । (यत् एव एषां वासः हिरण्यं मणिः अध्यात्मम् आसीत्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] का वस्त्र, सुवर्ण, और मणि शरीर पर वर्तमान है, उनका उसको ही उसके द्वारा वह ले लेते हैं । (द्विषतः वसु आदत्ते, एनम् एभ्यः सर्वेभ्यः लोकेभ्यः एव निर् नुदते, यः एवं वेद) वह [मनुष्य] शत्रु का धन ले लेता है और इस [शत्रु] को इन सब लोकों से निकाल देता है, जो ऐसा विद्वान् है ॥ २ ॥

भावार्थः—नीति निपुण पुरुष सावधानी से शत्रुओं को अनेक प्रकार से आधीन करें ॥ २ ॥

विशेष :—इस कण्डिका को मिलाओ–ऐ० ब्रा० ४ । ६ ॥

कण्डिका ३ ॥

पवमानवदहरित्याहुः, न रात्रिः पवमानवती, कथमुभे पवमानवती भवतः, केन ते समावद्भाजौ भवत इति । यदेवेन्द्राय मद्वने सुतमिदं वसो सुतमन्ध इदं ह्यन्वोजसा सुतमिति स्तुवन्ति च शंसन्ति च, तेन रात्रिः पवमानवती, तेनोभे पवमानवती भवतः, तेन ते समावद्भाजौ भवतः । पञ्चदशस्तोत्रमहरित्याहुः, न रात्रिः पञ्चदशस्तोत्रा, कथमुभे पञ्चदशस्तोत्रे भवतः, केन ते समावद्भाजौ भवत इति । द्वादशस्तोत्राण्यपिशर्वराणि तिसृभिर्देवताभिः सन्धिना राथन्तरेणाश्विना

माना एतैरेवावपनैः स्वर्गं लोकं यन्ति । सद्यो ह जातो वृषभः कनीन इति मैत्रावरुणः पुरस्तात् सम्पातानामहरहः शंसति । तदेतत् सूक्तं स्वर्ग्यमेतेन सूक्तेन देवाश्च ऋषयश्च स्वर्गं लोकमायन् । तथैवैतद्यजमाना एतेनैव सूक्तेन स्वर्गं लोकं यन्ति । तदृषभवत् पशुमद्भवति पशूनामाप्त्यै । तत्पञ्चर्चं भवति, अन्नं वै पङ्क्तिः, अन्नाद्यस्यावरुध्यै, अरिष्टैर्नः पथिभिः पारयन्तेति स्वर्गताया एवैतदहरहः शंसति । उदु ब्रह्माण्यैरत श्रवस्येति ब्राह्मणाच्छंसी । ब्रह्मण्वदेतत् सूक्तं समृद्धमेतेन सूक्तेन देवाश्च ऋषयश्च स्वर्गं लोकमायन् । तथैवैतद्यजमाना एतेनैव सूक्तेन स्वर्गं लोकं यन्ति । तदु वै षडर्चं, षड् वा ऋतवः ऋतूनामाप्त्यै । तदुपरिष्टात् सम्पातानामहरहः शंसति । अभि तष्टेव दीधया मनीषामित्यच्छावाकोऽहरहः शंसति । अभिवदति तत्यै रूपमभिप्रियाणि मर्मृशत्पराणीति, य न्येव पराण्यहानि, तानि प्रियाणि, तान्येव तदभिमर्मृशन्तो यन्त्यभ्यारभमाणाः परो वा अस्माल्लोकात् स्वर्गो लोकः, स्वर्गमेव तं लोकमभिमृशन्ति । कवीँरिच्छामि सन्दृशे सुमेधा इति, ये ह वा अनेन पूर्वे प्रीतास्ते वै कवयः तानेव तदभ्यभिवदति । यदु वै दशर्चं, दश वै प्राणाः, प्राणानेव तदाप्नोति प्राणानां सन्तत्यै । यद्‌ वै दशर्चं, दश वै पुरुषे प्राणाः, दश स्वर्गा लोकाः, प्राणांश्चैव तत् स्वर्गांश्च लोकानाप्नोति । प्राणेषु चैवैतत् स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति । यदु वै दशर्चं, दशाक्षरा विराड् *इयं वै वि[1]राड्* इय वै स्वर्गस्य लोकस्य प्रतिष्ठा, तदेतदस्यां प्रतिष्ठायां प्रतिष्ठापयति । सकृदिन्द्र निराह तेनै[2]न्द्राद्रूपान्न प्रच्यवते, तदुपरिष्टात् सम्पातानामहरहः शंसति ।। २ ।।

कण्डिका २ ।। अहीन यज्ञ में आवाप सूक्तों का वर्णन और महत्त्व ।।

(को अद्य नर्यः देवकामः इति मैत्रावरुणः) को अद्य नर्यः देवकामः--ऋ० ४ । २५ । १—८, इस सूक्त को मैत्रावरुण [अहीन यज्ञ में बोलता है] । (वने न वा यो न्यधायि चाकन्—इति ब्राह्मणाच्छंसी) वने न वा यो न्यधायि चाकन्—ऋ० १० । २९ । १—८, इस सूक्त को ब्राह्मणाच्छंसी [बोलता है] । (आ याह्यर्वाङुप बन्धुरेष्ठाः–इति अच्छावाकः) आ याह्यर्वाङुप बन्धुरेष्ठाः—ऋ० ३ । ४३ । १—८, इस सूक्त को अच्छावाक [बोलता है] । (एतानि वै आवपनानि, एतैः एव आवपनैः देवाः च ऋषयः च स्वर्गं लोकम् आयन्) यह ही आवपन [क्षेपणीय सूक्त] हैं, इन ही आवपनों से देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शक महात्माओं] ने स्वर्गलोक पाया है । (तथा एव एतत्, यजमानाः एतैः एव आवपनैः स्वर्गं लोकं यन्ति) वैसे ही यह है—यजमान लोग

२—(अद्य) इदानीम् (नर्यः) नृषु साधुः (देवकामः) देवान् विदुषः कामयमानः (वने) अरण्ये वृक्षे (न) इव (वायः) शकुनिः (नि अधायि) निहितः (चाकन्) कामयमानः । उत्सुकमनाः (आ याहि) आगच्छ (अर्वाङ्)

---

१. पुष्पाङ्कितः पाठः जर्मनसंस्करणे नास्ति ।।

२. पू. सं. 'तेनेन्द्रात्' इति पाठः ।। सम्पा० ।।

इन ही आवपनों से स्वर्गलोक पाते हैं । (सद्यो ह जातो वृषभः कनीनः—इति मैत्रा० वरुणः सम्पातानां पुरस्तात् अहरहः शंसति) सद्यो ह जातः वृषभः कनीनः—ऋ० ३ । ४८ । १—५, गो० उ० ४ । १,—इस सूक्त को मैत्रावरुण सम्पातों से पहिले [कण्डिका १] दिन दिन बोलता है । (तत् एतत् सूक्तं स्वर्ग्यं एतेन सूक्तेन देवाः च ऋषयः च स्वर्गं लोकम् आयन्) सो यह सूक्त स्वर्ग के लिए हितकारी है, इस सूक्त से देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शक महात्माओं] ने स्वर्गलोक पाया है । (तथा एव एतत् यजमानाः एतेन एव सूक्तेन स्वर्गं लोकं यन्ति) वैसे ही यह है—यजमान लोग इस ही सूक्त से स्वर्ग लोक पाते हैं । (तत् ऋषभवत् पशुमत् पशूनाम् आप्त्यै भवति) वह ऋषभ [वृषभ] शब्द वाला पशु युक्त [सूक्त] पशुओं की प्राप्ति के लिये हैं [ऋषभ वा वृषभ बैल भी है और वह पशु है] । (तत् पञ्चर्चं भवति, अन्नं वै पङ्क्तिः अन्नाद्यस्य अवरुद्ध्यै) वह पाँच ऋचा वाला [सूक्त] है, अन्न भी पङ्क्ति [पाँच तत्त्व वाला] है । खाने योग्य अन्न की प्राप्ति के लिए है [पंचभूतात्मके देहे आहारः पाञ्चभूतिकः । विपक्वः पंचधा सम्यग् गुणान् स्वानभिवर्धयेत्—सुश्रुत—आहारविधिः । पृथिवी जल अग्नि वायु आकाश इन पाँच तत्त्वों से बने देह में आहार पाँच तत्त्वों के स्वरूप का है, अच्छे प्रकार पका हुआ आहार पाँच प्रकार अपने गुणों को बढ़ाता है—जैसे पार्थिव गुण गन्ध को बढ़ाता है, इसी प्रकार और भी जानो] । (अरिष्टैः नः पथिभिः पारयन्ता इति स्वर्गतायै एव एतत् अहरहः शंसति) अरिष्टैर्नः पथिभिः पारयन्ता [सं वां कर्मणा—ऋ० ६ । ६९ । १, इस मन्त्र का यह चौथा पाद है, देखो गो० उ० ४ । १७] स्वर्ग की प्राप्ति के लिए ही इसको वह [मैत्रावरुण] बोलता है । (उदु ब्रह्माण्यैरत श्रवस्या इति ब्राह्मणाच्छंसी) उदु ब्रह्माण्यैरत श्रवस्या—ऋ० ७ । २३ । १—६ । गो० उ० ४ । १ तथा ६ । १, इस सूक्त को ब्राह्मणाच्छंसी [बोलता है] । (ब्रह्मण्वत् एतत् समृद्धं सूक्तम्, एतेन सूक्तेन देवाः च ऋषयः च स्वर्गं लोकम् आयन्) ब्रह्मन् [ब्रह्माणि] शब्द वाला यह समृद्ध सूक्त है, इस सूक्त से देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शक महात्माओं] ने स्वर्ग लोक पाया है । (तथा एव एतत्, यजमानाः एतेन सूक्तेन स्वर्गं लोकं यन्ति) उसी प्रकार ही यह है—यजमान लोग इस ही सूक्त से स्वर्ग लोक पाते हैं । (तत् उ वै षडर्थं, ऋतवः, ऋतूनाम् आप्त्यै) यह सूक्त छह ऋचा वाला है, छह ही ऋतुयें हैं, ऋतुओं की प्राप्ति के लिये [यह सूक्त है] । (तत् सम्पातानाम् उपरिष्टात् अहरहः शंसति) उसको सम्पात सूक्तों के उपरान्त [क० १] दिन दिन वह पढ़ता है ॥

(अभि तष्टेव दीधया मनीषाम्—इति अच्छावाकः अहरहः शंसति) अभि तष्टेव दीधया मनीषाम्—ऋ० ३ । ३८ । १—१० गो० उ० ६ । १, इस सूक्त को

अभिमुखः (उप) समीपे (बन्धुरेष्ठाः) मद्गुरादयश्च (उ० १ । ४१) बन्ध बन्धने—उरच्, बन्धुर—तिष्ठतेर्विच् । बन्धुरे बन्धनयुक्ते रम्ये वा रथे तिष्ठन् (आवपनानि) आवपनेयानि । प्रक्षेपणीयानि सूक्तानि (ऋषभवत्) ऋषभेण वृषभशब्देन युक्तम् (पङ्क्तिः) पचि व्यक्तीकरणे, विस्तारे—क्तिन् क्तिच् वा । पञ्चावयवा श्रेणिः पञ्चतत्त्वयुक्तत्वात् (अरिष्टैः) गो० उ० ४ । १६ । अहिंसितैः (पारयन्ता) पारं गमयन्तौ (अभिवदति) अभिशब्दयुक्तं सूक्तं ब्रूते (तत्यै)

अच्छावाक दिन दिन बोलता है। (अभिवदति तत्यै रूपम्, अभिप्रियाणि मर्मृशत् पराणि, इति यानि एव पराणि अहानि, तानि प्रियाणि तानि एव तत् अभिमर्मृशन्तः अभ्यारभमाणाः यन्ति) अभि, [सब ओर], शब्द वाला [पहिला पाद] वह बोलता है, वह विस्तार के लिये रूप है, अभिप्रियाणि मर्मृशत् पराणि [यह उसी मन्त्र का तीसरा पाद है], जो ही श्रेष्ठ दिन हैं, वे ही प्रिय हैं, उनको ही तब सब ओर से विचारते हुये और आरम्भ करते हुये लोग चलते हैं। (अस्मात् लोकात् परः वै स्वर्गः लोकः तं स्वर्गम् एव लोकम् अभिमृशन्ति) इस [सामान्य] लोक से श्रेष्ठ ही स्वर्ग लोक है, उस स्वर्ग लोक को ही वे छूते हैं [पाते हैं] (कवीँरिच्छामि सन्दृशे सुमेधाः इति ये ह वै पूर्वे अनेन प्रीताः ते वै कवयः, तान् एव तत् अभ्यभिवदति) कवीँरिच्छामि सन्दृशे सुमेधाः [यह उस मन्त्र का चौथा पाद है] जो ही पहिले ऋषि इस [सूक्त भाग] से प्रसन्न हुये हैं, वे ही कवि [महाज्ञानी] हैं, उनको ही इस [पाद से] वह प्रणाम करता है। (यत् उ वै दशर्चम्, दश वै प्राणाः, प्राणान् एव तत् प्राणानां सन्तत्यै आप्नोति) जो वह दश ऋचा वाला सूक्त है, दश ही प्राण [पांच ज्ञानेन्द्रिय और पांच कर्मेन्द्रिय] हैं, प्राणों को ही तब प्राणों के फैलाव के लिये वह पाता है। (यत् उ वै दशर्चम् दश वै पुरुषे प्राणाः, दश स्वर्गाः लोकाः, तत् प्राणान् च एव स्वर्गान् लोकान् च आप्नोति) जो यह दस ऋचा वाला सूक्त है, और दस ही पुरुष में प्राण हैं, [दस इन्द्रियों की स्वस्थता से] दस स्वर्ग लोक है, उससे ही प्राणों और स्वर्ग लोकों [इन्द्रियों की स्वस्थ गोलकों] को वह पाता है। (एतत् प्राणेषु च एव स्वर्गेषु च लोकेषु प्रतितिष्ठन्तः यन्ति) इससे ही प्राणों और स्वर्ग लोकों में दृढ़ ठहरे हुये वह चलते हैं। (यत् उ वै दशर्चम्, दशाक्षरा विराट्, इयं वै विराट् इयं वै स्वर्गस्य लोकस्य प्रतिष्ठा, तत् एतत् अस्यां प्रतिष्ठायां प्रतिष्ठापयति) जो ही यह [सूक्त] दश ऋचा वाला है, दश अक्षर वाला विराट् छन्द है, यह [पृथिवी] ही विराट् [विविध ऐश्वर्य वाली] है, यह [पृथिवी] ही स्वर्ग लोक की प्रतिष्ठा [दृढ़ स्थिति] है, सो यह इस प्रतिष्ठा में [यजमान को] प्रतिष्ठित करता है। (सकृत् इन्द्रं निराह, तेन ऐन्द्रात् रूपात् न प्रच्यवते) एक वार इन्द्र को वह बोलता है, इसलिये इन्द्र वाले रूप [ऐश्वर्य] से नहीं गिरता है। (तत् सम्पातानाम् उपरिष्टात् अहरहः शंसति) इसलिये सम्पात सूक्तों के उपरान्त [इस सूक्त को] दिन दिन वह बोलता है ॥ २ ॥

भावार्थः—कण्डिका १ के समान है ॥ २ ॥

विशेषः १—इस कण्डिका को ऐ० ब्रा० ६। १९ और ६। २० से मिलाओ ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—को अद्य नर्यो देवकाम उशन्निन्द्रस्य सख्यं जुजोष। को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे—ऋ० ४। २५। १-८ वामदेव ऋषि ॥

सन्तत्यै (अभिमर्मृशन्तः) अभितः पुनः स्पृशन्तः, विचारयन्तः, (अभ्यभिवदति) अभि अभि इति शब्दद्वययुक्तं सूक्तं ब्रूते। अभितो अभिवादनं नमस्करोति (सकृत्) एकवारम् (ऐन्द्रात्) इन्द्रसम्बन्धिनः सकाशात् ॥

(अद्य) आज (कः) कौन (नर्य्यः) नरों [नेताओं] में श्रेष्ठ, (देवकामः) विद्वानों को चाहने वाला और (इन्द्रस्य) इन्द्र [बड़े ऐश्वर्य वाले पुरुष] की (सख्यम्) मित्रता की (उशन्) कामना करता हुआ [मनुष्य] (जुजोष) सेवा करता है। (वा) अथवा (कः) कौन (समिद्धे) प्रज्वलित (अग्नौ) अग्नि में (सुतसोमः) सोम [तत्त्वरस] निचोड़ता हुआ [मनुष्य] (महे) बड़े (पार्याय) पार लगाने वाले (अवसे) रक्षणादि कर्म के लिये (ईट्टे) ऐश्वर्यवान् होता है ॥ [शेष मन्त्र वेद में देखो] ॥

२–वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः। यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान्––ऋ० १०। २९। १–८, वसुक्र ऋषि, अथर्व० २०। ७६। १–८॥ (वने) वृक्ष पर (न) जैसे (चाकन्) प्रीति करने वाला (वा, यः=वायः) पक्षी का बच्चा (नि अधायि) रखा जाता है, [वैसे ही] (भुरणौ) हे दोनों पोषको ! [माता पिताओ] (शुचिः) पवित्र (स्तोमः) बड़ाई योग्य गुण ने (वाम्) तुम दोनों को (अजीगः) ग्रहण किया है। (यस्य) जिस [बड़ाई योग्य गुण] का (इत्) ही ग्रहण करने वाला (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला पुरुष] (पुरुदिनेषु) बहुत दिनों के भीतर (नृणाम्) नेताओं का (नृतमः) सबसे बड़ा नेता, (नर्यः) पुरुषों का हितकारी (क्षपावान्) श्रेष्ठ रात्रियों वाला है॥ [शेष मन्त्र वेद में देखो] ॥

३––आ याह्यर्वाङुप बन्धुरेष्ठास्तवेदनु प्रदिवः सोमपेयम्। प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवन्ते–ऋ० ३। ४३। १––८ विश्वामित्र ऋषि ॥ [हे इन्द्र राजन्] (बन्धुरेष्ठाः) बन्धनों वाले वा सुन्दर रथ में बैठा हुआ तू (अर्वाङ्) सामने (उप आ याहि) समीप आ, (प्रदिवः तव) उत्तम प्रकाश वाले तेरे (इत्) ही (सोमपेयम् अनु) सोम [तत्त्व वा ओषधियों के रस] पीने के लिये (प्रिया सखाया) दो प्रिय मित्र [अध्यापक और उपदेशक वर्त्तमान हैं], (बर्हिः) ऊंचे आसन को (वि मुच) छोड़ दे, (इमे) यह (हव्यवाहः) देने लेने योग्य पदार्थ लाने वाले लोग (त्वाम्) तुझको (उप हवन्ते) आदर से बुलाते है॥ [शेष मन्त्र वेद में देखो] ॥

४––सद्यो ह जातो वृषभः कनीनः प्रभर्त्तुमावदन्धसः सुतस्य। साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य––ऋ० ३। ४८। १––५, विश्वामित्र ऋषि॥ यह मन्त्र आ चुका है—गो० उ० ४। १ तथा ६। १। शेष मन्त्र वेद में देखो ॥

५––सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य। जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता—ऋ० ६। ६९। १–८॥ भरद्वाज बृहस्पति का पुत्र ऋषि॥ यह मन्त्र आ चुका है गो०उ० ४। १७ शेष मन्त्र वेद में देखो॥

६—उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ। आ यो विश्वानि शवसा ततानोप श्रोता म ईवतो वचांसि–ऋ० ७। २३। १–६, वसिष्ठ ऋषि॥ यह मन्त्र आ चुका है गो० उ० ४। १ तथा ६। १॥ शेष मन्त्र वेद में देखो॥

७—अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः अभिप्रियाणि मर्मृशत् पराणि कवीँरिच्छामि सन्दृशे सुमेधाः—ऋ० ३ । ३८ । १—१०, विश्वामित्र के गोत्र का प्रजापति, अथवा वाच्य वाक् का पुत्र, अथवा प्रजापति और वाच्य दोनों, अथवा विश्वामित्र ही ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ६ । १ ॥ शेष मन्त्र वेद में देखो ॥

कण्डिका ३ ॥

कस्तमिन्द्र त्वावसुं कन्नव्यो अतसीनां कदून्व१स्याकृतं इति कद्वन्तः प्रगाथा अहरहः शस्यन्ते । को वै प्रजापतिः, प्रजापतेराप्त्यै । यदेव कद्वन्तः, तत् स्वर्गस्य लोकस्य रूपम् । यद्वेव कद्वन्तः, अथो अन्नं वै कम्, अथो अन्नस्यावरुध्यै । यद्वेव कद्वन्तः अथो सुखं वै कम्, अथो सुखस्यावरुध्यै यद्वेव कद्वन्तः, अथोऽहरहर्वा एते, शान्तान्यहीनसूक्तान्युपयुञ्जाना यन्ति, तानि कद्वद्भिः प्रगाथैः शमयन्ति तान्येभ्यः शान्तानि कं भवन्ति तान्येताञ्छान्तानि स्वर्गं लोकमभिवहन्ति । त्रिष्टुभः सूक्तप्रतिपदः शंसेयुः, ता हैके पुरस्तात् प्रगाथानां शंसन्ति, धाय्या इति वदन्तस्तदु तथा न कुर्यात् । क्षत्रं वै होता, विशो होत्राशंसिनः, क्षत्रस्यैव तद्विश प्रत्युद्यामिनीं कुर्युः । पापवस्यसं त्रिष्टुभो म इमा सूक्तप्रतिपद इत्येवं विद्यात्, यथा वै समुद्रं प्रतरेयुः, एवं हैवैते प्रप्लवन्ते ये संवत्सरं द्वादशाहं वोपासन्ते, तद्यथा सैरावतीं नावं पारकामाः समारोहेयुः एवं हैवैतास्त्रिष्टुभः स्वर्गकामाः समारोहन्ति । न ह वा एतच्छन्दो गमयित्वा स्वर्गं लोकमुपावर्त्तन्ते वीर्य्यवन्तं संहिताभ्यो न व्याह्वयीत समानं हि छन्दः, अथो नेद् धाय्या करवाणीति । यदेनाः शंसन्ति, तत् स्वर्गस्य लोकस्य रूपम् । यद्वेवैनाः शंसन्ति, इन्द्रमेवैतैर्निह्वयन्ते, यथा ऋषभं वासितायै ॥ ३ ॥

कण्डिका ३ ॥ अहीन यज्ञ में कद्वत् प्रगाथों का उपयोग और महत्त्व ॥

(कस्तमिन्द्र त्वावसुं, कन्नव्यो अतसीनां, कदू न्वस्याकृतम् इति कद्वन्तः प्रगाथाः अहरहः शस्यन्ते) कस्तमिन्द्र त्वावसुम्—······ऋ० ७ । ३२ । १४; कन्नव्यो अतसीनाम्······ऋ० ८ । ३ । १३, कदू न्व१स्याकृतम् ···ऋ० ८ । ६६ । ६, [सायणभाष्य ५५] । यह कत् वा क शब्द वाले प्रगाथ दिन दिन बोले जाते हैं । (कः वै प्रजापतिः, प्रजापतेः आप्त्यै) क शब्द प्रजापति [का वाचक] है, प्रजापति के पाने के लिये [यह हैं] । (यत् एव कद्वन्तः, तत् स्वर्गस्य लोकस्य रूपम्) जो यह [प्रगाथ] कत् अथवा क शब्द वाले हैं, वह स्वर्गलोक का रूप है । (यत् उ एव कद्वन्तः अथो अन्नं वै कम्, अथो अन्नस्य अवरुध्यै) जिस कारण से यह [प्रगाथ] कत् शब्द वाले हैं, और अन्न ही क

३—(त्वावसुम्) गो० उ० ४ । १ त्वया प्राप्तधनम् (कत्) कथम् (नव्यः) नव—ईयसुन्, ईकारलोपः । नवीयः । नवतरं कर्म (अतसीनाम्) अत्यविचमितमि० (उ० ३ । ११७) अत सातत्यगमने—असच्, ङीष् । सन्ततगामिनीनां

है, इसलिये अन्न की प्राप्ति के लिये [यह है]। (यत् उ एव कद्वन्तः, अथो सुखं वै कं, अथो सुखस्य अवरुध्यै) जिस कारण से यह [प्रगाथ] कत् शब्द वाले हैं, और सुख ही क है, इसलिये सुख की प्राप्ति के लिये [यह है]। (यत् उ एव कद्वन्तः अथो अहरहः वै एते शान्तानि अहीनसूक्तानि उपयुञ्जानाः यन्ति, तानि कद्वद्भिः प्रगाथैः शमयन्ति) जिस कारण से यह [प्रगाथ] कत् शब्द वाले हैं, इसलिये दिन दिन यह [यजमान] शान्ति वाले अहीन [बहुत दिन रहने वाले यज्ञ] के सूक्तों को उपयोग में लाते हुये चलते हैं, उनको वे कत् शब्द वाले प्रगाथों से शान्ति युक्त करते हैं। (तानि शान्तानि एभ्यः कं भवन्ति) वे शान्ति युक्त [सूक्त] इन [यजमानों] के लिये सुखकारी होते हैं। (तानि शान्तानि एतान् स्वर्गं लोकम् अभिवहन्ति) वे शान्ति युक्त [सूक्त] इन [यजमानों] को स्वर्ग लोक में पहुँचाते हैं। (त्रिष्टुभः सूक्तप्रतिपदः शंसेयुः) त्रिष्टुप् [छन्द वाली] सूक्त की आरम्भ वाली ऋचाओं को वे बोलें। (ताः ह एके प्रगाथानां पुरस्तात् शंसन्ति, धाय्याः इति वदन्तः, तत् उ तथा न कुर्यात्) उन [त्रिष्टुभों] को कोई कोई प्रगाथों के पहिले बोलते हैं, यह धाय्या [अग्नि प्रज्वलित करने के मन्त्र] हैं—ऐसा कहते हुये, सो वैसा वह [होता ऋत्विज्] न करे। (क्षत्रं वै होता, विशः होत्राशंसिनः, क्षत्रस्य एव तत् विशं प्रत्युद्यामिनीं कुर्युः) राजा [के समान] होता पुरुष है, प्रजायें होत्राशंसी [सहायक होता लोग] हैं, इसलिये [उन्हें बोलने से] प्रजा को राजा के प्रतिकूल उद्योग वाली वे करेंगे, (पापवस्यसम्) अतिशय पाप वाला व्यवहार [उससे वे करेंगे]। (त्रिष्टुभः मे इमाः सूक्तप्रतिपदः, इति एवं विद्यात्) त्रिष्टुप् छन्द मेरी यह सूक्त की आरम्भणीय ऋचायें हैं—ऐसा वह [होता] जाने। (यथा वै समुद्रं प्रतरेयुः, एवं ह एव एते प्रप्लवन्ते, ये संवत्सरं द्वादशाहं वा उपासन्ते) जैसे ही लोग समुद्र पार करते हैं, वैसे ही वे पार जाते हैं जो संवत्सर [वर्ष भर रहने वाले यज्ञ] अथवा द्वादशाह [बारह दिन वाले यज्ञ] को करते हैं। (तत् यथा सैरावतीं नावं पारकामाः समारोहेयुः, एवं ह एव एताः त्रिष्टुभः स्वर्गकामाः समारोहन्ति) सो जैसे बहुत अन्न वाली नाव पर पार जाना चाहने वाले लोग चढ़ते हैं, वैसे ही इन त्रिष्टुप् छन्दों पर स्वर्ग चाहने वाले लोग चढ़ते हैं। (एतत् छन्दः ह वै वीर्यवन्तं स्वर्गं लोकं गमयित्वा न उपावर्तन्ते = उपावर्तयते) यह छन्द वीर्यवान्

सृष्टीनाम् (कत्) किम् (उ) एव (नु) इदानीम् (अकृतम्) अनाचरितम् (कद्वन्तः) कच्छब्दयुक्ताः। कशब्दयुक्ताः (शान्तानि) सुखकराणि (उपयुञ्जानाः) उपयुक्तानि कुर्वाणाः (शमयन्ति) शान्तानि कुर्वन्ति (अभिवहन्ति) प्रापयन्ति (सूक्तप्रतिपदः) सूक्तस्य प्रारम्भणीया ऋचः (धाय्या) दधातेः—ण्यत्। अग्निज्वालनार्था ऋचः। सामिधेन्यः (क्षत्रम्) क्षत्रियः। राजा (विशः) प्रजाः (होत्राशंसिनः) वेदवाणीवाचकाः (प्रत्युद्यामिनीम्) प्रतिकूलोद्योगयुक्ताम् (पापवस्यसम्) पाप+वसु—ईयसुन्, ईकारलोपः। पापवसीयसम्। अतिशयेन पापव्यवहारम् (प्रतरेयुः) परतीरं गच्छेयुः (प्रप्लवन्ते) परतीरं गच्छन्ति (उपासन्ते) उपासते। अनुतिष्ठन्ते (सैरावतीम्) इरा—अण्, इरा अन्नम्, तत्समूहः ऐरम्, तेन सह वर्तत इति सैरम्, मतुप्, ङीप्, आर्षो दीर्घः। पर्याप्तान्नयुक्ताम्

[बलिष्ठ यजमान] को स्वर्गलोक में ले जाकर नहीं लौटाता है। (मंहिताभ्यः न व्याह्वयीत, समानं हि छन्दः, अथो नेत् धाय्याः करवाणि इति) प्रकाशित [ऊपर जाने हुये] त्रिष्टुभों से पहिले [शंसावोम्—गो० उ० ३ । १६] व्याहाव न करे, समान ही [सूक्तों का] छन्द है, इससे धाय्या [अग्नि प्रज्वलित करने की ऋचाओं] को मैं न करूँ [ऐसा होता कहे]। (यत् एनाः शंसन्ति, तत् स्वर्गस्य लोकस्य रूपम्) जो वे इन [त्रिष्टुभों] को बोलते हैं वह स्वर्ग लोक का रूप है। (यत् उ एव एनाः शंसन्ति, इन्द्रम् एव एतैः निह्वयन्ते यथा ऋषभं वासितायै) जब वे इन [त्रिष्टुभों] को बोलते हैं, इन्द्र को ही इन [छन्दों] से वे बुलाते हैं, जैसे गतिमान् [पुरुषार्थी] को निवास करती हुई प्रजा के लिये [बुलाते हैं]॥ ३ ॥

भावार्थः—कण्डिका १ के समान है ॥ ३ ॥

विशेषः १—इस कण्डिका को—ऐ० ब्रा० ६ । २१ से मिलाओ ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति । श्रद्धा इत्ते मघवन् पार्ये दिवि वाजी वाजं सिषासति—ऋ० ७ । ३२ । १४, १५ ॥ यह मन्त्र आ चुका है—गो० उ० ४ । १ ॥

२—कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः । नहीन्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः—ऋ० ८ । ३ । १३, १४ अथर्व० २० । ५० । १, २ ॥ (अतसीनाम्) सदा चलती हुई [सृष्टियों] के (तुरः) वेग देने वाले [परमात्मा] के (नव्यः) अधिक नवीन कर्म को (मर्त्यः) मनुष्य (कत्) कैसे (गृणीत) बता सके ? (नु) क्या (अस्य) उसकी (महिमानम्) महिमा को और (इन्द्रियम्) इन्द्रपन [परम ऐश्वर्य] को (गृणन्तः) वर्णन करते हुये पुरुषों ने (स्वः) आनन्द (नहि) नहीं (आनशुः) पाया है ? ॥

३—कदू न्व१स्याकृतमिन्द्रस्यास्ति पौंस्यम् । केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा—ऋ० ८ । ६६ । ९, [सायण भाष्य ५५]। अथर्व० २० । ९७ । ३, साम० ८ । २ । १३ ॥ (अस्य) इस (इन्द्रस्य) इन्द्र [बड़े ऐश्वर्य वाले वीर] का (नु) अब (कत् उ) कौन सा (पौंस्यम्) पौरुष (अकृतम्) बिना किया हुआ (अस्ति) है ? (केनो) किस (श्रोमतेन) श्रुति [वेद] मानने वाले करके (नु) अब (जनुषः परि) जन्म से लेकर (वृत्रहा) शत्रुनाशक [वीर पुरुष] (कम्) सुख से (न) नहीं (शुश्रुवे) सुना गया है ॥

(पारकामाः) परतीरगमनेच्छुकाः (उपावर्तन्ते) उपवर्तयते (वीर्यवन्तम्) सामर्थ्योपेतं यजमानम् (मंहिताभ्यः) महि दीप्तौ—क्तः । दीप्ताभ्यः । प्रज्ञाताभ्यः । त्रिष्टुब्भ्यः पूर्वम् (न) निषेधे (व्याह्वयीत) शंसावोम्—गो० उ० ३ । १६, इति व्याहावं कुर्यात् (नेत्) नैव (ऋषभम्) गो० उ० ५ । १५ । गतिमन्तं पुरुषार्थिनम् (वासितायै) गो० उ० ५ । १५ । निवासितायै प्रजायै ॥

कण्डिका ४ ॥

अपेन्द्र प्राचो मघवन्नमित्रानिति, मैत्रावरुणः पुरस्तात् सम्पातानामहरहः शंसति । अपापाचो अभिभूते नुदस्वापोदीचो अप शूराधराच उरौ यथा तव शर्म्मन् मदेमेति, अभयस्य रूपमभयमिव ह्यन्विच्छेति, ब्रह्मणा ते ब्रह्मयुजा युनज्मीति, ब्राह्मणाच्छंस्येतामहरहः शंसति युक्तवतीं युक्त इवाह्यहीनोऽहीनस्य रूपमुरुं नो लोकमनुनेषीति, अच्छावाको अहरहः शंसति । अनुनेषीत्येत इवाह्यहीनोऽहीनस्य रूपं नेषीति सत्रायणरूपम् । ओकःसारी हैवैषामिन्द्रो भवति, यथा गौः प्रज्ञातं गोष्ठं, यथा ऋषभं वासितायाः, एवं हैवैषामिन्द्रो यज्ञमागच्छति।[१] न शुनं हुवेम यथाहीनस्य परिदध्यात् । क्षत्रियो ह राष्ट्राच्च्यवते, यो हैव परो भवति, तमभिह्वयति ॥ ४ ॥

कण्डिका ४ ॥ अहीन यज्ञ में विशेष मन्त्रों का प्रयोग ।

(अपेन्द्र प्राचो मघवन्नमित्रान्—इति मैत्रावरुणः सम्पातानां पुरस्तात् अहरहः शंसति) अपेन्द्र प्राचो मघवन् अमित्रान्—...... अथर्व० २० । १२५ । १, हे महाधनी इन्द्र ! पूर्व वाले बैरियों को दूर [हटा] यह मन्त्र मैत्रावरुण सम्पात सूक्तों के पहिले दिन दिन बोलता है। (अपापाचो अभिभूते नुदस्वापोदीचो अप शूराधराच उरौ यथा तव शर्म्मन् मदेम, इति अभयस्य रूपम्, अभयम् इव हि अन्विच्छ इति) अप अपाचः अभिभूते ... [उसी मन्त्र के शेष तीन पाद, अर्थ नीचे देखो] यह [वाक्य] अभय का रूप है, अभय को ही तू ढूंढ़ । (ब्रह्मणा ते ब्रह्मयुजा युनज्मि इति ब्राह्मणाच्छंसी एतां युक्तवतीम् अहरहः शंसति, युक्तः इव हि अहीनः, अहीनस्य रूपम्) ब्रह्मणा ते ब्रह्मयुजा युनज्मि—अथर्व० २० । ८६ । १—इस युक्तवती [युनज्मि इस पद में युज, संयुक्त करना धातु के अर्थ वाली ऋचा] को ब्राह्मणाच्छंसी दिन दिन बोलता है युक्त [मिला हुआ, यज्ञ के दिनों से मिला हुआ] ही अहीन [बहुत दिनों वाला यज्ञ] है, [इसलिये यह मन्त्र] अहीन का रूप है । (उरुं नो लोकम् अनुनेषि, इति अच्छावाकः अहरहः शंसति) उरुं नो लोकम् अनुनेषि — अथर्व०

४—(अप) दूरे (प्राचः) प्र+अञ्चतेः क्विन्, शस् । पूर्वदेशे वर्तमानान् (मघवन्) महाधनिन् (अमित्रान्) पीडकान् वैरिणः (अपाचः) पश्चिमदेशे वर्तमानान् (अभिभूते) हे अभिभवितः (नुदस्व) प्रेरय (उदीचः) उत्तरदेशे वर्तमानान् (अधराचः) दक्षिणदिशि वर्तमानान् (उरौ) विस्तीर्णे (शर्मन्) शर्मणि । शरणे (मदेम) हृष्येम (इव) एव (अन्विच्छ) अन्वेषणेन प्राप्नुहि (ब्रह्मणा) अन्नेन (ते) तुभ्यम् (ब्रह्मयुजा) धनस्य संयोजकौ संग्राहकौ (युनज्मि) संयोजयामि (युक्तवतीम्) युनज्मि इति श्रवणाद् युजि धात्वर्थवतीम् (युक्तः) अह्नां परस्परसम्बन्धवान् (नः) अस्मान् (लोकम्) स्थानम्

---

१. पु. सं. "आगच्छन्ति" इति पाठः ॥ सम्पा० ॥

१६ । १५ । ४, यह मन्त्र अच्छावाक दिन दिन बोलता है। (अनु नेषि इति एतः इव हि अहीनः, अहीनस्य रूपम्) अनु नेषि, [तू निरन्तर ले चलता है] इससे एतः [आया हुआ] ही अहीन यज्ञ है, [इसलिये यह मन्त्र] अहीन यज्ञ का रूप है। (नेषि इति सत्रायणरूपम्) नेषि [तू ले चलता है] यह सत्र यज्ञ के अनुष्ठान का रूप है। (एषाम् ओकःसारी ह एव इन्द्रः भवति) इन [यजमानों] के घरों में जाने वाला इन्द्र है। (यथा गौः प्रज्ञातं गोष्ठं, यथा वासितायाः ऋषभम्, एवं ह एव इन्द्रः एषां यज्ञम् आगच्छति) जैसे गौ जाने हुये गोट में आती है, और जैसे निवास कराई हुई प्रजायें उद्योगी पुरुष के पास [आती हैं], वैसे ही इन्द्र इन [यजमानों] के यज्ञ में आता है। (शुनं हुवेम यथा अहीनस्य न परिदध्यात्) शुनं हुवेम अथर्व० २० । ११ । ११, इस पद वाली ऋचा से जिस प्रकार अहीन यज्ञ की परिधानीया [समाप्ति विधि] न करे [वैसा करे]। (क्षत्रियः ह राष्ट्रात् च्यवते, यः ह एव परः भवति, तम् अभिह्वयति) [इस मन्त्र की परिधानीया से] क्षत्रिय [राजा] राज्य से गिर जाता है, [क्योंकि] जो ही [इसका] बैरी है, उस [बैरी] को [इस परिधानीया से] वह बुलाता है ॥ ४ ॥

भावार्थ :—कण्डिका १ के समान है ॥ ४ ॥

विशेष: १—इस कण्डिका को ऐ० ब्रा० ६ । २२ से मिलाओ ॥

विशेष: २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—अपेन्द्र प्राचो मघवन्नमित्रानपापाचो अभिभूते नुदस्व। अपोदीचो अप शूराधराच उरौ यथा तव शर्मन् मदेम—अथर्व० २० । २५ । १, ऋ० १० । १३१ । १ भेद से ॥ (मघवन्) हे महाधनी! (अभिभूते) हे विजयी! (शूर) हे शूर! (इन्द्र) हे इन्द्र! [बड़े ऐश्वर्य वाले राजन्] (प्राचः) पूर्व वाले (अमित्रान्) वैरियों को (अप) दूर, (अपाचः) पश्चिम वाले [बैरियों] को (अप) दूर, (उदीचः) उत्तर वाले [बैरियों] को (अप) दूर, और (अधराचः) दक्षिण वाले [बैरियों] को (अप) दूर, नुदस्व) हटा, (यथा) जिससे (तव) तेरी (उरौ) चौड़ी (शर्मन्) शरण में (मदेम) हम आनन्द करें ॥

२—ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू। स्थिरं रथं सुखमिन्द्राधितिष्ठन् प्रजानन् विद्वाँ उप याहि सोमम्—अथर्व० २० । ८६ । १, ऋ० ३ । ३५ । ४ ॥ (इन्द्र) हे इन्द्र! [बड़े ऐश्वर्य वाले मनुष्य] (ते) तेरे लिए (ब्रह्मणा) अन्न के साथ (ब्रह्मयुजा) धन के संग्रह करने वाले, (आशू) शीघ्र चलने

(अनु) निरन्तरम् (नेषि) शपो लुक्। नयसि। नय (एतः) आ+इण् गतौ—क्तः। प्रवृत्तः (सत्रायणरूपम्) सत्रस्य यज्ञविशेषस्य अयनस्य अनुष्ठानस्य रूपम् (ओकःसारी) गृहगामी (वासितायाः) गो० उ० ५ । १५ । प्रथमार्थे षष्ठी। वासिता। निवासिता प्रजा (शुनम्) सुखप्रदम्। शुनं इति पदयुक्तया ऋचा (परिदध्यात्) परिधानीयां समाप्तविधिं कुर्यात् (परः) शत्रुः (अभिह्वयति) आह्वयति ॥

वाले, (हरी) दोनों जल और अग्नि को (सखाया) दो मित्रों के तुल्य (सधमादे) चौरस स्थान में (युनज्मि) मैं संयुक्त करता हूँ, (स्थिरम्) दृढ़ (सुखम्) सुख देने वाले [इन्द्रियों के लिए अच्छे हितकारी-निरु० ३ । १३] (रथम्) रथ पर (अधितिष्ठन्) चढ़ता हुआ (प्रजानन्) बड़ा चतुर (विद्वान्) विद्वान् तू (सोमम्) ऐश्वर्य को (उप याहि) प्राप्त हो ॥

३--उरुं नो लोकमनु नेषि विद्वान्त्स्व१र्यज्ज्योतिरभयं स्वस्ति । उग्रा त इन्द्र स्थविरस्य बाहू उप क्षयेम शरणा बृहन्ता--अथर्व० १९ । १५ । ४, ऋ० ६ । ४७ । ८ भेद से ॥ (विद्वान्) जानकार तू (नः) हमें (उरुम्) चौड़े (लोकम्) स्थान में (अनु नेषि) निरन्तर ले चलता है, (यत्) जो (स्वः) सुखप्रद, (ज्योतिः) प्रकाशमान (अभयम्) निर्भय और (स्वस्ति) मङ्गलदाता [अच्छी सत्ता वाला] है। (इन्द्र) हे इन्द्र ! [महाप्रतापी राजन्] (स्थविरस्य ते) तुझ दृढ़ स्वभाव वाले के (उग्रा) प्रचण्ड, (शरणा) शरण देने वाले, (बृहन्ता) विशाल (बाहू) दोनों भुजाओं का (उप) आश्रय लेकर (क्षयेम) हम रहें ॥

४—शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ । शृण्वन्त-मुग्रमूतये समत्सु घ्नन्तं वृत्राणि सं जितं धनानाम्—अथर्व० २० । ११ । ११, ऋ० ३ । ३० । २२ आदि १४ बार ।। (शुनम्) सुख देने वाले (मघवानम्) बड़े धनी, (अस्मिन्) इस (भरे) युद्ध के बीच (वाजसातौ) अन्न के पाने में (नृतमम्) बड़े नेता, (शृण्वन्तम्) सुनने वाले, (उग्रम्) तेजस्वी, (समत्सु) सङ्ग्रामों में (वृत्राणि) शत्रुओं को (घ्नन्तम्) मारने वाले, (धनानाम्) धनों के (संजितम्) जीत लेने वाले (इन्द्रम्) इन्द्र [महाप्रतापी जन] को (ऊतये) रक्षा के लिये (हुवेम) हम बुलावें ॥

कण्डिका ५ ॥

अथातोऽहीनस्य युक्तिश्च विमुक्तिश्च व्यन्तरिक्षमतिरदित्यहीनं युङ्क्ते । एवेदिन्द्रमिति विमुञ्चति । नूनं सा त इत्यहीनं युङ्क्ते । नू ष्टुत इति विमुञ्चति । एष ह वा अहीनं तन्तुमर्हति, य एनं योक्त्रञ्च विमोक्त्रञ्च वेद, तस्य हैषैव युक्ति-रेषा विमुक्तिः । तद्यत् प्रथमेऽहनि चतुर्विंश एकाहिकीभिः परिदध्युः, प्रथम एवाहनि यज्ञं संस्थापयेयुर्नाहीनकर्म्म कुर्युः । अथ यदहीनपरिधानीयाभिः परि-दध्युः, तद्यथा युक्तो विमुच्यमानः उत्क्रत्येत, एवं यजमाना उत्क्रत्येरन्, नाहीन-कर्म कुर्युः । अथ यदुभयीभिः परिदध्युः, तद्यथा दीर्घाध्व उपविमोकं याज्याः, तादृक् तत् समानीभिः परिदध्युः । तदाहुः, एकया द्वाभ्यां वा स्तोममतिशंसेत्, दीर्घारण्यानि भवन्ति यत्र बह्वीभिः स्तोमोऽतिशस्यते, अथो क्षिप्रन्देवेभ्योऽन्नाद्यं सम्प्रयच्छामीति, अपरिमिताभिरुत्तरयोः सवनयोः । अपरिमितो वै स्वर्गो लोकः, स्वर्गस्य लोकस्य समष्ट्यै । तद्यथा अभिहेषते पिपासते क्षिप्रं प्रयच्छेत्, तादृक् तत् समानीभिः परिदध्युः । सन्ततो हैवैषामारब्धो ऽविस्रस्तो यज्ञो भवति, सन्ततमृचा वषट्कृत्यं सन्तत्यै सन्धीयते प्रजया पशुभिः, य एवं वेद ॥ ५ ॥

कण्डिका ५ ॥ अहीन यज्ञ की युक्ति और विमुक्ति ॥

(अथ अतः अहीनस्य युक्तिः च विमुक्तिः च) अब अहीन [बहुत दिन वाले यज्ञ] का संयोग और वियोग [कहा जाता है]। (व्यन्तरिक्षमतिरत्, इति अहीनं युङ्क्ते, एवेदिन्द्रम्—इति विमुञ्चति) व्यन्तरिक्षमतिरत्... अथर्व० २० । २८ । १, इस मन्त्र से वह अहीन यज्ञ को जोड़ता है, और एवेदिन्द्रम्.....अथर्व० २० । १२ । ६, इस मन्त्र से वह [उसको] अलगाता है। (नूनं सा ते—इति अहीनं युङ्क्ते, नू ष्टुतः-इति विमुञ्चति) नूनं सा ते..... ऋ० २ । १२ । २१ आदि इस मन्त्र से वह अहीन यज्ञ को जोड़ता है, और नू ष्टुतः...... ऋ० ४ । १६ । २१ । इत्यादि, इस मन्त्र से वह [उसे] अलगाता है। (एषः ह वै अहीनं तन्तुम् अर्हति यः एनम् योक्त्रं च विमोक्त्रं च वेद) वह ही निश्चय करके अहीन यज्ञ को फैलाने योग्य है, जो इस [यज्ञ] के मिलाव और अलगाव को जानता है। (तस्य ह एषा एव युक्तिः एषा विमुक्तिः) उस [मनुष्य] की यह ही युक्ति और यह ही विमुक्ति है। (तत् यत् प्रथमे अहनि चतुर्विंशे एकाहिकीभिः परिदध्युः, प्रथमे एव अहनि यज्ञं संस्थापयेयुः, अहीनकर्म न कुर्युः) फिर जब पहिले दिन चतुर्विंश यज्ञ में एकाहिकी [एक दिन वाले यज्ञ की ऋचाओं] से पूरा करें, पहिले ही दिन यज्ञ को पूरा करें और अहीन [बहुत दिन वाले यज्ञ] के कर्म को न करें। (अथ यत् अहीनपरिधानीयाभिः परिदध्युः, तत् यथा युक्तः विमुच्यमानः उत्क्रत्येत, एवं यजमानाः उत्क्रत्येरन्. अहीनकर्म न कुर्युः) फिर जब अहीन यज्ञ की परिधानीयाओं [समाप्ति क्रियाओं] से पूरा करें सो जैसे जुता हुआ [रथादि में जुता हुआ घोड़ा बहुत थकने पर] छुटा हुआ कतर जावे [नष्ट हो जावे], ऐसे ही यजमान लोग कतरे जावें [नष्ट हो जावें, इसलिये] अहीन यज्ञ कर्म न करे। (अथ यत् उभयीभिः परिदध्युः, तत् यथा दीर्घाध्वे उपविमोकं याज्याः, तादृक् तत् समानीभिः परिदध्युः) फिर जो दोनों प्रकार वाली [एक दिन वाले और बहुत दिन वाले यज्ञ की ऋचाओं] से समाप्त करें, सो जैसे लम्बे मार्ग में उपविमोक [जगह जगह विश्राम के समान] याज्या ऋचायें हैं, उसी प्रकार उस [कर्म] को एकसी ऋचाओं से पूरा करें ॥

(तत् आहुः, एकया द्वाभ्यां वा स्तोमम् अतिशंसेत्, दीर्घारण्यानि भवन्ति, यत्र बह्वीभिः स्तोमः अतिशस्यते) फिर कहते हैं, एक अथवा दो ऋचाओं द्वारा स्तोम अधिक बोला जावे, [वहाँ] बड़े बड़े वन हो जाते हैं, जहाँ बहुत सी ऋचाओं द्वारा [स्तोम] बढ़ाकर बोला जाता है। (अथो क्षिप्रं देवेभ्यः अन्नाद्यं सम्प्रयच्छामि इति, अपरिमिताभिः उत्तरयोः सवनयोः) फिर शीघ्र विद्वानों को खाने योग्य अन्न देता हूँ—

५—(युक्तिः) संयोगः (विमुक्तिः) वियोगः (युङ्क्ते) संयोजयति (विमुञ्चति) वियोजयति (योक्त्रम्) दाम्नीशसयुयुजस्तु० (पा० ३ । २ । १८२) युजिर् योगे—ष्ट्रन् । बन्धनम् (विमोक्त्रम्) गुधृवीपचिवचि० (उ० ४ । १६७) मुच्लृ मोचने—त्रः । विमोचनम् (परिदध्युः) समापयेयुः (संस्थापयेयुः) समापयेयुः (युक्तः) रथयुक्तोऽश्वः (उत्क्रत्येत) उच्छिद्येत । विनश्येत् (उत्कृत्येरन्) विनश्येयुः (दीर्घाध्वे) दूरमार्गे (उपविमोकम्) तत्र तत्र विमोचनम् (अभिहेषते)

यह [ब्राह्मण वचन बोलकर] अपरिमित [बेगिनती ऋचाओं] से दोनों पिछले सवनों में [माध्यन्दिन और तृतीयसवन में स्तोम बढ़ाकर बोला जाता है]। (अपरिमित: वै स्वर्ग: लोक:, स्वर्गस्य लोकस्य समष्टचै) अपरिमित [परिमाण रहित] ही स्वर्ग लोक है, स्वर्ग लोक की प्राप्ति के लिये [यह कर्म होता है]। (तत् यथा अभिहेषते पिपासते क्षिप्रं प्रयच्छेत्, तादृक् तत् समानीभि: परिदध्यु:) सो जैसे हिनहिनाते हुये, प्यासे [घोड़े] को शीघ्र [जल] देवे, वैसे ही उस [यज्ञ कर्म] को समान ऋचाओं से समाप्त करे। (एषां ह एव सन्तत: आरब्ध: अविस्रस्त: यज्ञ: भवति, ऋचा सन्ततं वषट्कृत्यं सन्तत्यै) इन [पुरुषों] का ही फैलाया हुआ, आरम्भ किया हुआ यज्ञ विनाश रहित होता है, ऋचा द्वारा फैलाया हुआ वषट् कर्म [यजमान के] फैलाव के लिए है। (प्रजया पशुभि: सन्धीयते, य: एवं वेद) प्रजा और पशुओं से वह संयुक्त होता है, जो ऐसा विद्वान् है ॥ ५ ॥

भावार्थ:—यज्ञों के यथाविधि समाप्त होने पर यजमान लोग सुख पाते हैं ॥ ५ ॥
विशेष: १—इस कण्डिका को ऐ० ब्रा० ६ । २३ । से मिलाओ ॥

विशेष: २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—व्य१ न्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद् वरुम् ॥ अथर्व० २० । २८ । १ ॥ इत्यादि ऊपर आ चुका है—गो० उ० ५ । १३ ॥

२—एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः । स न स्तुतो वीरवद् धातु गोमद् यूयं पात स्वस्तिभि: सदा न:—अथर्व० २० । १२ । ६, ऋग्० ७ । २३ । ६, यजु० २० । ५४ ॥ यह मन्त्र आ चुका है—गो० उ० ४ । २ ॥

३—नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी । शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीरा:—ऋग्० २ । ११ । २१, २ । १५ । १०, २ । १६ । ९, २ । १७ । ९, २ । १८ । ९, २ । १९ । ९, २ । २० । ९ और निरु० १ । ७ ॥ (इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले वीर] (नूनम्) निश्चय करके (ते) तेरी (सा) वह (मघोनी) बहुत धन वाली (दक्षिणा) दक्षिणा [दानक्रिया] (जरित्रे) स्तुति करने वाले के लिये (वरम्) वर [कामना] (प्रति) प्रत्यक्ष (दुहीयत्) पूर्ण करे। (स्तोतृभ्य:) स्तुति करने वालों को (शिक्ष) शिक्षा दे, (न:) हमें (अति=अतीत्य) छोड़ कर (भग:) [हमारे] ऐश्वर्य को (मा धक्) मत भस्म कर, (सुवीरा:) बड़े वीरों वाले हम (विदथे) ज्ञान स्थान यज्ञ में (बृहत्) बृहत् [साम आदि विज्ञान] (वदेम) कहें ॥

४—नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपे: । अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्य: सदासा:—ऋ० ४ । १६ । २१, ४ । १७ । २१, ४ । १९ । ११, ४ । २० । ११, ४ । २१ । ११, ४ । २२ । ११, ४ । २३ । ११,

---

हेषृ अश्वशब्दे—शतृ, आर्षं परस्मैपदम् । हेषां कुर्वाणाय (पिपासते) तृषिताय (अविस्रस्त:) अविनाशित: (सन्धीयते) संयुज्यते ॥

४ । २४ । ११ ॥ (इन्द्र) हे इन्द्र ! [बड़े एश्वर्य वाले राजन्] (नु नु) अब ही (स्तुतः) स्तुति किया गया और (गृणानः) उपदेश करता हुआ तू (नद्यः न) नदियों के समान (जरित्रे) स्तुति करने वाले के लिये (इषम्) अन्न (पीपेः) बढ़ा, (हरिवः) हे उत्तम घोड़ों वाले ! (ते) तेरे लिये (नव्यम्) अधिक नवीन (ब्रह्म) अन्न (अकारि) किया गया है, (धिया) बुद्धि वा कर्म के साथ हम (रथ्यः = रथ्याः) उत्तम रथों वाले और (सदासाः) सेवकों वाले (स्याम) होवें ॥

कण्डिका ६ ॥

तदाहुः, कथं द्व्युक्थो होतैकसूक्त एकोक्था होत्रा द्विसूक्ता इति । असौ वै होता योऽसौ तपति, स वा एक एव, तस्मादेकसूक्तः । स यद्विध्यातो द्वाविवा भवति, तेज एव मण्डलं भा अपरं शुक्लमपरं कृष्णं, तस्माद् द्व्युक्थः । रश्मयो वाव होत्राः, ते वा एकैकं, तस्मादेकोक्थाः । तद्यदेकैकस्य रश्मेर्द्वौ द्वौ वर्णौ भवतः, तस्माद् द्विसूक्ताः । संवत्सरो वाव होता, स वा एक एव, तस्मादेकसूक्तः । तस्य यद् द्व्यान्यहानि भवन्ति, शीतान्यन्यान्युष्णान्यन्यानि, तस्माद्द्व्युक्थः । ऋतवो वाव होत्राः, ते वा एकैकं, तस्मादेकोक्थाः, तद्यदेकैकस्यर्त्तौ द्वौ द्वौ मासौ भवतः, तस्माद् द्विसूक्ताः । पुरुषो वाव होता स वा एक एव, तस्मादेकसूक्तः । स यत्पुरुषो भवत्यन्यथैव प्रत्यङ् भवत्यन्यथा प्राङ्, तस्माद् द्व्युक्थः । अङ्गानि वाव होत्राः, तानि वा एकैकं, तस्मादेकोक्थाः । तद्यदेकैकमङ्गं द्युतिर्भवति, तस्माद् द्विसूक्ताः । तदाहुः, यद् द्व्युक्थो होतैकसूक्त एकोक्था होत्रा द्विसूक्ताः, कथं तत् समं भवति, यदेव द्विदेवत्याभिर्यजन्ति अथो यद् द्विसूक्ता होत्रा इति ब्रूयात्, तदाहुः, यदग्निष्टोम एव सति यज्ञे द्वे होतुरुक्थे अतिरिच्येते, कथ ततो होत्रा न व्यवच्छिद्यन्त इति । यदेव द्विदेवत्याभिर्यजन्ति, अथो यद् द्विसूक्ता होत्रा इति ब्रूयात्, तदाहुः, यदग्निष्टोम एव सति यज्ञे सर्वा देवताः सर्वाणि छन्दांस्याप्याययन्ति, अथ कतमेन छन्दसायातयामान्युक्थानि प्रणयन्ति, कया देवतयेति । गायत्रेण छन्दसाग्निना देवतयेति ब्रूयात् । देवान् ह यज्ञं तन्वानान् असुररक्षांस्यभिचेरिरे यज्ञपर्वणि,यज्ञमेषां हनिष्यामस्तृतीयसवनं प्रति तृतीयसवने ह यज्ञस्त्वरिष्टो बलिष्ठः प्रतनुमेषां यज्ञं हनिष्याम इति । ते वरुणं दक्षिणतोऽयोजयन्, मध्यतो बृहस्पतिमुत्तरतो विष्णुम् । तेऽब्रुवन् एकैकाः स्मः, नेदमुत्सहामह इति, स्तु [अस्तु] नो द्वितीयो येनेदं सह व्यश्नवामहा इति । तानिन्द्रोऽब्रवीत्, सर्वे मद्द्वितीया स्थेति । ते सर्व इन्द्रं द्वितीयाः, तस्मादैन्द्रावारुणमैन्द्राबार्हस्पत्यमैन्द्रावैष्णवमनुशस्यते । द्वितीयवन्तो ह वा एतेन स्वा भवन्ति, द्वितीयवन्तो मन्यन्ते, य एवं वेद ॥ ६ ॥

कण्डिका ६ ॥ होताओं और होत्रक लोगों के उक्थों का वर्णन और असुरों से यज्ञ की रक्षा ॥

(तत् आहुः, कथं होता द्व्युक्थः एकसूक्तः होत्राः एकोक्थाः द्विसूक्ताः इति) वे कहते हैं—कैसे होता दो उक्थ वाला और एक सूक्त वाला होता है, और होत्रक

[सहायक होता लोग] एक उक्थ वाले और दो सूक्त वाले होते हैं। (असौ वै होता यः असौ तपति, सः वै एकः एव, तस्मात् एकसूक्तः) [उस का उत्तर] वह ही [सूर्य] होता [जल का दाता और ग्रहीता] है जो वह तपता है वह ही [सूर्य] एक ही है, इस लिये वह एक सूक्त वाला है। (सः यत् विध्यातः द्वौ इव भवति तेजः एव मण्डलम् भाः अपरं शुक्लम् अपरं कृष्णम्, तस्मात् द्व्युक्थः) वह [सूर्य] जब विविध प्रकार ध्यान किया गया, दो के समान तेज होता है, तेज ही मण्डल और किरण है, [सामने की ओर अथवा किरण में] एक शुक्ल रूप और दूसरा [पिछली ओर अथवा किरण में] कृष्ण रूप है इस लिये वह [होता] दो उक्थ वाला है। (रश्मयः वाव होत्राः ते वै एकैकम् तस्मात् एकोक्थाः) किरणों [के सामने] ही होत्रक लोग हैं, वे [दोनों किरण और होत्रक] निश्चय करके एक एक हैं, इस लिये वे [होत्रक] एक उक्थ वाले होते हैं। (तत् यत् एकैकस्य रश्मेः द्वौ द्वौ वर्णौ भवतः, तस्मात् द्विसूक्ताः) फिर जो एक एक किरण के दो दो रूप [शुक्ल और कृष्ण] होते हैं। इस लिये वे [होत्रक] दो सूक्त वाले होते हैं ॥

(संवत्सरः वाव होता, सः वै एकः एव, तस्मात् एकसूक्तः) संवत्सर [के समान] ही होता है, वह निश्चय करके एक ही है, इस लिये वह [होता] एक सूक्त वाला है। (तस्य यत् द्व्यानि [द्व्ययनानि] अहानि भवन्ति अन्यानि शीतानि अन्यानि उष्णानि, तस्मात् द्व्युक्थः) उस [संवत्सर] के जो दो अयन [सूर्य के मार्ग, दक्षिणायन और उत्तरायण] वाले होते हैं, एक शीत और एक उष्ण, इस लिये वह [होता] दो उक्थ वाला होता है। (ऋतवः वाव होत्राः, ते वै एकैकं, तस्मात् एकोक्थाः) ऋतुओं [के समान] ही होत्रक लोग हैं, वे ही एक एक हैं, इस लिये वे [होत्रक] एक उक्थ वाले हैं। (तत् यत् एकैकस्य ऋतौ [= ऋतोः] द्वौ द्वौ मासौ भवतः, तस्मात् द्विसूक्ताः) सो जो एक एक ऋतु के दो दो महीने होते हैं इस लिये वे [होत्रक] दो सूक्त वाले हैं ॥

(पुरुषः वाव होता, सः वै एकः एव तस्मात् एकसूक्तः) पुरुष [के समान] ही होता है वह निश्चय करके एक ही है, इस लिये वह [होता] एक सूक्त वाला है।

६—(आहुः) कथयन्ति (विध्यातः) वि+ध्यै चिन्तने—क्तः। विविध-चिन्तितः (भाः) किरणः (वर्णौ) शुक्लादिरूपे (द्व्यानि) द्व्ययनानि द्वे अयने दक्षिणायनमुत्तरायणं च येषां तानि (ऋतौ) ऋतोः (प्रत्यङ्) प्रति+अञ्चु गतिपूजनयोः—क्विन्। पश्चाद्देशभवः (द्युतिः) कंशंभ्यां बभयुस्तितुतयसः (पा० ५।२।१३८) द्वि—तिः[1] मत्वर्थे, वर्णव्यत्यये सति सम्प्रसारणेन वकारस्य उकारः इकारस्य यकारः। द्वित्वयुक्तम् (अतिरिच्येते) अधिके वर्तेते (व्यवच्छि-

---

१—द्वि शब्द से न तो ति प्रत्यय का विधान है, न ही व के स्थान पर उ करने मात्र से द्युति बन सकता है। इस प्रकार अर्थ भी सङ्गत नहीं हो पाता। अतः यह शब्द दीप्ति अर्थ वाली द्युत धातु से औणादिक इन् प्रत्यय करके बनाना समीचीन प्रतीत होता है ॥ सम्पा० ॥

(सः यत् पुरुषः अन्यथा एव प्रत्यङ् भवति, अन्यथा प्राङ् भवति, तस्मात् द्व्युक्थः) सो जो पुरुष एक प्रकार से ही पीछे की ओर होता है और दूसरे प्रकार से सामने की ओर, इसलिये वह [होता] दो उक्थ वाला है। (अङ्गानि वाव होत्राः, तानि वै एकैकं, तस्मात्, एकोक्थाः) अङ्गों [के समान] ही होत्रक लोग हैं, वे [अङ्ग] ही एक एक हैं, इसलिये वे [होत्रक] एक उक्थ वाले हैं। (तत् यत् एकैकम् अङ्गं द्युतिः भवति, तस्मात् द्विसूक्ताः) उस [पुरुष] का जो एक एक अङ्ग [जैसे हाथ और पांव] दो अवयव वाला होता है, इसलिये वे [होत्रक] दो सूक्त वाले होते हैं॥

(तत् आहुः, यत् द्व्युक्थः एकसूक्तः होता, एकोक्थाः द्विसूक्ताः होत्राः, कथं तत् समं भवति) वे कहते हैं—जो दो उक्थ वाला और एक सूक्त वाला होता है, और एक उक्थ वाले और दो सूक्त वाले होत्रक होते हैं, कैसे यह कर्म समान होता है। (यत् एव द्विदेवत्याभिः यजन्ति, अथो यत् द्विसूक्ताः होत्राः इति ब्रूयात्) जब ही दो देवता वाली ऋचाओं से यज्ञ करते हैं, और जब दो उक्थ वाले होत्रक हैं, वह यह बतलावे। (तत् आहुः यत् अग्निष्टोमे एव यज्ञे सति होतुः द्वे उक्थे अतिरिच्येते कथं तः होत्राः न व्यवच्छिद्यन्ते इति) जब अग्निष्टोम ही यज्ञ होने पर होता के दो उक्थ बढ़ते हैं, कैसे उससे होत्रक लोग नहीं अलग अलग होते। (यत् एव द्विदेवत्याभिः यजन्ति, अथो यत् द्विसूक्ताः होत्राः इति ब्रूयात्) [उत्तर] जब ही दो देवता वाली ऋचाओं से वे यज्ञ करते हैं, फिर जब दो सूक्त वाले होत्रक हैं [इसलिये वे अलग अलग नहीं होते]—यह कहे। (तत् आहुः यत् अग्निष्टोमे एव यज्ञे सति सर्वाः देवताः सर्वाणि छन्दांसि आप्याययन्ति, अथ कतमेन छन्दसा कया देवतया अयातयामानि उक्थानि प्रणयन्ति इति) वे कहते हैं–जब अग्निष्टोम ही यज्ञ होने पर सब देवताओं और सब छन्दों को वे बढ़ाते हैं, फिर कौन से छन्द से और किस देवता से समय के अनुकूल उक्थों को वे आगे लाते हैं। (गायत्रेण छन्दसा अग्निना देवतया इति ब्रूयात्) गायत्री छन्द से और अग्नि देवता से [समय के अनुकूल उक्थों को वे आगे लाते हैं]—ऐसा वह कहे। (यज्ञं तन्वानान् देवान् ह असुररक्षांसि यज्ञपर्वणि अभिचेरिरे, एषां यज्ञं तृतीयसवनं प्रति हनिष्यामः) यज्ञ फैलाते हुये देवताओं से असुर और राक्षस यज्ञ के उत्सव में अभिचार [छल प्रयोग] करने लगे––इनके यज्ञ को तीसरे सवन में हम नष्ट कर देंगे, (तृतीयसवने ह अरिष्टः यज्ञः तु वलिष्ठः, एषां प्रतनुं यज्ञं हनिष्यामः इति) तीसरे सवन में ही बिना बिगड़ा हुआ यज्ञ अति बलवान् होता है, इनके फैले हुए यज्ञ को हम नष्ट कर देंगे। (ते दक्षिणतः वरुणं, मध्यतः बृहस्पतिं, उत्तरतः विष्णुम् अयोजयन्) उन [देवताओं] ने दक्षिण ओर वरुण को, बीच में बृहस्पति को और उत्तर

द्यन्ते) विभिद्यन्ते। विनश्यन्ते (अयातयामानि) न यातो गतो याम उचितसमयो येषां तानि। समयानुकूलानि (अभिचेरिरे) अभिचार कपटविचारं चक्रुः (अरिष्टः) अहिंसितः। सुरक्षितः (प्रतनुम्) विस्तृतम् (हनिष्यामः) नाशयिष्यामः (स्तु) अकारलोपः। अस्तु (व्यश्नवामहै) प्राप्नुयाम। समापयाम (मद्द्वितीयाः) अस्मद्—द्वितीय। प्रत्ययोत्तरपदयोश्च (पा० ७।२।९८) इति

में विष्णु को नियुक्त किया। (ते अब्रुवन्, एकैका: स्म: इदं न उत्सहामहे इति, स्तु [अस्तु] न: द्वितीय: येन सह इदं व्यश्नवामहै इति) वे [तीनों] बोले--हम एक एक हैं, इस काम में हम उत्साह नहीं कर सकते, इसलिए हमारा कोई दूसरा [सहायक] हो। जिसके साथ इस काम को हम प्राप्त कर लें। (तान् इन्द्र: अब्रवीत्, सर्वे मद्-द्वितीया: स्थ इति) उनसे इन्द्र बोला--तुम सब मुझे दूसरा [सहायक] रखने वाले हो। (ते सर्वे इन्द्र (=इन्द्रेण) द्वितीया:, तस्मात् ऐन्द्रावारुणम्, ऐन्द्राबार्हस्पत्यम्, ऐन्द्रावैष्णवम् अनुशस्यते) वे सब इन्द्र के साथ सहाय वाले हैं, इसलिए इन्द्र-वरुण वाला, इन्द्र बृहस्पति वाला और इन्द्र-विष्णु वाला सूक्त निरन्तर बोला जाता है। (द्वितीयवन्त: ह वै एतेन स्वा: भवन्ति, द्वितीयवन्त: [=द्वितीयवान्] मन्यते, य: एवं वेद) इस [विधान] से ही दूसरे [सहायक] वाले अपने लोग होते हैं, दूसरे [सहायक] वाला वह माना जाता है जो ऐसा विद्वान् है ॥ ६ ॥

भावार्थ:—मनुष्य को चाहिये कि संसार में सङ्घटन करके कार्य सिद्धि करे ॥ ६ ॥

विशेष:—इस कण्डिका के लिए देखो ऐ० ब्रा० ६ । १३ तथा १४ ॥

कण्डिका ७ ॥

आग्नेयीषु मैत्रावरुणस्योक्थं प्रणयन्ति, वीर्यं वा अग्नि:, वीर्येणैवास्मै तत् प्रणयन्ति। ऐन्द्रावारुणमनुशस्यते, वीर्यं वा इन्द्र:, क्षत्रं वरुण:, पशव उक्थानि, वीर्येणैव तत् क्षत्रेण चोभयत: पशून् परिगृह्णाति स्थित्या अनपक्रान्त्यै। ऐन्द्रीषु ब्राह्मणाच्छंसिन उक्थं प्रणयन्ति, वीर्यं वा इन्द्र: वीर्येणैवास्मै तत् प्रणयन्ति। ऐन्द्राबार्हस्पत्यमनुशस्यते, वीर्यं वा इन्द्र:, ब्रह्म बृहस्पति: पशव उक्थानि, वीर्येणैव तद्ब्रह्मणा चोभयत: पशून् परिगृह्णाति स्थित्या अनपक्रान्त्यै। ऐन्द्री-ष्वच्छावाकस्योक्थं प्रणयन्ति, वीर्य्यं वा इन्द्र:, वीर्य्येणैवास्मै तत् प्रणयन्ति। ऐन्द्रावैष्णवमनुशस्यते, वीर्य्यं वा इन्द्र:, यज्ञो विष्णु:, पशव उक्थानि, वीर्येणैव तद्यज्ञेन चोभयत: पशून् परिगृह्य क्षत्रेऽन्तत: प्रतिष्ठापयति। तस्माद्ध क्षत्रियो भूयिष्ठं हि पशूनामीशते योऽधिष्ठाता प्रदाता, यस्मै प्रत्ता वेदा अवरुद्धा: तान्ये-तान्यैन्द्राणि। जागतानि शंसन्ति, अथो एतैरेव सेन्द्रं तृतीयसवनमेतैर्जागतं सवनं, धराणि ह वा अस्यैतान्युक्थानि भवन्ति, यन्नाभानेदिष्ठो बालखिल्यो वृषाकपि-रेवयामरुत्, तस्मात् तानि सार्द्धमेवोपेयु:, सार्द्धमिदं रेत: सिक्तं समृद्धं, एकधा प्रजनयामेति ये ह वा एतानि नानूपेयु:, यथा रेत: सिक्तं विलुम्पेत कुमारं वा जातमङ्गशो विभजेत् तादृक् तत्। तस्मात्तानि सार्द्धमेवोपेयु:। सार्धमिदं रेत: सिक्तं समृद्धमेकधा प्रजनयामेति। शिल्पानि शंसति, यदेव शिल्पानि, एतेषां वै शिल्पानामनुकृतिर्हि शिल्पमधिगम्यते, हस्ती कंसो वासो हिरण्यमश्वतरी रथ-शिल्पं, शिल्पं हास्य समधिगम्यते, य एवं वेद, यदेव शिल्पानि शंसति तत् स्वर्गस्य

रूपसिद्धि: । अहं द्वितीय: सहायको येषां ते (इन्द्रम्) इन्द्रेण । वीर्येण—क० ७ (अनु) निरन्तरम् (मन्यते) ज्ञायते ॥

लोकस्य रूपम् । यद्वेव शिल्पानि, आत्मसंस्कृतिर्वै शिल्पान्यात्मानमेवास्य तत् संस्कुर्वन्ति ॥ ७ ॥

कण्डिका ७ ॥ यज्ञ में उक्थों और शिल्पों का वर्णन ॥

(आग्नेयीषु मैत्रावरुणस्य उक्थं प्रणयन्ति) अग्नि देवता वाली ऋचाओं में मैत्रावरुण ऋत्विज् के उक्थ [स्तोत्र] को आगे लाते हैं । (वीर्यं वै अग्निः, वीर्येण एव अस्मै तत् प्रणयन्ति) वीर्य [पराक्रम] ही अग्नि है, वीर्य के साथ ही इस [यजमान] के लिये उस [उक्थ] को आगे लाते हैं । (ऐन्द्रावारुणम् अनुशस्यते) इन्द्र-वरुण देवता वाला [उक्थ] फिर बोला जाता है । (वीर्यं वै इन्द्रः क्षत्रं वरुणः, पशवः उक्थानि, तत् वीर्येण एव क्षत्रेण च उभयतः पशून् स्थित्याः अनपक्रान्त्यै परिगृह्णाति) वीर्य ही इन्द्र है, राज्य वरुण है, सब पशु उक्थ हैं, तप वीर्य के साथ और राज्य के साथ ही दोनों ओर से पशुओं को स्थिति [ठहराव] की अचलता [दृढ़ता] के लिये वह [यजमान] ग्रहण करता है । (ऐन्द्रीषु ब्राह्मणाच्छंसिनः उक्थं प्रणयन्ति) इन्द्र देवता वाली ऋचाओं में ब्राह्मणाच्छंसी के उक्थ को आगे लाते हैं । (वीर्यं वै इन्द्रः, वीर्येण एव अस्मै तत् प्रणयन्ति) वीर्य [पराक्रम] ही इन्द्र है, वीर्य के साथ ही इस [यजमान] के लिये उस [उक्थ] को आगे लाते हैं । (ऐन्द्राबार्हस्पत्यम् अनुशस्यते) इन्द्र-बृहस्पति वाला उक्थ फिर बोला जाता है । (वीर्यं वै इन्द्रः, ब्रह्म बृहस्पतिः, पशवः उक्थानि, तत् वीर्येण एव ब्रह्मणा च उभयतः पशून् स्थित्याः अनपक्रान्त्यै परिगृह्णाति) वीर्य ही इन्द्र है, ब्रह्म [वेदज्ञान] बृहस्पति है, सब पशु उक्थ हैं, तब वीर्य के साथ और ब्रह्म के साथ ही दोनों ओर से पशुओं को स्थिति [ठहराव] की अचलता के लिये वह [यजमान] ग्रहण करता है । (ऐन्द्रीषु अच्छावाकस्य उक्थं प्रणयन्ति) इन्द्र देवता वाली ऋचाओं में अच्छावाक के उक्थ को आगे लाते हैं । (वीर्यं वै इन्द्रः, वीर्येण एव अस्मै तत् प्रणयन्ति) वीर्य [पराक्रम] ही इन्द्र है, वीर्य के साथ ही इस [यजमान] के लिये उस [उक्थ] को आगे लाते हैं । (ऐन्द्रावैष्णवम् अनुशस्यते) इन्द्र-विष्णु वाला उक्थ फिर बोला जाता है । (वीर्यं वै इन्द्रः, यज्ञः विष्णुः पशवः उक्थानि, तत् वीर्येण एव च यज्ञेन उभयतः पशून् परिगृह्य क्षत्रे अन्ततः प्रतिष्ठापयति) वीर्य ही इन्द्र है, यज्ञ [देव पूजनादि] विष्णु [व्यापक] है, सब पशु उक्थ हैं, तब वीर्य से साथ और यज्ञ के साथ ही दोनों ओर से पशुओं को ग्रहण करके राज्य पर अन्त में [यजमान को] स्थापित करता है । (तस्मात् उ क्षत्रियः भूयिष्ठं हि पशूनाम् ईशते यः अधिष्ठाता प्रदाता, यस्मै प्रत्ताः वेदाः अवरुद्धाः, तानि एतानि ऐन्द्राणि) इसलिये ही क्षत्रिय [राजा] बहुत करके ही पशुओं का स्वामी है, जो अधिष्ठाता और बड़ा दाता है और जिसके लिये [ऋषियों को] दिये हुये वेद रक्षित हैं, वह ही यह सब इन्द्र के कर्म हैं ॥

(जागतानि शंसन्ति) जगती छन्द वाले [उक्थों] को वे बोलते हैं । (अथो एतैः एव सेन्द्रं तृतीयसवनम्, एतैः जागतं सवनम्) फिर इन [उक्थों] करके ही

७—(आग्नेयीषु) अग्निदेवताकासु ऋक्षु (प्रणयन्ति) प्रकर्षेण प्राप्नुवन्ति (अनपक्रान्त्यै) अचलतायै (प्रतिष्ठापयति) स्थापयति (ईशते) ईष्टे । ईश्वरो

इन्द्र सहित तीसरा सवन है, इन ही करके जागत [जगत् का उपकारक] सवन है। (धराणि ह वै अस्य एतानि उक्थानि भवन्ति, यत् नाभानेदिष्ठः, बालखिल्यः वृषाकपिः, एवयामरुत्) धारण योग्य ही इस [सवन] के यह उक्थ हैं, जो नाभानेदिष्ठ [इदमित्था रौद्रं गूर्तवचा, और ये यज्ञेन दक्षिणया समक्ता······ ऋ० १०। ६१ तथा ६२, यह नाभानेदिष्ठ [वेद सम्बन्ध में अति समीप ऋषि वाले दो सूक्त], वालखिल्य [अभि प्रवः सुराधस······ आदि, ऋ० ८। ४९। ५९ यह वालखिल्य [स्वीकार योग्य के ग्रहण करने वाले नाम के ग्यारह सूक्त], वृषाकपि [वि हि सोतोरसृक्षत··· ऋ० १०। ८६, यह वृषाकपि [बलवान् चेष्टा कराने वाले ऋषि वाला सूक्त] और एवयामरुत् [प्र वो महे मतयो यन्तु······ऋ० ५। ८७] यह एवयामरुत् [पाने योग्य का प्राप्त कराने वाला शत्रु-नाशक ऋषि का सूक्त] है। (तस्मात् तानि सार्द्धम् एव उपेयुः) इस लिये इन को एक साथ ही वे प्राप्त करें। (इदं रेतः सार्द्धं सिक्तं समृद्धम्, एकधा प्रजनयाम इति) यह वीर्य एक साथ सींचा हुआ सफल होता है, [इस लिये] एक प्रकार से [एक साथ] हम उत्पन्न करें। (ये ह वै एतानि न अनूपेयुः यथा रेतः सिक्तं विलुम्पेत, कुमारं वा जातं अङ्गशः विभजेत्, तादृक् तत्) जो [ऋत्विज् लोग] इन [उक्थों] को न लगातार प्राप्त करें, जैसे वीर्य सींचा हुआ छिन्न भिन्न हो जावे [तब] वह कुमार [गर्भस्थ बालक] अथवा उत्पन्न हुये बालक को अङ्ग अङ्ग से खण्डित कर देवे, वैसे ही वह [यज्ञ कर्म खण्डित] होता है। (तस्मात् तानि सार्द्धम् एव उपेयुः) इस लिये उन

भवति (अवरुद्धाः) रक्षिताः (धराणि) धारणीयानि। सहचराणि (नाभानेदिष्ठः) नहो भश्च (उ० ४। १२६) णह बन्धने—इञ्, हस्य भः। सुपां सुलुक्० (पा० ७। १। ३९) नाभि—डा। अन्तिक—इष्ठन्। अन्तिकबाढयोर्नेदसाधौ (पा० ५। ३। ६३) नेदादेशः। नाभौ वेदसम्बन्धे नेदिष्ठोऽतिसमीपः। ऋषिविशेषः। नाभा-दिष्ठेन दृष्टम् उक्थम् (वालखिल्यः) वृञ् वरणे—घञ्. रस्य लः + खल कणश-आदाने—क्यप्। व लं पर्व वृणोतेः—निरु० ११। ३१। वरणीयस्य स्वीकरणी-यस्य ग्राहयिता। वालखिल्यसंज्ञकानि सूक्तानि (वृषाकपिः) कनिन् युवृषितक्षि० (उ० १। १५।) वृष सेचने पराक्रमे च--कनिन्, यद्वा इगुपधज्ञाप्रीकिरः कः (पा० ३। १। १३५) इति कप्रत्ययः। कुण्ठिकम्प्योर्नलोपश्च (उ० ४। १४४) कपि चलने—इप्रत्ययः। अन्येषामपि दृश्यते (पा० ६। ३। १३७) इति दीर्घः। वृषा-कपिः पदनाम—निघ० ५। ६। अथ यद् रश्मिभिरभिप्रकम्पयन्नेति तद्वृषाक-पिर्भवति वृषाकम्पनः—निरु० १२। २७। हरविष्णू वृषाकपी—अमरः ९३। १३०। वृषाकपिः = विष्णुः शिवः, अग्निः, इन्द्रः, सूर्यः,—इति शब्दकल्पद्रुमः। वृषा बलवान्, कपिः कम्पयिता चेष्टयिता इन्द्रो जीवात्मा। ऋषिविशेषः। वृषा-कपिदृष्टसूक्तम् (एवयामरुत्) इण्शीभ्यां वन् (उ० १। १५२) इण् गतौ—वन् + या प्रापणे—कः, आर्षो दीर्घः। मृग्रोरुतिः (उ० १। ९४) मृङ् प्राणत्यागे—उतिः। एवयः प्रापणीयस्य प्रापकश्चासौ मरुत् शत्रूणां मारयिता च। ऋषिविशेषः। एव-यामरुत्संज्ञकेन दृष्टं सूक्तम् (उपेयुः) उप—ईयुः। प्राप्नुयुः (प्रजनयाम) उत्पाद-

[चार उक्थों] को एक साथ ही प्राप्त करें। (इदं रेतः सार्द्धं सिक्तं समृद्धम्, एकधा प्रजनयाम इति) यह वीर्य एक साथ सींचा हुआ सफल होता है, [इसलिये] एक प्रकार से [एक साथ] हम उत्पन्न करें ।।

(शिल्पानि शंसति) शिल्प [कला कौशल वाले नाभानेदिष्ठ ऋषि के सूक्तों, ऋ० १० । ६१, ६२] को वह बोलता है। (यत् एव शिल्पानि, एतेषां शिल्पानां वै अनुकृतिः, हि शिल्पम् अधिगम्यते) जो ही शिल्प सूक्त हैं, वे इन शिल्पों का अनुकरण [दृष्टान्त] हैं, क्योंकि [इनसे] शिल्प समझा जाता है। (हस्ती कंसः, वासः, हिरण्यम् अश्वतरी रथशिल्पम्) हाथी, कंस [चमकीला द्रव्य वा पात्र], वस्त्र, सुवर्ण आभूषण और खच्चरी रथ के शिल्प हैं। (शिल्पं ह अस्य समधिगम्यते, यः एवं वेद) शिल्प ही उस पुरुष का अच्छे प्रकार समझा जाता है, जो ऐसा विद्वान् है। (यत् एव शिल्पानि शंसति, तत् स्वर्गस्य लोकस्य रूपम्) जो ही वह शिल्प सूक्तों को बोलता है, वह स्वर्ग लोक का रूप है। (यत् उ एव शिल्पानि, वै आत्मसंस्कृतिः, शिल्पानि एव अस्य आत्मानम् तत् संस्कुर्वन्ति) जो ही शिल्प कर्म हैं, वे ही आत्मा के संस्कार [शुद्ध वासनायें] हैं, शिल्प कर्म ही इस [मनुष्य] के आत्मा को तब संस्कार युक्त करते हैं ।। ७ ।।

भावार्थः—मनुष्यों को चाहिये कि वेदमन्त्रों को भली भांति विचार कर और शिल्पशास्त्र आदि विद्याओं में निपुण होकर आनन्द भोगें ।। ७ ।।

विशेषः—इस कण्डिका के लिये देखो ऐ० ब्रा० ५ । १५ तथा ६ । २७ ।।

कण्डिका ८ ।।

नाभानेदिष्ठं शंसति, रेतो वै नाभानेदिष्ठः। रेत एवास्य तत् कल्पयति। तद्रेतो मिश्रं भवति, क्षमया रेतः सञ्जरमानो निषिञ्चदिति, रेतसः समृध्या एव। तं नाराशंसं शंसति, प्रजा वै नरः, वाक् शंसः, प्रजासु तद्वाचं दधाति। तस्मादिमाः प्रजा अदन्त्यो जायन्ते। तं हैके पुरस्तात् प्रगाथानां शंसन्ति, पुरस्तादायतना वागिति वदन्ते, उपरिष्टादेके। उपरिष्टादायतना वागिति वदन्तो मध्य एव शंसेत्, मध्यायतना वा इयं वाग्, उपरिष्टान्नेदीयसीव तं होता रेतोभूत शस्त्वा मैत्रावरुणाय सम्प्रयच्छति। एतस्य त्वं प्राणान् कल्पयेति बालखिल्याः शंसति, प्राणा वै बालखिल्याः, प्राणानेवास्य तत् कल्पयति। ता विहृताः शंसति, विहृता वै प्राणाः प्राणेनापानो अपानेन व्यानः। स पच्छः प्रथमे सूक्ते विहरति, अर्द्धर्चशो

याम (विलुम्पेत) लुप्लृ छेदने । विनाशयेत् (विभजेत्) विभक्तं कुर्यात् (शिल्पानि) खष्पशिल्पशष्पवाष्प० (उ० ३ । २८) शील समाधौ—पः, ह्रस्वत्वम् । कौशलानि । शिल्पसूक्तानि (अनुकृतिः) अनुकरणम् । सदृशीकरणम् (कंसः) वृतॄवदिवचिवसिहनिकमिकषिभ्यः सः (उ० । ३ । ६२) कमु कान्तौ—सः । तैजसद्रव्यं पात्रम् (हिरण्यम्) सुवर्णभूषणम् (आत्मसंस्कृतिः) आत्मनः शुद्धवासना (संस्कुर्वन्ति) शोधयन्ति ।।

३३

अथैतशप्रलापं शंसति, एता अश्वा आप्लवन्त इति। ऐतशो ह मुनिर्यज्ञस्यायुर्ददर्श। स ह पुत्रानुवाच, पुत्रका यज्ञस्यायुरभिददृक्षं तदभिलपिष्यामि मा मा तृप्तं मन्यध्वमिति। तथेति तदभिललाप। तस्य ह इत्यग्निरैतशायनो ज्येष्ठः पुत्रोऽभिदुद्रुत्य मुखमपि जग्राह, ब्रुवन्, तृप्तो नः पितेति। स होवाच, धिक् त्वा जाल्मापरस्य पापिष्ठान्ते प्रजां करिष्यामीति। यो मे मुखं प्राग्र[1]हीष्यो यदि जाल्म मे मुखं प्राग्रहीष्यः, शतायुषं गामकरिष्यं सहस्रायुषं पुरुषमिति। तस्मादभ्यग्नय ऐतशायना आजानेयाः सन्तः पापिष्ठा अन्येषां बलिहृतः पितायच्छन् ताः स्वेन प्रजापतिना स्वया देवतया। यदैतशः, प्रलापः, तत् स्वर्गस्य लोकस्य रूपम्। यद्वेवैतशः प्रलापः, यातयामा वा क्षितिः, ऐतशैतशः प्रलापोऽयातयामा मे यज्ञोऽसदक्षितिर्मे[2] यज्ञोऽसदिति। तं वा ऐतशैतशप्रलापं शंसति, पदावग्राहन्तासामुत्तमेन पदेन प्रणौति, यथा निविदः। अथ प्रवह्लिकाः पूर्वं[3] शस्त्वा विततौ किरणौ द्वाविति प्रतिराधानुत्तराः शंसति, भुगित्यभिगत इति

१ पू. सं. "प्रागृहीष्यः" इति पाठः। २. पू. सं अक्षिति मे इति पाठः॥
३. पू. सं. पूर्वंशस्त्वा इति पाठः॥ सम्पा० ॥

प्रवह्लिकाभिर्ह वै देवा असुराणां रसान् प्रववृहुः । तद्यथाभिर्ह वै देवा असुराणां रसान् प्रववृहुः, तस्मात् प्रवह्लिकाः, तत् प्रवह्लिकानां प्रवह्लिकात्वम् । ता वै प्रतिराधैः प्रत्यराध्नुवन् । तद्यत् प्रतिराधैः प्रत्यराध्नुवन्, तस्मात् प्रतिराधाः, तत् प्रतिराधानां प्रतिराधत्वम् । प्रवह्लिकाभिरेव द्विषतां भ्रातृव्याणां रसान् प्रवह्लिकास्ता वै प्रतिराधैः प्रतिराध्नुवन्ति, ताः प्रग्राहमित्येव । अथाजिज्ञासेन्याः शंसति, इहेत्थ प्रागपागुदगधरागिति । आजिज्ञासेन्याभिर्ह वै देवा असुरानाज्ञाय अथैनानत्यायन्, तथैवैतद्यजमाना आजिज्ञासेन्याभिरेवाप्रियं भ्रातृव्यमागायाथैनमतियन्ति । ता अर्द्धर्चशः शंसति, प्रतिष्ठित्या एव । अथातिवादं शंसति, वी३मे देवा अक्रंसतेति । श्रीर्वा अतिवादस्तमेकर्च्चं शंसति, एकस्ता वै श्रीस्तां वै विरेभं शंसति, विरेभैः श्रियं पुरुषो वहतीति । तामर्द्धर्चशः शंसति, प्रतिष्ठित्या एव ॥ १३ ॥

कण्डिका १३ ॥ कुन्ताप सूक्तों में ऐतशप्रलाप, प्रवह्लिका, प्रतिराध, आजिज्ञासेन्या, और अतिवाद मन्त्रों का प्रयोग ॥

(अथ ऐतशप्रलापं[1] शंसति, एता अश्वा आप्लवन्ते, इति) अब ऐतशप्रलाप [ऐतश ज्ञानवान् ऋषि का आलाप] वह [ऋत्विज्] बोलता है—एता अश्वा आप्लवन्ते······अथर्व० २० । १२९ । १–२०, यह सूक्त है । (ऐतशः ह मुनिः यज्ञस्य आयुः ददर्श) ऐतश [ज्ञानवान्] मुनि ने [इस सूक्त में] यज्ञ के आयु [जीवन काल] को देखा । (सः ह पुत्रान् उवाच, पुत्रकाः यज्ञस्य आयुः अभिददृक्षम् तत् अभिलपिष्यामि, मा मा तृप्तं मन्यध्वम् इति) वह पुत्रों से बोला—हे प्यारे पुत्रो ! यज्ञ के जीवन काल को मैंने देखा है, उसको मैं आलापूंगा, मुझको तुम मत तृप्त मानो [मत रोको] । (तथा इति) [वे बोले] ऐसा ही हो । (तत् अभिललाप) उसने उसे आलापा । (तस्य ह इति अग्निः ऐतशायनः ज्येष्ठः पुत्रः अभिदुर्द्दृत्य मुखम् अपि जग्राह, ब्रुवन् नः पिता तृप्तः इति) अग्नि नामक ऐतश गोत्र में उत्पन्न उसके जेठे पुत्र ने निरादर करके मुँह पकड़ लिया यह बोलते हुये—हमारा पिता बस करे । (सः ह उवाच, धिक् त्वा जाल्मापरस्य ते प्रजां पापिष्ठां करिष्यामि इति) वह बोला—तुझे धिक्कार है, तुझ क्रूर व्यवहार वाले की प्रजा

१३—(ऐतशप्रलापम्) इणस्तशन्तशसुनौ (उ० ३ । १४९) इण् गतौ—तशन्, एतश—अण् ऐतशम् । ऐतशस्य ब्राह्मणस्य सम्बन्धित्वं प्रलापम् आलापम् (अश्वाः) अशूङ् व्याप्तौ—क्वन्, टाप् । व्यापिकाः प्रजाः (आ) आगत्य (प्लवन्ते) गच्छन्ति (आयुः) एतेर्णिच्च (उ० २ । ११८) इण् गतौ—उसिः णित् । जीवनम् । जीवनज्ञानम् (पुत्रकाः) हे प्रियपुत्राः (अभिददृक्षम्) दृष्टवानस्मि (अभिलपिष्यामि) अभितः कथयिष्यामि (ऐतशायनः) अश्वादिभ्यः फञ् (पा० ४ । १ । ११०) एतश ऐतश वा—फञ् बाहुलकात् । ऐतशस्य गोत्रोत्पन्नः (अभिदुर्द्दृत्य) अनादृत्य (ब्रुवन्)

---

१. ऐतरेय ब्राह्मण के अनुसार ऐतश मुनि के पुत्र ने ऐतश को मनोविकृत बताया है जो कि इसके अग्रिम प्रलाप से स्पष्ट है ॥ सम्पा० ॥

को महादुखी कर दूंगा, (यः मे मुखं प्राग्रहीष्यः यदि जाल्म मे मुखं प्राग्रहीष्यः) जिस तूने मेरे मुँह को पकड़ा है, यदि हे क्रूर ! तूने मेरे मुँह को पकड़ा है। (शतायुषं गाम् अकरिष्यं सहस्रायुषं पुरुषम् इति) [नहीं तो] सौ बरस वाली गाय और सहस्र वर्ष वाला पुरुष को मैं कर देता। (तस्मात् अभ्यग्नयः ऐतशायनाः आजानेयाः सन्तः पापिष्ठाः अन्येषां बलिहृतः, पिता ताः स्वेन प्रजापतिना स्वया देवतया अयच्छन् [= अयच्छत्]) इसलिये ऐतश के गोत्र वाले अभ्यग्नि नाम वाले आजानेय [बड़ी गति से ले चलने वाले उत्तम घोड़ों के समान] होते हुये महादुखी, दूसरों के अन्न पाने वाले [हुये, क्योंकि] पिता ने उन [प्रजा लोगों] को अपने प्रजापालक व्यवहार से अपने देवता द्वारा रोका [शाप दिया]। (यत् ऐतशः, प्रलापः तत् स्वर्गस्य लोकस्य रूपम्) जो यह ऐतश आलाप है, वह स्वर्ग लोक का रूप है। (यत् उ एव ऐतशः प्रलापः यातयामा वा क्षितिः) क्योंकि उचित समय बीता हुआ ही ऐतशप्रलाप हानि है। (अयातयामा) [= अयातयामः] ऐतशैतशः प्रलापः मे यज्ञः असत् अक्षितिः मे यज्ञः असत् इति) उचित समय बिना चूका हुआ ऐतशप्रलाप वाला मेरा यज्ञ होवे, हानि रहित मेरा यज्ञ होवे। (तं वै ऐतशैतशप्रलापं पदावग्राहं शंसति, तासाम् उत्तमेन पदेन यथा निविदः प्रणौति) उस ही ऐतशप्रलाप को एक एक पाद लेकर वह बोलता है, [उन ऋचाओं] के पिछले पाद से निविद् मन्त्रों के समान प्रणव [ओङ्कार] करता है ॥

(अथ प्रवह्लिकाः पूर्वं शस्त्वा, विततौ किरणौ द्वौ, इति प्रतिराधान् उत्तराः शंसति, भगित्यभिगतः इति) फिर प्रवह्लिका [शत्रुओं को चलायमान करने वाली ऋचायें] पहले बोलकर—विततौ किरणौ द्वौ इति ····अथर्व० २० । १३३ । १—६, यह मन्त्र हैं, प्रतिराधों [शत्रुओं को रोकने वाले मन्त्रों] को पीछे वाली ऋचायें करके वह बोलता है—भुगित्यभिगतः इति ···· अथर्व० २० । १३५ । १–३, यह प्रतिराध मन्त्र हैं। (प्रवह्लिकाभिः ह वै देवाः असुराणां रसान् प्रववृहुः) प्रवह्लिका ऋचाओं से ही देवताओं [विद्वानों] ने असुरों के रसों [पराक्रमों] को उखाड़ दिया। (तद्

कथयन् सन् (तृप्तः) पर्याप्तः (जाल्मापरस्य) आर्षो दीर्घः । जल आच्छादने—मण् । जाल्मे क्रूरव्यवहारे परस्य[१] तत्परस्य (प्राग्रहीष्यः) प्र–अग्रहीष्यः । प्रकर्षेण गृहीतवान् असि (गाम्)—ऐ० ब्रा० ६ । ३३ । धेनुम् (सहस्रायुषम्) सहस्रवर्षजीवनयुक्तम् (आजानेयाः) अज गतिक्षेपणयोः—घञ् + आ + णीञ् प्रापणे—यत् । आजेन गमनेन आनेतारः । उत्तमघोटका इव (बलिहृतः) आहारस्य प्रापकाः (अयच्छन्) अयच्छत् नियमितवान् (यातयामा) विगतयोग्यः समयः (क्षितिः) हानिः (अयातयामा) प्राप्तयोग्यसमयः (असत्) भवेत् (पदावग्राहम्) पादेन पादेन अवगृह्य (प्रणौति) प्रणवेन ओङ्कारेण सह शंसति (प्रवह्लिकाः) प्र + ह्वल चलने—ण्वुल्, टाप्, प्रत्ययस्थात् कात्०(पा० ७।३।४४) इतीत्वम् प्रवह्लिकाख्याः ऋचः (प्रतिराधान्) प्रतिराधकान् ।

---

१. मूलपाठ पर नहीं, अपितु अपर है। अतः यह समास अर्थयुक्त नहीं बन सकेगा। 'अपरः जाल्मः' जाल्मापरः,—राजदन्तादित्वात् परनिपातः' यह उचित जान पड़ता है ॥ सम्पा० ॥

यथा अभिः ह वै देवाः असुराणां रसान् प्रववृहुः, तस्मात् प्रवल्हिकाः, तत् प्रवल्हिकानां प्रवल्हिकात्वम्) सो जैसे इन [ऋचाओं] से ही विद्वानों ने असुरों के रसों को उखाड़ दिया, इसलिये यह प्रवल्हिका [चलायमान करने वाली ऋचायें] हैं—यही प्रवल्हिकाओं का प्रवल्हिकापन है। (ताः वै प्रतिराधैः प्रत्यराध्नुवन्) उन [ऋचाओं] ने ही प्रतिराध मन्त्रों से [असुरों के पराक्रमों को] हटा दिया। (तत् यत् प्रतिराधैः प्रत्यराध्नुवन्, तस्मात् प्रतिराधाः, तत् प्रतिराधानां प्रतिराधत्वम्) सो जो प्रतिराध मन्त्रों से हटा दिया, इसलिये वे प्रतिराध मन्त्र हैं, यह ही प्रतिराध मन्त्रों का प्रतिराधपन है। (प्रवल्हिकाभिः एव द्विषतां भ्रातृव्याणां रसान् प्रवल्हिकाः, ताः वै प्रतिराधैः प्रतिराध्नुवन्ति, ताः प्रग्राहम् इति एव) प्रवल्हिका ऋचाओं से ही अप्रिय वैरियों के पराक्रमों को वे चलायमान करने वाली ऋचायें ही प्रतिराध मन्त्रों से हटा देती हैं, उनको पाद पाद करके [वह बोलता है]॥

(अथ आजिज्ञासेन्याः शंसति, इहेत्थ प्रागपागुदगधरागिति) फिर आजिज्ञासेन्याओं [शत्रुओं का तिरस्कार करने वाली ऋचाओं] को वह बोलता है—इहेत्थ प्रागपागुदगधराक् इति·· अथ० २० । १३४ । १–४, यह मन्त्र है। (आजिज्ञासेन्याभिः ह वै देवाः असुरान् आज्ञाय अथ एनान् अत्यायन् तथा एव एतत् यजमानाः आजिज्ञासेन्याभिः एव अप्रियं भ्रातृव्यम् आगाय अथ एनम् अतियन्ति।) आजिज्ञासेन्या ऋचाओं से ही विद्वानों ने असुरों को तिरस्कार करके फिर उनको उल्लंघन किया, वैसे ही अब यजमान लोग आजिज्ञासेन्या ऋचाओं से ही अप्रिय वैरी पर चढ़कर फिर उसको उल्लंघन करते हैं। (ताः अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उन [ऋचाओं] को आधी आधी ऋचाओं से प्रतिष्ठा के लिये वह बोलता है॥

(अथ अतिवादं शंसति, वी३मे देवा अक्रंसत इति) फिर वह अतिवाद [शत्रुओं के अधिक्षेप अर्थात् घुड़कने वाले मन्त्र] को वह बोलता है—वी३मे देवा अक्रंसत इति····अथर्व० २० । १३५ । ४, यह वह मन्त्र है। (श्रीः वै अतिवादः, तम् एकर्चं शंसति) श्री ही [सम्पत्ति का हेतु] अतिवाद है। उस एक ऋचा वाले को वह बोलता है। (एकः ताः [एका सा] श्रीः, तां वै विरेभं शंसति, विरेभैः श्रियं पुरुषः वहति इति) एक ही वह श्री है, उस [ऋचा] को विविध ध्वनि से वह बोलता है, विविध

प्रतिराधसंज्ञान् मन्त्रान् (भुक्) भुज पालनाभ्यवहारयोः—क्विप्। पालकः परमात्मा (अभिगतः) आभिमुख्येन प्राप्तः (रसान्) वीर्याणि (प्रववृहुः) वृह उद्यमने—लिट्। उद्यतवन्तः। उत्पाटितवन्तः (प्रग्राहम्) पादेन पादेन गृहीत्वा (आजिज्ञासेन्याः) आकारो अत्र अवशब्दार्थे। आज्ञातुमवज्ञातुमिच्छा आजिज्ञासा, तामर्हन्तीति तत् साधनीभूता ऋचः (इत्थ) इत्थम्। अनेन प्रकारेण (प्राक्) प्राच्यां दिशि (अपाक्) प्रतीच्यां दिशि (उदक्) उदीच्यां दिशि (अधराक्) नीच्यां दक्षिणस्यां दिशि (आज्ञाय) अवज्ञातवन्तः (आगाय) आभिमुख्येन प्राप्य (अतिवादम्) अतिक्षेपम्। तिरस्कारम्। अतिवादाख्यं सूक्तम् (इमे)

ध्वनियों से श्री को पुरुष पाता है। (ताम् अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उसको आधी आधी ऋचा करके प्रतिष्ठा के लिये ही वह बोलता है ॥ १३ ॥

भावार्थः—जो मनुष्य वेदों को विचार कर प्रयत्न के साथ वैरियों को निर्बल करते हैं, वे ही श्रीमान् होते हैं ॥१३॥

विशेषः १—इस कण्डिका को ऐ० ब्रा० ६ । ३३ से मिलाओ ॥

विशेषः २—प्रतीक वाले सूक्तों के पहिले पहिले मन्त्र अर्थ सहित लिखे जाते हैं। शेष मन्त्र वेद में देखो--

कुन्तापसूक्तानि ॥

१, ऐतश सूक्त—एता अश्वा आप्लवन्ते ॥ १ ॥ प्रतीपं प्राति सुत्वनम् ॥२॥ अथ० २० । १२९ । १—२० ॥ (एताः) यह (अश्वाः) व्यापक प्रजायें (प्रतीपम्) प्रत्यक्ष व्यापक (सुत्वनम् प्राति) ऐश्वर्य वाले [परमेश्वर] के लिये (आ) आकर (प्लवन्ते) चलती हैं ॥ १, २ ॥

२, प्रवह्लिका ऋचायें—विततौ किरणौ द्वौ तावा पिनष्टि पूरुषः। न वै कुमारि तत् तथा यथा कुमारि मन्यसे ॥ अथ० २० । १३३ । १—६ ॥ (द्वौ) दोनों (किरणौ) प्रकाश की किरणें [शारीरिक बल और आत्मिक पराक्रम] (विततौ) फैले हुये हैं, (तौ) उन दोनों को (पूरुषः) पुरुष [देहधारी जीव] (आ) सब ओर से (पिनष्टि) पीसता है [सूक्ष्म रीति से काम में लाता है]। (कुमारि) हे कुमारी! [कामना योग्य स्त्री] (वै) निश्चय करके (तत्) वह (तथा) वैसा (न) नहीं है, (कुमारि) हे कुमारी! (यथा) जैसा (मन्यसे) तू मानती है ॥

३, प्रतिराध सूक्त—भुगित्यभिगतः शलित्यपक्रान्तः फलित्यभिष्ठितः। दुन्दुभिमाहननाभ्यां जरितरोथामो दैव ॥ अथ० २० । १३५ । १—३ ॥ (भुक्) पालने वाला [परमात्मा] (अभिगतः) सामने पाया गया है--(इति) ऐसा है, (शल्) शीघ्रगामी वह (अपक्रान्तः) सुख से आगे चलता हुआ है--(इति) ऐसा है; (फल्) सिद्धि करने वाला वह (अभिष्ठितः) सब ओर ठहरा हुआ है--(इति) ऐसा है। (जरितः) हे स्तुति करने वाले (दैव) परमात्मा को देवता मानने वाले विद्वान्! (दुन्दुभिम्) ढोल को (आहननाभ्याम्) दो डंकों से (आ) सब ओर (उथामः) हम उठावें [बल से बजावें] ॥

४, आजिज्ञासेन्या ऋचायें—इहेत्थ प्रागपागुदगधराग्—अरालागुदभर्त्सथ-- अथ० २० । १३४ । १—६ ॥ (इह) यहाँ (इत्थ) इस प्रकार (प्राक्) पूर्व में, (अपाक्) पश्चिम में, (उदक्) उत्तर में और (अधराक्) दक्षिण में--(अरालागुदभर्त्सथ) हिंसा की गति को धिक्कारने वाला परमात्मा है ॥

प्रसिद्धाः (अक्रंसत) क्रमु पादविक्षेपे। पादं विक्षिप्तवन्तः। अग्रेगताः (विरेभम्) ध्वनिविशेषम् (वहति) प्राप्नोति ॥

५—अतिवाद मन्त्र—वीमे देवा अक्रंसताध्वर्यो क्षिप्रं प्रचर । सुसत्यमिद् गवामस्यसि प्रखुदसि—अथ० २० । १३५ । ४ ॥ (इमे देवाः) इन विद्वानों ने (वि) विविध प्रकार (अक्रंसत) पैर बढ़ाया है, (अध्वर्यो) हे हिंसा न करने वाले विद्वान् ! (क्षिप्रम्) शीघ्र (प्रचर) आगे बढ़ और (प्रखुदसि) बड़े आनन्द में (असि) तू हो, (असि) तू हो, [यह वचन] (गवाम्) स्तोताओं [गुण व्याख्याताओं] का (सुसत्यम् इत्) बड़ा ही सत्य है ॥

कण्डिका १४ ॥

अथादित्याश्चाङ्गिरसीश्च शंसति, आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन्निति । तद्देवनीथमित्याचक्षते । आदित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोकेऽस्पर्द्धन्त, वय पूर्वे स्वरेष्यामो वयं पूर्व इति । ते हाङ्गिरसः श्वःसुत्यां ददृशुः । ते हाग्नि[१] मूचुः, परेह्यादित्येभ्यः श्वःसुत्यां प्रब्रूहीति । अथादित्या अद्यसुत्यान्ददृशुः, ते हाग्नि[१] मूचुः, अद्यसुत्यास्माकं, तेषां नस्त्वं होतासीत्युदुपेमस्त्वामिति । स एत्याग्निरुवाच, अथादित्याः अद्यसुत्यामीक्षन्ते, कं वो होतारमवोचन्. वाह्वयन्ते युष्माकं वयमिति । ते हाङ्गिरसश्चु[२]क्रुधुः, मा त्वं गमो नु वयमिति । नेति हाग्निरुवाच, अनिन्द्या वै माह्वयन्ते किल्बिषं हि तद्योऽनिन्द्यस्य हवन्न इति । तस्मादतिदूरमत्यल्पमिति, यजमानस्य हवमियादेव देवाः । किल्बिषं हि तद्योऽनिन्द्यस्य हवन्न इति । तान् हादित्यानङ्गिरसो याजयाञ्चक्रुः, तेभ्यो हीमां पृथिवीं दक्षिणां निन्युः, तां ह न प्रतिजगृहुः सा हीयं, निवृत्तोभयतःशीर्ष्णी दक्षिणाः शुचाविद्धाः शोचमाना व्यचरन् कुपिताः, मा नः प्रत्यग्रहीषुरिति । तस्मा एते[३] निरदीर्यन्त, य एते प्रदरा[४] अधिगम्यन्ते । तस्मान्निवृत्तदक्षिणां नोपाकुर्य्यात् नैनां प्रमृजेन्नेद्दक्षिणां प्रमृणजानीति । तस्माद्य एवास्य समानजन्मा भ्रातृव्यः स्याद् वृणुहृयुः, तस्मा एनां दद्यात् । तन्नः पराची दक्षिणा विवृणक्ति, द्विषति भ्रातृव्येऽन्ततः शुचं प्रतिष्ठापयति । योऽसौ तपति स वै शंसति, आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन् तां ह जरितः प्रत्यायन्निति, न हीमां पृथिवीं प्रत्यायंस्तामु ह जरितः प्रत्यायन्निति, प्रतिहितेषु मायंस्तां ह जरितर्नः प्रत्यगृभ्णन्निति, न हीमां पृथिवीं प्रत्यगृभ्णंस्तामु ह जरितर्नः प्रत्यगृभ्णन्निति, प्रगृह्यादित्यमगृभ्णन्नहानेतरसन्न वि चेतनानीति । एष ह वा अह्नां विचेता, योऽसौ तपति । स वै शंसति, यज्ञानेतरसं न पुरोगवाम इति । एष ह वै यज्ञस्य पुरोगवी, यद्दक्षिणा यथार्हामः स्रस्तमितिरेतदन्तेत्येष एवेश्वर उन्नेता । उत श्वेत आशुपत्वा उतो पद्याभिर्यविष्ठः । उतेमाशु मानं पिपर्तीत्येष एव श्वेत एष शिशुपत्येष उतो पद्याभिर्यविष्ठः, उतेमाशु मानं पिपर्त्तीति, आदित्या रुद्रा वसवस्त्वेऽनु त इदं राधः प्रतिगृभ्णीह्यङ्गिरः । इदं राधो विभुः प्रभुरिदं राधो बृहद् पृथुः । देवा ददत्वासुरन्तद्वो अस्तु सुचेतनम् । युष्माँ अस्तु दिवेदिवे प्रत्येव गृभायतेति । तद्यदादित्याश्चा-

१. पू. सं. "हाग्निर" इति पाठः ॥ २. पू. सं. "चक्रुधुः" इति पाठः ॥ ३. पू. सं. "एताः" इति पाठः ॥ ४. पू. सं. "प्रतरा" इति पाठः ॥ सम्पा० ॥

ङ्गिरसीश्च शंसति, स्वर्गताया एवैतदहरहः शंसति, यथा निविदोऽथ भूतेच्छन्दः शंसति, त्वमिन्द्र शर्म रिणा इतीमे वै लोका भूतेच्छन्दोऽसुरान् ह वै देवा अन्नं सेचिरे। भूतेन भूतेन जिघांसन्तस्तितीर्षमाणास्तानिमे देवाः सर्वेभ्यो भूतेभ्यो-ऽच्छादयन्। तद्यदेतानिमे देवाः सर्वेभ्यो भूतेभ्योऽच्छादयन्, तस्माद्भूतेच्छन्द-स्तद् भूतेच्छन्दां [भूतेच्छन्दसां] भूतेच्छन्दस्त्वम्। छादयन्ति ह वापरमिमे लोकाः सर्वेभ्यो भूतेभ्यो निरघ्नन्। सर्वेभ्यो भूतेभ्यो छन्दते, य एवं वेद ॥ १४ ॥

कण्डिका १४ ॥ कुन्ताप सूक्तों में आदित्या और आङ्गिरसी ऋचाओं अथवा देवनीथ सूक्त का प्रयोग, आदित्यों का अङ्गिराओं को पृथिवी की दक्षिणा, पृथिवी की विषमता और भूतेच्छन्द का प्रयोग ॥

(अथ आदित्याः च आङ्गिरसीः च शंसति, आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन् इति) फिर आदित्या और आङ्गिरसी ऋचाओं [आदित्य और अङ्गिर शब्द वाली ऋचाओं] को वह बोलता है—आदित्या ह जरितर ... अथ० २० । १३५ । ६, यह मन्त्र है। (तद् देवनीथम् इति आचक्षते) उसको देवनीथ [विद्वानों करके पाने योग्य]—ऐसा वे कहते हैं। (आदित्याः च ह वै अङ्गिरसः च स्वर्गे लोके अस्पर्धन्त, वयं पूर्वे स्वः एष्यामः, वयं पूर्वे इति) आदित्य लोग [ऋषि विशेष] और अङ्गिरा लोग [ऋषि विशेष] स्वर्ग लोक के विषय में झगड़ने लगे—हम पहिले स्वर्ग जायेंगे, हम पहिले। (ते अङ्गिरसः ह श्वःसुत्यां ददृशुः) उन अङ्गिराओं ने श्वःसुत्या [आगामी कल्य होने वाले सोम यज्ञ] को देखा [करना विचारा]। (ते ह अग्निम् ऊचुः, परे हि आदित्येभ्यः श्वःसुत्यां प्रब्रूहि इति) वे अग्नि [अग्नि नाम वाले पुरुष] से बोले—जा, और आदित्य ऋषियों को श्वःसुत्या का कह दे [बुलवा दे]। (अथ आदित्याः अद्यसुत्यां ददृशुः) फिर [अग्नि के बुलावा देने पर] आदित्य लोगों ने अद्यसुत्या [आज होने वाले सोम यज्ञ] को देखा [करना विचारा]। (ते ह अग्निम् ऊचुः अस्माकं अद्यसुत्या, तेषां नः त्वम् इति होता असि, त्वाम् उपेमः इति) वे अग्नि से बोले—हमारा अद्यसुत्या यज्ञ है तू ही उनका और हमारा होता [हवन कराने हारा] है हम तुझको पहुँचते हैं [उनके सहित तुझे बुलाते हैं]। (सः अग्निः एत्य उवाच, अथ आदित्याः अद्यसुत्याम् ईक्षन्ते, कं वः होतारम् अवोचन् वा आह्वयन्ते,

---

१४—(आदित्याः) अखण्डब्रह्मचारिणः। आदीप्यमानाः सूर्यकिरणाः (ह) एव (जरितः) हे स्तोतः (अङ्गिरोभ्यः) विज्ञानिभ्यः। प्राणवायुभ्यः (दक्षिणाम्) प्रतिष्ठादानम् (अनयन्) प्रापितवन्तः। दत्तवन्तः (देवनीथम्) हनिकुषिनीरमिकाशिभ्यः क्थन् (उ० २ । २) देव+णीञ् प्रापणे—क्थन्। विद्वद्भिः प्रापणीयम् (अस्पर्धन्त) स्पर्धां विजयेच्छां कृतवन्तः (एष्यामः) गमिष्यामः (श्वःसुत्याम्) आगामिदिने भव्यं सोमयागम् (अग्निम्) अग्निनामानं पुरुषम् (अद्यसुत्याम्) अद्यतनसोमयागम् (उपेमः) उपगच्छामः (एत्य)

युष्माकं वयम् इति) वह अग्नि आकर बोला—अब आदित्य लोग अद्यसुत्या यज्ञ देखते हैं [करना विचारते हैं], सुख से तुम्हारे होता को वे कहते हैं और बुलाते हैं, तुम्हारे हम [होता] हैं। (ते ह अङ्गिरसः चुक्रुधुः, त्वं नु मा गमः, वयम् इति) वे अङ्गिरा ऋषि क्रोधित हुये—तू अब मत जा, हम [भी न जावेंगे]। (न इति ह अग्निः उवाच) ऐसा नहीं यह अग्नि बोला। (अनिन्द्याः वै मा आह्वयन्ते, तत् हि किल्बिषं यः अनिन्द्यस्य हवं न इति) अनिन्दनीय [श्रेष्ठ पुरुष] मुझे बुलाते—हैं, यह पाप है, जो मैं अनिन्दनीय के बुलावे को न [मानूं]। (तस्मात् अतिदूरम् अत्यल्पम् इति) इसलिये यह बहुत दूर [अश्लील] और बहुत तुच्छ बात है। (देवाः यजमानस्य हवम् इयात् एव, तत् हि किल्विषं यः अनिन्द्यस्य हवन्न इति) देवताओं [विद्वान् लोगों] ने यजमान के बुलावे को माना है, यह पाप है, जो मैं अनिन्दनीय के बुलावे को न [मानूं]॥

(तान् आदित्यान् ह अङ्गिरसः याजयांचक्रुः) उन आदित्य ऋषियों को अङ्गिराओं ने यज्ञ करा दिया। (तेभ्यः हि इमां पृथिवीं दक्षिणां निन्युः, तां ह न प्रतिजगृहुः) उन [अङ्गिराओं] को उन्होंने यह पृथिवी दक्षिणा दी, उसको उन [अङ्गिराओं] ने न लिया। (सा हि इयं निवृत्ता उभयतःशीर्ष्णी) सो ही यह त्यागी हुई [पृथिवी] दो ओर शिर वाली [उत्तर और दक्षिण ध्रुव रूप शिर वाली] है। (दक्षिणाः शुचाविद्धाः शोचमानाः कुपिताः व्यचरन्, नः मा प्रत्यग्रहीषुः इति) वह दक्षिणायें सोच में छिदी हुई, शोक करती हुई, कुपित होकर विचरने लगी—उन्होंने हमें नहीं ग्रहण किया है। (तस्मै [= तस्मात्] एते निरदीर्यन्त, ये एते प्रदराः अधिगम्यन्ते) इसलिये यह फट गये हैं, जो यह खड्डे [पहाड़ नदी आदि विषम स्थान] जाने जाते हैं। (तस्मात् निवृत्तदक्षिणां न उपाकुर्यात्, न एनां दक्षिणां प्रमृजेत् नेद् प्रमृणजानीति) इसलिये त्यागी हुई दक्षिणा को न लेवे, न इस दक्षिणाको सजावे और न नष्ट करे। (तस्मात् अस्य यः एव समानजन्मा वृणुहूयुः भ्रातृव्यः स्यात्, तस्मै एनां दद्यात्) इसलिये इस [यजमान] का समान जन्म वाला, सुख छीनने वाला शत्रु होवे, उसको यह [दक्षिणा] देवे। (तद् पराची दक्षिणा नः विवृणक्ति, द्विषति भ्रातृव्ये अन्ततः शुचं प्रतिष्ठा-

---

आगत्य (कम्) सुखेन (चुक्रुधुः) क्रोधितवन्तः (अनिन्द्याः) अनिन्दनीयाः। श्रेष्ठाः (किल्बिषम्) पापम् (हवम्) आवाहनम् (इयाः) इयुः। प्रापुः (याजयाञ्चक्रुः) यज्ञं कारितवन्तः (निन्युः) आनीतवन्तः दत्तवन्तः (प्रतिजगृहु) स्वीकृतवन्तः (निवृत्ता) त्यक्ता (उभयतःशीर्ष्णी) उत्तरदक्षिणध्रुवरूपशिरोयुक्ता (शुचाविद्धाः) व्यध ताडने–क्तः। शोकेन बाधिताः (निरदीर्यन्त) विदारिता वर्त्तन्ते (प्रदराः) प्रदराः—ऐ० ब्रा० ६। ५। विदारणानि (अधिगम्यन्ते) ज्ञायन्ते। दृश्यन्ते (उपाकुर्यात्) स्वीकुर्यात् (प्रमृजेत्) मृजू शौचालङ्कारयोः। अलङ्कुर्यात् (प्रमृणजानीति) मृण हिंसायाम्, आर्षरूपम् प्रमृणीयात्। नाशयेत् (वृणुहूयुः) पृभिदिव्यधि० (उ० १। २३) वृण प्रीणने—कुः। यजिमनिशुन्धि० (उ० ३। २०) हु दानादानयोः अदने च—युच्, दीर्घः। सुखस्य ग्रहीता (पराची) पर+अञ्चु गतिपूजनयोः–क्विन्, ङीप्। शत्रुगता (विवृणक्ति) वृजी वर्जने।

पयति) सो वह शत्रुको पहुँची हुई दक्षिणा हमें त्याग देती है, अप्रिय शत्रु पर अंत में शोक स्थापित करती है ॥

(यः असौ तपति, सः वै शंसति, आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन्. तां ह जरितः प्रत्यायन् इति, न हि इमां पृथिवीं प्रत्यायन्) जो वह [सूर्य] तपता है वह ही प्रशंसा किया जाता है—आदित्या ह······अथ० २० । १३५ । ६; [मन्त्र के पहिले तीन पाद हैं] उन्होंने [अङ्गिराओं] ने इस पृथिवी को प्रत्यक्ष नहीं पाया है। (तामु ह जरितः प्रत्यायन् इति प्रतिहितेषु मा आयन्) तामु ह जरितः प्रत्यायन् [उस मन्त्र का चौथा पाद] प्रत्यक्ष रक्खे पदार्थों में [उन्होंने उसको] नहीं पाया। (तां ह जरितर्नः प्रत्यगृभ्णन् इति, न हि इमां पृथिवीं प्रत्यगृभ्णन्) तां ह जरितर्नः प्रत्यगृभ्णन् [उसी सूक्त के मन्त्र ७ का पहिला पाद] उन्होंने इस पृथिवी को प्रत्यक्ष नहीं लिया है। (तामु ह जरितर्नः प्रत्यगृभ्णन् इति, प्रगृह्य आदित्यम् अगृभ्णन्) तामु ह जरितर्नः प्रत्यगृभ्णन् [उसी मन्त्र का दूसरा पाद] [पृथिवी को] ग्रहण करके सूर्य को उन्होंने ग्रहण किया। (अहानेतरसं न वि चेतनानि इति, एष ह वै अह्नां विचेता, यः असौ तपति, सः वै शंसति) अहानेतरसं न वि चेतनानि [उसी मन्त्र का तीसरा पाद], यह ही दिनों का जताने वाला है जो वह तपता है, वही प्रशंसा किया जाता है। (यज्ञानेतरसं न पुरोगवामः इति, एषः ह वै यज्ञस्य पुरोगवी, यत् दक्षिणाः यथा अर्हामः एषः एव ईश्वरः उन्नेता अन्ता स्रस्तम् इतिरेतत्) यज्ञानेतरसं न पुरोगवामः [उसी का चौथा पाद] यह ही यज्ञ का अग्रगामी है, क्योंकि जैसे हम दक्षिणाओं के योग्य होते हैं, यह ही समर्थ ऊंचा ले जाने वाला [सूर्य] अन्त में गिरे हुये [शत्रु] को हरा देता है। (उत श्वेतः आशुपत्वा उतो पद्याभिर्यविष्ठः। उतेमाशु मानं पिपर्ति इति, एषः एव श्वेतः एषः शिषुाति, एषः उतो पद्याभिः यविष्ठः उत ईम् आशुमानं पिपर्ति इति) उत श्वेतः आशुपत्वा······[उसी सूक्त का मन्त्र ८] यही

वर्जयति। त्यजति (प्रति) प्रत्यक्षम् (आयन्) अगच्छन्, प्राप्नुवन् (प्रतिहितेषु) प्रत्यक्षधृतेषु पदार्थेषु (अगृभ्णन्) गृहीतवन्तः (अहानेतरसम्) सम्यानच् स्तुवः (उ० २ । ८६) अह व्याप्तौ—आनच्। तरो बलनाम–निघ० २ । ६ । ततः अर्शआद्यच्। अहाने व्याप्तौ तरसं बलयुक्तं व्यवहारम् (चेतनानि) चेतनाः। ज्ञानानि (विचेता) विचेतिता। विज्ञापकः (यज्ञानेतरसम्) सम्यानच् स्तुवः (उ० २ । ८६) यज देवपूजासंगतिकरणदानेषु—आनच्, नकारश्छान्दसः। यज्ञे बलियुक्तं व्यवहारम् (न) सम्प्रति (पुरोगवामः) गु गतौ—लट्, परस्मैपदम्। गवते गतिकर्मा—निघ० २ । १४ । अग्रे भूत्वा गच्छामः प्राप्नुमः। (पुरोगवी) अग्रगामी (स्रस्तम्) पतितम्। शत्रुम् (इतिरेतत्) अतरेत्। अविभवेत्। (अन्ता) अन्ते (श्वेतः) शुक्लवर्णः सूर्यः (आशुपत्वाः) अशूप्रुषिलटि० (उ० १ । ५१) आशु+पत्लृ गतौ—क्वन्। हे शीघ्रगामिनः (उतो) निश्चयेन (पद्याभिः) पाद–यत्, पद्भावः। पादाय गमनाय हिताभिर्गतिभिः (यविष्ठः) युवन्—इष्ठन्। अतिशयेन बलवान् (उत) अवश्यम् (ईम्) प्राप्तव्यम् (आशु) शीघ्रम्

श्वेत है यही हिंसक [विघ्न] का गिराने वाला है और यही चलने योग्य गतियों से अति बलवान् होकर अवश्य पाने योग्य परिमाण को शीघ्र पूरा करता है । (आदित्या रुद्रा वसवस्त्वे नु त इदं राधः प्रतिगृभ्णीह्यङ्गिरः । इदं राधो विभु: प्रभुरिदं राधो बृहत् पृथुः ॥ देवा ददत्वासुरं तद् वो अस्तु सुचेतनं । युष्माँ अस्तु दिवे दिवे प्रत्येव गृभायत इति) आदित्या रुद्रा ······ बृहत् पृथु । देवा ददत्वासुरं ··· गृभायत इति [यह दो उसी सूक्त के मन्त्र ९, १० भेद से हैं]। (तत् यत् आदित्याः च आङ्गिरसीः च शंसति, स्वर्गतायै एव एतत् अहरहः यथा निविदः शंसति) सो जो आदित्या और अङ्गिरसी ऋचाओं को वह बोलता है, स्वर्ग प्राप्ति के लिये ही इसको निविदों के समान [मन्त्र के अन्त में भी ओम् बोल कर] दिन दिन वह बोलता है ॥

(अथ भूतेच्छन्दः शंसति) फिर भूतेच्छन्द [ऐश्वर्य में शत्रु को ढकना] वह बोलता है । (त्वमिन्द्र शर्म रिणा इति, इमे वै लोकाः भूतेच्छन्दः असुरान् ह वै देवाः अन्नं सेचिरे) त्वमिन्द्र शर्म रिणाः ··· [उसी सूक्त के मन्त्र ११-१३] इन ही लोकों में भूतेच्छन्दों द्वारा असुरों से ही देवताओं ने अन्न सेवन किया । (भूतेन भूतेन तान् जिघांसन्तः तितीर्षमाणाः इमे देवाः सर्वेभ्यः भूतेभ्यः अच्छादयन्) प्रत्येक ऐश्वर्य से उन [शत्रुओं] को मारना चाहते हुये और हराना चाहते हुये इन देवताओं ने सब प्राणियों के लिये ढक दिया । (तत् यत् एतान् इमे देवाः सर्वेभ्यः भूतेभ्यः अच्छादयन् तस्मात् भूतेच्छन्दः, तत् भूतेच्छन्दाम् [=भूतेच्छन्दसाम्] भूतेच्छन्दस्त्वम्) सो जो इन [शत्रुओं] को इन देवताओं ने सब प्राणियों के लिये ढक दिया, इसलिये यह भूतेच्छन्द [ऐश्वर्य में ढकने वाला] है. यही भूतेच्छन्दों का भूतेच्छन्दस्त्व है । (इमे लोकाः सर्वेभ्यः लोकेभ्यः ह वा अपरम् छादयन्ति निरघ्नन्) यह लोक [देवता लोग] सब प्राणियों के लिये निश्चय करके वैरी को ढक लेते और मार निकालते हैं । (सर्वेभ्यः भूतेभ्यः छन्दते यः एवं वेद) सब प्राणियों से [शत्रुओं को] वह ढक देता है, जो ऐसा विद्वान् है ॥ १४ ॥

(मानम्) परिमाणम् (पिपर्ति) पूरयति (शिपुपति) पृभिदिव्यधि० (उ० १ ।२३) शिष हिंसायाम्—कुः । सर्वधातुभ्य इन् (उ० ४ । ११८) पत अधोगतौ—इन्, विभक्तिलुक् । हिंसकानां विघ्नानामधोगमयिता (अनु) अनुसृत्य (ते) प्रसिद्धाः (राधः) धनम् (प्रति) प्रत्यक्षेण (गृभ्णीहि) गृहाण (अङ्गिरः) हे विज्ञानिन् (विभुः) व्यापकम् (प्रभुः) समर्थम् (बृहत्) बहु (पृथुः) विस्तृतम् (ददतु) प्रयच्छन्तु (आसुरम्) असुर--अण् भावे । असुरत्वं प्रज्ञावत्त्वं वानवत्त्वं वापि वासुरिति प्रज्ञानामास्यत्यनर्थानस्ताश्चास्यामर्थाः--निरु० १० । ३४ । बुद्धिमत्त्वम् (वः) युष्माकम् (सुचेतनम्) प्रशस्तज्ञानम् (गृभायत) गृह्णीत (भूतेच्छन्दः) सर्वधातुभ्यो असुन् (उ० ४ । १८९) भूते + छदि आच्छादने—असुन् । ऐश्वर्ये शत्रुछादनम् । एतन्नामसूक्तम् (शर्म) शरणम् । सुखम् (रिणा) रिणाः । अरिणाः । प्रापितवानसि (सेचिरे) षच सेवने । सेवितवन्तः (जिघांसन्तः) हन्तुमिच्छन्तः (तितीर्षमाणाः) तरितुमभिभवितुमिच्छन्तः (अच्छादयन्) आच्छादितवन्तः (निरघ्नन्) नाशितवन्तः (छन्दते) आच्छादयति शत्रून् ॥

भावार्थः—जो मनुष्य नीति निपुण होकर उपद्रवी शत्रुओं को निकाल देते हैं, वे ही अपनी और प्रजा की रक्षा कर सकते हैं ॥ १४ ॥

विशेषः १—इस कण्डिका को ऐतरेय ब्राह्मण ६ । ३४, ३५, ३६ से मिलाओ ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—आदित्या और आङ्गिरसी ऋचायें—आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन् । तां ह जरितः प्रत्यायंस्तामु ह जरितः प्रत्यायन्—अथ० २० । १३५ । ६ ॥ (आदित्याः) अखण्ड ब्रह्मचारियों ने (ह) ही, (जरितः) हे स्तुति करने वाले ! (अङ्गिरोभ्यः) विज्ञानी पुरुषों के लिये (दक्षिणाम्) दक्षिणा [दान वा प्रतिष्ठा] को (अनयन्) प्राप्त कराया है । (ताम्) उस [दक्षिणा] को (ह) ही, (जरितः) हे स्तुति करने वाले ! (प्रति आयन्) उन्होंने प्रत्यक्ष पाया है, (ताम्) उस [दक्षिणा] को (उ) निश्चय करके (ह) ही, (जरितः) हे स्तुति करने वाले ! (प्रति आयन्) उन्होंने प्रत्यक्ष पाया है ॥

२—तां ह जरितर्नः प्रत्यगृभ्णंस्तामु ह जरितर्नः प्रत्यगृभ्णः । अहानेतरसं न वि चेतनानि यज्ञानेतरसं न पुरोगवामः—अथ० २० । १३५ । ७ ॥ (ताम्) उस [दक्षिणा] को (ह) ही, (जरितः) हे स्तुति करने वाले ! (नः) हमारे लिये (प्रति अगृभ्णन्) उन्होंने [विज्ञानियों ने—मन्त्र ६] प्रत्यक्ष पाया है, (ताम्) उसको (उ) निश्चय करके (ह) ही (जरितः) हे स्तुति करने वाले ! (नः) हमारे लिये (प्रति अगृभ्णः) तूने प्रत्यक्ष पाया है । (न) अभी (अहानेतरसम्) व्यक्ति में बल रखने वाले व्यवहार को, (वि) विविध (चेतनानि) चेतनाओं को, और (न) अभी (यज्ञानेतरसम्) यज्ञ [देवपूजा, संगतिकरण और दान] में बल रखने वाले व्यवहार को (पुरोगवामः) हम आगे होकर पावें ॥

३—उत श्वेत आशुपत्वा उतो पद्याभिर्यविष्ठः । उतेमाशु मानं पिपर्ति—अथ० २० । १३५ । ८ ॥ (आशुपत्वाः) हे शीघ्रगामी पुरुषो ! (श्वेतः) श्वेत वर्ण वाला [सूर्य] (उत) भी (यविष्ठः) अत्यन्त बलवान् होकर (पद्याभिः) चलने योग्य गतियों से (उतो) निश्चय करके (उत) अवश्य (ईम्) प्राप्ति योग्य (मानम्) परिमाण को (आशु) शीघ्र (पिपर्ति) पूरा करता है ॥

४—आदित्या रुद्रा वसवस्त्वेऽनु त इदं राधः प्रति गृभ्णीह्यङ्गिरः । इदं राधो विभु प्रभु इदं राधो बृहत् पृथु—अथ० २० । १३५ । ९ ॥ [हे शूर सेनापति !] (ते) वे (आदित्याः) अखण्ड ब्रह्मचारी [अथवा १२ महीने], (रुद्राः ज्ञान दाता [अथवा ११ रुद्र, १० प्राण और आत्मा] और (वसवः) श्रेष्ठ विद्वान् लोग [अथवा पृथिवी आदि ८ वसु [(त्वे अनु) तेरे पीछे पीछे हैं, (अङ्गिरः) हे विज्ञानी पुरुष ! (इदम्) इस (राधः) धन को (प्रति) प्रत्यक्ष रूप से (गृभ्णीहि) तू ग्रहण कर । (इदम्) यह (राधः) धन (विभु) व्यापक और (प्रभु) बल युक्त है, (इदम्) यह (राधः) धन (बृहत्) बहुत और (पृथु) विस्तीर्ण है ॥

५—देवा ददत्वासुरं तद् वो अस्तु सुचेतनम्। युष्माँ अस्तु दिवेदिवे प्रत्येव गृभायत—अथ० २०।१३५।१०॥ [हे मनुष्यो!] (देवाः) विद्वान् लोग (आसुरम्) बुद्धिमत्ता (ददतु) देवें, (तत्) वह (वः) तुम्हारे लिये (सुचेतनम्) सुन्दर ज्ञान (अस्तु) होवे। (युष्मान्) तुमको वह (दिवेदिवे) दिन दिन (अस्तु) होवे, [उसको] (प्रति) प्रत्यक्ष रूप से (एव) ही (गृभायत) तुम ग्रहण करो॥

६—भूतेच्छन्द मन्त्र—त्वमिन्द्र शर्म रिणा हव्य पारावतेभ्यः। विप्राय स्तुवते वसुवनिं दुरश्रवसे वह—अथ० २०।१३५।११, मन्त्र १२; १३ वेद में देखो॥ (इन्द्र) हे इन्द्र [बड़े ऐश्वर्य वाले राजन्] (त्वम्) तू ने (शर्म) शरण और (हव्यम्) हव्य [विद्वानों के योग्य अन्न] (पारावतेभ्यः) पार और अवार देश वाले लोगों के लिये (रिणाः) पहुँचाया है। (स्तुवते) स्तुति करने वाले (विप्राय) बुद्धिमान् के लिये (वसुवनिम्) धनों का सेवन (दुरश्रवसे) दुष्ट अपयश मिटाने को (वह) प्राप्त करा॥

कण्डिका १५ ॥

अथाहनस्याः शंसति, यदस्या अंहुभेद्या इत्याह, न स्याद्वा इदं सर्वं प्रजातमाह, न स्याद्वा एतदधिप्रजायतेऽस्यैव सर्वस्याप्त्यै प्रजात्यै। ता वै षट् शंसेत्, षड् वा ऋतवः, ऋतवः पितरः, पितरः प्रजापतिः प्रजापतिराह, न स्यात् तादृशं शंसेदिति। शाम्भव्यस्य वचः, दशाक्षरा विराड्, वैराजो यज्ञः, तद्गर्भा उपजीवन्ति। श्रीर्वै विराड्, यशोऽन्नाद्यं, श्रियमेव तद्विराजं यशस्यन्नाद्ये प्रतिष्ठापयति। प्रतिष्ठन्तीरिदं सर्वमनु प्रतितिष्ठति। प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद। तिस्रः शंसेदिति वात्स्यः। त्रिवृद्वै रेतः सिक्तं सम्भवत्याण्डमल्पं जरायुस्त्रिवृत् प्रत्ययं, माता पिता यज्जायते, तत् तृतीयम्, अभूतोद्यमेवैतत्, यच्चतुर्थीं शंसेत्। सर्वा एव षोडश शंसेदिति हैके। कामार्त्तो वै रेतः सिञ्चति, रेतसः सिक्ताः प्रजाः प्रजायन्ते प्रजानां प्रजननाय। प्रजावान् प्रजनयिष्णुर्भवति, प्रजात्यै प्रजायते प्रजया पशुभिः, य एवं वेद॥ १५॥

कण्डिका १५ ॥ कुन्ताप सूक्तों में आहनस्या ऋचाओं का प्रयोग ॥

(अथ आहनस्याः शंसति, यदस्या अंहुभेद्या इति आह) फिर आहनस्यायें [संयोग सूचक ऋचायें] वह बोलता है—यदस्या अंहुभेद्या—अथ० २०।१३६।१—१६, यह सूक्त बोलता है। (आह इदं सर्वं प्रजातं वै न स्यात्, न स्यात् एतत् वै अधिप्रजायते, अस्य सर्वस्य एव आप्त्यै प्रजात्यै) वह कहता है—यदि यह सब प्रकट किया गया न होवे, यह भी न होवे कि यह [जगत्] प्रकट होवे, इस सब [जगत्] की प्राप्ति और उत्पत्ति के लिये [यह कर्म है]। (ताः वै षट् शंसेत्) उन छह ही [ऋचाओं] को बोले। (षट् वै ऋतवः, ऋतवः पितरः, पितरः प्रजापतिः) छह ही ऋतुयें हैं, ऋतुयें

१५—(आहनस्याः) सर्वधातुभ्योऽसुन् (उ० ४।१८९) आ+हन हिंसागत्योः—असुन्, आहनस्—यत्, टाप्। आहनसः आहननस्य संयोगस्य सम्बन्धिनीः ऋचः (अंहुभेद्या) भृमृशीङ्० (उ० १।७) अम रोगे पीडने च—उ प्रत्ययः हुक् च।

पितर [पालनेवाले] हैं, पितर प्रजापति [प्रजापालक] हैं। (प्रजापतिः आह, न स्यात्, तादृशं शंसेत् इति) प्रजापति कहता है--अब ऐसा होवे, वैसा बोले [सृष्टि उत्पादन मन्त्र बोले] । (शाम्भव्यस्य वचः, दशाक्षरा विराट्, वैराजः यज्ञः, गर्भाः तम् उपजीवन्ति) शाम्भव्य ऋषि का वचन है—[दस ऋचायें बोले] दस अक्षर वाला विराट् छन्द है विराट् [विविध ऐश्वर्य] वाला यज्ञ है, गर्भ उस [यज्ञ] के आश्रय जीते हैं। (श्रीः वै विराट् यशः. अन्नाद्यं, तत् श्रियम् एव विराजं यशसि अन्नाद्ये प्रतिष्ठापयति) श्री [सम्पत्ति] ही विराट्, यश और खाने योग्य अन्न है, तब श्री [अर्थात्] विराट् को यश में और खाने योग्य अन्न में वह स्थापित करता है। (प्रतिष्ठन्तीः अनु इदं सर्वं प्रतितिष्ठति) ठहरी हुई [प्रजाओं] के साथ साथ यह सब प्रतिष्ठा पाता है। (प्रजया पशुभिः प्रतितिष्ठति, यः एवं वेद) प्रजा से और पशुओं से वह प्रतिष्ठा [ठहराव] पाता है, जो ऐसा विद्वान् है। (तिस्रः शंसेत् इति वात्स्यः) तीन [ऋचायें] बोले, यह वात्स्य [कहता है]। (त्रिवृत् वै रेतः सिक्तं सम्भवति—आण्डम् अल्पं जरायुः त्रिवृत् प्रत्ययम्) तीन विधि से वर्तमान ही सींचा हुआ वीर्य समर्थ होता है—आण्ड [अण्डज पक्षी आदि], अल्प [सूक्ष्म, अङ्कुर वृक्ष आदि] और जरायु [जरायुज मनुष्य आदि] यह तीन विधि से वर्तमान प्रतीति है। (माता पिता यत् जायते, तत् तृतीयम्) माता और पिता [दो] और जो उत्पन्न होता है वह तीसरा है [यह भी त्रिवृत् है]। (अभूतोद्यम् एव एतत्, यत् चतुर्थीं शंसेत्) भविष्य कर्म का कथन ही यह है जो चौथी [ऋचा] को बोले। (सर्वाः एव षोडश शंसेत् इति ह एके) सब ही सोलह [ऋचाओं] को बोले—यह कोई कोई [कहते हैं]। (कामार्तः वै रेतः सिञ्चति, रेतसः सिक्ताः प्रजाः प्रजानां प्रजननाय प्रजायन्ते) काम से पीड़ित पुरुष ही वीर्य सींचता है, वीर्य से सींची हुई प्रजायें प्रजाओं के उत्पन्न करने के लिये उत्पन्न होती हैं। (प्रजनयिष्णुः प्रजावान् भवति, प्रजात्यै प्रजया पशुभिः प्रजायते, यः एवं वेद) उत्पन्न करने वाला पुरुष प्रजाओं वाला होता है, प्रजा की उत्पत्ति के लिये प्रजा से और पशुओं से वह बढ़ता है, जो ऐसा विद्वान् है ॥ १५ ॥

अंहुरः=अंहस्वान्--निरु० ६ । २७ । अवितृस्तृतन्त्रिभ्य ईः (उ० ३ । १५८) भिदिर् विदारणे—ईप्रत्ययः । अंहुना तापेन भेदनीया विदारणीया या सा अंहुभेदी तस्याः प्रजायाः (न) निषेधे । सम्प्रति (त्रिवृत्) त्रिविधवर्तमानम् (सम्भवति) समर्थं भवति (आण्डम्) अमन्ताड्डः (उ० १ । ११४) अम संयोगे—डः, अण् । पक्ष्यादिप्रादुर्भावकोषजम् । अण्डजम् (अल्पम्) पानीविषिभ्यः पः (उ० ३ । २३) अल वारणपर्याप्तिभूषासु—पः । सूक्ष्मम् । अङ्कुरजम् (जरायुः) किंजरयोः श्रिणः (उ० १ । ४) जरा+इण् गतौ—उण् । गर्भाशयः । गर्भजम् (प्रत्ययम्) प्रतीतिः (अभूतोद्यम्) वद कथने--क्यप् । अभूतस्य अनतीतस्य अनागतस्य भविष्यकर्मणः कथनम् (प्रजनयिष्णुः) णेश्छन्दसि (पा० ३ । ३ । १३७) प्रजनयतेः—इष्णुच् । प्रजनयिता ॥

भावार्थः—जो मनुष्य वेदों के तत्त्व सार को समझ कर संसार में काम करते हैं, वे धन धान्य, प्रजा और पशुओं से समृद्ध होते हैं ॥१५॥

विशेष: १—इस कण्डिका को ऐतरेय ब्राह्मण ६ । ३६ से मिलाओ ॥

विशेष: २—सोलह मन्त्रों में से प्रतीक वाला एक अर्थ सहित दिया जाता है, शेष वेद में देखो ॥

यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत् । मुष्काविदस्या एजतो गोशफे शकुलाविव--अथ० २० । १३६ । १—१६, तथा मन्त्र १, यजुर्वेद २३ । २८ ॥ (यत्) जब (अस्याः) इस (अंहुभेद्याः) पाप से नाश होने वाली [प्रजा] के (कृधु) छोटे और (स्थूलम्) बड़े [पाप] को (उपातसत्) वह [राजा] नाश करता है । (अस्याः) इस [प्रजा] के (मुष्कौ इत्) दोनों ही चोर [स्त्री और पुरुष चोर अथवा रात्रि और दिन के चोर] (गोशफे) गौ के खुर के गढ़े में (शकुलौ इव) दो मछलियों के समान (एजतः) कांपते हैं [डरते हैं] ॥

कण्डिका १६ ॥

अथ दाधिक्रीं शंसति, दधिक्राव्णो अकारिषमिति । तत उत्तराः पावमानीः शंसति, सुतासो मधुमत्तमा इति । अन्नं वै दधिक्राः, पवित्रं पावमान्यः, तदु हैके पावमानीभिरेव पूर्वं शस्त्वा तत उत्तरा दाधिक्रीं शंसति । इयं वागन्नाद्या, यः पवत इति वदन्तस्तदु तथा न कुर्य्यात्, उपनश्यति ह वागशनायती । स दाधिक्रीमेव पूर्वं शस्त्वा तत उत्तराः पावमानीः शंसति । तद्यद्दाधिक्रीं शंसति, इयं वागाहनस्यां वाचमवादीत्, तद्देवपवित्रेणैव वाचं पुनीते । सा वा अनुष्टुप् भवति । वाग्वा अनुष्टुप्, तत् स्वेनैव छन्दसा वाचं पुनीते । तामर्द्धर्चशः शंसति, प्रतिष्ठित्या एव । अथ पावमानीः शंसति, पवित्रं वै पावमान्यः, इयं वागाहनस्यां वाचमवादीत्, तत्पावमानीभिरेव वाचं पुनीते । ताः सर्वा अनुष्टुभो भवन्ति, वाग्वा अनुष्टुप्, तत्स्वेनैव छन्दसा वाचं पुनीते । ता अर्द्धर्चशः शंसति, प्रतिष्ठित्या एव, अव द्रप्सो अंशुमतीमतिष्ठदिति । एतं तृचमैन्द्राबार्हस्पत्यं सूक्तं शंसति । अथ हैतदुत्सृष्टं, तत् यदेतं, तृचमैन्द्राबार्हस्पत्यमन्त्यं तृचमैन्द्राजागतं शंसति, सवनधारणमिदं गुल्मह इति वदन्तस्तदु तथा न कुर्यात् । त्रिष्टुबायतना वा इयं वाक् एषां होत्रकाणां, यदैन्द्राबार्हस्पत्या तृतीयसवने । तद्यदेतं तृचमैन्द्राबार्हस्पत्यमन्त्यं तृचमैन्द्राजागतं शंसति, स्व एवैनं तदायतने प्रीणाति, स्वयोर्देवतयोः कामं नित्यमेव परिदध्यात्, कामं तृचस्योत्तमया । तदाहुः, संशंसेत्, षष्ठेऽहनि न संशंसेत्, कथमन्येष्वहःसु संशंसति कथमत्र न संशंसतीति । अथो खल्वाहुः, नैव संशंसेत् स्वर्गो वै लोकः, षष्ठमहरसमा ये वै स्वर्गो लोकः कश्चिद्वै स्वर्गे लोके शमयतीति । तस्मान्न संशंसति यदेव न संशंसति, तत् स्वर्गस्य लोकस्य रूपम् । यद्वेवैनाः संशंसति, यन्नाभानेदिष्ठो बालखिल्यो वृषाकपिरेवयामरुत् । एतानि वा अत्रोक्थानि भवन्ति । तस्मान्न संशंसति । ऐन्द्रो वृषाकपिः सर्वाणि छन्दांस्यैतशः प्रलाप उपाप्तो यदैन्द्राबार्हस्पत्या तृतीयसवने, तद्यदेतं तृचमैन्द्राबार्हस्पत्यं सूक्तं शंसति, ऐन्द्राबार्हस्पत्या परिधानीया

विशो अदेवीरभ्याचरन्तीरिति अपरजना ह वै विशो अदेवीः, न ह्यस्यापरजनं भयं भवति, शान्ताः प्रजाः क्लृप्ताः सहन्ते, यत्रैवंविदं शंसति यत्रैवंविदं शंसतीति ब्राह्मणम् ॥ १६ ॥

इत्यथर्ववेदस्य गोपथब्राह्मणोत्तरभागे षष्ठः प्रपाठकः समाप्तः ॥

समाप्तश्चायं ग्रन्थः ॥

———

कण्डिका १६ ॥ कुन्ताप सूक्तों में दाधिक्री, पवमानी और ऐन्द्रा-बार्हस्पत्य ऋचाओं का प्रयोग, षडह यज्ञ की समाप्ति ॥

(अथ दाधिक्रीं शंसति, दधिक्राव्णो अकारिषम् इति) फिर दाधिक्री [दधिक्रा शब्द वाली ऋचा] को वह बोलता है—दधिक्राव्णो अकारिषम् ... अथ० २० । १३७ । ३, यह मन्त्र है। (ततः उत्तराः पावमानीः शंसति, सुतासो मधुमत्तमाः इति) फिर पीछे वाली पावमानी [शुद्ध करने वाली ऋचायें] वह बोलता है—सुतासो मधुमत्तमाः......अथ० २० । १३७ । ४—६, यह ऋचायें हैं। (अन्नं वै दधिक्राः, पवित्रं पावमान्यः) अन्न ही दधिक्रा [धारण करने वाला और ले चलने वाला] है, और पवित्र [शुद्ध आचरण] पावमानी [शुद्ध करने वाली क्रियायें] हैं। (तत् उ ह एके पावमानीभिः [=पावमानीः] एव पूर्वं शस्त्वा ततः उत्तरा [=उत्तरां] दाधिक्रीं शंसति) फिर ही कोई कोई [कहते हैं]—पावमानी ऋचाओं को पहिले बोलकर उससे पीछे दाधिक्री बोलता है। (इयं वाक् अन्नाद्या, यः पवते—इति वदन्तः तत् उ तथा न कुर्यात् अशनायती ह वाक् उपनश्यति) यह वाक् अन्नाद्या [अन्न खाने वाली है, यः पवते—यह [ब्राह्मण वचन] वे बोलते हैं, इसलिये वह वैसा न करे [पावमानियों को पहिले न बोले], भूखी वाणी नष्ट हो जाती है। (सः दाधिक्रीम् एव पूर्वं शस्त्वा ततः उत्तराः पावमानीः शंसति) वह दाधिक्री ही ऋचा पहिले बोलकर फिर पीछे वाली पावमानियों को बोलता है। (तत् यत् दाधिक्रीं शंसति इयं वाक् आहनस्यां वाचम् अवादीत्, तत् देवपवित्रेण एव वाचं पुनीते) फिर वह जो दाधिक्री ऋचा बोलता है यह वाणी आहनस्या वाणी [संयोग वाली ऋचा—कण्डिका १५]

१६—(दाधिक्रीम्) दधि+क्रमु पादविक्षेपे—विट्, अनुनासिकस्य आकारः, दधिक्रा—अण्, ङीप्। दधिक्री एव दधिक्रावा। दधिक्राशब्दयुक्ता-मृचम् (दधिक्राव्णः) डुधाञ् धारणपोषणयोः—किः, दधि+क्रमु पादविक्षेपे वनिप्। दधिक्रावा अश्वनाम—निघ० १ । १४ । दधत् क्रामतीति—निरु० २ । २७ । धारणशीलस्य क्रमणशीलस्य च (अकारिषम्) अहं कर्म कृतवानस्मि (उत्तराः) अनन्तराः (पावमानीः) पवित्रव्यवहारसूचिका ऋचः (सुतासः) निष्पादिताः (मधुमत्ताः) मधुना ज्ञानेन अतिशयेन युक्ताः (अशनायती) अशन—क्यच् शतृ, ङीप्। बुभुक्षिता (आहनस्याम्) आहननस्य संयोगस्य सूचिकामृचम् (अवादीत्) वदति (पुनीते) शोधयति (पवित्रेण) शुद्धव्यव-

को बोलती है, तब विद्वानों की पवित्रता से ही वाणी को शुद्ध करता है । (सा वै अनुष्टुप् भवति) वह ही अनुष्टुप् छन्द है । (वाक् वै अनुष्टुप्, तत् स्वेन एव छन्दसा वाचं पुनीते) वाणी ही अनुष्टुप् है [निघ० १ । ११], तब वह अपने ही छन्द से वाणी को शुद्ध करता है । (ताम् अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उस [दाधिक्री] को आधी आधी ऋचा से प्रतिष्ठा के लिये ही वह बोलता है ॥

(अथ पावमानीः शंसति) फिर पावमानी ऋचायें वह बोलता है । (पवित्रं वै पावमान्यः, इयं वाक् आहनस्यां वाचम् अवादीत्, तत् पावमानीभिः एव वाचं पुनीते) पवित्र आचरण ही पावमानी ऋचायें [शुद्ध व्यवहार क्रियायें] हैं, यह वाणी आहनस्या वाणी को बोलती है । तब पावमानी ऋचाओं से ही वाणीको वह शुद्ध करता है । (ताः सर्वाः अनुष्टुभः भवन्ति, वाक् वै अनुष्टुप् तत् स्वेन एव छन्दसा वाचं पुनीते) वे सब अनुष्टुप् छन्द हैं, वाणी ही अनुष्टुप् है, तब वह अपने ही छन्द से वाणी को शुद्ध करता है । (ताः अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उनको आधी आधी ऋचा करके प्रतिष्ठा के लिये ही वह बोलता है ॥

(अव द्रप्सो अंशुमतीमतिष्ठत् इति, एतं तृचम् ऐन्द्राबार्हस्पत्यं सूक्तं शंसति) अव द्रप्सो अंशुमतीमतिष्ठत् इति''''''अथ० २० । १३७ । ७—६, इस तृच इन्द्र और वृहस्पति देवता वाले सूक्त को वह बोलता है । (अथ ह एतत् उत्सृष्टं, तत् यत् एतं तृचम् ऐन्द्राबार्हस्पत्यम् अन्त्यं तृचम् ऐन्द्राजागतं शंसति इदं सवनधारणं, गुल्महः इति वदन्तः, तत् उ तथा न कुर्यात्) फिर यह सूक्त छोड़ा हुआ है, इसलिये जो वह इस इन्द्र और बृहस्पति देवता वाले तृच को और पिछले इन्द्र देवता वाले जगती [वा त्रिष्टुप्] छन्द के तृच को वह बोलता है, यह [तीनों] सवनों का धारण करना है, गुल्महः [शत्रु सेना का नाश करने वाला इन्द्र है] यह वह बोलते हैं, इसलिये ही वह वैसा न करे [इन तृचों को न बोले] । (त्रिष्टुबायतना वै एषां होत्रकाणाम् इयं वाक्, यत् ऐन्द्राबार्हस्पत्या तृतीयसवने) त्रिष्टुप् छन्द वाली ही इन सहायक होताओं की यह वाणी है, इन्द्र और बृहस्पति देवता वाली तीसरे सवन में है। (तत् यत् एतम् ऐन्द्राबार्हस्पत्यं तृचम् अन्त्यम् ऐन्द्राजागतं तृचं शंसति, तत् एनं स्वे एव आयतने प्रीणाति) सो जो इस इन्द्र और बृहस्पति वाले तृच और पिछले इन्द्र देवता वाले जगती [वा त्रिष्टुप्] छन्द के तृच को बोलता है उससे इस [इन्द्र] को ही अपने स्थान पर वह प्रसन्न करता है । (स्वयोः देवतयोः कामं नित्यम् एव परिदध्यात्, कामं तृचस्य

हारेण (अनुष्टुप्) स्तोभति अर्चतिकर्मा—निघ० ३ । १४ । अनु+ष्टुभ स्तम्भे स्तुतौ च--क्विप् । निरन्तरस्तुतिशीला । वाक्—निघ० १ । १२ । (द्रप्सः) वृतवदिवचि० (उ० ३ । ६२) दृप हर्षमोहनयोः, गर्वे च—सप्रत्ययः । गर्ववान् (अंशुमतीम्) मृगय्वादयश्च (उ० १ । ३७) अंश विभाजने—कुः । विभागवतीं सीमायुक्तां नदीम् (अव अतिष्ठत्) अवस्थितवान् (उत्सृष्टम्) त्यक्तम् (गुल्महः)

उत्तमया) अपने ही दोनों देवताओं के [तृच से] चाहे नित्य ही पूरा करे, चाहे तृच की सबसे पिछली ऋचा से [पूरा करे] ।।

(तत् आहुः, षष्ठे अहनि संशंसेत्, न संशंसेत्) फिर लोग कहते हैं— छठे दिन में [शिल्पसूक्तों को] मिलाकर बोले, [अथवा] न मिलाकर बोले । (कथम् अन्येषु अहःसु संशंसति कथम् अत्र न संशंसति इति) कैसे दूसरे दिनों में वह मिलाकर बोलता है और कैसे यहाँ [छठे दिन में] वह नहीं मिलाकर बोलता । (अथो खलु आहुः न एवं संशंसेत्) [उत्तर] तब वे कहते हैं—वह मिलाकर न बोले । (स्वर्गः वै लोकः षष्ठम् अहः, असमाः ये [=असमः यः] वै स्वर्गः लोकः, कश्चित् वै स्वर्गे लोके शमयति इति) स्वर्ग ही लोक छठा दिन है, वह असम [सबके लिये असमान अर्थात् न मिलने योग्य] है जो स्वर्ग लोक है, कोई ही [पुण्यात्मा] स्वर्ग लोक में शान्ति पाता है । (तस्मात् न संशंसति) इसलिये वह मिलाकर नहीं बोलता । (यत् एव न संशंसति, तत् स्वर्गस्य लोकस्य रूपम्) जो वह मिलाकर नहीं बोलता, वह स्वर्ग लोक का रूप है । (यत् उ एव एनाः संशंसति, यत् नाभानेदिष्ठः बालखिल्यः वृषाकपिः एवयामरुत्, एतानि वै अत्र उक्थानि भवन्ति, तस्मात् न संशंसति) जो ही वह इन [ऋचाओं] को मिलाकर बोलता है, जो नाभानेदिष्ठ, बालखिल्य, वृषाकपि और एवयामरुत् [कण्डिका ८] हैं, यह ही यहाँ [छठे दिन वाले यज्ञ में] उक्थ [प्रधान स्तोत्र] हो जाते हैं, इसलिये [इनको] मिलाकर न बोले । (ऐन्द्रः वृषाकपिः ऐतशः प्रलापः सर्वाणि छन्दांसि उपाप्तः यत् ऐन्द्राबार्हस्पत्या तृतीयसवने) इन्द्र देवता वाला वृषाकपि और ऐतश प्रलाप [सूक्त] सब छन्दों को प्राप्त हैं, जो इन्द्र और बृहस्पति देवता वाली [स्तुति] तीसरे सवन में है (तत् यत् एतं तृचम् ऐन्द्राबार्हस्पत्यं सूक्तं शंसति, ऐन्द्राबार्हस्पत्या परिधानीया, विशो अदेवीरभ्याचरन्तीः इति) सो जो इस तृच इन्द्र और बृहस्पति देवता वाले सूक्त को वह बोलता है, वह इन्द्र बृहस्पति वाली परिधानीया [समाप्ति सूचक ऋचा] है--विशो अदेवीरभ्याचरन्तीः······अथ० २० । १३७ । ९ पाद ३, ४ यह बोली जाती है । (अपरजनाः ह वै अदेवीः विशः) [इस ऋचा में] वैरी लोग ही कुव्यवहार वाली प्रजायें हैं । (अस्य हि अपरजनं भयं न भवति, शान्ताः क्लृप्ताः प्रजाः सहन्ते, यत्र एवंविदं शंसति यत्र एवंविदं शंसति इति ब्राह्मणम्) उस [पुरुष] को वैरी से उत्पन्न भय नहीं होता है,

---

गुड वेष्टने रक्षणे च—मक्+हन हिंसागत्योः डः । शत्रुसेनानाशकः (परिदध्यात्) समापयेत् (संशंसेत्) ऐकाहिकानि सूक्तानि सम्भूय शंसेत् (शमयति) शान्तिं तृप्तिं प्राप्नोति (उक्थानि) प्रधानस्तोत्राणि (परिधानीया) समाप्तिक्रिया (विशः) प्रजाः (अदेवीः) कुव्यवहारवतीः (अभि) सर्वतः (आचरन्तीः) विचरन्तीः (अपरजनम्) शत्रुजनितम् (क्लृप्ताः) समर्थाः (एवंविदम्) विद ज्ञाने--क्विप् सम्पदादिः । एवं ज्ञानम् ।।

[उसकी] शान्ति युक्त समर्थ प्रजायें [बैरी को] हराती हैं, जहाँ ऐसे ज्ञान को वह बोलता है, जहाँ ऐसे ज्ञान को वह बोलता है--यह ब्राह्मण [ब्रह्मज्ञान] है [द्विरावृत्ति ग्रन्थ समाप्ति सूचक है] ॥ १६ ॥

भावार्थः—जो चतुर मनुष्य समझ बूझ कर शुभ कामों को अन्त तक पहुँचाते हैं वे शत्रुओं को हटाकर प्रजा को सुखी करके यश पाते हैं ॥ १६ ॥

विशेषः १—इस कण्डिका को ऐतरेय ब्राह्मण ६ । ३६ और ६ । २६ से मिलाओ ॥

विशेषः २—प्रतीक वाले एक एक मन्त्र अर्थ सहित लिखे जाते हैं, शेष मन्त्र वेद में देखो ॥

१, दाधिक्री ऋचा—(दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत् प्रण आयूंषि तारिषत्—अथ० २० । १३७ । ३) । (दधिक्राव्णः) चढ़ा कर चलने वाले वा हींसने वाले, (जिष्णोः) जीतने वाले, (वाजिनः) वेग वाले (अश्वस्य) घोड़े के (अकारिषम्) कर्म को मैंने किया है । वह [कर्म] (नः) हमारे (मुखा) मुखों को (सुरभि) ऐवर्श्य युक्त (करत्) करे और (नः) हमारे (आयूंषि) जीवनों को (प्र तारिषत्) बढ़ावे ॥

२, पावमानी तृच—(सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः । पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः—अथ० २० । १३७ । ४—६, ऋ० ९ । १०१ । ४—६, साम० उ० २ । २ । तृच १५) । (सुतासः) निचोड़े हुये, (मधुमत्तमाः) अत्यन्त ज्ञान करने वाले, (मन्दिनः) आनन्द देने वाले, (पवित्रवन्तः) शुद्ध व्यवहार वाले (सोमाः) सोम [तत्त्वरस] (इन्द्राय) इन्द्र [बड़े ऐश्वर्य वाले पुरुष] के लिए (अक्षरन्) बहे हैं, (मदाः) वे आनन्द देने वाले [तत्त्व रस] (वः) तुम (देवान्) विद्वानों को (गच्छन्तु) पहुँचें ॥

३, ऐन्द्राबार्हस्पत्य तृच—(अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः । आवत् तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणा अधत्त— अथ० २० । १३७ । ७—९, ऋ० ८ । ९६ [सायण भाष्य ८५] । १३-१५, साम० पू० ४ । ४ । १) । (द्रप्सः) घमंडी, (कृष्णः) कौवा [के समान निन्दित लुटेरा शत्रु] (दशभिः सहस्रैः) दस सहस्र [बड़ी सेना] के साथ (इयानः) चलता हुआ (अंशुमतीम्) विभाग वाली [सीमा वाली नदी] पर (अव-अतिष्ठत्) ठहरा है ।

(नृमणाः) नरों के समान मन वाले (इन्द्रः) इन्द्र [बड़े प्रतापी शूर] ने (तम् धमन्तम्) उस हांफते हुये को (शच्या) बुद्धि से (आवत्) बचाया है और (स्नेहिताः) अपनी मारु सेनाओं को (अप अधत्त) हटा लिया है ॥

इति श्रीमद्राजाधिराज प्रथितमहागुणमहिम *श्रीसयाजीराव गायकवाडा-धिष्ठित* बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदासत्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्य उत्तरभागे षष्ठः प्रापाठकः समाप्तः ॥

अयं प्रपाठको ग्रन्थश्च प्रयागनगरे भाद्रमासे कृष्णजन्माष्टम्यां तिथौ १९८१ तमे [एकाशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ॥

[मुद्रितम्–मार्गशीर्षकृष्णा ८ संवत् १९८१ वि० ता० १९ नवम्बर सन् १९२४ ई० ॥]

क्षेमकरणदास त्रिवेदी ।

जन्म, कार्तिक शुक्ला ७ संवत् १९०५
विक्रमीय [ता० ३ नवम्बर १८४८ ईस्वी]
जन्मस्थान, ग्राम शाहपुर–मडराक,
जिला अलीगढ़ ॥

५२ लूकरगंज, प्रयाग,
[अलाहाबाद]
भाद्रकृष्ण ८ संवत् १९८१ वि०
ता० २२ अगस्त १९२४ ई० ॥

ओ३म्

गोपथब्राह्मण भाष्य में वेदमन्त्र, ब्राह्मण वचन आदि की वर्णानुक्रमणसूची ।।

॥ ओ३म् ॥

प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ॥ १ ॥

अथर्व० १९।६२।१ ॥

प्रिय मोहि करो देव तथा राज समाज में ।
प्रिय सब दृष्टि वाले औ शूद्र और अर्य में ॥

Make me beloved the Gods,
beloved among the princes, make.
Me dear to every one who sees,
To sudra and to Aryanman,

Griffith's Trans,

Atharva 19. 62. ।

संकेत सूची

सङ्केत	सङ्केत विषय
अ० अथर्व०	अथर्ववेद, काण्ड, सूक्त, मन्त्र
अष्टा०	अष्टाध्यायी अध्याय, पाद, सूत्र
उ०	उणादिकोष, पाद सूत्र (स्वामी दयानन्द सरस्वती संशोधित)
ऋ० ऋग्०	ऋग्वेद, मण्डल, सूक्त, मन्त्र
ऐ० ब्रा०	ऐतरेय ब्राह्मण, पञ्चिका, कण्डिका
गो०ब्रा०उ०	गोपथ ब्राह्मण उत्तरभाग प्रपाठक कण्डिका
गो०ब्रा०पू०	गोपथ ब्राह्मण पूर्वभाग प्रपाठक कण्डिका
ज०सं०	जर्मनसंस्करण
निघ०	निघण्टु, अध्याय, खण्ड (यास्क मुनिकृत)
निरु०	निरुक्त अध्याय खण्ड (यास्क मुनिकृत)
पा०	पाणिनि व्याकरण-अष्टाध्यायी, अध्याय पाद सूत्र
पू० सं०	पूर्व संस्करण
य० यजु०	यजुर्वेद अध्याय मन्त्र
वा०	वार्त्तिक
श० क० द्रु०	शब्दकल्पद्रुम कोष (राजा राधाकान्त देव बहादुर विरचित)
सा० वे० उ०	सामवेद, उत्तरार्चिक, प्रपाठक, अर्धप्रपाठक, सूक्त वा तृच
सा० वे० पू०	सामवेद, पूर्वार्चिक, प्रपाठक, दशति, मन्त्र
( )	इस कोष्ठ में मूल ग्रन्थ के पद हैं।
[ ]	ऐसे कोष्ठ के शब्द व्याख्या वा अध्याहार हैं।